॥र्द०॥ श्रीगुरुभ्यो नमः॥ दिनेशवद्ध्यानकरप्रतापै रनंतकालप्रचितं समंतात् प्रोद्दशोषय कर्मविपाकपंकं देवो
मुदे वोस्तु स वर्द्धमानः १ ज्ञानादिगुणगुरूणां धर्मगुरूणां प्रणम्य पदकमलं। कर्मविपाके विवृतिं स्मृतिबीजं विरच्य
ये विदधे॥२॥ तत्रादावेवाभीष्टदेवतास्तुत्यादिप्रतिपादिकामिमां गाथामाह। सिरिवीरजिणं वंदिय कम्मविवागं समास गं
उ वुच्छं। कीरइ जिएण हेऊहिं। जेणं तो भन्नए कम्मं॥१॥ श्रिया सकलत्रिभुवनजनमनश्चमत्कारकारिमनोहारिप्रमा
तिशयमहामहिमाविस्तारि। अशोकवृक्षः सुरपुष्पवृष्टिः दिव्यध्वनिश्चामरमासनं च। भामंडलं दुंदुभिरातपत्रं स
त्प्रातिहार्याणि जिनेश्वराणामिति स्पष्टाष्टप्रातिहार्यशोभया चतुस्त्रिंशदतिशयविभूत्या वा समन्वितो वीरः श्रीवीरः
स्ववासोरागद्वेषमोहप्रभृतिवैरिवारपराजयात् जिनश्च श्रीवीरजिनस्तं श्रीवीरजिनं श्रीवर्द्धमानस्वामिनं वंदित्वा विशु
द्धमानसप्रणिधानसमन्वितेन वाग्योगेन स्तुत्वा काययोगेन च प्रणम्य वक्ष्ये भणिष्यामि वादिनयोरितिवचनात् एतेन मं
गलार्थमभीष्टदेवतायाः स्तुतिरुक्ता क्त्वाप्रत्ययस्य चोत्तरक्रियासापेक्षत्वादुत्तरक्रियामाह कर्मविपाकं वक्ष्ये तत्र क
र्मणां ज्ञानावरणादीनां विपाकोनुभवः कर्मविपाकस्तं कर्मविपाकं वक्ष्ये अभिधास्ये अनेनाभिधेयमाह कथमित्या
ह समासतः संक्षेपेण न विस्तरेण दुःषमानुभावाप्रहीयमानमेधायुर्बलादिगुणानामैदंयुगीनजनानां विस्तराभिधा
ने सम्यगवबोधाभावात् तदुपकारार्थं च शास्त्रारंभप्रयासः एतेन संक्षिप्तरुचिसत्त्वाना श्रित्य प्रयोजनमा
वेदि संबंधस्त्वर्थापत्तिगम्यः स चोपायोपेयलक्षणः साध्यसाधनलक्षणो गुरुपर्वक्रमलक्षणो वा स्वयमभ्यूह्यस्तत्र य
कर्मविपाकं वक्ष्ये इत्युक्तं तत्र कर्मशब्दं व्युत्पादयन्नाह क्रियते विधीयते अंजनचूर्णपूर्णसमुद्गकवन्निरंतरपुद्गल १
निचिते लोके क्षीरनीरन्यायेन वह्न्ययःपिंडवद्वा कर्मवर्गणाद्रव्यमात्मसंबद्धं येन तत्तस्मात्कारणात्कर्म भण्यते इति
संबंधः केन क्रियते इत्याह जीवेन जंतुना तत्र जीवति इंद्रियपंचकमनोवाक्कायबलत्रयोच्छ्वासनिःश्वासायुर्लक्षण

न् दशप्राणान्यथायोगं धारयतीति जीवः कदाचिदुत्तरं इति चेदुच्यते यो मिथ्यात्वादिकलुषितरूपस्तया सातादि
वेदनीयादिकर्मणामस्ति निर्वर्तकस्तत्फलस्य च विशिष्टसातादिरूपस्योपभोक्ता नरकादिभवेषु च यथाकर्मविपाकोदयं सं
सर्ता सम्यग्दर्शनज्ञानचारित्रसंपन्नरत्नत्रयाभ्यासप्रकर्षवशाच्च निःशेषकर्मांशापगमतः परिनिर्वाता स जीवः
सत्त्वः प्राणी आत्मेत्यादिपर्याया उक्तं च यः कर्ता कर्मभेदानां भोक्ता कर्मफलस्य च संसर्ता परिनिर्वाता स ह्यात्म १
नान्यलक्षणः १ इति कैः कृत्वा जीवेन क्रियते इत्याह हेतुभिर्मिथ्यात्वाविरतिकषाययोगलक्षणैश्चतुर्भिः सामान्यरूपैः प्र
त्यनीकत्वनिह्नवउपघातप्रद्वेषअंतरायअत्याशातनया आवरणद्वयं जिनइत्यादिभिर्विशेषप्रकारैरि
हैव वक्ष्यमाणैः अदयमत्र तात्पर्यार्थः क्रियते जीवेन हेतुभिर्येन ततः कर्म भण्यते इति कथमेतत्सिद्धिरिति चेत् इहात्मत्वे
नाविशिष्टानामात्मनां यदिदं देवासुरमनुजतिर्यगादिरूपं क्ष्मापतिद्रमकमनीषिमंदमहर्द्धिदरिद्रादिरूपं वा वैचित्र्यं त
न्न निर्हेतुकमेष्टव्यं माभूत्प्रसंगः नित्यं सत्त्वमसत्त्वं वा हेतोरन्यानपेक्षणात् सहेतुकत्वाभ्युपगम
मे च यदेवास्य हेतुस्तदेवास्माकं कर्मेति प्रमाणमिति तत्सिद्धिः यदवोचाम श्राद्धदिनकृत्यटीकायां जीवस्थापनाधिका
रे एवमेवार्थं श्लोकद्वयं ककयोर्मनीषिजडयोः सद्रूपनीरूपयोः श्रीमद्दुर्गतयोर्बलाबलवतोर्नीरोगरोगार्त्तयोः
सौभाग्यासुभगत्वसंगमजुषोस्तुल्येपि नृत्वेऽन्तरं यत्तत्कर्मनिबंधनं तदपि नो जीवं विना युक्तिमत् १ अन्यत्राप्युक्तं
आत्मत्वेनाविशिष्टस्य वैचित्र्यं तस्य यद्वशात् नरादिरूपं तच्चित्रमदृष्टं कर्मसंज्ञितं १ पौराणिका अपि कर्मसिद्धिं प्रति
पद्यन्ते तथा च ते प्राहुः यथा २ पूर्वकृतस्य कर्मणः फलं निधानस्थमिवावतिष्ठते तथा २ तत्प्रतिपादनोद्यता प्रदीपह
स्तेव मतिः प्रवर्तते १ यत्र वपुरा कृतं कर्म न स्मरंतीह मानवाः तदिदं पांडवश्रेष्ठ दैवमित्यभिधीयते २ मुदितान्यपि
मित्राणि सुकुद्धाश्च वैरिणः न हीमं तं करिष्यंति यन्न पूर्वकृतं त्वया ३ बौद्धा अप्याहुः इत एकनवते कल्पे शक्त्या मे पुरु

बोद्धतः तेन कर्म्मविपाकेन पादेविशेषोस्मिन्निह्रुवः ४ तदपि च कर्म्मपुद्गलस्वरूपं प्रतिपत्तव्यं नामूर्त्तं अमूर्त्तत्वे हि कर्म्मणः
सकाशादात्मना मनुग्रहोपघाताभ्यसंभवात् आकाशादिवत् यदाह अन्ने उ अमुत्तं चिय कम्मं मन्नंति वासणारूवं नउ
नडज्जइ तन्नो उवघायाणुग्गहा भावा १ नागासं उवघायं अणुग्गहं वा विकुणइ सत्ताणमित्यादि तच्च कर्म्म प्रवाहतोत्र
नादि अनाद्यंतं प्रवाहेण इति वचनात् यदि प्रवाहापेक्षयापि सादि स्यात्तदा जीवानां सर्वकर्म्मवियुक्तत्वमासीत् पश्चाद
कर्म्मकस्य जीवस्य कर्म्मणा सह संयोगः संजातः एवं सति मुक्तानामपि कर्म्मयोगः स्यादकर्म्मकत्वाविशेषात् अथ मु
क्ता अमुक्ताः स्युर्नचैतदभिष्टं तस्मादनादिर्जीवस्य कर्म्मणा सह संयोगः ननु अनादिसंयोगे कथं वियोगो जीवस्य कर्म्मणा
सहनुच्यते अनादिसंयोगेपि वियोगो दृष्टः कांचनोपलवत् तथाहि कांचनोपलानामनादिसंयोगः तथापि त
माविधसामग्रीसद्भावे ध्मानतादिना किल वियोगो दृष्टः एवं जीवस्यापि ज्ञानदर्शनचारित्रध्यानतापादिना कर्म्मण
सह वियोगः सिद्धो भवति यदाह भगवान् भाष्यसुधांभोनिधिः जह इह कंचनोवलसंजोगो णाइसंतइगउवि वुच्छि
ज्जइ सोवायं तह जोगो जीवकम्माणमित्यलं विस्तरेण अथ कतिभेदं कर्म्मेत्याशंक्याह पयइठिइरसपएसा तं चउहा
मोअगस्स दिट्ठंता मूलपगइट्ठउत्तरपगईअडवन्नसयभेयं २ तत्कर्म्म सर्वव्यापावलितिश्च शब्दार्थं चउर्द्धा चतुष्प्रकारं चतुर्भे
दं भवतीति शेषः कथमित्याह पयइठिइरसपएसत्ति इह गाथायां पः कर्म्माधारे: इति पंचमीयब्लोपसाद्यंतं कृतेइति तत
श्च प्रकृतिस्थितिरसप्रदेशानाश्रित्य प्रकृतिबंधस्थितिबंधरसबंधप्रदेशबंध इति तात्पर्यार्थः तत्र स्थित्यनुभागप्रदेशाबं
धानां यः समुदायः स प्रकृतिबंधः अध्यवसायविशेषगृहीतस्य कर्म्मदलिकस्य स्थितिकालनियमनं स्थितिबं २
धः कर्म्मपुद्गलानामेव शुभोशुभो वा घात्यघाती च यो रसः सो नुभागबंधः इत्यर्थः कर्म्मपुद्गलानामेव यद्ग्रहणं स्थिति
रसनिरपेक्षदलिकसंख्याप्राधान्येनैव करोति स प्रदेशबंधः उक्तं च ठिइबंधदलस्स ठिई पएसबंधो पएसगहणं जं

ताण रसो अणुभागो तस्समुदाओ पगईबंधो १ अन्यत्राप्युक्तं प्रकृतिः समुदायः स्यात् स्थितिकालावधारणं अनुभा
गो रसः प्रोक्तः प्रदेशो दलसंचयः १ इदं च प्रकृतिस्थितिरसप्रदेशानां स्वरूपं मोदकस्य कणिकादिमयलड्डुकस्य दृष्टां
तात् दृष्टांतेन भावनीयं दृष्टांतादित्यत्र तृतीयार्थे पंचमी यदाह पाणिनिः स्वप्राकृतलक्षणे व्यत्ययोप्यासामिति वातवि
नाशिद्रव्यनिष्पन्नो मोदकः प्रकृत्या वातमुपशमयति पित्तोपशमकद्रव्यनिर्वृत्तः पित्तं कफापहारिद्रव्यसमुद्भूतः कफ
मित्येवं स्वभावा प्रकृतिः स्थितिस्तु तस्यैव कतिचित् दिनात्मिका अपरस्य तु दिनद्वयं एवं यावत्कस्यचिन्मासादिकमपि कालं भ
वति ततः परं विनाशाद्यति रसः पुनः स्निग्धमधुरादिरूपस्तस्यैवैकस्य विदेकगुणोपरस्य द्विगुणोन्यस्य त्रिगुण इत्यादि
कः प्रदेशाश्च कणिकादिरूपास्तस्यैव कस्यचिदेकप्रसृतिप्रमाणाः अन्यस्य तु प्रसृतिद्वयप्रमाणा यावदपरस्य सेति
कादिप्रमाणाः एवं कर्म्मणोपि कस्यचन ज्ञानाच्छादनस्वभावा प्रकृति अपरस्य दर्शनावरणरूपा अन्यस्य आह्लादप्रदान
लक्षणा कस्यचित् सम्यग्दर्शनादिविघातजननस्वभावेत्यादि स्थितिस्तु तस्यैव कस्यचित् त्रिंशत्सागरकोटाकोटी अपरस्य
तु सप्ततिः सागरोपमकोटाकोटिलक्षणेत्यादि रसस्तु अनुभागशब्दवाच्य तस्यैवैकस्थानद्विस्थानत्रिस्थानादिरूपाः प्र
देशाः अल्पबहुतरबहुबहुतमादिरूपाः पुनः किंविशिष्टकर्म्म भवतीत्याह मूलपगइट्ठउत्तरपगईअडवन्नसयभेयं
ति मूलप्रकृतयः सामान्यरूपा अष्टावष्टसंख्याश्च तन्मूलप्रकृत्यष्टं उत्तरप्रकृतीनां मूलप्रकृतिविशेषरूपाणां अष्टपंचा
शतशतं भेदा यस्य तदुत्तरप्रकृत्यष्टपंचाशतशतभेदमिति अथ नाममूलप्रकृतिभेदस्यैवाष्टविधत्वमुत्तरप्रकृतिभेदस्तो
अष्टपंचाशत्शतभेदत्वं च प्रदर्शयन् सूत्रनामग्राहं अष्टौ मूलभेदान् एकैकस्य च भेदस्य यस्य यावंत उत्तरभेदास्तांश्च वक्तु
माह ब इह नाणदंसणावरणवेयमोहाउनामगोयाणि विग्घं च पण नव दु अट्ठवीस चउ तिसय दु पणविहं ३ इहव

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

च नेकर्म्मोच्यते इति शेषः। नाणदंसणावरणत्ति ज्ञायते परिच्छिद्यते वस्त्वनेनेति ज्ञानं ज्ञातिर्वा ज्ञानं सामान्यविशेषात्म
के वस्तुनि विशेषग्रहणात्मको बोध इत्यर्थः तथा दृश्यतेऽनेनेति दर्शनं दृष्टिर्वा दर्शनं सामान्यविशेषात्मके वस्तुनि सामान्यग्र
हणात्मको बोधः आव्रियते आछाद्यतेऽनेनेत्यावरणं यद्वा आवृणोतीत्यावरणं आछादयतीत्यर्थः कर्त्तर्यनट्प्रत्यये आवर
णं मिथ्यात्वादिसचिवजीवव्यापाराहृतकर्मवर्गणांतःपाती विशिष्टपुद्गलसमूहः ततो ज्ञानं च दर्शनं च ज्ञानदर्शने तयोरावर
णं ज्ञानदर्शनावरणं ज्ञानावरणं दर्शनावरणं चेत्यर्थः तथा वेद्यते सुखदुःखरूपतयाऽनुभूयते यत्तद्वेद्यं यद्वा अत अनीय
प्रत्यये वेदनीयं यद्यपि सर्वं कर्म वेद्यते तथापि पंकजादिशब्दवत् वेद्यशब्दस्य रूढिविषयत्वात् सातमसातं चैव कर्म वे
द्यमित्युच्यते न शेषं तथा मोहयति जनानमपि प्राणिनं सदसद्विवेकविकलं करोतीति मोहः लिहादित्वादच्प्रत्ययः मो
हनीयमित्यर्थः तथा एति गच्छत्यनेन गत्यंतरमित्यायुः यद्वा एति आगच्छति प्रतिबंधकतां स्वकृतकर्मावाप्तनरकादि
दुर्गतेर्निस्सर्त्तुमनसोऽपि जंतोरित्यायुः उणस्य त्राप्यौणादिको णस्प्रत्ययः यद्वा आयाति भवांतरं संक्रामतां जं
तूनां निश्चयेनोदयमागच्छतीति पृषोदरादित्वादायुः शब्दसिद्धिः यद्यपि सर्वं कर्मोदयमायाति तथाप्यस्यायुषो वि
शेषो यतः शेषं कर्म बद्धं सत् किंचित्तस्मिन्नेव भवे उदयमायाति किंचित्तु प्रदेशोदयमनुकं जन्मांतरेऽपि स्वविपाकतः उदय
मायात्येवं इत्युत्तयथाप्यव्यभिचारः आयुषि त्वयं नास्ति बद्धस्य तस्मिन्नेव भवे वेदनात् जन्मांतरसंक्रांतो जस्य विपाक
तोऽवश्यं वेदनादिति विशिष्टस्यैवोदयागमनस्य विवक्षितत्वादस्य वायुष्येव सद्भावात् तस्यैव तन्नाम अथवा आयाति २
उपभोगायाऽतस्मिन्नुदिते सति तद्भवप्रायोग्याण्येव सर्वाण्यपि शेषकर्माणीत्यायुः तथा नामयति गति जाति प्रभृतिपर्यायानु ति
भवनं प्रति प्रवणयति जीवमिति नाम ग्रययते आघ्यते उच्चावचैः शब्दैः रात्मा यस्मात्तज्जोत्रं ततो ज्ञानं च दर्शनावरणं च

वेद्यं च मोहश्च आयुश्च नाम च गोत्रं च ज्ञानदर्शनावरणवेद्यमोहायुर्नामगोत्राणि तथा विशेषेण दत्तं पंते दानादिलब्धयो विना
शंपतेऽनेनेति स्वगस्तापायुषि विघ्निदनिसः क इति कप्रत्यये विघ्नोंतरायं च समुच्चये पणनवदुअठवीसेत्यादि अत्र द्वंद्वग
र्भो बहुव्रीहिसमासः तावार्थः पुनरयं पंचविधं ज्ञानावरणं १ नवविधं दर्शनावरणं २ द्विविधं वेद्यं अष्टाविंशतिविधो मोहः ४
चतुर्विधमायुः ५ त्रिनवतिविधं नाम ६ त्रिसिरधिकं शतं त्रिशतं १०३ अनुत्तरशतविधमित्यर्थः ६ द्विविधं गोत्रं ७ पंचविधं विघ्नं ८ ननु किं
ज्ञानावरणाद्युपन्यासे किंचिदस्ति प्रयोजनमुत यथा कथंचिदेव प्रवृत्त इति अस्तीति ब्रूमः किं तदिति चेत् उच्यते इह ज्ञानद
र्शने च जीवस्य स्वतत्त्वं तदस्तां चैव लक्षेवामपयोगात् चेतनात्वहानेर्जीवस्ततः सह ज्ञानदर्शनासावेत्तवति ज्ञानदर्श
नयोरपि च मध्ये प्रधानं ज्ञानं तद्वशादेव सकलशास्त्रादिविचारसंततिप्रवृत्तेः अपि च सर्वा अपि लब्धयो जीवस्य साकारो
पयोगोपयुक्तस्योपजायते न दर्शनोपयोगोपयुक्तस्य सव्वाउलद्धीओ सागारोवओगोवउत्तस्स नो अणागारोवउत्तस्सेति व
चनप्रामाण्यात् अन्यच्च यस्मिन् समये सकलकर्मविनिर्मुक्तो जीवः संजायते तस्मिन् समये ज्ञानोपयोगोपयुक्तो एव
न दर्शनोपयोगोपयुक्तो दर्शनोपयोगस्य द्वितीयसमये तावात् ततो ज्ञानं प्रधानं तदावरकं ज्ञानावरणं कर्म ततस्तत्प्र
थममुक्तं तदनंतरं च दर्शनावरणं ज्ञानोपयोगात्च्युतस्य दर्शनोपयोगेऽवस्थानात् एते च ज्ञानदर्शनावरणे स्वविपा
कमुपदर्शयतीति यथायोगमवश्यं सुखदुःखरूपवेदनीयकर्मविपाकोपचयनिमित्ते भवतः तथाहि ज्ञानावरणमुप
चयोत्कर्षप्राप्तं विपाकतोऽनुभवन् सूक्ष्मतरवस्तुविचारासमर्थं आत्मानं जानानः १ खिद्यते भूरि लोकः ज्ञानावरणक
र्मक्षयोपशमपाटवोपेतश्च स्वस्मात्सूक्ष्मतराणि वस्तूनि निजप्रज्ञया विजानानो बहुजनातिशायिनमात्मानं पश्यन्
सुखं वेदयतीति तथा अतिनिविडदर्शनावरणविपाकोदये जात्यंधादिरनुभवति दुःखसंदोहं वचनगोचरातिक्रांतं द

र्शनावरणकर्मक्षयोपशमपविष्टतापरिष्कृतस्य स्पष्टदृशाद्यपेतो यथावद्वस्तुनिकुरंबं सम्यगवलो॥
कयमानो वेद्यते। अमंदमानंदसंदोहं ततस्तदर्थं दर्शनावरणानंतरं वेदनीयग्रहणं वेदनीयं च सुखदुःखे जनयत्पुः
लीष्टानलीष्टविषयसंबंधे चावश्यं संसारिणां रागद्वेषौ तौ च मोहनीयहेतुकौ तत एतदर्थप्रतिपत्तये वेदनीयानंतरं मोह
नीयग्रहणं मोहनीयमूढाश्च जंतवो बह्वारंभपरिग्रहत्वादिकर्मादानासक्ता नरकाद्यायुष्कमास्रयंति ततो
मोहनीयानंतरं आयुर्ग्रहणं नरकाद्यायुष्कोदये चावश्यं नरकगत्यादीनि नामान्युदयमायांति तत आयुरनंतरं
नामग्रहणं नामकर्मोदये च नियमाज्जीवानामुच्चनीचान्यतरगोत्रकर्मविपाकोदयेन भवितव्यं अतो नामग्रहणानंतरं गोत्र
ग्रहणं गोत्रोदये चोच्चैः कुलोत्पन्नस्य प्रायो दानलाभांतरायादिक्षयोपशमो भवति राजप्रभृतीनां प्राचुर्येण दानला
भादिदर्शनात् नीचैः कुलोत्पन्नस्य तु दानलाभांतरायाद्युदयो नीचजातीनां तथादर्शनात् तत एतदर्थप्रतिपत्त्यर्थं
गोत्रानंतरमंतरायग्रहणमिति अथ यथोद्देशं निर्देश इति न्यायात् प्रथमं तावत्पंचधा ज्ञानावरणं व्याचिख्यासुराह
॥ मइसुयओहीमणकेवलाणि नाणाणि तत्थ मइनाणं वंजणवग्गह चउहा मणनयणविणिंदियचउक्का ४ इह ज्ञानश = उ =
ब्दस्य प्रत्येकं संबंधान्मतिज्ञानं श्रुतज्ञानं अवधिज्ञानं मण इति पदैकदेशे पदसमुदायोपचारात् मनःपर्यवज्ञानं मनः
पर्यायज्ञानं वा केवलज्ञानं तत्र बुद्धिमनिबूज्ञाने मननं मतिः यद्वा मन्यते इंद्रियमनोद्वारेण नियतं वस्तु परिच्छिद्यते ऽन
येति योग्यदेशावस्थितवस्तुविषयं इंद्रियमनोनिमित्तो अवगमविशेषः मतिश्चासौ ज्ञानं च मतिज्ञानं इदं चागमे आभि ४
निबोधिकज्ञानमुच्यते यदाह भगवान् देवर्द्धिगणिक्षमाश्रमणः नाणं पंचविहं पन्नत्तं तंजहा आभिणिबोहि
नाणं सुयनाणं ओहिनाणं मणपज्जवनाणं केवलनाणं तत्र व्याख्यमाति निबोधिकज्ञानशब्दार्थः अर्थाभिमुखो नि

ति नैयत्येत तश्चाभिमुखो वस्तुयोग्यदेशावस्थानापेक्षी नियत इंद्रियमनः समाश्रित्य स्वविषयापेक्षी बोधनं बोधो
ऽभिनिबोधः स एवाभिनिबोधिकं विनयादेराकृतिगणत्वादिकण्प्रत्ययः अभिनिबुध्यते इत्यभिनिबोध
इति कर्तरि लिहादित्वादच् वा यद्वा अभिनिबुध्यते आत्मना स इत्यभिनिबोधः इति कर्मणि घञ् स एव आभिनिबो
धिकमिति तथैवाभिनिबोधिकं च तत् ज्ञानं चाभिनिबोधिकज्ञानं तथा श्रवणं श्रुतं अभिलापप्लावितार्थग्रहणहेतु
रुपलब्धिविशेषः एवमाकारं वस्तु घटशब्दाभिलाप्यं जलधारणाद्यर्थक्रियासमर्थमित्यादिरूपतया प्रधानीकृत
त्रिकालसाधारणसमानपरिणामः शब्दार्थपर्यालोचनानुसारी इंद्रियमनोनिमित्तो ऽवगमविशेष इत्यर्थः श्रुतं च
तत् ज्ञानं च श्रुतज्ञानं तथा ऽवधानं अवधिरिंद्रियाद्यनपेक्षमात्मनः साक्षादर्थग्रहणं अत एवेदं प्रत्यक्षज्ञानं यउ
क्तं नंद्यध्ययने नोइंदियपच्चक्खं तिविहं पन्नत्तं तंजहा ओहिनाणपच्चक्खं मणपज्जवनाणपच्चक्खं केवलनाणपच्च
क्खं अथवा अवशब्दो ऽधः शब्दार्थः अव अधो विस्तृतं वस्तु धीयते परिच्छिद्यते ऽनेनेति अवधिः यद्वा अवधिर्मर्यादा रू
पिष्वेव द्रव्येषु परिच्छेदकतया प्रवृत्तिरूपा तदुपलक्षितं ज्ञानमप्यवधिः अवधिश्च तत् ज्ञानं चावधिज्ञानं तथा परि सर्वतो
भावे अवनं अवः तुदादिभ्यो ऽवः अनकादित्यधिकारे अकितो चेत्यनेनौणादिको ऽकारप्रत्ययः अवनं गमनं वेदन
मिति पर्यायाः परि अवः पर्यवः मनसि मनसो वा पर्यवो मनःपर्यवः सर्वतस्तत्परिच्छेद इत्यर्थः मनःपर्यवश्च स ज्ञानं च म
नःपर्यवज्ञानं यद्वा मनःपर्यायज्ञानं तत्र संज्ञिभिर्जीवैः काययोगेन गृहीतानि मनःप्रायोग्यवर्गणाद्रव्याणि चिंतनीय
वस्तुचिंतनव्यापृतेन मनोयोगेन मनस्त्वेन परिणमय्यालंब्यमानानि मनांसीत्युच्यंते तेषां मनसां पर्यायाश्चिंतनानुग
ताः परिणामा मनःपर्यायास्तेषु तेषां वा संबंधि ज्ञानं मनःपर्यायज्ञानं यद्वा आत्मनि वस्तुचिंतने व्यापारितानि मनांसि पर्ये

।ते अवगच्छतीति मनःपर्यायः कर्मणि घञ् इत्यण्प्रत्ययः मनःपर्याये वा तत् ज्ञानं च मनःपर्यायज्ञानं तथा केवलम्
एकं मत्यादिज्ञानरहितत्वात् नट्ठंमि य छाउमत्थिए नाणे इति वचनात् आह यदि मत्यादीनि ज्ञानानि स्वस्वावरणक्षयो
पशमतो भवंति ततो निःशेषतः स्वस्वावरणक्षये सुतरां भवेयुः शुद्धिपरिणामवत् तत्कथं तेषां तदानीम
भावः आह च आवरणदेसविगमे जाइं विज्जंति मइसुयाईणि आवरणसव्वविगमे कह ताइं न जंति जीवस्से ति
उच्यते इह यथा सहस्रभानोरतिसमुन्नतघनाघनपटलांतरितस्यापांतरालावस्थितकटकुड्याद्यावरणविवरप्रवि
ष्टप्रकाशो घटादीन् प्रकाशयति तथा केवलज्ञानावरणावृतस्य केवलज्ञानस्यापांतरालमतिज्ञानावरणादिक्षयोप
शमरूपविवरविनिर्गतः प्रकाशो जीवादीन् प्रकाशयति स च प्रकाशयन् मतिज्ञानमित्यादिलक्षणं तत्तत् क्षायोपश
मानुरूपमभिधानमुद्वहति ततो यथा सकलघनपटलकटकुड्याद्यावरणापगमे सति तथाविधप्रकाशाः सहस्रभानो
रस्पष्टरूपो न भवति किंतु सर्वात्मना स्फुटरूपो ह्येक एव तथैवापि सकलकेवलज्ञानावरणमतिज्ञानाद्यावरणविल
ये न तथाविधो मतिज्ञानादिसंज्ञितः केवलज्ञानस्य प्रकाशो भवति किंतु सर्वात्मना यथावस्थितवस्तुपरिच्छित्तिरूपः परिस्फु
टरूपो ह्येक एवेत्यदोषः उक्तं च श्रीपूज्यैः कडविवरागयकिरणा मेहंतरियस्स जह दिणेसस्स ते कडमेहावगमे न जं
ति जह तह इमाइंपि १ अन्यैरपि स्फटिकादि मलविद्धमणेर्व्यक्तिर्यथानेकप्रकारतः कर्मविद्धात्मविज्ञप्तिस्तथानेकप्रक १
रतः २ यथा जात्यस्य रत्नस्य निःशेषमलहानितः स्फुटैकरूपाभिव्यक्तिर्विज्ञप्तिस्तद्वदात्मनः ३ अन्ये पुनराहुः ५
संत्येव मतिज्ञानादीन्यपि सयोगिकेवल्यादौ केवलमफलत्वात् संत्यपि तदानीं न विवक्ष्यंते यथा सूर्योदये नक्ष
त्रादीनि उक्तं च अन्ने आभिणिबोहियनाणाईण वि जिणस्स विंति अफलाणि य सूरुदये जह देव नक्खत्तमाईणि

---

१ शुद्धं वा केवलं तदावरणमलकलंकपंकापगमात् सकलं वा केवलं तत्प्रथमतयैव निःशेषतदावरणविगमतः
संपूर्णोत्पत्तेः असाधारणं वा केवलं अनन्यसदृशत्वात् अनंतं च केवलं ज्ञेयानंतत्वात् अपर्यवसितानंतकाला
वस्थायित्वाद्वा निर्व्याघातं च केवलं लोकालोकयोः क्वापि व्याघाताभावात् केवलं च तत् ज्ञानं च केवलज्ञानं यथा १
वस्थितसमस्तभूतभवद्भाविभावस्वभावावभासिज्ञानमिति भावना आह नन्वेतेषां पंचानां ज्ञानानां कः क्रमोप
न्यासे किं कारणं उच्यते इह मतिश्रुते तावदेकत्र वक्तव्ये परस्परमनयोः स्वामिकालकारणविषयपरोक्षत्वसाधर्म्या १
त् तथाहि य एव मतिज्ञानस्य स्वामी स एव श्रुतज्ञानस्य य एव श्रुतज्ञानस्य स्वामी स एव मतिज्ञानस्यापि जत्थ मइनाणं तत्थ
सुअनाणं जत्थ सुअनाणं तत्थ मइनाणं इत्यादिवचनप्रामाण्यात् ततः स्वामिसाधर्म्यं तथा यावानेव मतिज्ञानस्य स्थिति
कालस्तावानेव श्रुतज्ञानस्यापि तत्र प्रवाहापेक्षया अतीतानागतवर्त्तमानरूपः सर्वकालः अप्रतिपतितैकजीवा
पेक्षया षट्षष्टिसागरोपमाणि समधिकानि उक्तं च दो वारे विजयाइसु गयस्स तिन्नच्चुए अहव ताइं अइरेगं नरभवि
यं नाणाजीवाण सव्वद्धा १ इति कालसाधर्म्यं यथा चेंद्रियनिमित्तं मतिज्ञानं तथा श्रुतज्ञानमपीति कारणसाधर्म्यं तथा य
था मतिज्ञानमादेशतः सर्वद्रव्यादिविषयमेवं श्रुतज्ञानमपीति विषयसाधर्म्यं यथा च मतिज्ञानं परोक्षं तथा श्रुतज्ञानमपि इति
परोक्षत्वसाधर्म्यं तत एवं स्वाम्यादिसाधर्म्यादेते मतिश्रुते नियमादेकत्र वक्तव्ये तेषां च अवध्यादिज्ञानेभ्यः प्रागेव तद्भाव
अवध्यादिसद्भावात् उक्तं च जं सामिकालकारणविसयपरोक्खत्तणेहिं तुल्लाइं तब्भावे सेसाणि य तेणाईए मइसुयाइं १
ननु तत्त्वमेकत्र मतिश्रुते प्रागेव अवध्यादिभिः परमेतयोरेव मतिश्रुतयोर्मध्ये पूर्वं मतिः पश्चात् श्रुतमित्येतत्कथं उच्यते
मतिपूर्वत्वात् श्रुतज्ञानस्य तथाहि सर्वत्रापि पूर्वं अवग्रहादिरूपं मतिज्ञानमुदयते पश्चात् श्रुतं यदाह निविडडिमसंस्तार

नमस्कारकरणेः श्रीजिनभद्रगणिक्षमाश्रमणः मइपुव्वं सुयमुत्तं न मई सुयपुव्विया विसेसोयं पुव्वं पालणपूरण
त्तावाउजं मईतस्स १ नंद्यध्ययनचूर्णावप्युक्तं तेसु वि य मइपुव्वयं सुयंति किंचा पुव्वं मइनाणं कयं तस्स पिट्ठउ सुयं ति
आह यदि स्वामित्वादिभिरनयोरभेदस्तर्हि द्वयोरप्येकत्वमस्तु भेदहेत्वभावात् भेदहेतुर्नाचासिद्धत्वात् तद्युक्तं भेद
हेत्वभावस्यासिद्धत्वात् तथाहि स्वाम्यादिभिरभेदे सत्यपि लक्षणभेदादनयोर्भेदः तथाहि मन्यते योग्योऽर्थोऽनयेति मतिः श्रव
णं श्रुतमित्यादि तथा हेतुफलभावाद्भेदस्तथाहि मतिज्ञानं श्रुतस्य कारणं श्रुतं तु कार्यं यच्च यदुत्कर्षापकर्षाभ्यां तत्तस्य
कारणं यथा घटस्य मृत्पिंडः तथाहि श्रुतेऽपि बहुश्रुतं ग्रंथेषु यद्विषयं स्मरणेहापोहादिवाधिकतरं प्रवर्त्तते तत्तत्र स्फुट
तरः प्रतिभाति नेतरोऽपि तथा भेदाद्भेदः तथा मतिज्ञानमष्टाविंशत्यादिभेदं श्रुतज्ञानं तु चतुर्दशादिभेदं तथा इंद्रियविभा
गाद्भेदः तत्प्रतिपादिका चेयं सर्वांतर्गता गाथा सोइंदिओवलद्धी होइ सुयं सेसयं तु मइनाणं मोत्तूणं दव्वसुयं अक्खरलंभो य
सेसेसु १ तथा वल्कलसमं मतिज्ञानं कारणत्वात् शुंबसमं श्रुतज्ञानं तत्कार्यत्वादित्यप्यदनायाभेदनिबंधनं तथाऽन्य
अपरे तु मतिज्ञानमनक्षरं साक्षरं च तथाऽवग्रहज्ञानमनक्षरं तस्यानिर्देश्यसामान्यमात्रप्रतिभासकतया निर्विकल्पक
त्वात् ईहादिज्ञानं तु साक्षरं तस्य परामर्शादिरूपतया शब्दरूपवर्णादिसंवलितत्वात् श्रुतज्ञानं पुनः साक्षरमेव अक्षरमंतरे
ण शब्दार्थपर्यालोचनस्यानुपपत्तेः तथाऽन्यस्त्वभेदः मूककल्पं मतिज्ञानं स्वमात्रप्रत्यायकत्वात् अमूककल्पं श्रुतज्ञा
नं स्वपरप्रत्यायकत्वात् यथाचामूनेव हेतून् संगृहीतवान् भाष्यसुधांभोनिधिः लक्खणभेया हेऊफलभावओ भे ६
यइंदियविभागो वागक्खरमूयेयर भेया भेओ मइसुयाणं १ तथा कालविपर्ययस्वामित्वलाभसाधर्म्यात् मतिश्रुतज्ञा
नानंतरमवधिज्ञानं तथाहि अप्रतिपतितैकसत्त्वाधारापेक्षया च स्थितिकालो मतिश्रुतयोरिवावधिज्ञानस्य ष

ट्षष्टिसागरोपमाणि तथा यथैव मतिश्रुतज्ञाने मिथ्यात्वोदयतो विपर्ययतामासादयतस्तथाऽवधिज्ञानमपि मि
थ्यादृष्टेस्ततः तान्येव मतिश्रुतावधिज्ञानानि मत्यज्ञानश्रुताज्ञानविभंगज्ञानानि भवंति उक्तं च आद्यत्रयमज्ञानमपि
भवति मिथ्यात्वसंयुक्तमिति तथा य एव मतिश्रुतयोः स्वामी स एवावधिज्ञानस्यापि तथा विभंगज्ञानिनस्त्रिदशादे
: सम्यग्दर्शनावाप्तौ युगपदेव मतिश्रुतावधिज्ञानानां लाभसंभवस्ततो लाभसाधर्म्यं अवधिज्ञानानंतरं च छद्म
स्थविषयत्वावप्रत्यक्षत्वसाधर्म्यात् मनःपर्यायज्ञानमुक्तं तथाहि यथाऽवधिज्ञानं छद्मस्थस्य भवति तथा मनःपर्याय
ज्ञानमपीति छद्मस्थसाधर्म्यं तथा यथाऽवधिज्ञानं रूपिद्रव्यविषयं तथा मनःपर्यायज्ञानमपि तस्य मनःपुद्गलालंब
नत्वादिति विषयसाधर्म्यं तथा यथाऽवधिज्ञानं क्षायोपशमिके भावे वर्त्तते तथा मनःपर्यायज्ञानमपीति भावसाधर्म्यं
तथा यथाऽवधिज्ञानं प्रत्यक्षं तथा मनःपर्यायज्ञानमपि इति प्रत्यक्षत्वसाधर्म्यं उक्तं च कालविवज्जयसामित्तलाभ
साहम्मओऽवही तत्तो माणसमित्तो छउमत्थविसयभावाइसाहम्मा तथाहि मनःपर्यायज्ञानानंतरं केवलज्ञानस्योप
न्यासः सर्वोत्तमत्वात् अप्रमत्तयतिस्वामिसाधर्म्यात् सर्वावसाने लाभाच्च तथाहि सर्वाण्यपि मतिज्ञानादीनि ज्ञाना
नि देशतः परिच्छेदकानि केवलज्ञानं तु सकलवस्तुस्तोमपरिच्छेदकं सर्वोत्तमं सर्वोत्तमलाभांते सर्वविरतिःशेखरकल्पमु
पन्यस्तं तथा मनःपर्यायज्ञानमप्रमत्तयतेरेवोत्पद्यते तथा केवलज्ञानमपीत्यप्रमत्तयतिस्वामिसाधर्म्यं तथा यः सर्वा
ण्यपि ज्ञानानि समासादयितुं योग्यः स नियमात् सर्वज्ञानावसाने केवलज्ञानमवाप्नोति ततः सर्वांते केवलमुक्तं उक्तं
च अंते केवलमुत्तमजइसामित्तावसाणलाभाओ इति व्याख्यातानि नामसंस्कारमात्रेण पंचापि ज्ञानानि अधुना तान्येव सं
[illegible] व्याचिख्यासुः प्रथमं मतिज्ञानं प्रकटयन्नाह तं समासओ इत्यादि तत्र तेषु पंचसु ज्ञानेषु मतिज्ञानमष्टाविंशतिभे

हे भवतीत्युत्तरगाथायां संबंधः इह किल द्वेधा मतिज्ञानं श्रुतनिश्रितमश्रुतनिश्रितं च तत्र प्रायः श्रुताभ्यासमंत
रेणापि यत् तदावरणक्षयोपशमवशादुत्पद्यते तदश्रुतनिश्रितमौत्पत्तिक्यादिबुद्धिचतुष्टयं यदाह श्रीदेवर्द्धिगणिक्ष १
मकः से किं तं मइनाणं दुविहं पन्नत्तं तंजहा सुयनिस्सियं असुयनिस्सियं च से किं तं असुयनिस्सियं चउव्वि
हं पन्नत्तं तंजहा उप्पत्तिया वेणइया कम्मिया पारिणामिया बुद्धी चउव्विहा वुत्ता पंचमा नोवलब्भइ तत्रौत्पत्तिकी बुद्धि
र्यथा रोहकस्य वैनयिकी बुद्धिः पदर्शनात् करिण्यादिज्ञायकछात्रस्येव कर्मजा कर्षकस्येव पारिणामिकी श्रीवज्रस्वा १
मिन इव यत्तु सर्वं श्रुतपरिकर्मितमतेर्व्यवहारकाले पुनरश्रुतानुसारितया समुत्पद्यते तत् श्रुतनिश्रितं यदुक्तं श्री
विशेषावश्यके पुव्विं सुयपरिकम्मियमइस्स जं संपयं सुयाईयं तं निस्सियमियरं पुण अणिस्सियं मइचउक्कं तं १ तच्चतु
र्विधं भवति तद्यथा अवग्रहः ईहा अपायः धारणा यदाह से किं तं सुयनिस्सियं मइनाणं सुयनिस्सियं मइनाणं चउव्विहं पन्न
त्तं तंजहा उग्गहो १ ईहा २ अवाओ ३ धारणा ४ पुनरवग्रहो द्वेधा व्यंजनावग्रहोऽर्थावग्रहश्च आह च से किं तं उग्गहे उग्गहे
दुविहे पन्नत्ते तंजहा वंजणुग्गहे अत्थुग्गहे य तत्र व्यंज्यते प्रकटीक्रियतेऽनेनार्थः प्रदीपेनेव घट इति व्यंजनं आह च व
ज्जइ जेणत्थो घडुव्व दीवेण वंजणं तं च तच्चोपकरणेंद्रियं कदंबपुष्पातिमुक्तकपुष्पक्षुरप्रनानाकृतिसंस्थितश्रोत्रघ्रा
णरसनस्पर्शनलक्षणं शब्दगंधरसस्पर्शपरिणतद्रव्यसंघातो वा ततश्च व्यंजनेनोपकरणेंद्रियेण व्यंजनानां शब्दादिपरिणत
द्रव्याणामवग्रहणं परिच्छेदनमेकस्य व्यंजनशब्दस्य लोपात् व्यंजनावग्रहः किमपीदमित्यव्यक्तज्ञानरूपार्थावग्रहाद् ७
ऽव्यक्ततरं ज्ञानमित्यर्थः अयं चतुर्द्धा यदाह स च वंजणवग्गहो चउव्विहो पत्ते चाउव्विधमेव सावयति मणनय
णविणिंदियचउक्कत्ति मनश्च मानसं नयणं च लोचनं मनोनयणे मनोनयने विना मनोनयनं विना नामनाम्नेकार्थसि

मा सो बज्जमिति समासः इंदियाणं चउक्कमिंदियचउक्कं तस्मादिंदियचउक्कादवगम्यप्रयमः कर्मधारय इति पंचमी
मनोनयनवर्ज्जमिंदियचउक्कमाश्रित्य व्यंजनावग्रहश्चतुर्द्धा भवतीति गाथार्थः उक्तं च नंद्यध्ययने से किं तं वंजणुग्गहे वंज
णुग्गहे चउव्विहे पन्नत्ते तंजहा सोइंदियवंजणुग्गहे घाणिंदियवंजणुग्गहे रसणिंदियवंजणुग्गहे फासिंदियवंजणुग्गहे
मनोनयनवर्ज्जनं किमर्थमिति चेदुच्यते मनोनयनयोरप्राप्यकारित्वात् अप्राप्यकारित्वं च विषयकृतानुग्रहोपघातशून्यत्वात्
प्राप्यकारित्वे पुनरनलजलशूलशस्त्रादीनां चिंतने अवलोकने च दहनक्लेदनपाटनादयः स्युः अत्र च विषयदेशं गत्वा न पश्य
ति प्राप्तं चार्थं नालंबते इत्येतावन्मात्रमेवेह मतिमता पुनः प्राप्तेन भवतः प्रवरानुग्रहोपघातौ दिनकरकिरणादिनेति अप्रस्तु १
त वचो दृष्टाघातोपलब्धेरनुमानात् प्राप्यकारित्वं लोचनस्येत्येतदप्ययुक्तं अनैकांतिकत्वात् काचाभ्रपटलस्फटिकांतरि
तस्याप्युपलब्धेः स्यादेतन्नायनाद्रश्मयो निर्गत्य तमर्थं गृह्णंतीति तदसत् रश्मीनां तैजसत्वात् तेजोद्रव्येष्वपि स्वभावनाद्दो
ष इति एतदप्ययुक्तं महाज्वालादौ पतितस्य चक्षुषो नोपलब्धेः इत्यत्र बहुवक्तव्यं तत्तु नोच्यते ग्रंथगहनताप्रसंगात् व्यंजनाव
ग्रहस्य च कालो जघन्यः आवलिकासंख्येयभागतुल्य उत्कृष्टः आनप्राणपृथक्त्वं उक्तं च वंजणवग्गहकालो आवलियअ
संखभागतुल्लो उ थोवो उक्कोसो पुण आणापाणुपुहुत्तंति इत्युक्तश्चतुर्द्धा व्यंजनावग्रहः अथार्थावग्रहादीन् व्याचि
ख्यासुराह अत्थुग्गह ईहावाय धारणा करणमानसेहिं छहा इय अट्ठवीसभेयं चउदसहा वीसहा व सुयं ५ अर्थ्यत इ
त्यर्थः तस्य शब्दरूपादिभेदानामन्यतरेणापि भेदेनानिर्द्धारितस्य सामान्यरूपस्यावग्रहणमर्थावग्रहः किमपीदमिति अ
व्यक्तज्ञानमित्यर्थः स च करणमानसैः षोढा भवति तत्र करणानींद्रियाणि पंच मानसं च मनः ६ करणमानसानि तैः कर
णमानसैः कृत्वा इदमुक्तं भवति श्रोत्रेंद्रियार्थावग्रहः १ चक्षुरिंद्रियार्थावग्रहः २ घ्राणेंद्रियावग्रहः ३ रसनेंद्रियावग्रहः

४ स्पर्शनेंद्रियावग्रहः ५ मानसार्थावग्रहः ६ इति षोढावग्रहः तथावगृहीतस्यैव वस्तुनः किमयं भवेत् स्था
णुरेव न तु पुरुष इत्यादि वस्तुधर्मान्वेषणादिकं ज्ञानं चेष्टनमीहा ईहनमीहेति कृत्वा अरण्यमेतत्सविता स्तमा
गतो। न चाधुना संभवतीह मानवः प्रायस्तदेतेन खगादिभाजा भाव्यं स्मरारातिसमाननाम्नेत्याद्यन्वयधर्म
घटनव्यतिरेकधर्मनिराकरणाभिमुखतालिंगितो ज्ञानविशेष ईहेति हृदयं सापि करणमानसैः षोढैव तथा ईहितस्यै
व वस्तुनः स्थाणुरेवायमिति निश्चयात्मको बोधविशेषोऽपायो यमपि करणमानसैः षोढा तथा निश्चितस्यैवाविच्युतिस्मृ
तिवासनारूपं धरणं धारणा सापि करणमानसैः षोढैव अथावग्रहादीनां च कालप्रमाणमिदं अवग्रह एकं समयं ॥ ईहावाया
मुहूर्त्तमर्द्धं तु। कालमसंख्यं संख्यं च धारणा होइ नायव्वा ॥१॥ इति श्रोत्रेंद्रियप्रकारेणावग्रहादीनां चतुर्णां प्रत्येकं षड्विधत्वात्
व्यंजनावग्रहस्य चतुर्द्धात्वेन सह श्रुतनिश्रितं मतिज्ञानमष्टाविंशतिभेदं भवति अश्रुतनिश्रितत्वेन चौत्पत्तिक्यादिबुद्धिच
तुष्टयेन सह द्वात्रिंशद्भेदं भवति अथवा जातिस्मरणमपि समतिक्रांतसंख्यातभवावगमस्वरूपं मतिज्ञानभेद एव तथा च
श्रीआचारांगटीकायां जातिस्मरणं त्वाभिनिबोधिकविशेषः अथवा बहु १ बहुविध २ क्षिप्र ३ निश्रित ४ संदिग्ध ५ ध्रुवा
णां ६ सेतराणामिति। एवं चाष्टाविंशतिरपि द्वादशधा भिद्यते तथाहि बहूनामपि श्रोत्रेण विशेषेणाभिविषयत्वेऽपि शंख
भेर्यादितूर्यसमुदाये क्षयोपशमवैचित्र्यात्कश्चिदवग्रहादिभिर्बहु गृह्णाति एकदेशास्फालितानामपि शंखभेर्यादि
तूर्याणां पृथक् पृथक् शब्दं गृह्णातीत्यर्थः अपरस्त्वबहु गृह्णाति। अव्यक्ततूर्यध्वनिमेवोपलभत इत्यर्थः २ अन्यस्तु योषिदा ८
दिवाद्यमानतामधुरमंद्रत्वादिबहुपर्यायोपेतान् शंखादिध्वनीन् पृथग् जानातीति बहुविधग्राहीत्युच्यते ॥३॥ एकद्विपर्या
योपेतांस्तु तानेव जानानोऽबहुविधग्राही ४ अन्यस्तु क्षिप्रमविरेणैव जानाति ५ अन्यस्तु विमृश्य चिरेणेति ६ अन्यस्तु ध्वनि

श्रितमलिंगं गृह्णाति न पुनः पताकयेव देवकुलं ७ अपरस्तु पताकया देवकुलमिव लिंगनिश्रिततया गृह्णाति ८ य
दसंशयं गृह्णाति तदसंदिग्धं ९ संशयोपेतं तु यं गृह्णाति तत्संदिग्धं १० यदेकदा गृहीतं तत्सर्वदैवावरणं गृह्णाति न पुनः का
लांतरेण तदुपदेशापेक्षमपेक्षते तद्ध्रुवं ११ यत्पुनः कदाचिदेव गृह्णाति न सर्वदा तदध्रुवं १२ एवमेतैर्द्वादशभिर्भेदै
रवग्रहादयः श्रोत्रेंद्रियेद्युक्ता वस्तु गृह्णंतीति तत्राष्टाविंशत्या द्वादशगुणितया त्रीणि शतानि षट्त्रिंशदधिकानि भवंति
यदाह ताप्पपीयूषपयोधिः बहु बहुविह खिप्पा निस्सिय निच्छिय धुवेयरविभिन्ना। पुणरुग्गहादओ तो तं छत्तीसतिसयभे
यं १ नाणसहस्समेवं बहुंपि द्दमुणइ भिन्नजाईयं। बहुविहमणेगभेयं इक्केक्कं निद्धमहुराई २ खिप्पमचिरेण तं चिय स
रूवओ ते अणिस्सियमलिंगं। निच्छियमसंसयं जं धुवमच्चंतं न य कयाइ ३ अश्रुतनिश्रितबुद्धिचतुष्टयेन सह चत्वारिं
शदधिकानि त्रीणि शतानि मतिज्ञानस्य भेदानां भवंति यच्च मतिज्ञानं चतुर्विधम् द्रव्यक्षेत्रकालभावभेदात् यदाहुः
निर्दलिताध्यानसंतानप्रसराः श्रीदेवर्द्धिवाचकवराः तं समासओ चउव्विहं पन्नत्तं तं जहा दव्वओ खित्तओ कालओ भावओ
तत्थ दव्वओ णं आभिणिबोहियनाणी आएसेणं सव्वदव्वाइं जाणइ न पासइ खेत्तओ णं आभिणिबोहियनाणी आएसेणं स
व्वं खेत्तं जाणइ न पासइ कालओ णं आभिणिबोहियनाणी आएसेणं सव्वं कालं जाणइ न पासइ भावओ णं आभिणिबोहि
यनाणी आएसेणं सव्वे भावे जाणइ न पासइ जातिस्मरणमपि समतिक्रांतसंख्यातभवावगमस्वरूपं मतिज्ञानभेद एव
तथा चाचारांगटीकायां जातिस्मरणं त्वाभिनिबोधविशेषः इति व्याख्यातं सप्रपंचं मतिज्ञानं। सांप्रतं श्रुतज्ञानं व्याचि।
ख्यासुराह चउदस वा वीसइ वा सुयंति श्रुतं श्रुतज्ञानं चतुर्दशधा चतुर्दशभेदं विंशतिविधा विंशतिप्रकारं भवतीति त
तः प्रथमं श्रुतस्य चतुर्दशभेदान् व्याख्यानयन्नाह। अक्खरसन्नीसम्मं। साईयं खलु सपज्जवसियं च। गमियं अंगपवि

ं सन्नदिएसपडिवक्खा ॥६॥ इह श्रुतं चतुर्दशधा गाथातः संबध्यते ततो अक्षरश्रुतं १ संज्ञिश्रुतं २ सम्यक्श्रुतं ३ सा
दिश्रुतं ४ सपर्यवसितं ५ गमिकश्रुतं ६ अंगप्रविष्टश्रुतं ७ इत्येते सप्त भेदाः सप्रतिपक्षाः श्रुतस्य चतुर्दश भेदा भवंति त
थाहि अक्षरश्रुतप्रतिपक्षमनक्षरश्रुतं १ एवमसंज्ञिश्रुतं २ मिथ्याश्रुतं ३ अनादिश्रुतं ४ अपर्यवसितश्रुतं ५ अगमिक
श्रुतं ६ अनंगप्रविष्टश्रुतं ७ इत्येते सप्त भेदाः सप्तवा सश्रुतमिति ७ तत्राक्षरं त्रिधा संज्ञा व्यंजनलब्धिभेदात् उक्तं च तंस
न्नावंजणलद्धिसंनियं तिविहमक्खरं लिपिरूपं हंसलिपिविलेयनिवाक्यां नरकरमरकाकारो बहुधा अष्टादस +सं+
लिपयः श्रूयंते तथाहि हंसलिवी १ भूयलिवी २ जक्खी ३ तह रक्खसीय ४ बोधव्वा उड्डी ५ जवणि ६ तुरुक्खी ७ कीरी ८ दवि
डीय ९ सिंधविया १० मालविणी ११ नडि १२ नागरि १३ लाडलिवी १४ पारसीय १५ बोधव्वा तह अनिमित्तीय लिवी १६ चा
णक्की १७ मूलदेवी य १८ २ व्यंजनाक्षरमकारादिहकारपर्यंतमुच्यते तदेतद्द्वितयमज्ञानात्मकमपि श्रुतकारणत्वाउ
+ह+ पचारेण श्रुतं लब्ध्यक्षरं शब्दश्रवणरूपदर्शनादेरर्थप्रत्यायनगर्भशब्दोपलब्धिः यदाह जो अक्खरोवलंभो सा लद्धी तं च
होइ विन्नाणं इंदियमणोनिमित्तं जो आवरणक्खओवसमो १ ततो अक्षरैरभिलाप्यभावानां प्रतिपादनप्रधानं श्रुतमक्षर
श्रुतं नन्वनभिलाप्या अपि किं केचिद्भावाः संति येनैवमुच्यते अभिलाप्यभावानां प्रतिपादनप्रधानं श्रुतमिति उच्य
ते संत्येव यदाह भावाः पन्नवणिज्जा भावा अणंतभागो उ अणभिलप्पाणं पन्नवणिज्जाणं पुण अणंतभागो सुयनिब
द्धो १ जं चउदसपुव्वधरा छट्ठाणगया परोप्परं हुंति तेण उ अणंतभागो पन्नवणिज्जाण जं सुत्तं २ अक्खरलंभेण समा ऊणहि ९
या हुंति मइविसेसेण ते विय मइविसेसा सुयनाणब्भंतरे जाण ३ अनक्षरश्रुतं छिक्कितशिरःकंपनादिनिमित्तं भासाक्रय
ति वा ख्यतिक्ष्वेलादिरूपमभिप्रायपरिज्ञानं २ तथा संज्ञिश्रुतं तत्र संज्ञानं संज्ञा उपसर्गादातः इत्यङ्प्रत्ययः सा च त्रि

विधा दीर्घकालिकी १ हेतुवादोपदेशिकी २ दृष्टिवादोपदेशिकी ३ च यदाह सा समासओ तिविहा इह दीहकालिगी त्ति स
न्ना जया सुदीहंपि संचरइ भूयमिस्सं चिंतेइ य किह णु कायव्वं १ जे पुण संचिंतेउं इट्ठाणिट्ठेसु विसयवत्थूसु वट्टंति नियत्तं
ति य सदेहपरिपालणाहेउं २ पाएण संपयं चिय कालंमि न या वि दीहकालेज्जा ते हेउवायसन्नी निच्चिट्ठा हुंति असन्नी ३
सम्मद्दिट्ठी सन्नी संते नाणे खओवसमियंमि असन्नी मिच्छत्तंमि दिट्ठिवाओवएसेणं ४ ततश्च संज्ञा विद्यते येषां ते संज्ञिनः पर
सर्वत्राप्यागमे ये दीर्घकालिक्या संज्ञया संज्ञिनस्ते संज्ञिन उच्यंते ततः संज्ञिनां श्रुतं संज्ञिश्रुतं समनस्कानां मनःसहितेंद्रि
येंद्रियजनितं श्रुतं संज्ञिश्रुतमिति भावः मनोरहितेंद्रियजं श्रुतमसंज्ञिश्रुतं ४ तथा सम्यग्दृष्टेरर्हत्प्रणीतं मिथ्यादृष्टिप्रणीतं वाय
थास्वरूपमवगमात् सम्यक्श्रुतं ५ मिथ्यादृष्टेः पुनरर्हत्प्रणीतमितरद्वा मिथ्याश्रुतं यथास्वरूपमनवगमात् आह मिथ्यादृष्टे
रपि मतिश्रुते सम्यग्दृष्टेरिव तदावरणकर्मक्षयोपशमसमुद्भवे सम्यग्दृष्टेरिव पृथुबुध्नोदराद्याकारं घटादिकं च संविदाते
तत्कथं मिथ्यादृष्टेरज्ञाने उच्यते सदसद्विवेकपरिज्ञानाभावात् तथाहि मिथ्यादृष्टिः सर्वमप्येकांतपुरस्सरं प्रतिपद्यते न तत्
गवडक्रस्याद्वादनीत्या ततो घटमेवायमिति यदा ब्रूते तदा तस्मिन् घटे घटपर्यायव्यतिरेकेण शेषानुसत्त्वज्ञेयत्वप्रमेयत्वा २
दीन् सतोऽपि धर्मान्नाप्रतिपद्यत इति ततो घट एवायमित्येकांतेनावधारणानुपपत्तेः घटः सन्नेवेति ब्रुवाणः पररूपेण नास्ति
त्वस्यानभ्युपगमात् पररूपतामसतीमपि तत्र प्रतिपद्यते ततः संतमसंतं संपद्यते असंतं च संतमिति सदसद्विशेषपरिज्ञाना
भावादज्ञाने मिथ्यादृष्टेर्मतिश्रुते १ इतश्चैते मिथ्यादृष्टेरज्ञाने भवहेतुत्वात् तथाहि मिथ्यादृष्टीनामपि श्रुते पशुवधमैथुना
दीनां धर्मसाधकत्वेन परिच्छेदकेतत्तो दीर्घतरसंसारप्रवर्त्तिनी तथा यदृच्छोपलंभात् उन्मत्तकविकल्पवत् तथाहि उन्म
त्तकविकल्पा वस्त्वनपेक्षैव यथाकथंचिद्वस्त्वप्रवर्तंत यद्यपि तत्क्वचित् यथावस्थितवस्तुसंवादिनस्तथापि सम्यग्यथाव

स्थितवस्तुतत्त्वपर्यालोचनाविरहेण प्रवर्त्तमानत्वात् परमार्थतो पारमार्थिकाः तथा मिथ्यादृष्टीनां मतिश्रुते यथावस्थवि +दी
चार्यैव प्रवर्त्तेते ततो यद्यपि ते कचिद्घटोयं स्तंभोयमित्याद्यवबोधकारणाध्यवसायात् सावसंवादिनी तथापि न ते स्याद्वादमुद्रापरित्त १
वनात्तत्त्वाप्रवृत्तेः किंच यथा कथंचिदवनस्ते अज्ञाने तथा ज्ञानफलाभावात् ज्ञानस्य हि फलं हेयस्य हानिरुपादेयस्य चोपादानं
न च संसारात्परं किंचन हेयमस्ति न च मोक्षात्परं किंचिदुपादेयं ततो भवमोक्षयोर्हानोपादाने सर्वसंगविरतेरविरतं ततः
सा च रूपं तत्त्ववेदिना कर्तव्या सैव च तत्त्वतो ज्ञानस्य फलं तथा चाह भगवानुमास्वातिवाचकः ज्ञानस्य फलं विरतिरिति सा च
मिथ्यादृष्टेर्नास्तीति ज्ञानफलाभावादज्ञाने मिथ्यादृष्टेर्मतिश्रुते यदाह सप्पमधुधांतो निधिः सदसदविसेसणाओ भवहेउजह
च्छिवलंभाउ नाणफलाभावाउ मिच्छद्दिट्ठिस्स अन्नाणमिति तथा साइयं सपज्जवसियं ७ अणाइयं ९ अपज्जवसियं १० इच्चेइ
यं दुवालसंगं वुच्छित्तिनयट्ठयाए साइयं सपज्जवसियं अवुच्छित्तिनयट्ठयाए अणाइयं अपज्जवसियं ८ तं समासओ चउव्विहं
पन्नत्तं तंजहा दव्वओ खित्तओ कालओ भावओ दव्वओणं सम्मसुयं एगं पुरिसं पडुच्च साइयं सपज्जवसियं बहवे पुरिसे पडुच्च अणाइयं
अपज्जवसियं खित्तओणं पंच भरहाइं पंच एरवयाइं पडुच्च साइयं सपज्जवसियं पंच महाविदेहाइं पडुच्च अणाइयं अपज्जवसियं
कालओणं उस्सप्पिणिं ओसप्पिणिं च पडुच्च साइयं सपज्जवसियं नोउस्सप्पिणिं नोओसप्पिणिं च पडुच्च अणाइयं अपज्जवसियं
नोउस्सप्पिणी णोओसप्पिणी चेति कालो महाविदेहेषु ज्ञेयः तत्रोत्सर्पिण्यवसर्पिणीलक्षणकालाभावात् भावओणं जे ज
या जिणपन्नत्ता भावा आघविज्जंति पन्नविज्जंति परूविज्जंति दंसिज्जंति ते तया पडुच्च साइयं सपज्जवसियं खाओवसमियं पुण १०
भावं पडुच्च अणाइयं अपज्जवसियं अहवा भवसिद्धियस्स सुयं साइयं सपज्जवसियं केवलज्ञानोत्पत्तौ तदभावात् नट्ठंमि
छाउमत्थिए नाणे इति वचनात् अभवसिद्धियस्स सुयं अणाइयं अपज्जवसियं इत्थं सामान्यतः श्रुतमुक्त्वेदानीं श्रुताज्ञ १

नं चोच्यते यदाह अविसेसियं सुयं नाणं सुयनाणं सुयअन्नाणं च तथा गमाः सदृशपाठास्ते विद्यंते यत्र तत् गमिकं ततो अनेकस्व
रादिति इक प्रत्ययः तत्प्रायो दृष्टिवादगतं अगमिकमसदृशाक्षरालापकं तत्प्रायः कालिकश्रुतगतं १२ अंगपविट्ठं द्वादशां
गीरूपं तथाहि अट्ठारसपयसहस्सा आयारे दुगुण २ सेसेसु सूयगड २ ठाण ३ समवाय ४ भगवई ५ नायधम्मकहा ६ अंगं उवा
सगदसा ७ अंतगड ८ अणुत्तरोववाइदसा ९ पण्हावागरणं १० तहा विवागसुय ११ मिगादसं अंगं २ परिकम्म १ सुत्त २ पुव्वाणुओग ३
पुव्वगय ४ चूलिया ५ एवं पण दिट्ठिवायभेया चउदसपुव्वाइं पुव्वगयं ३ उप्पाए पयकोडी १ अग्गेणीयंमि छन्नउइलक्खाइं २ विरिय
पवाए ४ अत्थिपवाए पलक्खा सयरिसट्ठी ४ एगायऊणा कोडी पयाण नाणप्पवायपुव्वंमि ५ सच्चप्पवायपुव्वे एगा पयकोडि छच्च पयाइं ६ ब
त्तीसं पयकोडी पुव्वे आयप्पवायनामंमि ७ कम्मप्पवायपुव्वे पयकोडी असिइलक्खजुआ ८ ह पच्चक्खाणे सिट्ठाणे पुव्वे चुलसी
इ पयसयसहस्सा ९ दसपयसहस्सजुआ पयकोडी विज्जप्पवायंमि १० ३ कल्लाणनामधिज्जे पुव्वंमि पयाण कोडिछव्वीसा ११ ज
पन्नलक्खकोडी पयाण पाणाउवायपुव्वंमि १२ ८ किरियाविसालपुव्वे नवपयकोडीउ बिंति समयविऊ १३ सिरिलोकबिंदुसा
रे सड्ढदुवालससयसहस्सा १४ ९ अंगबाह्यश्रुतं आवश्यकदशवैकालिकादि १४ इत्याख्यातं चतुर्दशधा श्रुतं संप्रति विं
शतिधा श्रुतं व्याख्यानयन्नाह पज्जय अक्खर २ पय ३ संघाया ४ पडिवत्ति ५ तह य अणुओगो ६ पाहुडपाहुड पाहुड ८ व
त्थू पुव्वा यणसमासा ७ पर्यायश्च अक्षरं च पदं च संघातश्च पर्यायाक्षरपदसंघाताः प्रतिपत्तिः प्रतिपत्तिः प्राकृतत्वात्
लुप्तविभक्तिको निर्देशः तथा चानुयोगो अनुयोगद्वारलक्षणश्चानुतथा प्राभृतं च प्राभृतप्राभृतं च वस्तु च पूर्वं च प्राभृतप्राभृतप्रा
भृतवस्तुपूर्वाणि प्राकृतत्वात् लिंगव्यत्ययः यदाह पाणिनिः स्वप्राकृतलक्षणे लिंगव्यभिचार्यपि च समुच्चये एते पर्याय १
दयः श्रुतस्य द्वयभेदाः कथं तावत् स्यात् ससमासास्ति समासः संक्षेपो मीलक इत्यर्थः सह समासेन वर्त्तंत इति ससमासा स्तत

अक्षरैकसंबंधस्तथाहि पर्याय पर्यायसमासः २ अक्षरं ३ अक्षरसमासः ४ पदं ५ पदसमासः ६ संघातः ७ संघातसमासः
८ प्रतिपत्तिः ९ प्रतिपत्तिसमासः १० अनुयोगः ११ अनुयोगसमासः १२ प्राभृतप्राभृतं १३ प्राभृतप्राभृतसमासः १४ प्राभृतं
१५ प्राभृतसमासः १६ वस्तु १७ वस्तुसमासः १८ पूर्वं १९ पूर्वसमासः २० इति विंशतिधा श्रुतं भवतीति गाथाक्षरार्थो भा
वार्थस्त्वयं पर्यायो ज्ञानस्यांशो विभागः परिच्छेद इति पर्यायाः तत्रैको ज्ञानांशः पर्यायो अनेके तु ज्ञानांशाः पर्यायसमा
सः एतदुक्तं भवति लब्ध्यपर्याप्तस्य सूक्ष्मनिगोदजीवस्य यत्सर्वजघन्यं श्रुतमात्रं तस्मादन्यत्र जीवांतरे य एकः श्रुतज्ञानां
शो अविभागपरिच्छेदरूपो वर्द्धते स पर्यायः १ ये तु द्व्यादयः श्रुतज्ञानविभागपरिच्छेदा नानाजीवेषु वृद्धा लभ्यंते ते समुदिताः
पर्यायसमासः २ अकारादिलब्ध्यक्षराणामन्यतरदक्षरं अक्षरश्रुतं ३ तेषामेव द्व्यादिसमुदायो अक्षरसमासः ४ पदं त
दर्थपरिसमाप्तिः पदमित्याद्युक्तिसद्भावेऽपि येन केनचित्पदेन अष्टादशपदसहस्रादिप्रमाणं आचारांगादिग्रंथा गीयंते तदि
ह गृह्यते तस्यैव द्वादशांगश्रुतपरिमाणे अधिकृतत्वात् श्रुतभेदानामेवेह प्रस्तुतत्वात् तस्य च पदस्य यथा विधाम्ना
याभावात् प्रमाणं न ज्ञायते तत्रैकं पदं पदश्रुतं ते द्व्यादिपदसमुदायस्तु पदसमासः ६ गइ इंदिए य काए इच्चादि गाथाप्रति
पादितद्वारकलापस्यैकदेशो यो गत्यादिकस्तस्याप्येकदेशो यो नरकगत्यादिस्तत्र जीवादिमार्गणं यत् क्रियते स संघा
तः ७ द्व्यादिगत्याद्यवयवमार्गणा संघातसमासः ८ गत्यादिद्वाराणामन्यतरैकपरिपूर्णगत्यादिद्वारेण जीवादिमार्गणं प्र
तिपत्तिः ९ द्वारद्वयादिमार्गणा तु प्रतिपत्तिसमासः १० संतपयपरूवणया दव्वपमाणं चेत्यादि अनुयोगद्वाराणामन्यत ११
रदेकमनुयोगद्वारमुच्यते ११ तद्व्यादिसमुदायः पुनरनुयोगद्वारसमासः १२ प्राभृतांतर्वर्ती अधिकारविशेषः प्राभृ
तप्राभृतं १३ तद्व्यादिसमुदायस्तु प्राभृतप्राभृतसमासः १४ वस्त्वंतर्वर्ती अधिकारविशेषः प्राभृतं १५ तद्व्यादिसंयोग

स्तु प्राभृतसमासः १६ पूर्वांतर्वर्ती अधिकारविशेषो वस्तु १७ तद्व्यादिसंयोगस्तु वस्तुसमासः १८ पूर्वं उत्पादपूर्वादि पूर्वोक्त
स्वरूपं १९ तद्व्यादिसंयोगस्तु पूर्वसमासः २० एवमेते संक्षेपतः श्रुतज्ञानस्य विंशतिर्भेदा दर्शिता विस्तरार्थिना तु बृहत्कर्मप्र
कृतिरन्वेषणीया एते च पर्यायादयः श्रुतभेदा यथोत्तरं तीव्रतीव्रतरादिक्षयोपशमलभ्यत्वाद्विशिष्टा इति परिभावनीय
मिति अथवा चतुर्विधं श्रुतज्ञानं तद्यथा द्रव्यतः क्षेत्रतः कालतः भावतश्च तत्र द्रव्यतः श्रुतज्ञानी सर्वद्रव्याण्यादेशेन जानाति
क्षेत्रतः सर्वक्षेत्रमादेशेन श्रुतज्ञानी जानाति कालतः सर्वकालमादेशेन श्रुतज्ञानी जानाति भावतः सर्वान् भावान् आ
देशेन श्रुतज्ञानी जानाति इति व्याख्यातं सविस्तरं श्रुतज्ञानं संप्रत्यवधिज्ञानं व्याख्यायते तच्च द्वेधा भवप्रत्ययं गुणप्रत्ययं च तत्र
भवप्रत्ययं देवनारकाणां गुणप्रत्ययं मनुष्यतिरश्चां तच्च षोढा तथा चाह सूत्रं अणुगामि य वड्ढमाणय पडिवाई यर विहा छद्धा ते
ही रिउमइ विउलमई मणनाणं केवलमिगविहाणं ८ अनुगामि च वर्द्धमानकं च प्रतिपाति च इतराणि च अननुगामि हीयमा
नकाप्रतिपातीनि अनुगामिवर्द्धमानकप्रतिपातीतराणि विधानानि विधा भेदा यस्य तत्तथा तस्मादनुगामिवर्द्धमानकप्रति
पातीतरविधानात् षड्धा अवधिरवधिज्ञानं भवति उक्तं च नंद्यध्ययने तं समासतो छव्विहं पन्नत्तं तं जहा अणुगामियं अणाणुगा
मियं वड्ढमाणयं हीयमाणयं पडिवाई अपडिवाई तत्र गच्छंतं पुरुषमा समंतादनुगच्छतीत्येवंशीलमनुगामि यद्देशांतरगतमपि
ज्ञानिनमनुगच्छति लोचनवत्तदवधिज्ञानमानुगामीति भावः तथा न अनुगामि अननुगामि शृंखलाबद्धप्रदीपवत् यन्न गच्छं
तं ज्ञानिनं अनुगच्छति यत्किल तद्देशस्थस्यैव भवति तद्देशनिबंधनक्षयोपशमजत्वात् देशांतरगतस्य त्वपैति तदवधिज्ञानम
नानुगामीति भावः यदाह भगवान् श्रीदेवर्द्धिगणिक्षमाश्रमणः से किं तं अणाणुगामियं ओहिनाणं अणाणुगामियं ओहिना १
णं से जहानामए केइ पुरिसे एगं महं जोइट्ठाणं काउं तस्सेव जोइट्ठाणस्स परिपेरंतेसु परिहिंडमाणे २ परिघोलेमाणे २ तमेव जोइ १

इत्ताणं पासइ अन्नत्थगए न पासइ एवामेव अणाणुगामियं ओहिनाणं जत्थेव समुप्पज्जइ तत्थेव संखिज्जाणि असंखि-
ज्जाणि वा जोयणाणि जाणइ पासइ न अन्नत्थगए जाणइ साध्यकारो पाद् अणाणुगामि ओहिनाणं गयं तल्लोच्य णं जहा पुरिसं इयरो
उ नाणं गच्छइ विज्झाइ पुण चागच्छंतं २ तथा वर्द्धत इति वर्द्धमानं ततः संज्ञायां कन् प्रत्ययः बहु बहुतरेंधनप्रक्षेपाद् धृति
वर्द्धमान ज्वलन ज्वाला कलाप इव पूर्वावस्थातो यथायोगं प्रशस्त प्रशस्ततराध्यवसायतो वर्द्धमानं अवधिज्ञानं वर्द्धमानकं
यत्किल अंगुलासंख्येय भागादि विषयमुत्पन्नं पुनर्वृद्धिविषय विस्तरेणत्मिकं याति यावदलोके लोकप्रमाणान्यसं-
ख्येयानि खंडानि इति तथा हीयते तथाविध सामग्र्यभावतो हानिमुपगच्छति हीयमानं कर्मकर्तृविवक्षायां मानश्प्रत्य-
यः हीयमानमेव हीयमानकं कुत्सितादौ ज्ञातेक प्रत्ययः पूर्वावस्थातो यदधोऽधो ह्रासमुपगच्छति तत् हीयमान-
कमवधिज्ञानमिति उक्तं च नंदिचूर्णौ हीयमाणं पुव्वावत्थाउ अहोऽहो ह्रस्समाणं ति तथा प्रतिपतती त्येवं शीलं प्रतिपा-
ति यदाह से किं तं पडिवाई पडिवाई जं णं जहन्नेणं अंगुलस्स असंखेज्जइभागं वा संखिज्जइभागं वा वालग्गं वा वालग्गपुहत्तं वा
लिक्खं वा लिक्खपुहत्तं वा जूयं वा जूयपुहत्तं वा जवं वा जवपुहत्तं वा अंगुलं वा अंगुलपुहत्तं वा एवं एतेणं अभिलावे-
णं विहत्थिं वा हत्थं वा कुच्छिं वा कुक्षिर्हस्तद्वयमुच्यते धणुं वा गाउयं वा जोयणं वा जोयणसयं वा जोयणसहस्सं वा सं-
खिज्जाणि वा असंखिज्जाणि वा जोयणसहस्साइं उक्कोसेणं लोगं पासित्ताणं परिवडिज्जा से तं पडिवाई तथा न प्रतिपाति
अप्रतिपाति यत्किल लोकस्य प्रदेशमेकमपि पश्यति तदप्रतिपाती तिभावः हीयमानकप्रतिपातिनोः कः प्रतिविशेष इ- १२
ति चेदुच्यते हीयमानकं पूर्वावस्थातो अधोऽधो ह्रासमुपगच्छद् विधीयते यत्पुनः प्रदीप इव निर्मूलमेककालमुप-
गच्छति तत्प्रतिपाती ति यथा अनंतद्रव्यत्वाव विषयत्वात् तत्तारतम्य विवक्षया अनंतभेदं असंख्येय कालक्षेत्र विषयत्वा

त् तारतम्यविवक्षया असंख्येयभेदमवधिज्ञानं यद्वा चतुर्विधमवधिज्ञानं द्रव्यक्षेत्रकालभावात् तथा चाह तं समासओ चउव्वि-
हं पन्नत्तं तं जहा दव्वओ खित्तओ कालओ भावओ दव्वओ णं ओहिनाणी जहन्नेणं अणंताइं रूविदव्वाइं जाणइ पासइ उक्कोसेणं सव्व-
रूविदव्वाइं जाणइ पासइ खित्तओ णं ओहिनाणी जहन्नेणं अंगुलस्स असंखेज्जइभागं उक्कोसेणं असंखेज्जाइं अलोए लोयप्प-
माणमित्ताइं खंडाइं जाणइ पासइ कालओ णं ओहिनाणी जहन्नेणं आवलियाए असंखेज्जइभागं उक्कोसेणं असंखिज्जाओ उस्सप्पि-
णीओ अवसप्पिणीओ अतीयं च अणागयं च कालं जाणइ पासइ भावओ णं ओहिनाणी जहन्नेणं अणंते भावे जाणइ पासइ उक्कोसेण
वि अणंते भावे जाणइ पासइ सव्वभावाणं अणंतभागं इत्युक्तमवधिज्ञानं इदानीं मनःपर्यायज्ञानं व्याख्यानयन्नाह रिउ-
मइ विउलमई मणनाणं ति मनोज्ञानं मनःपर्यायज्ञानमित्यर्थः ऋजुमति विपुलमति भेदाद्विविधं तत्र ऋज्वी सामान्यग्राहि-
णी मतिः ऋजुमतिः घटोऽनेन चिंतितः इत्यध्यवसायनिबंधनो मनोद्रव्यपरिच्छित्तिरित्यर्थः यदाह रिउसामन्नं तम्मत्तगाहि-
णी रिउमई मणोनाणं पायं विसेसविमुहं घडमित्तं चिंतियमुणइ १ तथा विपुला विशेषग्राहिणी मतिर्विपुलमतिः घटोऽनेन चिं-
तितः स च सौवर्णः पाटलिपुत्रको अद्यतनो महानित्याद्यध्यवसायहेतुभूता मनोद्रव्यविज्ञप्तिरिति भावार्थः अस्याप्युक्तोस्व-
तंत्रं ज्ञानामवगृह्यत इति अथवा ऋज्वी सामान्यग्राहिणी मतिरस्येति ऋजुमतिः विपुला विशेषग्राहिणी मतिरस्य विपुलमतिः अ-
स्याप्युत्पत्तौ लब्धानूगृह्यते यद्वा मनःपर्यायज्ञानं चतुर्विधं द्रव्यतः क्षेत्रतः कालतो भावतश्च उक्तं च तं समासओ चउव्विहं पन्न-
त्तं तं जहा दव्वओ खित्तओ कालओ भावओ दव्वओ णं उज्जुमई अणंते अणंतपएसिए खंधे जाणइ पासइ ते चेव विउलमई अब्भहियतराए
विमलतराए जाणइ पासइ क्षेत्रतः पुनः ऋजुमतिरधो यावदधोलौकिकग्रामान् जानाति यदाह क्षेत्रोद्देशप्रकरणे ऽत्रप-
सादस्त्र अधरे [illegible] हरि रजस्तुपादाः नंदिचूर्णौ इहाधोलौकिकान् ग्रामान् तिर्यग्लोकवर्त्तिनः मनोगतान् रूपो

स्ता चान्ये वेति तद्वर्तिनामपि ज्ञेयं यावज्ज्योतिश्चक्रस्योपरितनं तिर्यग्लोकश्चांतोमध्यस्य रचिते अड्ढाइज्जेसु दीवेसु दो
सु य समुद्देसु पनरससु कम्मभूमीसु तीसाए अकम्मभूमीसु छप्पन्नाए अंतरदीवेसु सन्नीणं पंचेंदियाणं पज्जत्तगाणं मणोगा
ए भावे जाणइ पासइ तं चेव विउलमई अड्ढाइज्जेहिं अंगुलेहिं अब्भहियतरागं विसुद्धतरागं खेत्तं जाणइ पासइ इत्यस्मा
द्गमा च अंतमध्ये मनुष्यक्षेत्रस्य अर्धतृतीयेषु द्वीपेषु जंबूद्वीपधातकीखंडपुष्करवरद्वीपार्द्धेषु द्वयोः समुद्रयोः लवण
समुद्रकालोदसमुद्रयोः पंचदशसु कर्मभूमिषु भरतपंचक ऐरवतपंचक महाविदेहपंचकलक्षणासु त्रिंशत्स्व
कर्मभूमिषु हैमवतपंचक हरिवर्षपंचक देवकुरुपंचक उत्तरकुरुपंचक रम्यकपंचक ऐरण्यवतपंचकरूपासु तथा
लवणसमुद्रस्यांतर्मध्ये वर्तमाना द्वीपा अंतरद्वीपास्तेषु षट्पंचाशत्संख्याकास्तथाहि जंबूद्वीपे भरतस्य हैमवतस्य क्षेत्र
स्य सीमाकारी भूमिनिमग्नः पंचविंशतियोजनानि योजनशतोच्चयपरिमाणो भरतक्षेत्रापेक्षया द्विगुणविष्कंभो हे
ममयः चीनपट्टवर्णो नानावर्णविशिष्टद्युतिमणिनिकरपरिमंडितोभयपार्श्वः सर्वत्र तुल्यविस्तारो गगन
मंडलोल्लेखिरत्नमयैकादशकूटोपशोभितो वज्रमयतलविविधमणिकनकमंडिततटभित्तिर्दशयोजना
वगाढः पूर्वपश्चिमयोजनसहस्रायामदक्षिणोत्तरपंचयोजनशतविस्तारपद्मह्रदशोभितशिरोमध्यभागः सर्व
तः कल्पपादपश्रेणिरमणीयः पूर्वापरपर्यंताभ्यां लवणोदार्णवजलसंस्पर्शी हिमवन्नामपर्वतस्तस्य लवणोदार्णव
जलसंस्पर्शादारभ्य पूर्वस्यां पश्चिमायां विदिशि प्रत्येकं द्वे गजदंताकारे दंष्ट्रे विनिर्गते तत्रैशान्यां विदिशि या विनिर्ग १३
ता दंष्ट्रा तस्यां हिमवतः पर्यंतादारभ्य त्रीणि योजनशतानि लवणसमुद्रमवगाह्य अत्रांतरे योजनशतत्रयायाम
मविष्कंभः किंचिन्न्यूनमेकोनपंचाशदधिकनवयोजनशतपरिरय एकोरुकनामा द्वीपो वर्त्तते अयं च पंचधनुःशत

प्रमाणविष्कंभयार्धद्विगव्यूतोच्छ्रितया पद्मवरवेदिकया सर्वतः परिमंडितः सापि च पद्मवरवेदिका सर्वतो वनखं
डपरिक्षिप्ता तस्य च वनखंडस्य चक्रवालतया विष्कंभो देशोनद्वियोजनपरिक्षेपः पद्मवरवेदिकाप्रमाणः तथा
तस्यैव हिमवतः पर्वतस्य पर्यंतादारभ्य दक्षिणपूर्वस्यां दिशि त्रीणि योजनशतानि लवणसमुद्रमवगाह्य द्वितीयदंष्ट्रा
या उपरि एकोरुकद्वीपप्रमाणः एको आभासिकनामा द्वीपो वर्त्तते अयं च पंचशतधनुःप्रमाणविष्कंभया द्विगव्यूतोच्छ्रि
तया पद्मवरवेदिकया सर्वतः परिमंडितः सापि च पद्मवरवेदिका सर्वतो वनखंडपरिक्षिप्ता तस्य च वनखंडस्य चक्रवा
लतया विष्कंभो देशोने द्वियोजने परिक्षेपः पद्मवरवेदिकाप्रमाणः आभासिकनामो द्वीपो वर्त्तते तथा तस्यैव हिमवतः प
श्चिमायां दिशि पर्यंतादारभ्य दक्षिणपश्चिमायां त्रीणि योजनशतानि लवणसमुद्रमवगाह्य दंष्ट्राया उपरि यथोक्तप्रमा १
णो वैषाणिकनामा द्वीपः तथा तस्यैव हिमवतः पश्चिमायां दिशि पर्यंतादारभ्य पश्चिमोत्तरस्यां दिशि त्रीणि योजनशतानि
लवणसमुद्रमवगाह्य दंष्ट्राया उपरि योजनशतान्यतिक्रम्य चतुर्थः पूर्वोक्तप्रमाणो नांगोलिकनामा द्वीपः एवमेते चत्वा
रो द्वीपा हिमवतश्चतसृषु विदिक्षु तुल्यपरिमाणा अवतिष्ठंते तथा तेषामेकोरुकादीनां चतुर्णां द्वीपानां परतो य
थाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं चत्वारि योजनशतान्यतिक्रम्य चतुर्योजनशतायामविष्कंभाः किंचिन्न्यूनपंचष
ष्टिसहितद्वादशयोजनशतपरिक्षेपा यथोक्तपद्मवरवेदिकावनखंडमंडितपरिसरा जंबूद्वीपवेदिकातश्चतुर्योज
नशतप्रमाणांतरा हयकर्णगोकर्णगजकर्णशष्कुलीकर्णनामानश्चत्वारो द्वीपास्तद्यथा एकोरुकस्य परतो हय
कर्णः आभासिकस्य परतो गजकर्णः वैषाणिकस्य परतो गोकर्णो नांगोलिकस्य परतः शष्कुलीकर्णः एव[illegible]
एवमग्रेऽपि भावना कार्या ततएतेषामपि हयकर्णा[illegible]दीनां चतुर्णामपि द्वीपानां परतः पुनरपि यथाक्रमं पूर्वोत्तरा

दिविदिक्षु प्रत्येकं पंचपंचयोजनशतान्यतिक्रम्य पंचयोजनशतायामविष्कंभा एकाशीत्यधिकपंचदशयोजनशतपरिक्षे
पाः पूर्वोक्तप्रमाणपद्मवरवेदिकावनखंडमंडितबाह्यप्रदेशा जंबूद्वीपवेदिकातः पंचयोजनशतप्रमाणांतरा आदर्शमुख
मेंढमुख अयोमुख गोमुखनामानश्चत्वारो द्वीपा एतेषामप्यादर्शमुखादीनां चतुर्णां द्वीपानां परतोऽपि यथाक्रमं पूर्वोत्त
रादिविदिक्षु प्रत्येकं षट् योजनशतान्यतिक्रम्य षट्योजनशतायामविष्कंभा सप्तनवत्यधिकाष्टादशयोजनशतप
रिक्षेपा यथोक्तप्रमाणपद्मवरवेदिकावनखंडमंडितपरिसरा जंबूद्वीपवेदिकातः षट्योजनशतप्रमाणांतरा अश्वमुख
हस्तिमुख हंसमुख व्याघ्रमुखनामानश्चत्वारो द्वीपाः एतेषामप्यश्वमुखादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदि
क्षु प्रत्येकं सप्तसप्तयोजनशतान्यतिक्रम्य सप्तयोजनशतायामविष्कंभास्त्रयोदशाधिकद्वाविंशतियोजनशतपरिरयाः ॥परिक्षेपा इत्यपि पाठः
पूर्वोक्तप्रमाणपद्मवरवेदिकावनखंडसमवगूढा जंबूद्वीपवेदिकातः सप्तयोजनशतप्रमाणांतरा अश्वकर्ण हस्तिक
र्ण अकर्ण कर्णप्रावरणनामानश्चत्वारो द्वीपास्तत एतेषामश्वकर्णादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदि
क्षु प्रत्येकमष्टावष्टौ योजनशतान्यतिक्रम्य अष्टयोजनशतायामविष्कंभा एकोनत्रिंशदधिकपंचविंशतियोजन
शतपरिक्षेपा यथोक्तप्रमाणपद्मवरवेदिकावनखंडमंडितपरिसरा जंबूद्वीपवेदिकातो अष्टयोजनशतप्रमाणांतरा उल्का २
मुख मेघमुख विद्युन्मुख विद्युद्दंताभिधानाश्चत्वारो द्वीपास्ततो मीषामप्युल्कामुखादीनां चतुर्णां द्वीपानां परतो यथाक्र
मं पूर्वोत्तरादिविदिक्षु प्रत्येकं नवनवयोजनशतान्यतिक्रम्य नवयोजनशतायामविष्कंभाः पंचचत्वारिंशदधिकाष्टाविंशतियोज १४
नशतपरिक्षेपा यथोक्तप्रमाणपद्मवरवेदिकावनखंडमंडितपरिसरा जंबूद्वीपवेदिकातो नवयोजनशतप्रमाणांतरा घनदं
त लष्टदंत गूढदंत शुद्धदंतनामानश्चत्वारो द्वीपाः एवमेते सप्त चतुष्काः हिमवति पर्वते चतसृषु विदिक्षु व्यवस्थिताः सर्वसंख्य

याष्टाविंशतिः एवं हिमवत्तुल्यवर्णप्रमाणे पद्महृदप्रमाणायामविष्कंभावगाहपुंडरीकहृदोपशोभिते शिखरिण्यपि लव
णोदार्णवजलसंस्पर्शादारभ्य यथोक्तप्रमाणांतराश्चतसृषु विदिक्षु व्यवस्थिता एकोरुकादिनामानो अंतर्द्वीपांतरायामवि फ
ष्कंभा अष्टाविंशतिसंख्या द्वीपा वक्तव्याः सर्वसंख्यया षट्पंचाशदंतरद्वीपाः एतन्नता मनुष्याश्चापि तन्नामानस्तदुपचाराद्भ
वंति तात्स्थ्यात्तद्व्यपदेशो यथा पंचालदेशनिवासिनः पुरुषाः पंचाला इति ते च मनुष्याः वज्रऋषभनाराचसंहनिनः सम
चतुरस्रसंस्थानाः सर्वांगोपांगसुंदराः कमंडलुकलशयूपस्तूपवापीध्वजपताकासौवस्तिकयवमत्स्यमकरकूर्मरथ
वरस्थाल्यंकुशाष्टापदांकुशसुप्रतिष्ठकमयूरश्रीदामाभिषेकतोरणमेदिनीजलधिवरभवनादर्शपर्वतगजवृषभसिंह
चामररूपप्रशस्तोत्तमद्वात्रिंशल्लक्षणधराः स्वभावत एव सुरभिवदनाः प्रतनुक्रोधमायालोभाः संतोषिणो निरौत्सुक्य १
मार्दवार्जवसंपन्नाः सत्यपि मनोहारिणि मणिकनकमौक्तिकादौ ममत्वकारणे ममत्वाभिनिवेशरहिताः सर्वथा अपगत
वैरानुबंधाः हस्त्यश्वमहिषगोकरभादिसद्भावेपि तत्परिभोगपराङ्मुखाः पादविहारिणो ज्वरादिरोगयक्षभूतपिशाचा
दिग्रहमारिव्यसनोपनिपातविकला परस्परप्रेष्यप्रेषकादिभाववर्जितत्वादहमिंद्रास्तेषां पृष्टिकरंडकानि चतुःषष्टिसंख्या
कानि चतुर्थातिक्रमे चाहारग्रहणं आहारोपि च तेषां शाल्यादिधान्यनिष्पन्नो न किंतु पृथ्वीमृत्तिका कल्पद्रुमाणां पुष्पफलानि
च तथाहि ज्ञायंते खलु तत्रापि विस्रसात एव शालिगोधूममुद्गमाषादीनि धान्यानि परं तानि मनुष्याणामुपभोगं गच्छंति यावत *नो+
पृथिवी सा शर्करातोप्यनंतगुणमाधुर्या यच्च कल्पद्रुमपुष्पफलानामास्वादः स च चक्रवर्तिभोजनादप्यधिकगुणः यदु
क्तं तेसि णं भंते पुप्फफलाणं केरिसए आसाए पन्नत्ते गोयमा से जहानामए रन्नो चाउरंतचक्कवट्टिस्स कल्लाणे भोयणे १
सयसहस्सनिप्फन्ने वन्नोववेए रसोववेए गंधोववेए फासोववेए आसायणिज्जे विस्सायणिज्जे दप्पणिज्जे मयणिज्जे विंह

णिज्जो सव्विंदियगायपल्हायणिज्जो आसायएणं पण्णत्ते इत्तो इट्ठतराए चेव पन्नत्ते ततः पृथिवीकल्पपादपपुष्पफला
न्यैव तेषामाहारः तथा स्वल्पं चाहारमाहार्य प्रासादादिसंस्थाना ये [illegible] हाकाराः कल्पद्रुमास्तेषु यथासुखमवतिष्ठंते न
च तत्र क्षेत्रे दंशमशकयूकामत्कुणमक्षिकादयः शरीरोपद्रवकारिणो जंतवः उपजायंते ये पि जायंते ते भुजगव्याघ्रसिंहादयः
तेपि मनुष्याणां न बाधायै प्रभवंति नापि ते परस्परं हिंस्यहिंसकभावेन वर्त्तंति क्षेत्रानुभावतो रौद्रभावरहितत्वात् मनुष्ययुग
लानि च पर्यवसानसमये युगलं प्रसुवते तच्च युगलं एकोनाशीतिदिनानि पालयंति तेषां शरीरोच्छ्रयो अष्टौ धनुःशतानि प
ल्योपमासंख्येयभागप्रमाणमायुः स्तोककषायतया स्तोकप्रेमानुबंधतया च ते मृत्वा दिवमुपसर्पंति मरणं च तेषां जृंभिकाका
सितक्षुतादिमात्रव्यापारपूर्वकं भवति न शरीरपीडापुरस्सरमिति अत्र गाथा हिमसिहरिनिगयमुच्चा वरदाढा विदिसिसु विक्खा
लवणे जोयण तिसय गंतुं तिसिसय विच्छराऽऽयामा १ चेव दुयवणसंडजुया चउअंतरदीवते सिं नामाइं एगोरुक १ आभासि
य २ वेसाणिय ३ नामगंगूलीय ४ पढमचउक्कं व उ पण सत्ता अट्ठ नव य जोयणसएसु हयकन्ना ५ गयकन्ना ६ गोकन्ना ७ सक्कुलीकन्ना ८ आयं
सगमिंढमुहा ९ १० अओमुहा ११ गोमुहा १२ चउरदीवा आसमुहा १३ हत्थिमुहा १४ सीहमुहा १५ तह य वग्घमुहा १६ ४ तत्तो य आसक
न्ना १७ हत्थियकन्ना य १८ कन्नपावरणा १९ उक्कामुह २० मेहमुहा २१ विज्जुमुहा २२ विज्जुदंता य २३ ५ घणदंता २४ लट्ठदंता २५
निगूढदंता य २६ सुद्धदंता य २७ अस्सि हरंमि विसिले अट्ठावीसंतरद्दीवा ६ उत्तयमीलिताः षट्पंचाशत्संख्याः एएसु जुगलधम्मा अस्स
य अट्ठूसिया परमरूवा पल्लअसंखिज्जाऊ गुणसीदिणव्व पालणया ७ चउसट्ठी पिट्ठिकरंडगाणं मणुयाणं चउत्थ सोइ य कप्पत १५
रुसुरियासा सुरगइगामी तणुकसाया ८ शेषं सुगमं स्पष्टं कालतिगं उज्जुमई जहन्नेणं पलिउवमस्स असंखेज्जइभागं उक्कोसेण
विपलिउवमस्स असंखेज्जइभागं तीयं अणागयं च कालं जाणइ पासइ तं चेव विउलमई अब्भहियतरागं जाणइ पासइ जीतक

ल्पलाघे पुनः कालतो णं उज्जुमई जहन्नेणं उक्कोसेण वि पलियस्स भागमसंखेज्जइमं अतीयं एमेव कालओ १ जाणइ पासइ ते क्रम
णिज्जमाणे असंनिजीवाणं ते चिय विउलमई विइतिमिरसुद्धं जाणेइ २ भावतस्तु तत्पर्यायाश्चिंतनानुगुणपरिणतिरूपा ऋजु
मतिर्विषयीकरोति चिंतनीयं तु मूर्त्तममूर्त्तं वा त्रिकालगोचरमपि बाह्यमर्थमनुमानादेवैति जाणइ बज्झेणुमाणाओ इति वचनात्
यत एवमेतत्परिणतानि तानि मनोद्रव्याणि इत्येतदन्यथा वा अनुपपत्तेरमुको र्थो अनेन चिंतितः इति लेखाक्षरदर्शनात् इंगिताभि
व्यक्तस्वदृष्टमनोद्रव्यदर्शनाच्चिंत्यमर्थमनुमिमीते स एव बाह्याभ्यंतररूपो द्विविधो पि विषयः स्फुटतरबहुतरविशेषाध्यासितत्वेन वि
पुलमतेर्विपुलतरो वसेयः इति निरूपितं मनःपर्यायज्ञानं अथ केवलज्ञानं व्याचिख्यासुराह केवलमिगविहाणं ति केवलज्ञा
नमेकविधं प्रथमत एव सर्वद्रव्यक्षेत्रकालभावग्राहकत्वादितिभावः इत्युपतिष्ठितं केवलज्ञानं तदभिधानेन व्याख्यातानि पंचापि
ज्ञानानि इदानीमेतेषामावरणमाह एसिं जं आवरणं पडुव्व चक्खुस्स तं तयावरणं दंसणचउपणनिद्दा वित्तिसमं दंसणावरणं ९ एषां मति
ज्ञानादीनां पंचानां ज्ञानानां यदावरणमाच्छादकं पटकवस्त्रादिनिष्पन्नशाटक इव चक्षुषो लोचनस्य तदेषां मतिज्ञानादीनामावरणं
तदावरणमुच्यते इममत्र हृदयं यथा घनघनतरघनतमेन पटेनाच्छादितं सन्निर्मलमपि चक्षुर्मंदमंदतरमंदतमदर्शनं भवति तथा ज्ञानावरणेन
कर्म्मणा घनघनतरघनतमेनाच्छादितो यं जीवः शारदशशधरकरनिकरनिर्मलतरोपि मंदमंदतरमंदतमज्ञानो भवति तेन पटोपमं ज्ञा
नावरणं कर्म्मोच्यते तत्र आवरणस्य सामान्यत एकरूपत्वेपि यत्पूर्वोक्तानेकभेदभिन्नस्य मतिज्ञानस्यानेकभेदमेवावरणस्वभावं कर्म्म
तन्मतिज्ञानावरणमेकग्रहणेन गृह्यते चक्षुषः पटलमिव तथा विंशतिभेदसंदोहस्य श्रुतज्ञानस्य यदावरणस्वभावं कर्म्म तच्छ्रुतज्ञाना
वरणं २ तथा षड्भेदकदंबकस्यावधिज्ञानस्य यदावरणस्वभावं कर्म्म तदवधिज्ञानावरणं ३ तथा प्राङ्निर्णीतभेदद्वयस्य
मनःपर्यायज्ञानस्य यदावरणस्वभावं कर्म्म तन्मनःपर्यायज्ञानावरणं ४ तथा पूर्वनिरूपितस्वरूपस्य केवलज्ञानस्य यदावरणस्वभावं

कर्मेति केवलज्ञानावरणं ५ उक्तं च बृहत्कर्मविपाके सरउग्गयससिनिम्मलयरस्स जीवस्स छायणं जमिह नाणावरणं
कम्मं पडोवमं होइ एवं तु १ जह निम्मला वि चक्खू पडेण केणावि छाइया संती मंदं मंदतरागं पिच्छइ सा निम्मला जइ वि २ तह म
इसुयओहिनाणावरणं अइबहलमेहेण केवलनाणावरणं जीवं निम्मलरूवं आवरइ इमेहिं भेएहिं ३ तदेवमेतानि पंचावरणानु
त्तराः प्रकृतयस्तन्निष्पन्नं तु सामान्येन ज्ञानावरणं मूलप्रकृतिः यथा अंगुलीपंचकनिष्पन्नो मुष्टिः मूलत्वक्पत्रशाखा
दिसमुदयनिष्पन्नो वा वृक्षः घृतगुडकणिकादिनिष्पन्नो वा मोदक इति एवमुत्तरत्रापि भावनीयं आख्यातं पंचविधं ज्ञा
नावरणं कर्म इदानीं नवविधं दर्शनावरणं कर्माख्यानयन्नाह दंसणचउपणनिद्दा वित्तिसमं दंसणावरणं ति इह
भीमो भीमसेन इति न्यायात्पदैकदेशे पदसमुदायोपचारात् वा दंसणचउ इति शब्देन दर्शनावरणचतुष्कं गृह्यते
तत्र दृष्टिर्दर्शनं दृश्यते परिच्छिद्यते सामान्यरूपं वस्तु अनेनेति वा दर्शनं तस्यावरणमाच्छादनमिति दर्शनावरणमिति तेषां
चउक्कं दर्शनावरणचतुष्कं तथा पण निद्द त्ति द्राकृ कुत्सितगतौ नितरां द्राति कुत्सितत्वमविस्पष्टत्वं गच्छतीति चैतन्यं
यासु ता निद्राः निद्रादय इत्यर्थः ताः पंच पंचेति पंचसंख्या निद्रा १ निद्रानिद्रा २ प्रचला ३ प्रचलाप्रचला ४ स्त्यानर्द्धिरूपाः ५
च निद्राः ततो दर्शनावरणचतुष्कं निद्रापंचकमिति नवधा दर्शनावरणं भवति किंविशिष्टमित्याह वित्तिसमं ति वेत्रिणा प्रा
तीहारेण समं तुल्यं वेत्रिसमं यथा राजानं द्रष्टुकामस्यापि अस्खलितस्य लोकस्य वेत्रिणा स्खलितस्य राज्ञो दर्शनं नोपजा
यते तथा दर्शनस्वभावस्याप्यात्मनो येनावृतस्य स्तंभकुड्यादिवदर्थस्य न दर्शनमुपजायते तद्वेत्रिस १६
मं दर्शनावरणं उक्तं च दंसणसीले जीवे दंसणघायं करेइ जं कम्मं तं पडिहारसमाणं दंसणवरणं भवे कम्मं १ जह रन्नो
पडिहारो अणभिप्पेयस्स सो उ लोगस्स रन्नो तह दरिसावं न देइ दट्ठुंपि कामस्स २ जह राया तह जीवो पडिहारस

मं उ दंसणावरणं तेणिह विग्घेणं नो पिच्छए सो घडाइयं ३ अथ दर्शनावरणचतुष्कं व्याचिख्यासुराह चक्खूदिट्ठिअचक्खू से
सिंदिय ओहिकेवलेहिं च दंसणमिह सामन्नं तस्सावरणं तयं चउहा १० इह चक्षुःशब्देन दृष्टिर्गृह्यते अचक्षुःशब्देन सेसिंदिय त्ति
चक्षुर्वर्जशेषेंद्रियाणि गृह्यंते ततश्चक्षुश्च अचक्षुश्च अवधिश्च केवलं च चक्षुरचक्षुरवधिकेवलानि तैः चक्षुरचक्षुरवधिकेव
रकू॥ लैश्चशब्दो ऽचक्षुः सेसिंदिय इत्यत्र मनसः संग्रहः चक्षुर्दर्शनमिह प्रवचने सामान्योपयोगमुच्यते यदुक्तं जं सामन्नग्गह
णं भावाणं नेव कट्टु आगारं अविसेसिऊण अत्थे दंसणमिय वुच्चए समए १ तस्सावरणं दर्शनावरणं तच्चतुर्धा भवति चक्षु
र्दर्शनावरणं १ अचक्षुर्दर्शनावरणं २ अवधिदर्शनावरणं ३ केवलदर्शनावरणं ४ मिति गाथाक्षरार्थः भावार्थस्त्वयं इह चक्षु
र्दर्शनं नाम चक्षुषा रूपसामान्यग्रहणं तस्यावरणं चक्षुर्दर्शनावरणं चक्षुःसामान्योपयोगावरणमिति यावत् अचक्षुषा
चक्षुर्वर्जशेषेंद्रियचतुष्टयेन मनसा च यद्दर्शनं स्वस्वविषयसामान्यपरिच्छेदे अचक्षुर्दर्शनं तस्यावरणमचक्षुर्दर्शनावरणं २ अ
वधिना रूपिद्रव्यमर्यादया दर्शनं सामान्यार्थग्रहणमवधिदर्शनं तस्यावरणमवधिदर्शनावरणं ३ केवलेन संपूर्णवस्तुतत्त्वा
वबोधविशेषरूपेण यद्दर्शनं वस्तुसामान्यांशग्रहणं तत्केवलदर्शनं तस्यावरणं केवलदर्शनावरणं ४ अत्राह ननु यथा अवधिद
र्शनावरणं कर्मोच्यते तथा मनःपर्यायज्ञानस्यापि दर्शनावरणं कर्म किमिति नोच्यते मनःपर्यायज्ञानं तथाविधक्षयोपशमपाट
वात्सर्वदा विशेषानेव गृह्णदुत्पद्यते न सामान्यमतस्तद्दर्शनाभावात्तदावरणं कर्मापि न भवति अत्र चक्षुर्दर्शनावरणोदये ए
कद्वित्रींद्रियाणां मूलत एव चक्षुर्न भवति चतुःपंचेंद्रियाणां तु सदपि चक्षुस्तथाविधे तदुदये विनश्यति तिमिरादिना वा अ
स्पष्टं भवति चक्षुर्वर्जशेषेंद्रियमनसां पुनर्यथासंभवमचक्षुर्दर्शनावरणोदयादिति उक्तं दर्शनावरणचतुष्कं संप्रति निद्रापंच
कमाह सुहपडिबोहा निद्दा निद्दानिद्दा य दुक्खपडिबोहा पयला ठिओवविट्ठस्स पयलपयला उ चंकमओ ११ सुखे

नाकृच्छ्रेण नखच्छोटिकामात्रेणापि प्रतिबोधो जागरणं स्वप्तुर्यस्यां स्वापावस्थायां सा सुखप्रतिबोधा निद्रा तद्विपाकवेद्या
कर्मप्रकृतिरपि कारणे कार्योपचारात् निद्रेत्युच्यते १ निद्रातोऽतिशायिनी निद्रा निद्रानिद्रेत्युच्यते २ मयूरव्यंसकादित्वा
न्मध्यपदलोपी समासः चः समुच्चये दुःखेन कष्टेन बहुभिर्घोलनाप्रकारैरत्यर्थमस्फुटतरीभूतचैतन्यत्वेन स्वप्तुः प्रतिबोधो
यस्यां सा दुःखप्रतिबोधा अत एव सुखप्रतिबोधनिद्रापेक्षया अस्या अतिशायिनीत्वं तद्विपाकवेद्या कर्मप्रकृतिरपि नि
द्रानिद्रेत्युच्यते प्रचलति विघूर्णते यस्यां स्वापावस्थायां प्राणी सा प्रचला सा च स्थितस्योर्ध्वस्थानेनोपविष्टस्यासीनस्य भवति त
द्विपाकवेद्या कर्मप्रकृतिरपि प्रचला ३ प्रचलातोऽतिशायिनी प्रचलाप्रचला इयं तु पुनश्चंक्रमतश्चंक्रमणमपि कुर्वतो
जंतोरुपतिष्ठते अतः स्थानस्थितस्वप्तृभवप्रचलामपेक्ष्य अतिशायिनीत्वमस्यास्तद्विपाकवेद्या कर्मप्रकृतिरपि प्रचला
प्रचला ५ अत्रैव पयलपयलेति ह्रस्वत्वं दीर्घह्रस्वौ मिथो वृत्तौ इति सूत्रेणेति ॥ ११ ॥ दिणचिंतियत्थकरणी थीणद्धी अद्धचक्कि
अद्धबला महुलित्तखग्गधारा लिहणं व दुहा उ वेयणियं १२ स्त्याना बहुत्वेन संघातमापन्ना गृद्धिरभिकांक्षा जाग्रदवस्था
ध्यवसितार्थसाधनविषया यस्यां स्वापावस्थायां सा स्त्यानगृद्धिः गौणादयः इति प्राकृतसूत्रेण थीणद्धीति निपात्यते अस्य
द्धि जाग्रदवस्थाध्यवसितमर्थमुत्थाय साधयति श्रूयते ह्येतदागमे कथानकं क्वचित्प्रदेशे कोपि कुंभकारो द्विरदेन दैवात् खली
कृतः स्त्यानर्द्ध्युदये वर्त्तमानः तस्मिन्नेव द्विरदे बद्धाभिनिवेशो रजन्यामुत्थाय तद्दंतयुगलमुत्पाट्य स्वोपाश्रयद्वारे क्षिप्त्वा
पुनः सुप्तवानित्यादि इमां च स्त्यानर्द्धिमाश्रित्याह दिणचिंतियत्थकरणी थीणद्धी त्ति दिने दिवसे चिंतितमुपलक्षणत्वान्निशा
यामपि चिंतितमध्यवसितमर्थं करोति साधयति निद्राप्रचलयोरभेदोपचारात् दिनचिंतितार्थकरणी रम्यादित्वः कर्तर्यन
ट्प्रत्ययः यद्वा स्त्याना पिंडीभूता ऋद्धिरात्मशक्तिरस्यामिति स्त्यानर्द्धिः एतत्सद्भावे हि प्रथमसंहननस्य केशवार्धबलसदृशी

शक्तिरेनां च स्त्यानर्द्धिमाश्रित्याह अद्धचक्कि अद्धबल त्ति अर्धचक्रिणो वासुदेवस्य बलापेक्षया अर्धबलं स्थाम यस्या उदये जंतोर्भवति सा अ
र्धचक्र्यर्धबला तद्विपाकवेद्या कर्मप्रकृतिरपि थीणद्धीति अत्र च कृतदर्शनावरणादिचतुष्कं मूलत एव दर्शनलब्धिमुपहंति निद्रापंचकं तु प्रा
प्ताया दर्शनलब्धेरुपघातकत्वात् आह च गंधहस्ती निद्रादयः समधिगताया एव दर्शनलब्धेरुपघाते वर्तंते दर्शनावरणचतुष्टयं तूद्गमो
च्छेदित्वात् समूलघातं हंति दर्शनलब्धिमिति निरूपितं द्वितीयं नवविधं दर्शनावरणं सांप्रतं तृतीयं कर्म वेदनीयापरपर्यायं व्याचिख्या
सुराह महुलित्तेत्यादि मधुना मधुररसेन लिप्ता खरंटिता खड्गस्य करवालस्य धारा तीक्ष्णाग्ररूपा तस्या जिह्वया लेहनमिव स्वादन
सदृशं द्विविधैव द्विप्रकारमेव साताऽसातभेदात् तुशब्द एवकारार्थः वेदनीयं वेद्यं कर्म भवति इह च मधुलेहनसन्निभं सातवेदनीयं खड्ग
धाराछेदनसमानमसातवेदनीयं उक्तं च महुआसायणसरिसो सायावेयस्स होइ उ विवागो जं असिणा तह छिज्जइ सो उ
विवागो असायस्स अथ गतिचतुष्टये सातासातस्वरूपमाह उसन्नं सुरमणुए सायमसायं तु तिरियनरएसु मज्जं व मोहणीयं दु
विहं दंसणचरणमोहा १३ उसन्नशब्दो देश्यवचनो बाहुल्यवाचको यथा उसन्नं देवा सायवेयणं वेयंति तत्र उसन्नं बाहुल्येन प्रा
येणेत्यर्थः सुराश्च देवाः मनुजाश्च मनुष्याः सुरमनुजं समाहारद्वंद्वस्तस्मिन् सुरमनुजे सुरेषु मनुजेषु इत्यर्थः सातं सातवेदनीयं भ
वति उसन्नग्रहणाच्च्यवनकाले अन्यदापि सुराणामसातोदयो मनुष्याणां च चारकनिरोधवधबंधनशीतातपादिभिर्मनुजानामप्य
सातमिति नरकभवाः प्राणिनो पुण्यचारान्नारकास्तत्तिर्यंचश्च नरकाश्च तिर्यक्नरकास्तेषु तिर्यक्षु नरकेष्वित्यर्थः उसन्नग्र
हस्येहापि संबंधः असातं तु पुनरर्थे व्यवहितसंबंधश्च स चैवं योज्यते तिर्यक्नरकेषु पुनरसातं प्रायो भवति उसन्नग्रहणात्के
षांचित्पट्टहस्तितुरंगादीनां नारकाणामपि जिनजन्मादिकल्याणकादिषु सातमप्युक्तं द्विविधं वेदनीयं कर्म तृतीयं
इदानीमष्टाविंशतिविधं मोहनीयं चतुर्थं कर्माभिधित्सुराह मज्जं व मोहणीयमित्यादि मद्यमिव मदिरासदृशं मोहय

DR. BHAU DAJI

तीति मोहनीयं कर्म प्रवचनीयादय इति कर्त्तर्य अनीयप्रत्ययः यथा हि मद्यपानमूढः प्राणी सदसद्विवेकविकलो भ
वति तथा मोहनीयेनापि कर्मणा मूढोऽजंतुः सदसद्विवेकविकलो भवति इति तच्च द्विविधं द्विभेदं कथमित्याह दंसणचरणमो
हत्ति दर्शनचरणमोहादिरूपं तत्र दर्शनं यथावस्थितवस्तुपरिच्छेदः तन्मोहयतीति कर्मणोऽण् इत्यण्प्रत्यये दर्शन
मोहं चरंति परमपदं गच्छंति जीवाः अनेनेति चरणं चारित्रं तन्मोहयतीति चरणमोहमिति अथ दर्शनमोहं व्याख्यानयन्ना
ह ॥ गा ॥ दंसणमोहं तिविहं सम्मं मीसं तहेव मिच्छत्तं सुद्धं अद्धविसुद्धं अविसुद्धं तं हवइ कमसो १४ दर्शनमोहं त्रिवोक्तरू
पं त्रिविधं त्रिप्रकारं भवति सम्मंति सम्यक्त्वं मिश्रं सम्यग्मिथ्यात्वं एतदेव स्वरूपतः प्राह शुद्धमर्द्धविशुद्धमविशुद्धं त
द्भवति क्रमशः क्रमेणेति अयमत्रार्थः मिथ्यात्वपुद्गलकदंबकं मदनकोद्रवन्यायेन शोधितं सद्विकाराजनकत्वेन शु
द्धं सम्यक्त्वं भवति तदेव किंचिद्विकारजनकत्वेनार्द्धविशुद्धं मिश्रं तदेव सर्वथाप्यविशुद्धं मिथ्यात्वमिति उक्तं च तथा स्वेहदीप
स्य स्वच्छाभ्रपटलैर्गृहं न करोत्यावृतिं क्वचिदेवमेतद्रुचेरपि १ एकपुंजी द्विपुंजी वा सत्क्रमात् दर्शयित्वा स एव स्याच्चैव मिथ्या
दृष्टिरकीर्तितः २ अत्राह सम्यक्त्वं कथं दर्शनमोहनीयं स्यात् न हि तद्दर्शनं मोहयति तस्यैव दर्शनत्वात् उच्यते मिथ्यात्व
प्रकृतित्वेनातिचारसंभवात् अपरामिकादिमोहत्वाच्च दर्शनमोहनीयमिति इत्युक्तं संक्षेपतस्त्रिविधं दर्शनमोहं संप्र
त्येतदेव व्याचिख्यासुः अथ सम्यक्त्वस्वरूपमाह जिय १ अजिय २ पुन्न ३ पावा ४ सव ५ संवर ६ बंध ७ मुक्ख ८ निज्जरणा ९
जेणं सद्दहइयं सम्मं खइगाइ बहुभेयं १५ जीवश्चाजीवश्च पुण्यं च पापं च आस्रवश्च संवरश्च बंधश्च मोक्षश्च निर्जरणं १८
च निर्जरा एतानि नवतत्त्वानि येन कर्मणा श्रद्दधाति प्रत्येति तत्सम्यक्त्वमुच्यते तत्र नवतत्त्वान्यमूनि जीवाजीवा पुन्नं पा
वासव संवरो य निज्जरणा बंधो मुक्खो य तहा नवतत्ता हुंति नायव्वा १ एगविह दुविह तिविहा चउव्विहा पंचछव्विहा जी

वा चेयणतसइयरेहिं वेयगईकरणकाएहिं २ एगिंदिय सुहुमियरा बितिचउ असन्नि सन्नि पंचेंदी अपज्जत्ता प
ज्जत्ता चउदस भेया अहव जीवा ३ पणथावर सुहुमियरा परित्तवण सन्न सन्नि विगलतिगं इइ सोलस अपज्जत्ता पज्जत्ता
जीव बत्तीसा ४ धम्माधम्मागासाय दव्वदेसपएस तिविहा गइठाणवगाहगुणा कालो अअरूविणो दसहा ५ खंधा
देसपएसा परमाणू पुग्गला चउह जीवा जीवं विणाइ चेयण अकिरिया सव्वगयमगं ६ कालो माणुसलोए जिय धम्माध
म्म लोयपरिमाणं सव्वे दव्वे अरूवा कालविणा अत्थिकायाय ७ धम्माइगासा कालो परिणामि एइहत्ता वेउदय परिणामि
पुग्गला जसव्वे उपुण जीवा ८ जीवाजीवतत्त्वं तिरिनरसुराउ उच्चं सायं परिघाय आयवुज्जोयं जिणऊसासनिमाणं
पणिंदिय वयरुसभ चउरंसं ९ तसदस चउवन्नाई सुरमणुदुग पंचतणु उवंगतिगं अगुरुलहु पढमखगई बायाल १
पुन्नपगईउ १० पुण्यतत्त्वं नाणंतराय पणपण नवबीए नियअसाय मिच्छत्तं थावरदस नरयतिगं कसायपणवीस ति
रियदुगं ११ चउजाई उवघायं अपढमसंघयणखगइसंठाणा वन्नाइ असुहचउरो बासीया पावपयडीउ १२ पापतत्त्वं
इंदियकसाय अव्वय किरिया पण ५ चउर ४ पंच ५ पणवीसा २५ जोगतिगं बायाला आसवतेयाइमा किरिया १३ काइ
य अहिगरणीया पाउसिया पारितावणी किरिया पाणाइवाय रंभिय परिग्गहिया माइवत्तीय १४ मिच्छादंसणवित्ती अ
पच्चक्खाणा दिट्ठिपुट्ठीय पाडुच्चिय सामंतोवणीय नेसत्थि साहत्थी १५ आणवणि वियारणिया अणभोगा अणवकंखप
च्चइया अन्ना पओगसमुदाण पिज्जदोसेरियावहिया १६ आश्रवतत्त्वं भावणा १२ चरण ५ परीसह २२ समिई ५ जइधम्म
१० गुत्ति ३ बारस उ पंचदुवीसा पणदस तिय संवर भेय सगवन्ना १७ संवरतत्त्वं बारसविहं तवो निज्जरा उ अहवा अक १
मसकामा पयइ ठिइ अणुभाग पएस भेया चउह बंधो १८ निर्जराबंधतत्त्वे संतपयपरूवणया दव्वपमाणं च खित्त

पुरिसा णपुं कालो अ अंतरं तारणा जाव अप्पा बज्झंचेव १५ जिण १ अजिण २ तित्थ ३ अतित्था ४ गिह ५ अन्न ६ सलिंग ७
थी ८ नर ९ णपुंसा १० पत्तेय ११ सयंबुद्धा १२ बुद्धबोहिय १३ इक्क १४ णिक्काय १५ २० इति मोक्षतत्त्वं ९ इत्युक्तं संक्षेपतो नवतत्त्व
स्वरूपं विस्तरस्तु श्रीधर्मरत्नटीकातो ऽवसेयं तदेवं येन कर्मणो ऽमूनि नवतत्त्वानि श्रद्दधाति तत्सम्यक्त्वं किंविशिष्ट
खइयाइबहुभेयंति क्षायिकमादौ येषां ते क्षायिकादयः क्षायिकादयो बहवो भेदाः प्रकारा यस्य तत्क्षायिकादिब
हुभेदं इह दिग्मात्रं दर्शितं औपशमिकसास्वादनक्षायोपशमिकग्रहणं एतद्व्याख्यानगाथा खीणे दंसणमोहे तिविहं
मि विखाइयं सवे सम्म वेयगमिहसबो इत्थ चरमिल्लयपुग्गलग्गासं १ उवसमसेढिगयस्स उ होइ उवसामियं उस
म्मत्तं जो वा अकयतिपुंजो अखवियमिच्छो लहइ सम्मं २ उवसमसम्मत्ताउ वडओ मिच्छं अपावमाणस्स सासायणसम्मत्तं
तयंतरालम्मि छावलियं ३ मिच्छत्तं उदिन्नं तं खीणं अणुदियं च उवसंतं मीसीभावपरिणयं वेइज्जंतं खउवसमं मिस्तुक्तं स
म्यक्त्वं मिश्रमाह मीसा न रागदोसो जिणधम्मे अंतमुहू जहा अन्ने नालियरदीवमणुणो मिच्छं जिणधम्मविवरीयं १७ मि
श्रात् मिश्रोदयात् जीवस्य जिनधर्मे जिनधर्मस्योपरि न रागो मतिदौर्बल्यादिना एकान्तनिश्चयात्मकश्रद्धानरूपः प्रीतिवि
शेषः न च द्वेषः एकान्तविप्रतिपत्तिपरिणामोपजात निन्दात्मको ऽप्रीतिरूपः मिश्रोदयश्च अंतमुहु त्ति अन्तमुहूर्त्तं भिन्नमुहूर्त्तं का
लं यावद्भवतीत्यर्थः अथ कथं मिश्रोदया जिनधर्मे न रागो न द्वेष इत्याशंकाद्दृष्टान्तमाह जहा अन्ने इत्यादि यथैवतुदाहरणोपम्य
से अन्ने इत्यादौ यथा नालिकेरद्वीपमनुजस्य नालिकेरद्वीपवासिपुरुषस्य न रागो न च द्वेषो ऽदृष्टाश्रुतत्वेन उक्तं च इह खलु एक १८
इक्कमूलो जहा नालिकेरदीववासिस्स अइछुहा इयस्स वि पुरिसस्स इत्थ उवणए ओयणाइए अणेगविहे विढोइए तस्स आहा
रस्स उवरिं न रई न य निंदा जेण कारणेणं सो उयणाईओ आहारो न कयाइ दिट्ठो नावि सुओ एवं सम्मामिच्छद्दिट्ठिस्स वि जीव

इ पइ ज्झाणं उवरिं न रई न य निंदा इत्यादि उक्तं मिश्रं संप्रति मिथ्यात्वमाह मिच्छं जिणधम्मविवरीयं ति मिच्छं ति मिथ्यात्वं जिनध
र्माद्विपरीतं विपर्यस्तं ज्ञेयमिति शेषः अत्रायमाशयः रागद्वेषमोहादिकलंकांकिते अदेवे ऽपि देवबुद्धिः धर्मज्ञो धर्मकर्त्ता च सदा
धर्मपरायणः सत्त्वानां धर्मशास्त्रार्थदेशको गुरुरुच्यते इत्यादिप्रतिपादितगुरुलक्षणविलक्षणे अगुरावपि गुरुबुद्धिः संयमसूनृ
तशौचब्रह्मसत्यादिस्वरूपधर्मप्रतिपक्षे अधर्मे ऽपि धर्मबुद्धिरिति मिथ्यात्वं उक्तं मिथ्यात्वं तद्भणनेनाभिहितं त्रिविधमपि द
र्शनमोहनीयं इदानीं चारित्रमोहनीयमभिधित्सुराह ॥ सोलसकसायनवनोकसाय दुविहं चरित्तमोहणियं अण अप्प
च्चक्खाणा पच्चक्खाणा य संजलणा १७ द्विविधं द्विभेदं चारित्रमोहनीयं भवति तद्यथा सोलसकसायत्ति कषन्ति हिंसन्ति परस्प
रमस्मिन् प्राणिन इति कषः संसारः कषमयन्ते गच्छन्त्येभिर्जन्तव इति कषायाः यद्वा कषस्याया लाभो येभ्यस्ते कषायाः क्रोध
मानमायालोभाः तत्र क्रोधो ऽक्षान्तिपरिणतिरूपः मानो जात्यादिसमुत्थो ऽहंकारः माया परवञ्चनात्मिका लोभो ऽसंतोषा
त्मको गृद्धिपरिणामः ततः षोडशसंख्याः कषायाः कषायमोहनीयमुच्यते विसर्गलोपश्च प्राकृतत्वात् एवमुत्तरत्रापि नव
नोकसायत्ति कषायैः सहचरा नोकषायास्ते च नव हास्यादयः षट् त्रयो वेदाः अत्र नोशब्दः साहचर्यवाची एषां हि केवला
नां न प्राधान्यमस्ति किं तु कषायैरनन्तानुबन्ध्यादिभिः सहोदयं यान्ति तद्विपाकसदृशमेव विपाकं दर्शयन्ति बुधग्रहवदन्यसं
सर्गमनुवर्त्तन्त इति भावः कषायोद्दीपनाद्वा नोकषायाः उक्तं च कषायसहवर्त्तित्वात् कषायप्रेरणादपि हास्यादिनवकस्यो
क्ता नोकषायकषायता १ ततो नवसंख्या नोकषायाः नोकषायमोहनीयमुच्यते अथ यथोद्देशं निर्देश इति न्यायात्प्रथमं क
षायमोहनीयं व्याख्यानयन्नाह अण अपच्चक्खाणेत्यादि अणत्ति अनन्तानुबन्धिनस्तत्रानन्तं संसारमनुबध्नन्तीत्येवंशीला अनन्ता
नुबन्धिनः यदुक्तं वि यस्मादनन्तं संसारमनुबध्नन्ति देहिनां ततो ऽनन्तानुबन्धीति संज्ञाद्येषु निवेशिता १ ते च चत्वारः क्रोधमानमा

याल्लोभाः यद्यपि च तेषां शेषकषायोदयरहितानामुदयो नास्ति तथाप्यवश्यमनंतसंसारमूलकारणमिथ्यात्वोदयाक्षे
पकत्वादेषामेवानंतानुबंधित्वव्यपदेशः शेषकषायास्तु नावश्यं मिथ्यात्वोदयमाक्षिपंत्यतस्तेषामुदययोगपद्येप्यस्य
पि नायं व्यपदेशः इत्यसाधारणमेवैतन्नामेति तथा न विद्यते स्वल्पमपि प्रत्याख्यानं येषामुदयात्तेऽप्रत्याख्यानाः यदवादि
नाल्पमप्युत्सहेद्येषां प्रत्याख्यानमिहोदयात् अप्रत्याख्यानसंज्ञातो द्वितीयेषु निवेशिता १ ते च चत्वारः क्रोधमानमायालो १
भाः तथा प्रत्याख्यानं सर्वविरतिरूपमावृण्वंतीति प्रत्याख्यानावरणाः यदवादि सर्वसावद्यविरतिः प्रत्याख्यानमिहोच्य
ते तदावरणसंज्ञातस्तृतीयेषु निवेशिता १ ते च चत्वारः क्रोधमानमायालोभाः तथा परीषहोपसर्गोपनिपाते सति चारित्रि
णमपि संज्वालयंतीषदर्थे सम् ईषज्ज्वलयंति दीपयंतीति संज्वलनाः यदभ्यधायि परीषहोपसर्गोपनिपाते यतिमप्यमी समीष
त्संज्वलयंते यत्तेन संज्वलनाः स्मृताः ते च चत्वारः क्रोधमानमायालोभाः तदेवं चत्वारश्चतुष्ककाः षोडश भवंतीत्युक्ताः षोड
श कषायाः संप्रत्येतेषामेव विशेषतः किंचित्स्वरूपं प्रतिपिपादयिषुराह ॥ १८ ॥ जाजीववरिसचउमासपक्खगा नरयतिरि
यनरा अमरा सम्माणुसव्वविरई अहखायचरित्तघायकरा १८ जाजीव त्ति यावज्जीवितवर्तमानाध्वस्थावारकदे
वकुलैवमेवेव इति प्राकृतत्वेनैवकारलोपात् यावज्जीवं च वर्षं च चतुर्मासं च पक्षश्च यावज्जीववर्षचतुर्मासपक्षास्तान् गच्छं
तीति यावज्जीववर्षचतुर्मासपक्षगाः नाम्नो गमः खड्डेति विहायसस्तु विह इति डप्रत्ययः इदमुक्तं भवति यावज्जीवानुगामि
नो अनंतानुबंधिनः वर्षगा अप्रत्याख्यानावरणाः चउमासगाः संज्वलनाः इदं च फरुसवयणेण दिणतवं अहिक्खिवंतो य २०
हणइ मासतवं इत्यादिवत् व्यवहारनयमाश्रित्योच्यते अन्यथा हि बाहुबलिप्रभृतीनां पक्षादिपरतोपि संज्वलनाद्यवस्थि
तिः श्रूयते अन्येषां च संयतादीनां मासवर्षादिकाले प्रत्याख्यानावरणानामप्रत्याख्यानावरणानामनंतानुबंधिनां चांतर्मुहू

र्त्तादिकं कालमुदयः श्रूयते इति तथा नरकगतिकारणत्वादनंतानुबंधिनः कषाया अपि नरका भवंतीति कारणे कार्योपचाराद्य
था आयुर्घृतं नड्वलोदकं पादरोग इति एवं तिर्यग्गतिकारणत्वात्तिर्यंचोऽप्यप्रत्याख्यानावरणाः नरगतिकारणत्वान्नराः
प्रत्याख्यानावरणाः अमरगतिकारणत्वादमराः संज्वलनाः एतदुक्तं भवति अनंतानुबंध्युदये मृतो नरकगतावेव गच्छ
ति अप्रत्याख्यानावरणोदये मृतस्तिर्यक्षु प्रत्याख्यानावरणोदये मृतो मनुष्येषु संज्वलनोदये पुनर्मृतोऽमरेष्वेव गच्छति उ
क्तं चायमर्थः पश्चानुपूर्व्याऽन्यत्रापि पक्खचउमासवच्छर जावज्जीवाणुगामिणो कमसो देवनरतिरियनारय गइसाहणहेय
वो नेया १ इदमपि व्यवहारनयमधिकृत्योच्यते अन्यथा हि अनंतानुबंध्युदयवतामपि मिथ्यादृशां केषांचिदुपरितनग्रैवेयके
षूत्पत्तिः श्रूयते प्रत्याख्यानावरणोदयवतां देशविरतानां देवगतिः अप्रत्याख्यानावरणोदयवतां च सम्यग्दृष्टिदेवा
नां मनुष्यगतिः तथा सम्मं ति सम्यक्त्वं च अणुसव्वविरइ त्ति इति विरतिशब्दस्य प्रत्येकं संबंधात् अणुविरतिश्च देशविरतिः सर्वविरतिश्च
यथाख्यातचारित्रं सम्माणुसव्वविरति यथाख्यातचारित्राणि तेषां घातो विनाशः सम्माणुसव्वविरति यथाख्यातचारित्रघातस्तं कु
र्वंतीत्येवंशीलाः सम्माणुसव्वविरतियथाख्यातचारित्रघातकराः एतदुक्तं भवति अनंतानुबंधिनः कषायाः सम्यक्त्वघातकराः यदु १
क्तं श्रीभद्रबाहुस्वामिपादाः पढमिल्लुयाण उदए नियमा संजोयणाकसायाणं सम्मद्दंसणलंभं भवसिद्धीया वि न लहंति १ अप्र
त्याख्यानावरणा देशविरतेर्घातकराः न सम्यक्त्वस्येत्यर्थः यदाहुः श्रीभद्रबाहुपादाः बीयकसायाणुदए अपच्चक्खाणावरणना
मधिज्जाणं सम्मद्दंसणलंभं विरयाविरयं न उ लहंति २ प्रत्याख्यानावरणास्तु सर्वविरतेर्घातकाः सामर्थ्यान्न देशविरतेः उक्तं च तइय
कसायाणुदए पच्चक्खाणावरणनामधिज्जाणं देसिक्कदेसविरयं चरित्तलंभं न उ लहंति ३ संज्वलनास्तु पुनर्यथाख्यातचारित्रस्य घा
तकराः न सामान्यः सर्वविरतेः उक्तं च श्रीमदाराध्यपादैः मूलगुणाणं लंभं न लहइ मूलघाइणं उदए संजलणाणं उदए न लहइ

रणं अरक्षकायमिति ४ अथ जलरेखादिदृष्टांतेन किंचित्स विशेषं क्रोधादिकषायाणां स्वरूपं व्याचिख्यासुराह ॥ गाथा ॥ जलरेणु
पुढविपव्वय राईसरिसो चउव्विहो कोहो तिणिसलयाकट्ठट्ठिय सेलत्थंभोवमो माणो ॥१९॥ इह राजिशब्दः सदृशशब्दश्च प्रत्येकं
संबध्यते ततो जलराजिसदृशः स्वसंज्वलनः क्रोधः यथा यष्ट्यादिना जलमध्ये राजी रेखा क्रियमाणा शीघ्रमेव निवर्त्तते
तथायं कथमप्युदयप्राप्तोपि सत्वरमेव व्यावर्त्तते स संज्वलनक्रोधोऽभिधीयते रेणुराजिसदृशः प्रत्याख्यानावरणः क्रो
धः अयं हि संज्वलनक्रोधापेक्षया तीव्रत्वात् रेणुमध्यविहितरेखावच्चिरेण निवर्त्तते इति भावः पृथ्वीराजिसदृशोऽप्रत्या
ख्यानावरणः यथा स्फुटितपृथ्वीसंबंधिनी राजी कचवरादिभिः भरिता कष्टेनापनीयते एवमेषोपि प्रत्याख्यानावरणापे
क्षया कष्टेन निवर्त्तते इति भावः विदलितपर्वतराजिसदृशः पुनरनंतानुबंधी क्रोधः कथमपि निवर्त्तयितुमशक्यत्वात् इ
त्यर्थः उक्तश्चतुर्विधः क्रोधः इदानीं मानोऽभिधीयते तत्र तिनिशलतोपमः संज्वलनो मानः यथा तिनिशो वनस्पतिवि
शेषस्तत्संबंधिनी लता सुखेनैव नम्यते एवं यस्य मानस्योदये जीवः स्वाग्रहं मुक्त्वा सुखेनैव नमति स संज्वलनो मानः य
था स्तंभं किमपि काष्ठमग्निस्वेदादिभिरुपायैः कष्टेन नम्यते एवं यस्य मानस्योदये जीवोपि कष्टेन नमति स काष्ठोपमः प्र
त्याख्यानावरणो मानः यथास्थिस्तंभं बहुभिरुपायैरतितरां महता कष्टेन नम्यते एवं यस्य मानस्योदये जीवोऽप्यति
तरां महता कष्टेन नमति सोऽस्थ्युपमोऽप्रत्याख्यानावरणो मानः शिलायां घटितः शैलस्तंभः सोऽस्ति अस्य शैलस्तंभः तदुप
मस्त्वनंतानुबंधी मानः कथमप्यनमनीयत्वात् उक्तश्चतुर्विधो मानः अथ मायालोभौ व्याख्यानयन्नाह ॥ गाथा ॥ माया २१
वलेहिगोमुत्ति मिंढसिंगघणवंसिमूलसमा लोहो हलिद्दखंजण कद्दमकिमिरागसामाणो २० माया अवलेखिकास
मा संज्वलनी धनुरादीनां उल्लिख्यमानानां या अवलेखिका वक्रत्वस्वरूपा पतति यथासौ कोमलत्वात् सुखेनैव प्रांजली

क्रियते एवं यस्या उदये समुत्पन्नापि हृदये कुटिलता सुखेनैव निवर्त्तते सा संज्वलनी माया गोर्बलीवर्दस्य मार्गे गच्छ
तो वक्रतया पतिता मूत्रधारा गोमूत्रिका अभिधीयते यथासौ शुष्का पवनादिभिः किमपि कष्टेनापनीयते एवं यदुक्ता नि
ता कुटिलता कष्टेनापगच्छति सा गोमूत्रिकासमा प्रत्याख्यानावरणी माया एवं मेषशृंगसमायामप्रत्याख्याना
वरणमायायां सावना कार्या नवरमेषा कष्टतरनिवर्त्तनीया घनवंशीमूलसमा त्वनंतानुबंधिनी माया यथा निबिडवंश १
मूलस्य कुटिलता किल वह्निनापि न दह्यते एवं यदुक्ता नितान्तं मनः कुटिलता कथमपि न निवर्त्तते सानंतानुबंधिनी माये
त्यर्थः तथा लोभो हरिद्रारागसमानः संज्वलनः यथा वाससि हरिद्रारागः सूर्यातपस्पर्शादिमात्रादेव निवर्त्तते तथा यम
पीत्यर्थः कष्टनिवर्त्तनीयो वस्त्रविलग्नः प्रदीपादिखंजनसमानः प्रत्याख्यानावरणो लोभः कष्टतरापनेयो वस्त्रविलग्न निबि
डकर्दमसमानोऽप्रत्याख्यानावरणो लोभः कृमिरागरक्तपट्टसूत्ररागसमानः कथमप्यपनेतुमशक्योऽनंतानुबंधी लोभः
इत्युक्तं कषायमोहनीयं अथ नोकषायमोहनीयं व्याख्यायते तच्च द्विविधं हास्यादिषट्कं वेदत्रिकं च तत्र हास्यादिषट्कं व्या
ख्यानयन्नाह ॥ गाथा ॥ जस्सुदया होइ जिए हासरईअरइसोगभयकुच्छा सनिमित्तमन्नहा वा तं इह हासाइमोहणियं २१
यस्य कर्मण उदयाद्विपाकाद्भवति जायते जीवे जीवस्य हासो रतिः अरतिः शोको भयं कुत्सा जुगुप्सा हास्यादिशब्देषु सिलोपः
प्राकृतत्वात् सनिमित्तं सकारणं अन्यथा अनिमित्तं निःकारणं वा शब्दः पक्षांतरद्योतकः तदिह प्रवचने हास्यादिमोहनीयं
आदिशब्दाद्रतिमोहनीयं अरतिमोहनीयं शोकमोहनीयं भयमोहनीयं जुगुप्सामोहनीयं च एते इति शेषगाथार्थः भा
वार्थः पुनरयं यदुदयात् सनिमित्तमनिमित्तं वा जीवस्य हासो हास्यं भवति तत् हास्यमोहनीयं १ यदुदयात् सनिमित्तमनि
मित्तं वा बाह्याभ्यंतरेषु वस्तुषु जीवस्य रतिः प्रमोदो भवति तद्रतिमोहनीयं २ यदुदयात्सनिमित्तमनिमित्तं वा जीवस्य बाह्य १

संतरेषु वस्तुषु अरतिः अप्रीतिर्भवति तदरतिमोहनीयं ३ यदुदयात्सनिमित्तमन्यथा वा जीवस्य उरस्ताडनाक्रं-
दनपरिदेवनदीर्घनिःश्वासभूलुठनरूपः शोको भवति तत् शोकमोहनीयं ४ यदुदयात्सनिमित्तमनिमित्तं वा तथारू-
पस्वसंकल्पतो जीवस्य इह१परलोया२दाण३मकम्हा४आजीव५मरण६मसिलोए७ इति गाथार्द्धोक्तं सप्तविधं भयं
भवति तद्भयमोहनीयं ५ यदुदयात्सनिमित्तमन्यथा वा जीवस्याशुभवस्तुविषया जुगुप्सा व्यलीकं भवति तज्जुगु-
प्सामोहनीयं ६ तत्कंदर्पाद्यादिषट्कं संप्रति वेदत्रिकमाह पुरिसित्थितदुभयं पइ अहिलासो जव्वसा हवइ सोउ थीनरनपु-
वेउदओ फुंफमतणनगरदाहसमो २२ प्रतिशब्दः प्रत्येकं योज्यते पुरुषं प्रति स्त्रियं प्रति तदुभयं प्रति स्त्रीपुरुषं प्रतीत्यर्थः
यद्वशात्तस्य रतं अथवा अभिलाषो वांछा भवति जायते उशब्दः परस्परापेक्षया पुनरर्थे स्त्री योषित् नरः पुरुषः नपुंसकं नपुं-
सकं तैर्वेद्यते अनुभूयते स्त्रीनरनपुंसकवेदस्तस्योदयः स्त्रीनरनपुंवेदोदयो ज्ञेय इति शेषः फुंफमा करीषं तृणानि प्र- ॥करीषाग्नि
तीतानि नगरं पुरं फुंफमा च तृणानि च नगरं च तेषां दाहस्तेन समः तुल्य इति गाथाक्षरार्थः भावार्थस्त्वयं यद्वशात् स्त्रियाः पु-
रुषं प्रति अभिलाषो भवति यथा पित्तवशान्मधुरद्रव्यं प्रति स फुंफमादाहसमः यथा फुंफमा चाल्यते तथा ज्वलति दह-
ति च एवमंगनापि यथा यथा संस्पृश्यते पुरुषेण तथा तथा अस्या अधिकतरोऽभिलाषो जायते अभुज्यमाना यां तु छन्नकारी-
षदाहतुल्योऽभिलाषो भवति मंद इत्यर्थः इति स्त्रीवेदोदयः यद्वशात्पुरुषस्य स्त्रियं प्रति अभिलाषो भवति यथा श्ले-
ष्मवशादम्लं प्रति स पुनस्तृणदाहसमो यथा तृणानां दाहो झगिति ज्वलनं झटिति विध्यापनं भवति एवं पुंवेदोदये स्त्रिया सेवनं २२
प्रति उत्सुकोऽभिलाषो भवति निवर्त्तते च तत्सेवने शीघ्रमिति नरवेदोदयः २ यद्वशान्नपुंसकस्य तदुभयं प्रत्यभिला-
षो भवति यथा पित्तश्लेष्मवशान्मार्जिकां प्रति स पुनर्नगरदाहसमो यथा नगरं दह्यमानं महता कालेन दह्यते विध्याति
॥

च महता च एवं नपुंसकवेदोदयेपि स्त्रीपुरुषयोः सेवनं प्रत्यभिलाषोऽतिरेको महतापि कालेन निवर्त्तते नापि सेवने तृप्तिरि-
ति नपुंसकवेदोदयः ३ अभिहितं वेदत्रिकं तदभिधानेनाभिहितं नवधा नोकषायमोहनीयं तदभिधानेन च समर्थि-
तं चारित्रमोहनीयमित्युक्तमष्टाविंशतिविधं चतुर्थं मोहनीयं कर्म इदानीं पंचममायुःकर्म व्याचिख्यासुराह ॥
सुरनरतिरिनिरयाऊ हडिसरिसं नामकम्म चित्तिसमं बायालतिनवइविहं तिउत्तरसयं च सत्तट्ठी २३ आयुःशब्दः प्र-
त्येकं योज्यते ततश्च सुष्ठु राजंते इति सुराः यद्वा सुर ऐश्वर्यदीप्त्योः सुरंति विशिष्टमैश्वर्यमनुभवंति दिव्याभरणकां-
त्यादिना शरीरकांत्या च दीप्यंते इति सुराः यद्वा सुष्ठु राति ददति प्रणतानामीप्सितमर्थं लवणाधिपसुस्थितदेववत् लवण-
जलधौ मार्गं जिनादीनामिति सुराः देवास्तेषामायुः सुरायुः येन तेषु भवस्थितिर्भवति नृणंति निश्चिन्वंति वस्तुतत्त्वमिति
नरा मनुष्यास्तेषामायुर्नरायुस्तद्भवावस्थितिहेतुः २ तिरिश्चि प्राकृतत्वात् तिरोंचंति गच्छंतीति तिर्यंचः व्युत्पत्तिनिमित्तं चै-
तत् प्रवृत्तिनिमित्तं तु तिर्यग्गतिनाम एते चैकेंद्रियादयस्ततः तिरश्चामायुस्तिर्यगायुर्येन तेषु स्थीयते नरान् उपज-
रणत्वान्निःश्रेयोपि अत्र पापकारिणः कायंतीव आक्रंदंतीवेति नरका नरकावासा तत्रोत्पन्ना जंतवोपि नरकाः नरके १
वा विद्यते येषां ते अर्शआदित्वादप्रत्यये नारकास्तेषामायुर्नरकायुर्येन तेषु ध्रियंते एतच्चायुर्हडिसदृशं भवति तत्र हडि-
खोडकस्तेन सदृशं तत्तुल्यं यथा हि राजादिना हडौ क्षिप्तः कश्चिच्चोरादिस्ततो निर्गमनं मनोरथं कुर्वाणोपि विवक्षितं
कालं यावत्तया ध्रियते तथा नारकादिस्ततो निःक्रमितुमना अपि तदायुषा ध्रियते इति हडिसदृशमायुः व्याख्यातं चतु-
र्विधं पंचममायुःकर्म संप्रति षष्ठं नामकर्माभिधित्सुराह नामकम्म चित्तिसममित्यादि नामकर्म भवति चित्तिसमं चि-
त्रं चित्रकर्म तत्कर्तृत्वतया क्रियते यस्य स चित्री चित्रकरस्तेन समं सदृशं चित्रिसमं यथा हि चित्री चित्रं चित्रप्रकारं विविध

वर्णादिकैः करोति तथा नामकर्म्मापि जीवो नारकोयं तिर्यग्योनिकोयं एकेंद्रियोयं द्वींद्रियोयमित्यादिव्यपदेशैरनेक
धा करोति चित्रिसममिदमिति एतच्चानेकभेदं कथमित्याह बायालतिनवइविहं तिउत्तरसयं च सत्तठीति अत्र वि
धाशब्दस्य प्रत्येकं योगात् द्विचत्वारिंशद्विधं यद्वा त्रिनवतिविधं यद्वा त्र्युत्तरशतविधं अथवा सप्तषष्टिविधं चशब्दः
समुच्चये अवस्थितसंबंधश्च स्वबुद्ध्यैव योजितः अथ नामकर्म्मणो द्विचत्वारिंशतं भेदान् प्रविकटयिषुराह ॥ गइ
जाइतणुउवंगा बंधणसंघायणाणि संघयणा संठाणवन्नगंधरसफासअणुपुव्विविहगगई २४ इह नाम्नः प्रस्तावा
त्सर्वत्रगत्यादिषु नामेत्युपस्कारः कार्यस्तथाहि गतिनाम जातिनाम तनुनाम उपांगनाम ग्रंथाग्रं १००० बंधननाम संघातन २
म संहनननाम संस्थाननाम वर्णनाम गंधनाम रसनाम स्पर्शनाम आनुपूर्वीनाम विहायोगतिनामेति तत्र गम्यते तथाविध
कर्म्मसचिवैर्जीवैः प्राप्यत इति गतिः नारकादिः पर्यायपरिणतिः तद्विपाकवेद्या कर्म्मप्रकृतिरपि गतिः सैव गतिनाम
नाम १ जननं जातिरेकेंद्रियादिव्यपदेशेन पर्यायेण जीवानामुत्पत्तिस्तद्भावनिबंधनत्वं तन्नाम जातिनाम तनोति जंतुरात्म
प्रदेशान् विस्तारयति यस्यां सा तनुस्तद्धेतुकं कर्म्मापि तनुः सैव नाम तनुनाम शरीरनामेत्यर्थः ३ उवंगत्ति उपलक्षणत्वा
दंगोपांगनाम तत्रांगं औष्ठिक्रिप्रमुखाणां तिगतिस्थितिधातो रूपं ते गतेर्लभ्यंते शरीरस्य व्यक्तीभवंतीति जन्मप्रस्तावात्संस्कृते
त्यंगानि शिरउरउदरादीनि वक्ष्यमाणस्वरूपाणि तदवयवभूतानि अंगुल्यादीन्युपांगानि शेषाणि तदवयवभू
तान्यंगुलिपर्वरेखादीन्यंगोपांगानि ततश्चांगानि चोपांगानि च अंगोपांगानि अंगोपांगानि च अंगोपांगानि चे २३
ति द्वंद्वस्यादावसंरंभेय इति एकशेषे च कृते अंगोपांगानीति तत्र यद्वशादौदारिकशरीरतयोपात्ता अपि पुद्गला अंगो
पांगविभागेन परिणमंति तत्कर्म्मांगोपांगनाम ४ बध्यंते गृह्यमाणपुद्गलाः पूर्वगृहीतपुद्गलैः सह श्लिष्टाः क्रि
यंते येन तद्बंधनं तदेव नाम बंधननाम ५ स्वत एव घ्नंति संघातमापद्यंते ततस्तैः संघातः संतः संघात्यंते प्रत्येकं शरी
रपंचकप्रायोग्याः पुद्गलाः पिंड्यंते येन तत्संघातनं तदेव नाम संघातननाम ६ संहननं तथा च नाम मनेकार्थत्वात् दृढीक्रि
यंते शरीरपुद्गलाः कपाटादयो लोहपट्टिकादिनेव येन तत्संहननं तदेव नाम संहनननाम ७ संतिष्ठंते विशिष्टावयवर
नात्मिकया शरीराकृत्या जंतवो भवंति येन तत्संस्थानं तदेव नाम संस्थाननाम ८ वर्ण्यते अलंक्रियते अनेनेति वर्णः कृ
ष्णादिः जंतुशरीरे कृष्णादिवर्णहेतुकं नामकर्म्मापि वर्णनाम ९ गंध्यते आघ्रायते इति गंधः तद्धेतुत्वान्नामकर्म्मापि
गंधनाम १० रस्यते आस्वाद्यत इति रसस्तिक्तादिः जंतुशरीरेतिक्तादिरसहेतुकं कर्म्मापि रसनाम ११ स्पृश्यत इति स्पर्शः
कर्कशादिस्तद्धेतुत्वात् कर्म्मापि स्पर्शनाम १२ द्विसमयादिना विग्रहेण भवांतरं गच्छतो जंतोरनुश्रेणि नियतागमनपरिपाट्या १
नुपूर्वी तद्विपाकवेद्या कर्म्मप्रकृतिरप्यानुपूर्वी १३ गमनं गतिः सा पुनरत्र पादादिविहरणात्मिका देशांतरप्राप्तिहे
द्वींद्रियादीनां प्रशस्ताप्रशस्ता विधीयते न एकेंद्रियाणां पादादेरभावात् ततो विहायसा नभसा गतिर्विहायोगतिस्तद्धेतुत्वात्
कर्म्मापि विहायोगतिनाम १४ ननु विहायसः सर्वगतत्वेन ततोन्यत्र गमनाभावात् व्यवच्छेद्याभावेन विहायसेति विशे
षणस्य वैयर्थ्यं सत्यं किंतु यदि गतिरित्येवोच्यते तदा नाम्नः प्रथमप्रकृतिरपि गतिरस्तीति पौनरुक्त्याशंका स्यात् तद्व्य
वच्छेदार्थं विहायोग्रहणमकारि विहायसा गतिः प्रवृत्तिर्न तु भवति नारकादिकेति अथ प्रदर्शितानां गत्यादिप्रकृती
नाम स्थानसंख्याकथनपूर्वकमष्टौ प्रत्येकप्रकृतीराह ॥ ॥ पिंडपयडित्ति चउदस परघाउस्सासआयवुज्जोयं अ
गुरुलहुतित्थनिमिणोवघायमिय अट्ठपत्तेया २५ एतैर्गतिनामादिभिः पदैर्वक्ष्यमाणचतुरादिभेदानां पिंडितानां प्रति
पादनात् पिंडप्रकृतयश्चात क्राद्दतीति एता गत्यादयोनंतरगाथोद्दिष्टाः प्रकृतयः कियत्यः पुनस्ता इत्याह चतुर्दश सं

Dr BHAU DAJI

रव्याः तथा प्रक्रमान्नामशब्दः पराघातादिषु प्रत्येकमभिसंबध्यते तद्यथा पराघातनाम उच्छ्वासनाम आतपनाम उद्योतनाम
अगुरुलघुकनाम तित्थयरत्ति तीर्थंकरनाम निम्माणत्ति निर्म्माणनाम उपघातनाम इत्येताः पराघातादयोऽष्टावष्टसंख्याः
प्रत्येकप्रकृतयो ज्ञेयाः आसां पिंडप्रकृतिवद् भेदाभावादिति ॥ तसबायरपज्जत्तं पत्तेयथिरं सुभं च सुभगं च सु
सराइज्जजसं तसदसगं थावरदसं तु इमं २६ नामशब्दस्येहापि संबंधात् त्रसनाम बादरनाम पर्याप्तनाम प्रत्येकनाम
स्थिरनाम शुभनाम सुभगनाम चशब्दः समुच्चये सुस्वरनाम आदेयनाम जसंति यशःकीर्त्तिनाम इत्येवं त्रसशब्देनोपल
क्षितं प्रकृतिदशकं त्रसदशकं इदमुक्तमते इति शेषः तथा स्थावरशब्देनोपलक्षितं त्रसदशकस्य विपक्षभूतं दशप्रकृ
तित्वाद्दशकं स्थावरदशकं तत्पुनरिदं वक्ष्यमाणमिति तदेवाह ॥ थावरसुहुमअपज्जं साहारणअथिरअसु
भदुभगाणि दुस्सरणाइज्जजसं इयनामे सेयरा वीसं २७ इहापि नामशब्दस्य संबंधात् स्थावरनाम सूक्ष्मनाम अप
र्याप्तनाम साधारणनाम अस्थिरनाम अशुभनाम दुर्भगनाम दुःस्वरनाम अनादेयनाम अजसत्ति अयशःकी
र्त्तिनाम प्ररूपितं दशकद्वयमपि अथ नामदशकद्वयमीलनेन यथा त्वसतीयं विंशतिर्यद्विषयो भवते तदाह इयत्ति इ
त्यमुना त्रसादिदशद्वितयप्रकारेण नामेत्ति नामकर्मणि सेतराः सप्रतिपक्षाः प्रत्येकसंज्ञिता विंशतिर्विज्ञेया तथाहि त्रसना
म्नः स्थावरनाम्नः प्रतिपक्षत्वं एवं बादरसूक्ष्मप्रकृतीनामपि सेतरत्वमुपनीतमेवेति अथानंतरोद्दिष्टत्रसादिविंश
तमध्ये यासां प्रकृतीनामाद्यपदनिर्देशेनया संज्ञा भवंति ताः कथयन्नाह ॥ तसचउथिरछक्कं अथिरछक्कसुहुम २४
तिगथावरचउक्कं सुभगतिगाइविभासा तयाइसंखाहिं पयडीहिं २८ त्रसप्रकृत्योपलक्षितं चतुष्कं त्रसचतुष्कं एतद
नुसारतः समासोऽन्यत्रापि कार्यः ततो यथासंख्यं पुनरपि समाहारं द्वंद्वस्य तत्र त्रसचतुष्कं यथा त्रसं बादरं पर्याप्तं प्रत्येकमि

ति स्थिरषट्कं स्थिरं शुभं सुभगं सुस्वरं आदेयं यशःकीर्त्तिश्चेति अस्थिरषट्कं अस्थिरं अशुभं दुर्भगं दुःस्वरमनादेयमयशःकीर्त्ति
स्वरूपं सूक्ष्मत्रिकं सूक्ष्मं पर्याप्तं साधारणलक्षणं स्थावरचतुष्कं स्थावरसूक्ष्मापर्याप्तसाधारणलक्षणं सुभगत्रि
कं सुभगसुस्वरादेयात्मकं आदिशब्दात् दुर्भगत्रिकं दुर्भगदुःस्वरानादेयरूपं गृह्यते तत्र सूत्रपदे समासो यथा
सुभगत्रिकमादिर्यस्य दुर्भगत्रिकस्य तत्सुभगत्रिकादि तस्य विभाषा प्ररूपणा कर्त्तव्येति शेषः काभिः कृत्वा पुन
स्त्रसचतुष्कादिका विभाषा कर्त्तव्येत्याह तदादिसंख्याभिः प्रकृतिभिः सा निर्दिष्टा प्रकृतिरादिर्यस्याः संख्यायाः
सा तदादिः तदादिः संख्या यासां प्रकृतीनां तास्तदादिसंख्यास्ताभिस्तदादिसंख्याभिः प्रकृतिभिः कोऽर्थो यासां प्रकृ
तिस्त्रसादिका निर्दिष्टा तामादौ कृत्वा निर्दिष्टा संख्या श्रेणीयेति एताश्च संज्ञाः प्रकृतिपिंडकसंख्याद्विगुणो यथास्व
नमुपयोगमायास्यंतीति कृत्वा प्ररूपिता इति उक्ता नामकर्म्मणो द्विचत्वारिंशद्भेदाः अथ तस्यैव त्रिनवतिर्भेदान्
प्ररूपयितुकामो गत्यादि पिंडानां पिंडप्रकृतिसंज्ञिकानां मध्ये येन यावंतो भेदाः पिंडिता वर्त्तंते तान्तान्भेदान्तेषु
माह गइयाईण उ कमसो चउ पण पण ति पण पंच छ छक्कं पण दुग पण अट्ठ चउ दुग इय उत्तरभ
ेयपणसट्ठी २९ गत्यादीनां पिंडप्रकृतीनां शब्दप्रवृत्तिस्वरूपाणां पुनः क्रमशः क्रमेण यथासंख्यमिति यावत् च
त्वारो भेदा भवंतीति वाक्यार्थः तथाहि गतिनाम चतुर्द्धा जातिनाम पंचधा तनुनाम पंचधा उपांगनाम त्रिधा बंध न+
नाम पंचधा संघातनाम पंचधा संहनननाम षोढा संस्थाननाम षोढा वर्णनाम पंचधा गंधनाम द्विधा रसनाम पंचधा
स्पर्शनाम अष्टधा आनुपूर्वीनाम चतुर्धा विहायोगतिनाम द्विधा एतेषां सर्वमीलने भेदा यमाह इयत्ति इत्यमुना
चतुरादिभेदमीलनप्रकारेण उत्तरभेदानां पंचषष्टिरिति ॥ अडवीसजुया तिनवइ संते वा पनरबंधणे तिसयं

बंधणसंघायगहो तणूसु सामन्नवन्नचउ ॥३०॥ एषा पूर्वोक्ता पंचषष्टिरष्टाविंशतियुता प्रत्येकप्रकृष्टौ विंशत्या स
म्मीलने त्रिसिरधिका नवतिर्भवति सा च क्वोपयुज्यत इत्याह संतत्ति प्राकृतत्वात् सत्तायां सत्कर्मणीति बोद्धव्येत्य
र्थः चशब्दो विकल्पार्थो व्यवहितसंबंधश्च स च वियोज्यते पंचदशबंधनैः खित्रिंशतं च पंचदशसंख्यैर्बंधनैः प्रमाणस्वरूपैर्बं
धनैः प्रदर्शितत्रिनवतिमध्ये प्रक्षिप्तैस्त्रिसिरधिकं शतं त्रिंशतं वा सत्तायामधिक्रियते इति शेषः अथ त्रिनवतिमध्य
पंचदशानां प्रकृतीनां प्रक्षेपेण षष्ठोत्तरशतं भवतीति चेत् उच्यते यावद्रूपमाणाः पंचदश बंधननामप्रकृतयस्तासु
मध्यात्सामान्यत औदारिकादिबंधनपंचकस्य त्रिनवतिमध्ये पूर्वं प्रक्षिप्तत्वाच्छेषाणां दशानां प्रक्षेपे त्रिशतमेव तु भवती
ति न कश्चिद्विरोधः सत्त्ये च पुनर्बंधणेत्यत्र विरक्तिवचनव्यत्ययः प्राकृतत्वात् इत्युक्ता नामकर्मणस्त्रिनवतिस्त्रु
त्तरशतं चवेदानीं अष्टसप्तषष्टि सेदानीह बंधणसंघायगहो तणूसुत्ति बंधनानि च पंचदश संघातनानि च पंच बं
धनसंघाताः तेषां ग्रहणं ग्रहो बंधनसंघातग्रहः स तनुषु शरीरेषु तनुग्रहणेनैव बंधनसंघाता गृह्यन्ते न पृथग्वि
वक्ष्यन्ते इत्यर्थः तथा सामन्नवन्नचउत्ति सामान्यं कृष्णनीलाद्यविशेषितं वर्णेनोपलक्षितं चतुष्कं सामान्यवर्णच
तुष्कं गृह्यत इति शेषः अयमत्राशयः इह सप्तषष्टिमध्ये औदारिकादितनुपंचकमेव गृह्यते न तद्बंधनानि तत्सं
घातनानि च यतः औदारिकत्वात्स्वजातीयत्वादौदारिकतनुसदृशानि बंधनानि तत्संघाताश्च गृहीताः एवं वैक्रि
यादितन्वापि निजबंधनसंघाता गृहीता अतिन पृथगेते पंचदश बंधनानि पंच संघाता गृह्यन्ते तथा वर्णगंधरसस्पर्श २५
+पं+ नां यथासंख्यं पंच द्वि अष्टभेदैर्निष्पन्ना विंशतिमपनीय तेषामेव सामान्यवर्णगंधरसस्पर्शलक्षणं चतुष्कं गृह्यते
+त+ ततश्चानंतरोदितात् त्र्युत्तरशताद्वर्णादि षोडशकं बंधनपंचदशकसंघातपंचकलक्षणानां षट्त्रिंशत्प्रकृतीनामप

सारणे सत्ति सप्तषष्टिर्भवतीत्येतदेवाह ॥ इयसत्तट्ठी बंधोदये य न य सम्ममीसया बंधे बंधुदए सत्ताए वीसदु
वीससट्ठवन्नसयं ॥३१॥ इति पूर्वोक्तप्रकारेण सप्तषष्टिर्नामकर्मप्रकृतीनां भवति सा च क्वोपयुज्यत इत्याह बंधोद
एय त्ति बंधश्चोदयश्च बंधोदयं तस्मिन् बंधोदये सप्तषष्टिर्भवति चशब्दादुदीरणायां च सप्तषष्टिः अथ बंधनसंघात
नवर्णादिविशेषाणां विवक्षावशादेव बंधेनाधिकारः इत्युक्तं संप्रति ययोः प्रकृत्योः सर्वथैव बंधो न भवति ते आह न य
सम्ममीसया बंधे त्ति न चैते सम्यक्त्वमिश्रके बंधे अधिक्रियेते अयमभिप्रायः सम्यक्त्वमिश्रयोर्बंध एव न भवति किं
तु मिथ्यात्वपुद्गलानामेव जीवः सम्यक्त्वगुणेन मिथ्यात्वरूपतामपनीय केषांचित्त्रयं तद्विशुद्धिमापादयति अपरेषां त्वीष
द्विशुद्धिं केचित्पुनर्मिथ्यात्वरूपा एवावतिष्ठन्ते तत्र ये त्यंत विशुद्धाः ते सम्यक्त्वव्यपदेशभाजः ईषद्विशुद्धा मिश्रव्यपदेश
भाजः शेषा मिथ्यात्वमिति उक्तं च सम्मत्तगुणेण तओ विसोहए कम्ममेव मिच्छत्तं यद्वच्छगणप्रमुखैः शोध्यंते
कोद्रवा मदनाः ॥ यत्सर्वथापि तत्र विशुद्धं तद्भवति कर्म सम्यक्त्वं मिश्रं त्वर्धविशुद्धं भवत्यशुद्धं तु मिथ्यात्वं ॥ उदयो
दीरणसत्तासु पुनः सम्यक्त्वमिश्रके अपि अधिक्रियेते एवं च ज्ञानावरणे पंच दर्शनावरणे नव वेदनीये द्वे मोहे सम्यक्त्वमिश्र +नव+
वर्जाः षड्विंशतिः आयुषि चतस्रः नाम्नि तेदानीं तरसंतत्वेपि प्रदर्शितयुक्त्या सप्तषष्टिः गोत्रे द्वे अंतराये पंच इत्ये
तद्विंशत्युत्तरप्रकृतिशतं बंधेऽधिक्रियेते एतदेव सम्यक्त्वमिश्रसहितं द्वाविंशत्युत्तरप्रकृतिशतमुदयउदीरणयोश्च
सत्तायां पुनः शेषकर्मणां पंचपंचाशता नाम्नस्त्रिनवतिरित्यष्टाचत्वारिंशं शतं यद्वा शेषकर्मणां पंचपंचाशता नाम्न
स्त्र्युत्तरशतमित्यष्टपंचाशं शतमधिक्रियत इत्येतदेव मनसि कृत्वाह बंधुदए सत्ताए इत्यादि इत्थात्र शब्दस्य प्रत्येकं यो १
गात् यथासंख्यं बंधे विंशं शतं उदयेऽप्युपलक्षणत्वात् उदीरणायां च द्वाविंशं शतं सत्तायामष्टपंचाशं शतमुपलक्षणत्वा

दृष्टचत्वारिंशत्तमं इति तावन्नासुकैरेव अथयथोद्दिष्टानां गतिजातिप्रभृतीनां पिंडप्रकृतीनां चतुरादिभेदान्व्याचि-
ख्यासुराह् नरयतिरिनरसुरगई इगबितियचउपणिंदिजाईओ उरालियवेउव्वियआहारगतेयकम्मइगा ॥३३॥ निर-
याश्च तिर्यंचश्च नराश्च सुराश्च तेषु गतिरिति विग्रहः तावाबोध्यं गतिशब्दः प्रत्येकं योज्यते तत्स्थाया ॥ इष्टफलं दैवमिति वचना-
त् निर्गतोऽयः इष्टफलं सातवेदनीयादिरूपं येभ्यस्ते निरयाः सीमंतकादयो नरकावासाः ततो निरयेषु विषये गतिरिति
गतिनाम तद्विपाकवेद्या कर्मप्रकृतिरपि निरयगतिनाम नरकशब्दव्यपदेशरूपपर्यायनिबंधनं निरयगतिनामेति हृदयं ए-
वं तिर्यग्नरसुरगतिनामापि वाच्यं अत्राह ननु सर्वे विपर्याया जीवेन गम्यंते प्राप्यंते इति सर्वेषामपि तेषां गतित्वप्रसंग-
स्तथाच प्राग्गतिशब्दस्येयमेव व्युत्पत्तिर्दर्शितेति नैवं यतो विशेषेण व्युत्पादिता अपि शब्दा रूढितो गोशब्दवत् प्रति-
नियतमेवार्थं विषयीकुर्वंतीत्यदोषः उक्तं गतिनाम चतुर्विधं ४ तथास्वकत्वात्तत्रस्पेकेंद्रियाश्च द्वींद्रियाश्च त्रींद्रिया-
श्च चतुरिंद्रियाश्च पंचेंद्रियाश्च तेषां जातय इति विग्रहे तावाबोध्यं एकेंद्रियचतुरिंद्रियपंचेंद्रियनामभेदात् पंचधा जातिना-
+१०+ म तत्र एकस्य स्पर्शनेंद्रियज्ञानस्यावरणक्षयोपशमादेकविज्ञानभाज एकेंद्रियाः द्वयोः स्पर्शनरसनज्ञानयोरावर-
णक्षयोपशमाद्द्विविज्ञानभाजो द्वींद्रियाः त्रयाणां स्पर्शनरसनघ्राणज्ञानानामावरणक्षयोपशमात् त्रिविज्ञानभाजस्त्री-
द्रियाः चतुर्णां स्पर्शनरसनघ्राणचक्षुर्ज्ञानानामावरणक्षयोपशमात् चतुर्विज्ञानभाजश्चतुरिंद्रियाः पंचानां स्पर्शन-
रसनघ्राणचक्षुःश्रोत्रज्ञानानामावरणक्षयोपशमात् पंचविज्ञानभाजः पंचेंद्रियाः ततएकेंद्रियाणां जातिनाम ए- २६
केंद्रियजातिनाम एवं यावत्पंचेंद्रियजातिनाम अत्राह नन्वेतेन जातिनाम्ना किं तावदिंद्रियमेकादिकं जन्यते उतद्र-
व्येंद्रियमहोस्विदेकेंद्रियोयमित्यादिव्यपदेश इति त्रयी गतिः तत्राद्यपक्षः स न युक्तो भावेंद्रियस्य श्रोत्रादींद्रियज्ञा-

नावरणक्षयोपशमजन्यत्वात् क्षायोपशमिकानींद्रियाणीति वचनात् अथ द्रव्येंद्रियं जन्यते तदयुक्तं द्रव्येंद्रियस्य
इंद्रियपर्याप्तिनामोदयजन्यत्वात् एकेंद्रियादिव्यपदेशस्त्वेकेंद्रियज्ञानावरणक्षयोपशमपर्याप्तिनामस्यामेव सेत्स्यति
किमंतर्गडुना जातिनाम्ना अत्रोच्यते आद्यविकल्पयुगलं तावदनभ्युपगमादेव निरस्तं यत्पुनरुक्तमेकेंद्रियादिव्यप-
फ=५ देशनिष्पत्त्यादिः तदयुक्तं यत इंद्रियज्ञानावरणक्षयोपशम इंद्रियपर्याप्तिश्च यथाक्रमं भावेंद्रियजननेन द्रव्येंद्रियजननेन च
कृतार्थकिमिमेकेंद्रियादिव्यपदेशनिबंधन इति परिणतिलक्षणं कार्यांतरं जनयितुमलं न हि अन्यसाध्यं कार्यमन्यः साध-
यति अतिप्रसंगात्तस्मादेकेंद्रियादीनां समानजातीयजीवांतरेण सदृशमानाबासाकाचितसिणतिरेकेंद्रियादिशब्दा-
व्याश्रवरूपं जातिकर्मनामोदयत एवाभ्युपगंतव्या उक्तं च अव्यभिचारिणा सादृश्येन एकीकृतार्थात्मा जातिरिति
तथाहि बकुलादीनामनुमानादिसिद्धेंद्रियपंचकक्षयोपशमे सत्यपि पंचेंद्रियशब्दव्यपदेशपंचेंद्रियजातिनामकर्मोदय-
जन्यविशिष्टबाह्यपरिणत्यभावान्न पंचेंद्रियव्यपदेशो भवति यद्यंगोत्तरगलुकांगमात्रमादिकमे सत्यपि पंचेंद्रियव्यपदेशः
सा विपर्यायस्य कारणं किंचित्कर्माभ्युपगंतव्यमितिचेन्नैवं जातिनामकर्मवैचित्र्यादेव तत्सिद्धेः न चात्रैकांतेन यु-
क्त्युपन्यास एवाग्रहः कार्यः आगमोपपत्तिगम्यत्वात्तत्त्वस्य यदवादि आगमश्चोपपत्तिश्च संपूर्णं दृष्टिलक्षणं अ-
तींद्रियाणामर्थानां सद्भावप्रतिपत्तये १ इत्युक्तं जातिनाम पंचधा तथा औदारिकं च वैक्रियं च आहारकं च तैजसं च
कार्मणं चेति द्वंद्वे तावाबोध्यं औदारिकवैक्रियाहारकतैजसकार्मणनामभेदात् पंचधा शरीरनाम तत्र उदारं स्थू-
नं चास्य तीर्थकरगणधरशरीराद्यपेक्षया ततो ह्यस्यानुत्तरशरीरस्यापि अनंतगुणहीनत्वात् यद्वा उदारं सातिरेक-
योजनसहस्रमानत्वात् शेषशरीरापेक्षया बृहत्प्रमाणं बृहत्ता चास्य वैक्रियं प्रति भवधारणीयसहजशरीरापेक्षया १

दृष्टत्वादन्यथोत्तरवैक्रियं योजनलक्षमानमपि लभ्यते उदारमेवौदारिकं विनयादिभ्य इति कण् एतद्विषयस्तन्निबंध
नंनाम औदारिकनाम यदुदयवशादौदारिकशरीरयोग्यान् पुद्गलान् आदाय औदारिकशरीररूपतया परिणमय
ति परिणमय्य च जीवप्रदेशैः सहान्योन्यानुगमरूपतया संबंधयति तदौदारिकशरीरनामेत्यर्थः १ तथा विविधा क्रिया
विक्रिया तस्यां भवं वैक्रियं तथाहि तदेकं भूत्वा अनेकं भवति अनेकं भूत्वा एकं भवति अणु भूत्वा महद्भवति महद्
भूत्वा अणु भवति खेचरं भूत्वा भूमिचरं भवति भूमिचरं भूत्वा खेचरं भवति अदृश्यं भूत्वा दृश्यमित्यादि तच्च द्विधा औप
पातिकं लब्धिप्रत्ययं च तत्रौपपातिकं उपपातजन्मनिमित्तं तच्च देवनारकाणां लब्धिप्रत्ययं तिर्यग्मनुष्याणां वैक्रियनि
बंधनंनाम वैक्रियनाम यदुदयवशाद्वैक्रियशरीरयोग्यान् पुद्गलानादाय वैक्रियशरीररूपतया परिणमय
ति परिणमय्य जीवप्रदेशैः सहान्योन्यानुगमरूपतया संबंधयति २ तथा चतुर्दशपूर्वविदा तीर्थकरस्फातिदर्शनादि
कतया विविधप्रयोजनोत्पन्नो सत्या विशिष्टलब्धिवशादाह्रियते निवर्त्यते इत्याहारकं बहुलवचनात् कर्मणि
णक्प्रत्ययो यथा पादहारकं इत्यादौ तच्च वैक्रियापेक्षया अत्यंतशुभं स्वच्छस्फटिकशिलेव शुभ्रपुद्गलसमूहघटना
त्मकं आहारकनिबंधनंनाम आहारकनाम यदुदयवशादाहारकशरीरयोग्यान् पुद्गलानादाय आहारकरूप
तया परिणमयति परिणमय्य च जीवप्रदेशैः सहान्योन्यानुगमरूपतया संबंधयतीति ३ तथा तेजसा तेजःपुद्गलैर्निर्वृत्तं ते
जसं यच्च भुक्ताहारपरिणमनहेतुः यद्वशाच्च विशिष्टतपःसमुत्थलब्धिविशेषस्य पुंसस्तेजोलेश्याविनिर्गमस्तेजोनिबंधनंना २३
म तैजसनाम यदुदयवशात्तैजसशरीरयोग्यान् पुद्गलानादाय तैजसशरीररूपतया परिणमयति परिणमय्य च जी
वप्रदेशैः सहान्योन्यानुगमरूपतया संबंधयतीति ४ तथा कर्मपरमाणुपुद्गलव कार्मिक कार्मणशरीरमित्यर्थः कर्मप

रमाणव एवात्मप्रदेशैः सह क्षीरनीरवदन्योन्यानुगताः संतः कार्मणंशरीरं कर्मणो विकारः कार्मणमिति व्युत्पत्तेः तदु
क्तं कम्मविगारो कम्मण मट्ठविहविचित्तकम्मनिप्फन्नं सव्वेसि सरीराणं कारणभूयं मुणेयव्वं १ अत्र सव्वेसिंति सर्वेषामौद १
रिकशरीराणां कारणभूतं बीजभूतं कर्मणशरीरं न खल्वामूलविच्छिन्ने भवप्रपंचप्ररोहबीजभूते कार्मणवपुषि शेषश
रीरप्रादुर्भावसंभवः इदं च कार्मणशरीरं जंतोर्गत्यंतरसंक्रांतौ साधकतमं करणं तथाहि कार्मणेनैव वपुषा परिकरितो जंतु
र्मरणदेशपरित्यागेनोत्पत्तिदेशमभिसर्पति ननु यदि कार्मणं वपुः परितो गत्यंतरं संक्रामति तर्हि संगच्छमानो गच्छन्वा कस्मान्नोपल
भ्यते उच्यते कर्मपुद्गलानामतिसूक्ष्मतया चक्षुरादीन्द्रियागोचरत्वात् आह च प्रज्ञाकरगुप्तोपि अंतराभवदेहोपि सूक्ष्मत्वा १
न्नोपलभ्यते निष्क्रामन् प्रविशन्वापि नाभावोऽनीक्षणादपि १ कार्मणनिबंधनंनाम कार्मणनाम यदुदयात् कार्मणप्रायोग्या
न् पुद्गलानादाय कार्मणशरीररूपतया परिणमयति परिणमय्य च जीवप्रदेशैः सहान्योन्यानुगमरूपतया संबंधयतीति ५
उक्तं तनुपंचनामपंचधा इदानीमंगोपांगनामत्रिधा आह बाहूरुपिट्ठिसिर उर उयरंगउवंग अंगुलीपमुहा सेसा अंगोवंगा प
ढमतणुतिगस्सुवंगाणि २२ बाहूबाहुद्वयं ऊरूऊरुद्वयं पृष्टिः प्रतीता शिरोमस्तकं उरोवक्षः उदरं पेटमित्यष्टावंगान्यंते
इह विभक्तिलोपः प्राकृतत्वात् एवमन्यत्रापि उपांगानि अंगुलीप्रमुखानि इह पुंस्त्वं प्राकृतत्वात् शेषाणि तत्तदवयवभू
तान्यंगुलीपर्वरेखादीनि इहापि पुंस्त्वं प्राकृतत्वात् प्राकृते हि लिंगमतंत्रं यदाह प्रभुश्रीहेमचंद्रसूरिपादाः स्वप्राकृतलक्ष
णे लिंगमतंत्रमिति इमान्युपांगानि प्रथमतनुत्रिकस्य भवंति प्रथमास्त्राद्यास्तनवः शरीराणि तासां त्रिकं त्रयमौदारिकवैक्रि
याहारकरूपं तस्य प्रथमतनुत्रिकस्य भवंति ततः प्रथमतनुत्रिकद्वारेणांगोपांगनामापि त्रिविधं मंतव्यं तथाहि औदारिकांगोप १
गनाम वैक्रियांगोपांगनाम आहारकांगोपांगनाम तत्र यदुदयादौदारिकादिशरीरत्वेन परिणतानां पुद्गलानामंगोपांगा

विभागपरिणतिरूपजायते तदौदारिकांगोपांगनाम यदुदयाद्वैक्रियशरीरत्वेनपरिणतानांपुद्गलानामंगोपांगविभाग
परिणतिरूपजायते तद्वैक्रियांगोपांगनाम यदुदयादाहारकशरीरत्वेनपरिणतानांपुद्गलानामंगोपांगविभागपरिणति
रूपजायते तदाहारिकांगोपांगनाम ३ तैजसकार्मणयोस्तुजीवप्रदेशसंस्थानानुरोधित्वान्नास्त्यंगोपांगसंभव
इत्युक्तं त्रिविधमंगोपांगनाम सांप्रतं बंधननामस्वरूपमाह ॥ उरलाइपुग्गलाणं निबद्धबझंतयाण संबंधं जंकुणइ
जउसमं तंउरलाइबंधणंनेयं ३४ औदारिकादिपुद्गलानामादिशब्दाद्वैक्रियपुद्गलानामाहारकपुद्गलानांतैज
सपुद्गलानांकार्मणपुद्गलानां किंविशिष्टानामित्याह निबद्धबझंतयाणंति निबद्धाश्चबध्यमानाश्चनिबद्धबध्यमा
नास्तेषां निबध्यमानानांपूर्वबद्धानां बध्यमानानांचयत्कर्मसंबंधंपरस्परंमीलनंकरोति दारुपाषाणमिवजउअत
एवजउसमं तदौदारिकमादिशब्दाद्वैक्रियनिबंधनं आहारकनिबंधनं तैजसबंधनं कार्मणबंधनंज्ञेयंज्ञात
व्यमितिगाथाक्षरार्थः भावार्थस्त्वयं पूर्वगृहीतैरौदारिकपुद्गलैर्यत्परस्परंगृह्यमाणान्औदारिकपुद्ग
लानुदितेनयेनकर्मणाबध्नाति आत्माअन्योन्यसंयुक्तान्करोति तदौदारिकशरीरबंधननाम दारुपाषा
णादीनांजतुरालावत्स्वितिश्लेषद्रव्यतुल्यं १ पूर्वगृहीतैर्वैक्रियपुद्गलैः सहपरस्परंगृह्यमाणान् वैक्रियपुद्गलानु
दितेनयेनकर्मणाबध्नात्यात्मा अन्योन्यसंयुक्तान्करोति तज्जतुसमंवैक्रियशरीरबंधननाम २ पूर्वगृहीतैरा
हारकपुद्गलैः सहपरस्परंगृह्यमाणानाहारकपुद्गलानुदितेनकर्मणाबध्नात्यात्मान्योन्यसंयुक्तान्करोतित २८
ज्जतुसमाहारकशरीरबंधननाम ३ पूर्वगृहीतैस्तैजसपुद्गलैः सहपरस्परंगृह्यमाणांस्तैजसपुद्गलानुदितेनयेनक
र्मणाबध्नात्यात्मान्योन्यसंयुक्तान्करोतितज्जतुसमंतैजसशरीरबंधननाम ४ पूर्वगृहीतैः कार्मणपुद्गलैः सहपरस्प

रंगृह्यमाणान्कार्मणपुद्गलानुदितेनयेनकर्मणाबध्नात्यात्मान्योन्यसंयुक्तान्करोतितज्जतुसमंकार्मणशरीरबंध
ननाम ५ यद्यपुनरिदंशरीरपंचकंपुद्गलानामौदारिकादिशरीरनामभिः सामर्थ्याद्गृहीतानामन्योन्यसंबंधकारिबंधनपं
चकंनस्यात् ततस्तेषांशरीरपरिणतौसत्यामप्यसंबद्धत्वात् पवनाहतकुंडस्थितसक्तूनामिवैकत्रस्थैर्यं
नस्यादित्युक्तंबंधनस्वरूपंइदंचबंधननाम असंहतानांपुद्गलानांनसंभवत्यतोऽन्योन्यसंनिधानेनसंहतेः
कारणंसंघातननामाह ॥ जंसंघायइउरलाइपुग्गलेतणगणंवदंताली तंसंघायंबंधणमिवतणुनामेणपंचविहं ३५
यत्कर्मसंघातयति पिंडीकरोति औदारिकादिपुद्गलानादिशब्दाद्वैक्रियपुद्गलान् आहारकपुद्गलान्तैजसपुद्गलान्
कार्मणपुद्गलान् तत्रदृष्टांतमाह तृणगणमिवरणोत्करमिवयतश्चइतश्चविक्षिप्तंदंतालीकाष्ठमयीमरुमंडलप्रसि
द्धा तत्संघातंसंघातननाम तच्चपूर्वोक्तंबंधननामापि तनुनाम्नाशरीराभिधानेनपंचविधंभवतीति तत्रबंधननामपूर्वमे
वभवतीति अथसंघातनामेवविभावते औदारिकसंघातननाम वैक्रियसंघातननाम आहारकसंघातननाम तैजस
संघातननाम कार्मणसंघातननाम तत्रयदुदयात्औदारिकशरीरत्वपरिणतान्पुद्गलान्आत्मासंघातयति अन्यो
न्यसंनिधानेनव्यवस्थापयति तदौदारिकसंघातननाम १ यदुदयाद्वैक्रियशरीरत्वपरिणतान्पुद्गलान्आत्मासंघात
यति अन्योन्यसंनिधानेनव्यवस्थापयतितद्वैक्रियसंघातननाम २ यदुदयादाहारकशरीरत्वपरिणतान्पुद्गलान्
आत्मासंघातयति अन्योन्यसंनिधानेनव्यवस्थापयति तदाहारकसंघातननाम ३ यदुदयात्तैजसशरीरत्वपरिणता
न्पुद्गलान्आत्मासंघातयति अन्योन्यसंनिधानेनव्यवस्थापयति तत्तैजससंघातननाम ४ यदुदयात्कार्मणशरीर
त्वपरिणतान्पुद्गलान्आत्मासंघातयति अन्योन्यसंनिधानेनव्यवस्थापयतितत्कार्मणसंघातननाम ५ इत्युक्तंपंच।

BHAU DAJI

धा बंधननाम पंचधा संघातननाम संप्रति संतेवा पनरबंधणे तिसयमिति गाथावयवं बंधनपंचदशकं व्याचिख्या
सुराह् ओरालविउव्वाहारयाण सगतेयकम्मजुत्ताणं नवबंधणाणि इयरेदुसहियाणं तिन्नि तेसिं च ३५ औदारिक
वैक्रियाहारकशरीराणां नव बंधनानीति योगः कीदृशानां सतामित्याह स्वकतैजसकार्मणयुक्तानां प्रत्येकस्व
तैजसकार्मणनामभ्यामन्यतरेण युक्तानामित्यर्थः नव त्रिनवसंख्यानि बंधनानि बंधनप्रकृतयो भवंतीति औदारि
कवैक्रियाहारकाणां त्रयाणामपि प्रत्येकनाम्ना तैजसेन कार्मणेन च योगात् द्विकसंयोगनिष्पन्नान्येकैकस्य औद १
रिकादेस्त्रीणि ३ बंधनानि भवंतीति तेषां च त्रयाणां त्रिकाणां मीलनेन नव बंधनानीति तथाहि औदारिकऔदारिकबंध
१ ननाम औदारिकतैजसबंधननाम २ औदारिककार्मणबंधननाम ३ वैक्रिय२बंधननाम १ वैक्रियतैजसबंधननाम २
वैक्रियकार्मणबंधननाम ३ आहारक२बंधननाम १ आहारकतैजसबंधननाम २ आहारककार्मणबंधननाम ३
तत्र पूर्वगृहीतैरौदारिकपुद्गलैः संप्रति गृह्यमाणौदारिकपुद्गलानां बंधो येन क्रियते तदौदारिकबंधननाम १ येन औदारि
कपुद्गलानां तैजसशरीरपुद्गलैः सह बंधो विधीयते तदौदारिकतैजसबंधननाम २ येनौदारिकपुद्गलानां कार्म
णशरीरपुद्गलैः सह बंधो विधीयते तदौदारिककार्मणबंधननाम ३ एवमनेनैव न्यायेनान्यान्यपि बंधनानि वाच्या १
नि शेषबंधननिरूपणायाह इयरदुसहियाणं तिन्नि इतरे स्वकीयनामापेक्षया द्वे तैजसकार्मणशरीरे ततः
प्राकृतत्वात् अन्यथोपन्यासेपि द्वे ते इतरे च ताभ्यां सहितानि युक्तानि द्वेतरसहितानि अथवा द्विद्विकं ततश्चेतरच्च २९
द्विकं चेतरद्विकं च तेन सहितानि इतरद्विकसहितानि तेषां द्वेतरसहितानामितरद्विकसहितानां औदारिकवैक्रिय १
हारकाणामत्रापि योज्यं त्रीणि बंधनानि भवंति अयमत्राशयः प्रत्येकं औदारिकवैक्रियाहारकाणां तैजसकार्म

णाभ्यां युगपत्संयोगे त्रिकसंयोगरूपाणि त्रीणि बंधनानि भवंति तथाहि औदारिकतैजसकार्मणबंधननाम १
वैक्रियतैजसकार्मणबंधननाम २ आहारकतैजसकार्मणबंधननाम ३ अथ पूर्वोक्तं एवं न केवलमेषामौदारिकादी
नामितरद्विकसहितानामेव त्रीणि बंधनानि भवंति किंतु तेसिं च त्रि त्रीणि तेषां शेषमरूकर्मणि न्यायादित्यत्रापि यो
ज्यः ततोयमर्थः ततो द्वे तरशब्दवाच्ययोस्तैजसकार्मणयोः स्वनाम्ना इतरेण च योगे त्रीणि बंधनानि भवंति यथा तैज
स२बंधणेनाम १ तैजसकार्मणबंधननाम २ कार्मणकार्मणबंधननाम ३ तदेवं नव त्रीणि त्रीणि च मीलितानि पंचदश
बंधनानीति अत्राह पंचानां शरीराणां द्विकादियोगप्रकारेण षड्विंशतिसंयोगा भवंति तत्र उत्पबंधनानि च कस्मान्न
भवंति उच्यते औदारिकवैक्रियेण पंचदशसंघाता अपि कस्मान्न विधीयंते संघातितानामेव बंधनभावात् तथाहि पा
षाणयुग्मस्य कृतसंघातस्यैवोत्तरकालं वज्रलेपलाक्षादिना बंधनं क्रियते तद्वत् यतो लोके ये स्वकृतिसंयोगा भ
वंति त एव श्रुताः एवमिहापि स्वशरीरपुद्गलानां स्वशरीरपुद्गलैः सह ये संयोगरूपाः संघातास्ते श्रुता इति प्राधान्य
ख्यापनार्थं पंचैव संघाता अत्र विहिता इति व्याख्यातानि पंचदश बंधनानि संप्रति संहनननाम षड्विधमभिधित्सुर्गा
थायुगलमाह ७ संघयणमट्ठिनिचओ तं छद्धा वज्जरिसहनारायं तह रिसहनारायं नारायं अद्धनारायं ३८ की
लिय छेवट्ठं इह रिसहो पट्टो य कीलिया वज्जं उभओ मक्कडबंधो नारायं इममुरालंगे ३९ संहन्यंते दृढीक्रियंते शरी
रपुद्गला येन तत्संहननं तच्चास्थिनिचयः कीलादिरूपाणामस्थ्निनिचयो रचनाविशेषोस्थिनिचयः तत्संहन
नं षड्धा षट्प्रकारं भवति तद्यथा वज्रऋषभनाराचं १ तथा ऋषभनाराचं २ इहानुस्वारो लाक्षणिकः नाराचं ३ अर्द्ध
नाराचं ४ कीलिका ५ सेवार्तं ६ इह च वज्रं ऋषभस्तत्र वेष्टनपरिवेष्टनपट्टश्च उच्यते वज्रं त्वस्थ्नां कीलिका धीयते नारा १

चं नाराचशब्देन उभयोर्मर्कटबंधो लभ्यते इदमस्थिनिचयात्मकं संहननमौदारिकांगोपांगौदारिकशरीर एव नामे
षु शरीरेषु तेषामस्थिरहितत्वात् इति गाथायुगलाक्षरार्थः भावार्थः पुनरयं इह द्वयोरस्थ्नोरुभयतो मर्कटबंधेन ब
द्धयोः पट्टाकृतिना तृतीयेनास्थ्नोपरिवेष्टितयोरुपरि तदस्थित्रयभेदि कीलिकाख्यं वज्रनामास्थि यत्र भवति तद्वज्र
ऋषभनाराचं तन्निबंधनं नाम वज्रऋषभनाराचनाम १ यत्पुनः कीलिकारहितं संहननं तत् ऋषभनाराचनाम २
यत्र पुनर्मर्कटबंधः केवलो भवति न पुनः कीलिकाऋषभसंज्ञः पट्टस्तन्नाराचं तन्निबंधनं नाम नाराचनाम ३ यत्र
त्वेकपार्श्वेन मर्कटबंधो द्वितीयपार्श्वे च कीलिका भवति तदर्धनाराचं तन्निबंधनं नाम अर्धनाराचनाम ४ यत्र पुनरस्थीनि
कीलिकामात्रबद्धान्येव भवंति तत्कीलिकासंहननं तन्निबंधनं नाम कीलिकानाम ५ यत्र तु परस्परं पर्यंतस्पर्शलक्षणां सेवामा
गतान्यस्थीनि भवंति स्नेहाभ्यवहारतैलाभ्यंगविश्रामणादिरूपां च परिशीलनां नित्यमपेक्षंते तन्निबंधनं नाम सेवार्त्तनाम
६ यथा छेवट्टं तिरस्कारस्य प्रभृतस्येह दर्शनात् छेदा नाम अस्थिपर्यंतास्तेषां वृत्तं परस्परसंबंधघटनालक्षणं वर्त्तनं हि यत्र छेदवृ +2+
त्तं कीलिकापट्टमर्कटबंधरहितमस्थिपर्यंतमात्रसंस्पर्शिविशिष्टमित्यर्थः ततो यदुदयाच्छरीरे वज्रऋषभनाराचसंहननं भव
ति तद्वज्रऋषभनाराचसंहननं नाम कर्मेति एवं ऋषभनाराचादिष्वपि वाच्यमिति व्याख्यातं षड्विधं संहनननाम संप्रति
षोढा संस्थाननाम विवक्षुराह ॥ समचउरंसं निग्गोह साइ खुज्जाइ वामणं हुंडं संघयणा वन्ना किण्हनील लोहियहल
लिद्द सिया ४० समचउरंसं निग्गोह त्ति पदैकदेशेऽपि पदसमुदायदर्शनात् न्यग्रोधपरिमंडलं सादि वामनं कुब्जं हुंड ३०
कषट् इति संस्थानानि अवयवरचनात्मकशरीराकृतिस्वरूपाणि शरीरे भवंति इति शेषः तत्र समाः शास्त्रोक्तलक्ष
णाविसंवादिन्यश्चतस्रोऽस्रयः पर्यंकासनोपविष्टस्य जानुनोरंतरं आसनस्य ललाटोपरिभागस्य चांतरं दक्षिणस्कंध

॥ ॥

स्य वामजानुनश्चांतरं वामस्कंधस्य दक्षिणजानुनश्चांतरमिति चतस्रो दिग्विभागोपलक्षिताः शरीरावयवा यत्र तत्समच
३ तुरस्रं अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवपदमिति सूत्रेण समासांतोऽच्प्रत्ययः समचतु
रस्रं च तत्संस्थानं च समचतुरस्रसंस्थानं उत्सेधोपरिणाहः संपूर्णलक्षणोपेतांगोपांगावयवः स्वांगुलाष्टाधिकश
तोच्छ्रयः सर्वसंस्थानप्रधानः पंचेंद्रियजीवशरीराकारविशेषः समचतुरस्रसंस्थानं तन्निबंधनं नाम समचतुरस्रनाम १ न्यग्रो
धपरिमंडलं यथा न्यग्रोधो वटवृक्ष उपरि संपूर्णावयवोऽधस्तु हीनस्तथा यत्संस्थानं नाभेरुपरि संपूर्णावयवं अधस्तु न तथा
तन्न्यग्रोधपरिमंडलं तन्निबंधनं नाम न्यग्रोधपरिमंडलनाम २ सह आदिना नाभेरधस्तनभागरूपेण यथोक्तप्रमाणयुक्तेन
वर्त्तत इति सादि सर्वमपि हि शरीरं सादि ततः सादित्वविशेषणमथानुपपत्तेरादिरिह विशिष्टो ज्ञातव्यः स ततो यत्र नाभेरधो यथो
क्तं प्रमाणयुक्तमुपरि च हीनं तत्सादिसंस्थानं तन्निबंधनं नाम सादिनाम ३ यत्र पाणिपादादि शिरोग्रीवं यथोक्तप्रमाणोपपन्नं
उरउदरादि च मडहं तत्कुब्जसंस्थानं तन्निबंधनं नाम कुब्जनाम ४ यत्र पुनरुरउदरादि यथोक्तप्रमाणोपेतं हस्तपादादिकं च
हीनं तद्वामनसंस्थानं तन्निबंधनं नाम वामननाम ५ अन्ये तु कुब्जवामनयोर्विपरीतं लक्षणमाहुः यत्र सर्वेऽप्यवयवाः शास्त्रो
क्तप्रमाणहीनास्तत्सर्वत्रासंस्थितं हुंडसंस्थानं तन्निबंधनं नाम हुंडनाम ६ ततो यदुदयात् जंतुशरीरं समचतुरस्रसंस्थानं
भवति तत्कर्मापि समचतुरस्रसंस्थाननामेति एवं न्यग्रोधपरिमंडलादिष्वपि योज्यं उक्तं षोढा संस्थाननाम इदानीं पं
चधा वर्णनामाह वर्णाः पंच भवंति कृष्णनीललोहितहारिद्रसिताः तत्र यदुदयाज्जंतुशरीरं कृष्णं भवति राजपट्टादिवत्तत्कर्मा
पि कृष्णनाम १ यदुदयाज्जंतुशरीरं मरकतादिवन्नीलं भवति तन्नीलनाम २ यदुदयाज्जंतुशरीरं लोहितं रक्तं हिंगुलका
दिवद्भवति तल्लोहितनाम ३ यदुदयाज्जंतुशरीरं हारिद्रं पीतं हरिद्रावद्भवति तद्धारिद्रनाम ४ यदुदयाज्जंतुशरीरं सितं

श्वेतं शंखादिवद्भवति तच्छ्वेतनाम ५ कपिशादयस्त्वेतत्संयोगेनैवोत्पद्यंते न पुनः सर्वेषामेतद्विलक्षणा इति न दर्शि
ताः उक्तं वर्णनाम पंचधा अथ गंधनाम द्विधाह ब सुरहिदुरही रसा पण तित्तकडुकसाय अंबिला महुरा फासा गुरुल
हु मिउ खर सीउण्ह सिणिद्ध रुक्खट्ठ ४१ दुर्गंधः शब्दः प्रक्रमात्संबध्यते ततः सुरभिगंधो दुरभिगंधश्च द्वेधा गंधः तत्र सौमु
ख्यकृत्सुरभिगंधः यदुदयाज्जंतुशरीरं कर्पूरादिवत्सुरभिगंधं भवति तत्सुरभिगंधनाम १ वैमुख्यकृत् दुरभिगंधः यदु
दयात् जंतुशरीरं लशुनादिवत् दुरभिगंधं भवति तत् दुरभिगंधनाम २ अत्राप्युभयसंयोगजाः पृथग्नोक्ता एतत्संसर्गज
त्वादेव भेदाविवक्षणात् उक्तं द्विधा गंधनाम अथ पंचधा रसनामाह रसाः शब्दैकशेषार्थाः पंच भवंति तथाहि तिक्तकटु
कषायाम्लाश्चत्वारो मधुरश्च पंच तत्र श्लेष्मादिदोषहंता निंबाद्याश्रितस्तिक्तो रसः तथा च भिषक्शास्त्रे श्लेष्माणम
रुचिं पित्तं तृषं कुष्ठं विषं ज्वरं हन्यात्तिक्तो रसो बुधैः कर्त्तामात्रोपसेवित इति यदुदयाज्जीवशरीरं निंबादिवत्तिक्तं भवति त
त्तिक्तनाम १ गलामयादिप्रशमनो मरिचनागराद्याश्रितः कटुः यदवादि कटुर्गलामयं शोफं हंति युक्त्योपसेवितः दीप
नं पाचको रुच्यो बृंहणो ऽतिकफापहः यदुदयाज्जंतुशरीरं मरिचादिवत्कटु भवति तच्च कटुनाम २ रक्तदोषाद्यपहर्त्ता
+क+ बिभीतकामलकपित्थाद्याश्रितः कषायः यदवाचि रक्तदोषं कफं पित्तं कषायो हंति सेवितः रूक्षः शीतो गुरुश्चापि
रोपणश्च स्वरूपतः यदुदयाज्जंतुशरीरं बिभीतकादिवत्कषायं भवति तत्कषायनाम ३ अग्निदीपनादिकृदम्लीकाद्या १
श्रितो ऽम्लः यदभ्यधायि अम्लो ऽग्निदीप्तिकृत्स्निग्धः शोफपित्तकफापहः क्लेदनः पाचनो रुच्यो मूढवातानुलोमकः यदु ३१
दयाज्जीवशरीरमम्लीकादिवदम्लं भवति तदम्लनाम ४ पित्तादिप्रशमकः खंडशर्कराद्याश्रितो मधुरः यदवादि पित्तं
वातं कफं हंति धातुवृद्धिकरो गुरुः जीवनः केशकृद्बालवृद्धक्षीणौजसां हितः यदुदयाज्जंतुशरीरं सितादिवन्मधुरं भव

ति तन्मधुरनाम ५ स्वान्नांतरे स्तंभिताहारविध्वंसादिकर्त्ता सैंधवलवणाद्याश्रितो लवणो ऽपि रसः प्रज्ञप्यते स चेह नो
पात्तो मधुरादिसंसर्गजत्वादस्य भेदेन विवक्षणात् संभाव्यते च तत्र माधुर्यादिसंसर्गः सर्वरसानां लवणप्रक्षेप एव स्वाद
त्वोपपत्तेरित्युपेक्षितं पंचधा रसनाम अथ नामस्पर्शनामाष्टधाह स्पृश्यंत इति स्पर्शाः अष्टावष्टसंख्याका भवंति तथाहि
गुरु १ लघु २ मृदु ३ खर ४ शीत ५ उष्ण ६ स्निग्ध ७ रूक्षाः ८ इति तत्राधोगमनहेतुरयोगोलकादिगतो गुरुः १ प्रायस्तिर्य
गूर्ध्वगमनहेतुरर्कतूलादिनिश्रितो लघुः २ सन्नतिकारणं वेतिसलतादिगतो मृदुः ३ स्तब्धतादिकारणं दृषदादिगतः ख
रः ४ देहस्तंभादिहेतुः प्रालेयाद्याश्रितः शीतः ५ आहारपाकादिकारणं ज्वलनाद्युपगत उष्णः ६ पुद्गलानां मिथः संयु
ज्यमानानां बंधनिबंधनं तैलादिस्थितः स्निग्धः ७ पुद्गलानां मिथो ऽसंयुज्यमानानामबंधनिबंधनं भस्माद्याधारो रू
क्षः ८ एतत्संसर्गजास्तु नोक्ताः पूर्ववदंतर्भावादिति ततो यदुदयाज्जंतुशरीरं गुरु भवति वज्रादिवत्तद्गुरुस्पर्शनाम १ यदुद
याज्जंतुशरीरमर्कतूलादिवल्लघु भवति तल्लघुस्पर्शनाम २ यदुदयाज्जंतुशरीरं हंसरुतादिवन्मृदु भवति तन्मृदुस्पर्शना
म ३ यदुदयाज्जंतुशरीरं खरं कर्कशं पाषाणादिवद्भवति तत्खरस्पर्शनाम ४ यदुदयाज्जंतुशरीरं शीतं शीतलं मृणालादि
वद्भवति तत् शीतस्पर्शनाम ५ यदुदयाज्जंतुशरीरं हुतभुगादिवदुष्णं भवति तदुष्णस्पर्शनाम ६ यदुदयाज्जंतुशरीरं घृता
दिवत्स्निग्धं भवति तत्स्निग्धस्पर्शनाम ७ यदुदयाज्जंतुशरीरं भस्मादिवत् रूक्षं भवति तत् रूक्षस्पर्शनाम ८ उक्तमष्टधा स्प
र्शनाम इदानीं वर्णादिचतुष्कोत्तरविंशतिभेदानां शुभाशुभत्वयोर्विभिन्नतयाह ब ४१ नीलं कसिणं दुग्गंधं तित्तं क
डुअं गुरुं खरं रुक्खं सीअं च असुहनवगं इक्कारसगं सुभं सेसं ४२ नीलकृष्णं नीलकृष्णाख्ये कर्मणी अशुभे दुर्गंधनाम तिक्तं ४+
कटुकमिति तिक्तकटुके रसनाम्नी गुरु खरं रूक्षं शीतं भवति चत्वारि स्पर्शनामानि एतान्यपि सर्वाण्यपि समुदितानि किमुच्य

ते इत्याह अशुभनवकं नवकप्रकृतयः परिमाणमस्य प्रकृतिवृंदस्य तन्नवकं अशुभं च तन्नवकं च अशुभनवकं एकादशा
म्येकादश संख्याप्रकृतिसमूहरूपं यथा रक्तपीतश्वेतवर्णाः सुरभिगंधो मधुराम्लकषायरसाः लघुमृदुस्निग्धोष्णस्पर्शा
: इति शुभं शुभविपाकवेद्यत्वात् शुभस्वरूपं कीदृक्कं तदित्याह शेषं कृष्णवर्णनवकाद्ववशिष्टं कोर्थः कृष्णवर्णः नवकात् शेषा एक
दशवर्णादिभेदाः शुभत्वेनैकादशोक्ता इति अथ नागति नामातिदेशेनानुपूर्वीचतुष्टयं आनुपूर्वीसंबंधेनोत्तरत्रोपयोगि
प्रकृतिसमुदायसंग्राहि नरकद्विकादिरूपं संज्ञांतरं विहायोगतिद्विकं चाभिधित्सुराह ४२ ॥ चउहगइव्वणुपुव्वी गइ
पुव्विदुगं तिगं नियाउजुयं पुव्वीउदउवक्के सुहअसुहवसुट्टविहगगई ४२ चतुर्धा गतिरिवानुपूर्वी शायुक्तरूपा भवति
कोर्थो गतिप्रसिद्धनव्यपदेशमानुपूर्वीनामततो निरयानुपूर्वी तिर्यगानुपूर्वी मनुष्यानुपूर्वी देवानुपूर्वीभेदात् आनुपूर्वी
नाम चतुर्धेति तात्पर्यं तत्र नरकगत्या नामकर्मप्रकृत्या सहचरितानुपूर्वी नरकगत्यानुपूर्वी तत्समकालं चास्या वेद्यमान
त्वात् सहचरितत्वं एवं तिर्यग्मनुष्यदेवानुपूर्व्योपि वाच्याः गइपुव्वदुगंति इह पूर्वीशब्देनानुपूर्वी लभ्यते आनुशब्दलोपस्तेनु
काइति स्वत्रेण यथा देवदत्तः देवः दत्त इति ततो नरकादिगते नरकाद्यानुपूर्वीस्वरूपं नरकादिद्विकमुच्यते तदेव त्रिकमभिधीय
ते गतिपूर्वीद्विकमिदं काकाक्षिगोलकन्यायेन संबध्यते कीदृक्कं सदित्याह नियायुर्युतं नरकाद्यायुष्कसमन्वितं नरकादित्रिक
मुच्यते इति हृदयं उपलक्षणत्वाद्वैक्रियषट्कं विकलत्रिकं औदारिकद्विकं वैक्रियद्विकं आहारकद्विकं अगुरुलघुचतुष्कं
वैक्रियाष्टकमित्याद्यनुक्तसंज्ञांतराण्यापि तत्र देवगतिर्देवानुपूर्वी नरकगतिर्नरकानुपूर्वी वैक्रियशरीरं वैक्रियांगोपांग २२
मिति वैक्रियषट्कं द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियाणां जातयो विकलत्रिकं औदारिकशरीरं औदारिकांगोपांगमित्यौदारिकद्वि
कं वैक्रियशरीरं वैक्रियांगोपांगमिति वैक्रियद्विकं आहारकशरीरं आहारकांगोपांगमित्याहारकद्विकं देवगतिः देव

नुपूर्वी देवायुः नरकगतिः नरकानुपूर्वी नरकायुः वैक्रियशरीरं वैक्रियांगोपांगमिति वैक्रियाष्टकं अगुरुलघूपघातप
राघात परघात उच्छ्वासलक्षणमगुरुलघुचतुष्कमिति ननु आनुपूर्व्या उदयो नरकादिषु किमृजुगत्या गच्छत आहोस्विद्वक्र
गत्येत्याशंक्याह पूर्वीउदयो वक्के ति पूर्व्या आनुपूर्व्या वृषभस्य नासिकारज्जुकल्पाया उदयो विपाको वक्र एव भवति अयमर्थः
नरके द्विसमया द्विवक्रेण गच्छतो जीवस्य नरकानुपूर्व्या उदयः तिर्यक्षु द्विसमया द्विवक्रेण जीवस्य गच्छतस्तिर्यगानुपूर्व्या
उदयः मनुष्येषु द्विसमया द्विवक्रेण गच्छतो जीवस्य मनुष्यानुपूर्व्या उदयः देवेषु द्विसमया द्विवक्रेण गच्छतो जीवस्य देवानुपू
र्व्या उदयः उक्तं च बृहत्कर्मविपाके नरयाउदयस्स उदउ नरए वक्केण गच्छमाणस्स नरयाणुपुव्वियाए तहिं उदउ अन्नहिं न
हि एवं तिरिमणुदेवे तेसु वि वक्केण गच्छमाणस्स तेसिमणुपुव्वियाणं तहिं उदउ अन्नहिं नत्थि २ तथा विहायसा आकाशेन गति
र्विहायोगतिः सा द्विधा शुभा प्रशस्ता अशुभा अप्रशस्ता क्रमेणोदाहरणमाह वसुट्टविहगगई वृषभः सौरभेयो बलीवर्द इति
यावत् तथा हंसस्योपलक्षणत्वात् गजकलभराजहंसादीनां प्रशस्ता विहायोगतिः उष्ट्रः करभः क्रमेलक इति यावत् तद्व
उष्ट्रस्योपलक्षणत्वात् खरतिड्डादीनां अप्रशस्ता विहायोगतिरिति व्याख्याताः पिंडप्रकृतीनामुत्तरभेदाः सांप्रतमष्टौ प्रत्ये
कप्रकृतीः विविधिसुराह ४३ ॥ परघाउदया पाणी परेसि बलिणंपि होइ दुद्धरिसो ऊससणलद्धिजुत्तो हवेइ ऊसास
नामवसा ४४ परता हंति परिस्सर्वति परैर्वा निहन्यते नाभिभूयते इति पराघातं तन्निबंधनं नाम पराघातनाम ततः पराघा
तोदयात् पराघातनाम कर्म विपाकान् प्राणी जंतुः परेषामन्येषां बलिनामपि बलवतामप्यास्तां दुर्बलानामित्यपि शब्दार्थो भव
ति जायते दुर्धर्षोऽनभिभवनीय इत्यर्थः अयमर्थः यदुदयात् परेषां दुःप्रधर्षो महौजस्वी दर्शनमात्रेणैव वाक्सौष्ठवेन वा महान्
पमसायामपि गतः सभानामपि क्षोभमापादयति प्रतिपक्षप्रतिभाप्रतिघातं च करोति तत्पराघातनामेत्यर्थः १ उच्छ्वासनाम

श्वाउच्छ्वासनामकर्मोदयेन उच्छ्वसनलब्धियुक्तो भवति उच्छ्वासलब्धिसमन्वितो जायते यदुदयादुच्छ्वसनलब्धिर्जन्तोर्भव
ति तदुच्छ्वासनाम २ सर्वलब्धीनां क्षायोपशमिकत्वादौदयिकी लब्धिर्न संभवतीति चेत् नैष दोषः वैक्रियाहारकलब्धीनामौ
दयिकीनामपि संभवाद्वीर्यान्तरायक्षयोपशमो हि तत्र निमित्तं भवतीति सत्यप्यौदयिकत्वे क्षायोपशमिकव्यपदेशोऽपि
न विरुध्यते ५ ४४ रविबिंबे उ जिअंगं तावजुअं आयवाउ न उ जलणे जमुसिणफासस्स तहिं लोहिअवन्नस्स उदउत्ति
४५ आतपादातपनामोदयाज्जीवानामंगं शरीरं तापयुतं स्वयमनुष्णमप्युष्णप्रकाशयुक्तं भवति आतपस्य पुनरुदयो रवि
बिंबे एव उ शब्दस्यैवकारार्थः कोऽर्थः भानुमंडलादिपार्थिवशरीरेष्वेव न तु ज्वलने ज्वलनजीवेष्विति अत्र युक्तिमाह यत् यस्मा
कारणात् तत्र ज्वलने ज्वलनजंतुशरीरे तेजस्कायशरीरेत्यर्थः उष्णस्पर्शस्योदयस्तथा लोहितवर्णस्योदय इति तेजस्का
यशरीराणि चोष्णस्पर्शोदय इति तेजस्कायशरीराणि चोष्णस्पर्शोदयेनोष्णानि लोहितवर्णनामोदयात्तु प्रकाशरूपमातपं
कुर्वन्ति आतपनामेत्यर्थः ३ ५ ४५ अणुसिणपयासरूवं जीअंगमुज्जोयए इहुज्जोआ जइदेवुत्तरविक्कियजोइसखज्जोअ
माइव्व ४६ इहोद्योतादुद्योतनामोदयेन जीवांगं जंतुशरीरं उद्योतते उद्योतं करोतीति कथमित्याह अनुष्णप्रकाशरूपं अनुष्णप्रका
शरूपं हिमकिरणवदुद्योतत इति तथ्यवच्छेदार्थमनुष्णप्रकाशरूपमित्युक्तं आह क इवोद्योतोदयाज्जंतुशरीराण्यनुष्णप्रका
शरूपमुद्योतं कुर्वन्तीत्याह यतिदेवोत्तरवैक्रियज्योतिष्कखद्योतादय इव तत्र यतयश्च साधवो देवाश्च सुरा यतिदेवाः यतिदे
वैर्मूलशरीरापेक्षयोत्तरकालं क्रियमाणं वैक्रियं यतिदेवोत्तरवैक्रियं ज्योतिष्काश्चंद्रग्रहनक्षत्रताराः खद्योताः प्रतीताः ततो यतिदे
वोत्तरवैक्रियं च ज्योतिष्काश्च खद्योताश्च ते आदिर्येषां ते रत्नौषधीप्रभृतीनां यतिदेवोत्तरवैक्रियज्योतिष्कखद्योतादयस्त
इव अत्र मकारो लाक्षणिकः अयमर्थः यथा यतिदेवोत्तरवैक्रियचंद्रग्रहादिज्योतिष्काः खद्योता रत्नौषधीप्रभृतयश्चानुष्णप्र

३३

काशात्मकमुद्योतं विदधति तथा यदुदयाज्जंतुशरीराण्यनुष्णप्रकाशरूपमुद्योतमातन्वंति तदुद्योतनामेत्यर्थः ४ ५ ४६
अंगं न गुरु न लहुअं जायइ जीवस्स अगुरुलहुउदया तित्थेण तिहुअणस्स वि पुज्जो से उदउ केवलिणो ४७ अगुरुल
घूदयादगुरुलघुनामोदयेन जीवस्यांगं शरीरं न गुरु लघु जायते भवति किंत्वगुरुलघु यत एकांतगुरुत्वे हि वोढु
मशक्यं स्यादेकांतलघुत्वे तु वायुनाऽपह्रियमाणं धारयितुं न पार्येत यदुदयाज्जंतुशरीरं न गुरु न लघु नापि गुरुलघु किं त्व
गुरुलघुपरिणामपरिणतं भवति तदगुरुलघुनामेत्यर्थः ५ तीर्थेण तीर्थंकरनामकर्मवशात् त्रिभुवनस्यापि देवमानवदा
नवलक्षणत्रिलोकलोकस्यापि पूज्योऽर्चनीयो भवति से तस्य तीर्थंकरनामकर्मण उदयो विपाकः केवलिन उत्पन्न
केवलज्ञानस्यैव यदुदयाज्जीवः सदेवमनुजासुरलोकस्य पूज्यमुत्तमोत्तमं तित्थं भंते तित्थं तित्थयरे तित्थं गोयमा अरिहा ताव नि
यमा तित्थंकरे तित्थं पुण चाउवन्ने समणसंघे पढमगणहरे वा इति परमर्षिप्रणीतधर्मतीर्थस्य प्रवर्तयितृपदमवाप्नोति ती
र्थंकरनामेत्यर्थः ६ ५ ४७ अंगोवंगनिअमणं निम्माणं कुणइ सुत्तहारसमं उवघाया उवहम्मइ सतणुवयवलंबिगा
ईहिं ४८ निर्माणं निर्माणनामांगोपांगनियमनं अंगप्रत्यंगानां नियतप्रदेशव्यवस्थापनं करोति विदधाति ततः सूत्रधारस
सूत्रधारकल्पं यदुदयाज्जंतुशरीरेष्वंगोपांगानां प्रतिनियतस्थानवर्तिता भवति तत्सूत्रधारकल्पं निर्माणनामेत्यर्थः त
दभावे हि तद्भृतककल्पैरंगोपांगनामादिभिर्निर्वर्तितानामपि शिरउदरादीनां स्थानेऽनियमः स्यात् ७ उपघातादुपघात
नामोदयादुपहन्यते विनाश्यते केनेत्याह स्वास्वकीयात्तनुः शरीरं स्वतनुस्तस्यावयवा अंशाये लंबिकादय आदिशब्दा
त्प्रतिजिह्वाचौरदंतादिपरिग्रहः तैः स्वतन्ववयवैरित्यर्थः इत्यत्र अकारलोपः प्राकृतत्वात् यदुदयात्स्वशरीरान्तःप्रवर्धमानैर्लंबि
काप्रतिजिह्वाचौरदंतादिभिर्जंतुरुपहन्यते तदुपघातनामेत्यर्थः ८ व्याख्याता अष्टौ प्रत्येकप्रकृतयः सांप्रतं त्रसदशकं व्याख्या

DR. BHAU DAJI

नयन्नाह ॥ ४८ ॥ बितिचउपणिंदिअ तसा बायरउ बायरा जीवा थूला । निअनिअपज्जत्तिजुआ पज्जत्ता लद्धिकरणेहिं ॥४९॥
त्रस्यंति उद्विजंत इति त्रसाः संतो विवक्षितस्थानात् उद्विजंते गच्छंति च छायाद्यासेवनार्थं स्थानांतरमिति त्रसास्तत्पर्यायविपा
कवेद्यकर्मापि त्रसनाम ततस्त्रसनामोदयाज्जीवा बितिचउपणिंदिय त्ति इंद्रियशब्दस्य प्रत्येकं योगाद्द्वे इंद्रिये स्पर्शनरसनल
क्षणे येषां ते द्वींद्रियाः शंखचंदनककपर्दजलौकाकृमिगंडोलकपूतरकादयो भवंति त्रीणि स्पर्शनरसनघ्राणरूपाणींद्रिया
णि येषां ते त्रींद्रियाः यूकामत्कुणमर्दालइंद्रगोपककुंथुमतकोटकादयः चत्वारि स्पर्शनरसनघ्राणचक्षुर्लक्षणानींद्रियाणि
येषां ते चतुरिंद्रियाः मक्षिकाः भ्रमरमशकवृश्चिकादयः पंच स्पर्शनरसनघ्राणचक्षुःश्रोत्ररूपाणींद्रियाणि येषां ते पंचेंद्रियाः
मत्स्यमकरहरिणसारसराजहंसनरनारकादयो भवंतीति यदुदयाज्जीवास्त्रसा द्वित्रिचतुःपंचेंद्रिया भवंति तत्त्रसनामे
त्यर्थः ॥१॥ बादरात् बादरनामोदयात् जीवाः जंतवो बादराः स्थूला भवंति बादरत्वं चेह न चक्षुर्ग्राह्यत्वमिष्टं बादरस्याप्येके
कस्य पृथिव्यादिशरीरस्य चक्षुर्ग्राह्यत्वाभावात् तस्मात् जीवविपाकत्वेन जीवस्यैव किंचिद्बादरपरिणामं जनयत्येतन्न च पु
द्गलेषु किंचिज्जीवविपाक्यप्येतच्छरीरं पुद्गलेष्वपि काचिदभिव्यक्तिं दर्शयति तेन बादराणां बहुतरसमुदितपृथिव्यादीनां
चक्षुर्ग्राह्यत्वं भवति सूक्ष्माणां जीवविपाकिकर्मणः शरीरे स्वशक्तिप्रकटनमयुक्तमिति चेत् नैवं जीवविपाक्यपि क्रोधो भ्रू
भंगत्रिवलीतरंगिताधिकफलककठोरस्वेदजलकणनेत्राघातास्खलत्पुरुषवचनवेपथुप्रकृतिविकारकंपितनरशरीरेऽपि
दर्शयति विचित्रत्वात्कर्मशक्तेरिति यदुदयाज्जीवा बादरा भवंति तद्बादरनामेत्यर्थः ॥२॥ पर्याप्तात् पर्याप्तनामोदयात् ३४
जीवा निजनिजपर्याप्तियुता भवंति तत्र पर्याप्तिर्नाम पुद्गलोपचयजः पुद्गलग्रहणपरिणमनहेतुः शक्तिविशेषः सा च वि
षयभेदात् षोढा आहारपर्याप्तिः शरीरपर्याप्तिः इंद्रियपर्याप्तिः उच्छ्वासपर्याप्तिः भाषापर्याप्तिः मनःपर्याप्तिश्चेति ६ तत्र

यया बाह्यमाहारमादाय खलरसरूपतया परिणमयति सा आहारपर्याप्तिः १ यया रसीभूतमाहारं रसासृग्मांसमेदोऽस्थि
मज्जशुक्रलक्षणसप्तधातुरूपतया परिणमयति सा शरीरपर्याप्तिः २ यया धातुरूपतया परिणमितमाहारमिंद्रियरूप
तया परिणमयति सा इंद्रियपर्याप्तिः ३ यया पुनरुच्छ्वासप्रायोग्यवर्गणादलिकमादाय उच्छ्वासरूपतया परिणमय्यालंब्य च मुं
चति सा उच्छ्वासपर्याप्तिः ४ यया तु भाषाप्रायोग्यवर्गणाद्रव्यं गृहीत्वा भाषात्वेन परिणमय्यालंब्य च मुंचति सा भाषापर्याप्तिः
५ यया पुनर्मनोयोग्यवर्गणादलिकं गृहीत्वा मनस्त्वेन परिणमय्यालंब्य च मुंचति सा मनःपर्याप्तिः ६ एताश्च यथाक्रममेके
ंद्रियाणां द्वींद्रियत्रींद्रियचतुरिंद्रियासंज्ञिपंचेंद्रियाणां संज्ञिपंचेंद्रियाणां च चतुःपंचषट्संख्या भवंति तथा वैक्रियशरीरिणां
शरीरपर्याप्तिरेवैकांतर्मुहूर्तिकी शेषाः पंचाप्येकसामयिकाः औदारिकशरीरिणां पुनराहारपर्याप्तिरेवैका एकसामा
यिकी शेषाः पुनरंतर्मुहूर्तिकाः आहारवेउव्वियपज्जत्ती शरीरअंतमुहुस्सेसा इगसमया आहारे इगसमया सेसा अंतमुहु
त्तकाले ततः पर्याप्तयो निर्वृता येषां ते अभ्यादित्वादप्रत्यये ते पर्याप्ताः तद्विपाकवेद्यं कर्मापि पर्याप्तनाम यदुदयात् स्वस्वपर्या
प्तियुक्ता भवंति जीवास्तत् पर्याप्तिनामेत्यर्थः ते च पर्याप्ता द्विधा लब्ध्या करणैश्च तत्र ये स्वयोग्यपर्याप्तीः सर्वा अपि समर्थ्य म्रि
यंते नार्वाक् ते लब्धिपर्याप्ता ये पुनः करणानि शरीरेंद्रियादीनि निर्वर्तितवंतस्ते करणपर्याप्ता इति ननु च शरीरपर्या
प्तेश्च शरीरस्य विप्रतिपत्तिः किं प्रागभिहितेन शरीरनाम्ना नैतदस्ति साध्यभेदात्तथाहि जीवेन शरीरनाम्ना गृहीतानां पुद्गलानामौ
दारिकादिशरीरत्वेन परिणतिः साध्या शरीरपर्याप्तेः पुनरारब्धशरीरस्य परिसमाप्तिरिति एवं प्राणुक्तेन उच्छ्वासनाम्नैवोच्छ्
वासस्य सिद्धित्वादिहोच्छ्वासपर्याप्तिर्निर्विषयेति नैवं सत्यामपि उच्छ्वासनामोदयेन जनितमुच्छ्वासलब्धिमात्मशक्तिविशे
षरूपामुच्छ्वासपर्याप्तिमंतरेण व्यापारयितुं न शक्नुयात् यथा हि शरीरनामोदयेन गृहीतानप्यौदारिकादिशरीरपुद्गलाः

॥ लद्धिअपज्जत्तो जो मरइ अपरियं सपज्जत्ते ॥ लद्धिपज्जत्तो सो पुण नियमा परिसमइ सो य ॥ जा न करणेहिं परिसमइ सो करणअपज्जत्तो । करणपज्जत्तो
सो पुण जेण तासु वरीया हुंति ॥ २ ॥ ५६ ॥

शक्तिविशेषरूपां शरीरपर्याप्तिं विना शरीररूपतया परिणमयितुं न शक्नोतीति शरीरनाम्नः पृथग्निर्दिष्टे शरीरपर्याप्तिरेवमत्रा
प्युच्छ्वासनाम्नः पृथगुच्छ्वासपर्याप्तिरेवोक्ता उपयुक्तत्वादिति ७ ॥४९॥ पत्तेयतणू पत्ते उदएणं दंतअट्ठिमाइ थिरं नाभुवरि सि
राइ सुहं सुभगाओ सव्वजणइट्ठो ॥५०॥ प्रत्येकोदयेन प्रत्येकनामकर्मोदयेन शरीरं प्रत्येकं तनुः पृथक् शरीरं भवति यदुद
यादेकैकस्य जंतोरेकैकं शरीरं औदारिकशरीरं वा भवति तत्प्रत्येकनामेत्यर्थः स्थिरं स्थिरनामोदयेन दंतास्थ्यादि निश्चलं
भवति यदुदयात् शिरोस्थिग्रीवादीनामवयवानां स्थिरत्वं भवति तत् स्थिरनामेत्यर्थः ५ शुभं शुभनामोदयान्नाभेरुपरि
शिरःप्रभृति भवति यदुदयान्नाभेरुपर्यवयवाः शुभा भवंति तत् शुभनाम शिरःप्रभृतिभिः स्पृष्टः परो हृष्यतीति तेषां शुभत्वं
शुभगात् शुभगनामोदयेन सर्वजनेष्टो भवति यदुदयादनुपकार्यपि सर्वस्य मनःप्रियो भवति तत्सुभगनामेत्यर्थः यदुक्तं
अणुवकए वि बहूणं जो होइ पिओ तस्स सुभगनामुदओ त्ति सुभगुदए वि हु कोई कंची अभव्वं दुब्भगो जइ वि जायइ त
द्दोसाउ जओ अभव्वाण तित्थयरो ५० ॥ सुसरा महुरसुहज्झुणी आइज्जा सव्वलोयगिज्झवओ जसओ जसकित्ती थावरदस
गं विवज्जत्थं ५१ सुस्वरात् सुस्वरनामोदयेन मधुरो माधुर्यगुणालंकृतः सुखयतीति सुखः सुखदो ध्वनिः स्वरो भवति यदुदयात्
जीवस्य स्वरः श्रोतृप्रीतिहेतुर्भवति तत्सुस्वरनामेत्यर्थः ८ आदेयादादेयनामोदयेन सर्वलोकेन समस्तजनेन ग्राह्यमादेयं वचो व
चनं यस्य स तथा यदुदयात् यत्किंचिदपि ब्रुवाणो जीवः सर्वस्योपादेयवचनो भवति दर्शनसमनंतरमेव तस्याभ्युत्थानादि
समाचरति तदादेयनामेत्यर्थः ९ जसओ त्ति यशसः यशोनामकर्मोदयेन यशःकीर्तिर्भवति तत्र सामान्यतस्तपःशौर्यत्या ३५
गादिसमुपार्जितयशसा कीर्तनं संशब्दनं श्लाघनं यशः कीर्त्यते यथा दानपुण्यकृता कीर्तिः पराक्रमकृतं यशः अ
थवा एकदिग्गामिनी कीर्तिः सर्वदिग्गामुकं यश इति १० व्याख्यातं त्रसदशकं संप्रति स्थावरदशकं व्याचिख्यासुरिति दिशति

तः त्रसदशकात् स्थावरदशकं विपर्यस्तं विपरीतार्थं भवति तथाहि तिष्ठंतीत्येवंशीला उष्णाद्यभितापेपि तत्परिहारासम
र्थाः स्थावराः स्थिरास्ता सा भि सक सो दरहति वरभसयः पृथिवीकायिका अप्कायिकाः तेजस्कायिकाः वायुकायिकाः
वनस्पतिकायिकाः एकेंद्रियास्तद्विपाकवेद्यं कर्मापि स्थावरनाम उदयेपि चलनं स्वाभाविकमेव न पुनरुष्णाद्यभितापे
न द्वींद्रियादीनामिव विशिष्टमिति १ यदुदयात् सूक्ष्माः पृथिवीकायिकादयः पंच भवंति तदपि जीवविपाकि सूक्ष्म
नामकर्मेति २ यदुदयात् स्वैकैकस्वयोग्यपर्याप्तिपरिसमाप्तिविकला जंतवो भवंति तदपर्याप्तनाम अपर्याप्ता यो वि
द्यंते येषां ते अपर्याप्ता इति कृत्वा तन्निबंधनं नाम अपर्याप्तनाम तत्र द्विधा अपर्याप्ता लब्ध्या करणैश्च तत्र ये अपर्याप्तका
एव संतो म्रियंते न पुनः स्वयोग्यपर्याप्तीः सर्वा अपि समर्थयंते ते लब्ध्यपर्याप्ताः ये पुनः करणानि शरीरेंद्रियादीनि न
तावन्निवर्तयंति अथ चावश्यं पुरस्तान्निवर्तयिष्यंति ते करणापर्याप्ताः इह चैवमागमः लब्ध्यपर्याप्ता अपि निय
मादाहारशरीरेंद्रियपर्याप्तिपरिसमाप्तावेव म्रियंते नार्वाग् यस्मादागामिभवायुर्बद्ध्वा म्रियंते सर्व एव देहिनः तच्चा
हारशरीरेंद्रियपर्याप्तिपर्याप्तानामेव बध्यत इति यदुदयादनंतानां जीवानां साधारणमेकं शरीरं भवति तत्साधार
णनाम ४ यदुदयात् कर्णभ्रूजिह्वाद्यवयवा अस्थिराश्चपला भवंति तदस्थिरनाम ५ यदुदयान्नाभेरधः पादादीनाम
वयवानामशुभता भवति तदशुभनाम पादादिना हि स्पृष्टः परो रुष्यतीति तेषामशुभत्वं कामिनीव्यवहारेण व्यभि
चार इति चेन्नैवं तस्य मोहनिबंधनत्वात् वस्तुस्थितिश्चेह चिंत्यते इति ६ यदुदयवशादुपकारकृदपि जनस्याप्रि
यो भवति तद्दुर्भगनाम उक्तं च उवकारकारगे वि हु न रुच्चइ दुब्भगो जणस्स इहइ ति ७ यदुदयात् स्वरो भिन्नहीनस्व
रो भवति तद्दुःस्वरनाम ८ यदुदयवशाद्युक्तियुक्तमपि ब्रुवाणो नादेयवचनो भवति न च लोकोऽभ्युत्थानादि तस्य

करोति तदनादेयनाम ९ यदुदयात्पूर्वप्रदर्शितयशःकीर्त्तिर्भवति तद्यशःकीर्त्तिनामेत्याख्यातं च-
त्वारिंशद्भेदं त्रिनवतिभेदं त्र्युत्तरशतभेदं सप्तषष्टिभेदं चेदं नामेति संप्रति द्विभेदं गोत्रकर्माभिधित्सुराह ॥ ५१ ॥ गोयं दुहुच्च
नीअं कुलाल इव सुघडभुंभलाईअं विग्घं दाणे लाभे भोगुवभोगेसु वीरिए अ ॥ ५२ ॥ गोत्रं प्राग्वर्णितशब्दार्थं द्विधा द्विभेदं क-
थमित्याह उच्चनीचं उच्चं च नीचं च उच्चनीचं उच्चैर्गोत्रं नीचैर्गोत्रमित्यर्थः एतच्च कुलाल इव कुंभकारवत् ज्ञेयं यथासौ घटः सुघटः
पूर्णकलशः भुंभलं मद्यस्थानं सुघटभुंभले आदौ यस्य तत्कृतोपकरणस्य तत्सुघटः भुंभलादि करोतीति शेषः अय-
मत्र भावः यथा हि कुलालः पृथिव्यास्तादृशं पूर्णकलशादिरूपं करोति यादृशं लोकात् कुसुमचंदनाक्षतादिभिः पूजां ल-
भते स एव भुंभलकादि तादृशं विदधाति यादृशमपक्वमद्यमपि लोकान्निंदां लभते तथा यदुदयान्निर्धनः कुरूपो बुद्ध्यादिप-
रिहीणोऽपि पुरुषः सुकुलजन्ममात्रादेव लोकात् श्लाघां लभते तदुच्चैर्गोत्रं यदुदयात्पुनर्महाधनोऽपि सुरूपो बुद्ध्यादि
समन्वितोऽपि पुमान् विशिष्टकुलाभावाल्लोकान्निंदां प्राप्नोति तन्नीचैर्गोत्रमित्युक्तं द्विविधं गोत्रकर्म अथ विघ्नकर्म पंचधा
व्याख्यानयन्नाह विग्घं दाणे लाभे इत्यादि विशेषेण हन्यते दानादिलब्धयो विनाश्यंते अनेनेति विघ्नमंतरायं कर्मेति
तद्विषयभेदात्पंचधेति दर्शयति दीयते इति दानं तस्मिन् लभ्यते इति लाभस्तस्मिन् भुज्यते सकृदुपयुज्यते इति भोगः पुष्प १
हारादिः उपेति पुनः पुनर्भुज्यते उपभोगो भवनवसनांगनादि उक्तं च सइ भुज्जइ त्ति भोगो सो पुण आहारपुप्फमाईओ
उवभोगो उ पुणो पुण उवभुज्जइ भवणविलयाई ततो भोगश्च उपभोगश्च भोगोपभोगौ तयोः प्राकृतत्वाद्द्विव ३६
नस्थाने बहुवचनं भवति यदाहुः श्रीहेमचंद्रसूरिपादाः स्वप्राकृतलक्षणे द्विवचनस्य बहुवचनमिति विशेषेण १
ईर्यते चेष्ट्यते वानेनेति वीर्यं यद्वा विविधमनेकप्रकारमीरयति यत्प्राणिनं क्रियासु तद्वीर्यं सामर्थ्यं शक्तिरिति पर्याय १

स्तस्मिन् च शब्दः समुच्चये सर्वत्र विघ्नमिति योज्यं विषयसप्तमी चेयं सर्वत्र ततो दानादिविषयं पंचधा विघ्नं कर्म भवतीति वा-
क्यार्थः भावार्थस्त्वयं सत्यपि दातव्ये वस्तुनि आगते च गुणवति पात्रे जानन्नपि दानफलं यदुदयाद्दातुं नोत्सह-
ते तद्दानांतरायं १ यदुदयाद्विशिष्टेऽपि दातरि विद्यमानेऽपि देयवस्तुनि याच्ञाकुशलोऽपि याचको न लभते तल्लाभां-
तरायं २ यदुदयात्सति विभवादौ संपद्यमानेऽप्याहारमाल्यादौ विरतिहीनोऽपि न भुंक्ते तद्भोगांतरायं ३ यदुदयाद्विद्यमा- १
नमपि वस्त्रालंकारादि नोपभुंक्ते तदुपभोगांतरायं ४ यदुदयाद्बलवान् नीरुजो वयस्थोऽपि तृणकुब्जीकरणे-
ऽप्यसमर्थस्तद्वीर्यांतरायमिति ५ एतच्च भांडागारिकसममिति दर्शयन्नाह ॥ ५२ ॥ सिरिहरिअसमं एअं जह पडिकूलेण
तेण रायाई न कुणइ दाणाईअं एवं विग्घेण जीवो वि ॥ ५३ ॥ व्या॰ श्रियो गृहं श्रीगृहं भांडागारं तद्विद्यते यस्य स श्रीगृहिको
भांडागारिकस्तेन समं तुल्यमेतदंतरायकर्म यथा तेन श्रीगृहिकेण प्रतिकूलेन अननुकूलेन राजा नृपतिः आदि-
शब्दात् श्रेष्ठीश्वरतलवरादिपरिग्रहः न करोति कर्त्तुं न व्यापारयति दानादि आदिशब्दाल्लाभभोगोपभोगादिपरिग्रहः ए-
वममुना श्रीगृहिकदृष्टांतेन विघ्नेनांतरायकर्मणा जीवोऽपि दानादि कर्त्तुं न पारयतीति व्याख्यातं पंचविध-
मंतरायं कर्म तद्व्याख्याने च समर्थिता इह नाणदंसणावरणवेय इत्यादि मूलगाथा अथ कीरइ जीएण हेउहिं जेण
तो भन्नए कम्मं इत्यादौ यदुक्तं तद्व्याख्यानार्थं यस्य कर्मणो ये बंधहेतवः स्युस्तान् कथनद्वारेण क्वापि च हेतुमपि द्वारे-
ण दर्शयिष्यन्नाह ॥ ५४ ॥ पडिणीअत्तणनिन्हवउवघायपओसअंतराएणं अच्चासायणयाए आवरणदुगं जीओ ज-
यइ ॥ ५४ ॥ आवरणद्विकं ज्ञानावरणदर्शनावरणरूपं जीवो जयति धातूनामनेकार्थत्वात् बध्नातीति संबंधः तत्र ज्ञा-
नस्य मत्यादेर्ज्ञानिनां साध्वादीनां ज्ञानसाधनस्य पुस्तकादेः प्रत्यनीकत्वेन तदनिष्टाचरणलक्षणेन निह्नवेन न मयात्

१

कर्मग्रं० वृ० पत्र २

तत्समीपेऽधीतमित्यादिस्वरूपेण उपघातेन मूलतो विनाशस्वरूपेण प्रद्वेषेणाऽन्तरायीतिरूपेण अन्तरायेण तत्कृपा
नवसनोपाश्रयलाभनिवारणलक्षणेन आशातनया जात्याद्युद्घट्टनादीलारूपया ज्ञानावरणं कर्म जयतीति सर्व
त्र द्रष्टव्यं एतच्चोपलक्षणम् तो ज्ञानावर्णवादेन आचार्योपाध्यायाद्यविनयेन अकालस्वाध्यायकरणेन कालेचस्व
ध्यायाविधानेन प्राणिवधाकृतलापेन स्तेन्याब्रह्मपरिग्रहरात्रिभोजनाविरमणादिभिश्च ज्ञानावरणं जयतीत्याद्यपि वक्तव्य
मिति एवं दर्शनावरणेऽपि वाच्यं नवरं दर्शनाभिलापो वक्तव्यस्तथाहि दर्शनस्य चक्षुर्दर्शनादेः दर्शनिनां साध्वादीनां दर्शनसा
धनस्य श्रोत्रनयननासिकादेः सम्यक्त्वनेकान्तजयपताकादिप्रमाणशास्त्रपुस्तकादेर्वा प्रत्यनीकत्वेन तदनिष्टाचरणल
क्षणेन निह्नवेन न मया तत्समीपेऽधीतमित्यादिस्वरूपेण उपघातेन मूलतो विनाशेन प्रद्वेषेण अन्तरायीत्यात्मकेनान्तरा
येण तत्कृपान वसनोपाश्रयलाभनिवारणेन दर्शनावरणं आशातनया वक्रात्यादिहीलया दर्शनावरणं कर्म जयती
ति सर्वत्र द्रष्टव्यं उपलक्षणमिदमदो दर्शनिनां दोषग्रहणेन श्रवणकर्तनतत्रोत्पादननासाछेदजिह्वाविकर्तनादिना प्रा
णिवधाव्रतलापेन स्तेन्याब्रह्मपरिग्रहरात्रिभोजनाविरमणादिभिश्च दर्शनावरणं जयतीत्याद्यपि वक्तव्यं यदवादि श्री
देवेन्द्रसूरिगुरुपादैः ज्ञानदर्शनयोस्तद्वतां प्रत्यनीकविघ्ननिह्नवपैशून्याशातनाघातमत्सराः १ तेन ज्ञानदर्श
नावरणकर्मणि हेतवः आश्रवाः उक्ता ज्ञानावरणदर्शनावरणबंधहेतवः इदानीं वेदनीयस्य द्विविधस्यापि तानाह ब ५४
गुरुभत्तिखंतिकरुणा वयजोगकसायविजयदाणजुओ दढधम्माइअज्जइ सायमसायं विवज्जय ५५ इह यु
त्तराद्धस्य प्रत्येकं योगस्ततो गुरवो मातापितृधर्माचार्यादयस्तेषां भक्तिरासनादिप्रतिपत्तिर्गुरुभक्तिस्तया युतो गुरु
भक्तिसमन्वितोऽजंतुः सातं सातवेदनीयमर्जयति समुपार्जयतीति संबंधः क्षांतियुतः क्षमान्वितः करुणायुतो दया

२७

परीतचेताः व्रतयुतो महाव्रताणुव्रतादिसमन्वितः योगयुतो दशविधचक्रवालसामाचार्याद्याचरणप्रगुणः कषाय
विजययुतः क्रोधादिकषायपरिभवनशीलः दानयुतो दानरुचिः दृढधर्म आपत्स्वपि निश्चलधर्म आदिशब्दात् बालवृद्धग्ला
नादिवैयावृत्त्यकरणशीलः जिनचैत्यभक्तिपरायणश्च सातमर्जयति बध्नाति यदवादि देवगुरुपूजागुरुपास्तिपात्रदानदय
क्षमाः सरागसंयमो देशसंयमोऽकामनिर्जरा शौचं बालतपश्चेति सद्वेद्यस्यास्रवाः तथा विपर्ययतः सातबंधविपर्य
येणासातमर्जयति तथाहि गुरूणामवज्ञायकः क्रोधनो निर्दयो व्रतयोगविकलः उत्कटकषायः कार्पण्यवान् सद्धर्म
रूपशमनः हस्तिश्वबलीवर्दादिनिर्दयदमनवाहनलांछनादिकरणः स्वपरदुःखशोकवधतापक्रंदनपरिदेवनादिका
रकश्चेति यदवादि दुःखशोकवधास्तापक्रंदनपरिदेवनं स्वान्योभयस्थाः स्युरसद्वेद्यस्यामी इहाश्रवाः उक्ता वेदनी =१जा ५ करे ति=
यस्य बंधहेतवः सांप्रतं मोहनीयस्य द्विविधस्यापि तानाह ब ५५ उम्मग्गदेसणामग्गनासणा देवदव्वहरणेहिं दंसण
मोहं जिणमुणिचेइअसंघाइपडिणीओ ५६ उन्मार्गस्य भवहेतोर्मोक्षहेतुत्वेन देशना कथनं सुन्मार्ग देशना मार्गस्य ज्ञान
दर्शनचारित्रलक्षणस्य मुक्तिपथस्य नाशना अपलपनं मार्गनाशना देवद्रव्यस्य चैत्यद्रव्यस्य हरणं यद्वणं भक्षणोपेक्षणप्र
ज्ञाहीनत्वलक्षणं तत् उन्मार्गनाशनाचदेवद्रव्यहरणं चेति हेतुभिर्जीवो दर्शनमोहं मिथ्यात्वमोहनीयमर्जयति तथा जि
नमुनिचैत्यसंघादिप्रत्यनीकस्तत्र जिनास्तीर्थंकरा मुनयः साधवः चैत्यानि प्रतिमारूपाणि संघः साधुसाध्वीश्राविकाश्रा
विकालक्षण आदिशब्दात् सिद्धगुरुश्रुतादिपरिग्रहस्तेषां प्रत्यनीकोऽवर्णवादाशातनाद्यनिष्टनिर्वर्तको दर्शनमोहमर्ज
यति यदवाणि वीतरागे श्रुते संघे धर्मे सर्वसुरेषु च अवर्णवादिता तीव्र मिथ्यात्वपरिणामिता १ सर्वज्ञसिद्धिदेवापह्नवो
धार्मिकदूषणं उन्मार्गदेशनानर्थाग्रहोऽसंयतपूजनं २ असमीक्षितकारित्वं गुर्वादिष्ववमानता इत्यादयो दृष्टिमोहस्य २,

श्रवाः परिकीर्तिताः ३ । ५६ दुविहंपि चरणमोहं कसायहासाइ विसयविवसमणो बंधइ नरयाउ महारंभपरिग्गहरओ रुद्दो ॥ ५७ द्विविधमपि द्विभेदमपि चरणमोहं चारित्रमोहनीयं कषायमोहनीयं नोकषायमोहनीयं रूपं जीवो बध्नातीति संबंधः किंविशिष्ट इत्याह कषायहास्यादिविषयविवशमनाः तत्र कषायाः क्रोधादय उक्तस्वरूपाः षोडश हास्यादयो हास्यरत्यरतिशोकभयजुगुप्सा इति षट् सांत विषयाः शब्दरूपगंधरसस्पर्शाख्याः पंच ततः कषायाश्च हास्यादयश्च विषयाश्च कषायहास्यादिविषयास्तैर्विवशं विसंस्थुलं पराधीनं मनो मानसं यस्य स कषायहास्यादिविषयविवशमना
इमत्र हृदयं कषायविवशमनाः कषायमोहनीयं बध्नाति हास्यादिविवशमनास्तु हास्यादिमोहनीयं रतिमोहनीयारति मोहनीयशोकमोहनीयभयमोहनीयजुगुप्सामोहनीयाख्यं नोकषायमोहनीयं बध्नाति विषयविवशमनाः पुन
र्वेदत्रयाख्यं नोकषायमोहनीयं बध्नाति सामान्यतः सर्वेपि कषायाः हास्यादिविषयद्विविधस्यापि चारित्रमोहनीयस्य बंधहेतवो भवंति यदुक्तं तत्त्वार्थादि कषायोदयतः तीव्रः परिणामो यस्त्वात्मनः चारित्रमोहनीयस्य स आश्रव उदीरितः १
उत्प्रासनं सकंदर्पोपहासो हासशीलता बहुप्रलापो दैन्योक्तिर्हास्यस्यामी स्युराश्रवाः २ देशादिदर्शनोत्सुक्यं चित्रे रमणखेलने परचित्तावर्जनावेति आश्रवाः कीर्तिता रतेः ३ असूयापापशीलत्वं परेषां रतिनाशनं अकुशलप्रो त्साहनं चारतेराश्रवा अमी ४ परशोकाविष्करणं स्वशोकोत्पादशोचने रोदनादिप्रसक्तिश्च शोकस्यैते स्युराश्रवाः ५ स्वयं भयपरिणामः परेषां भयदापनं त्रासने निर्दयत्वं च भयस्याश्रवा अमी ६ चतुर्वर्णस्य संघस्य परिवादजुगुप्सने स दाचारजुगुप्सा च जुगुप्सायाः स्फुराश्रवाः ७ ईर्ष्या विषादगार्द्ध्यं च मृषावादोतिवक्रता परदाररतासक्तिः स्त्रीवेदस्याश्रवा इमे ८ स्वदारमात्रसंतोषोऽनीर्ष्यामंदकषायता अवक्राचारशीलत्वं पुंवेदस्याश्रवा इति ९ स्त्रीपुंसानंगसेवायाः

स्फुरदो ष्टकेदस नं =

= नपुंसकवेदस्य =

कषायतीव्रकामता पाषंडिस्त्रीव्रतभंगः षंढवेदाश्रवा अमी १० साधूनां गर्हणा धर्मोन्मुखानां विघ्नकारिता मधुमांसरतानां च मविरत्यसविवर्णनं ११ विरताविरतानां चांतरायकरणं मुहुः अचारित्रगुणाख्यानं तथा चारित्रदूषणं १२ कषायनोकषायाणां मन्यस्थानामुदीरणं चारित्रमोहनीयस्य सामान्येनाश्रवा अमी १३ अभिहितं मोहनीयस्य बंधहेतवः संप्रति चतुर्विधस्याप्यायुषस्तानाह बंधइ नरयाउ इत्यादि बध्नाति अर्जयति नरकायुर्नारकायुष्कं जीवः किंविशिष्ट इत्याह महारंभपरिग्रहरतो महारंभरतो महापरिग्रहरतश्चेति अर्थः रौद्रो रौद्रपरिणामो गिरिरेखासमानकषायरौद्रध्यानाश्रितः चेते त्ति रित्यर्थः उपलक्षणत्वात्पंचेंद्रियवधादि परिग्रहः यदागमादिपंचेंद्रियप्राणिवधो बह्वारंभपरिग्रहो निरनुग्रहता मांसभोजनं स्थिरवैरता १ रौद्रध्यानमिथ्यात्वानंतानुबंधिकषायता कृष्णनीलकापोतश्च लेश्या अनृतभाषणं २ परद्रव्यापहरणं मुहुर्मैथुनसेवनं अवशेंद्रियता चेति नरकायुष आश्रवाः उक्ता नरकायुषो बंधहेतव इदानीं तिर्यगायुषस्तानाह ५७ तिरियाउ गूढहियउ सढो ससल्लो तहा मणुस्साउ पयईइ तणुकसाउ दाणरुई मज्झिमगुणो अ ५८ तिर्यगायुर्बध्नाति जीवः किं विशिष्ट इत्याह गूढहृदय उदायिनृपमारकादिवत् यात्मा चित्ताभिप्रायं सर्वथैव निगूहति यथा नान्यः कश्चिद्वेत्ति शठो वक्र समक्षरः परिणामे उदारुणः सशल्यो रागादिवशाच्चीर्णानकव्रतनियमातिचारस्फुरहृदंतः शल्यो ऽनालोचिता प्रतिक्रां त स्तथा शब्दादुन्मार्गदेशनादि परिग्रहः उक्तं च उन्मार्गदेशना मार्गप्रणाशो गूढचित्तता आर्त्तध्यानं सशल्यत्वं मायारंभपरिग्रहः शीलव्रते सातिचारो नीलकापोतलेश्यता अप्रत्याख्यानकषायस्तिर्यगायुष आश्रवा उक्ता स्तिर्यगायुर्बंधहेतवः अथ मनुष्यायुषस्तानाह मणुस्साउ इत्यादि मनुष्यायुर्जीवो बध्नाति किं विशिष्ट इत्याह प्रकृत्या स्वभावेनैव तनुकषायो रेणुराजिसमानकषायः दानरुचिर्यत्र तत्र वा दानशील मध्यमास्त्वगुणैर्युक्ताः केचिद्गुणाः क्षमार्जवमार्दवादयो यस्य
मा

१

कर्मग्रंथवृ०
पत्र३९

समधर्मगुणः अधमगुणस्य हि नरकायुः संभवाउत्तमस्यापि तु सिद्धेः सुरत्नो कायुषो वा संभवादिति भावः च शब्दादल्पपरि
ग्रहारंभादिपरिग्रहः आर्जव अल्पोपधिग्रहारंभो सदृढे मार्दवार्जवि कापोतपीतलेश्यात्वं धर्मध्यानानुरागिता १ प्रत्याख्यान
कषायत्वं परिणामश्च मध्यमः संविभागविधायकत्वं देवतागुरुपूजनं २ पूर्वालापप्रियालापो सुखप्रज्ञापनीयता लो
कयात्रासु माध्यस्थं मनुष्यायुष आश्रवाः ३ उक्ता मनुष्यायुषो बंधहेतवः संप्रति देवायुषस्तानाह ॥ ५८ अविरय
माइ सुराउ बालतवोकामनिज्जरो जयई सरलो अगारविल्लो सुहनामं अन्नहा असुहं ५९ अविरतो ऽविरत
सम्यग्दृष्टिः सुरायुर्देवायुर्देवायुष्कं जयति बध्नाति आदिशब्दात् देशविरतः सरागसंयतपरिग्रहः वीतरागसंयतस्य
तिविशुद्धत्वादायुर्न बध्नाति घोलनापरिणाम एव तस्य बध्यमानत्वात् बालं तपो यस्य स बालतपाः अनधिगतपरमा
र्थस्वभावोऽः खगार्हमोहगर्त्तवैराग्यो ज्ञानपूर्वकनिवर्त्तिततपः प्रवृत्तिकष्टविशेषो मिथ्यादृष्टिः सोप्यात्मगुणानु
रूपं किंचित्सुरादिकायुर्बध्नाति यदाह भगवान् भाष्यकारः बालतवे पडिबुद्धा उक्कडरोसा तवेण गारविया वेरे
ण य पडिबद्धा मरिउं असुरेसु उववज्जे अकामस्यानिच्छतो निर्ज्जरा कर्मविचटनलक्षणा यस्य स भावकामनि
र्ज्जरः इदमुक्तं भवति अकामतण्हाए अकामछुहाए अकामबंभचेरवासेणं अकामसीयायवदंसमसकअण्ह १
णगासयजल्लमलपंकपरिग्गहेणं दीहरोगचारगनिरोहबंधणेहिं गिरितरुसिहरनिवडणयाए जलजलणप्प
वेस अणसणाईहिं उदकराजिसमानकषायस्तदवित शुभपरिणामः किंचिद्व्यंतरादिकायुर्बध्नाति उपलक्षणात्क ३९
ल्याणमित्रसंपर्कमानसः धर्मश्रवणशीलत्वादिपरिग्रहः यदाहुः सरागसंयमो देशसंयमोऽकामनिर्ज्जराक
ल्याणमित्रसंपर्को धर्मश्रवणशीलता १ पात्रे दानं तपः श्रद्धा रत्नत्रयविराधना मृत्युकाले परिणामो लेश्ययोः पद्म

पीतयोः २ बालं तपोग्नितोयादिसाधनो ह्वंबनानि च अव्यक्तसामायिकता देवस्यायुष आश्रवाः ३ उक्ता देवायुषो बंधहे
तवः संप्रति नामकर्म्मणः यद्यपि कश्चिन्नारिंगादादिभेदादनेकधा तथापि शुभाशुभत्वविवक्षया द्विविधमित्यस्य द्विविधस्यापि बंध
हेतूनाह सरलो इत्यादि सरलः सर्वत्र मायारहितः गौरवाणि ऋद्धिरससातलक्षणानि विद्यंते यस्य स गौरववान् न गौरव
वान् अगौरववान् आलि च्छो लालवंतमंतरे लरमणम नो रिति प्राकृतसूत्रेण मतोः स्थाने इल्लादेशः उपलक्षणत्वात्संसा
रभीरुः क्षमामार्दवार्जवादिगुणयुक्तः शुभं देवगतियशःकीर्तिपंचेंद्रियजात्यादिरूपं नामकर्म्म बध्नाति अन्यथा उक्त
विपरीतस्वभावस्तथा हि मायावी गौरववान् उत्कटक्रोधादिपरिणामोऽशुभं नरकगत्ययशःकीर्त्येकेंद्रियजात्यादिलक्ष
णं नामकर्म्म बध्नातीति उक्तं च मनोवाक्कायवक्रत्वं परेषां विप्रतारणं मायाप्रयोगो मिथ्यात्वं पैशून्यं चलचित्तता १ सुवर्ण
दिप्रतिच्छंदकरणं कूटसाक्षिता वर्णगंधरसस्पर्शान्यथापादनानि च २ अंगोपांगच्यावनानि यंत्रपंजरकर्म च कूटमा
नतुलाकमान्यनिंदात्मप्रशंसनं ३ हिंसानृतस्तेयाब्रह्म महारंभपरिग्रहाः पुरुषासभ्यवचनं शुचिवेषादिना मदः ४ मौखर्य १
क्रोशो सौभाग्योपघातः कार्मणक्रिया परकौतूहलोत्पादः परहासविडंबने ५ वेश्यादीनामलंकारदानं दावाग्निदीपनं देवादि
व्याजान्गंधादि चौर्यं तीव्रकषायता ६ चैत्यप्रतिश्रयाराम प्रतिमानां विनाशनं अंगारादिक्रियाचेत्य शुभस्य नाम्न आश्रवाः
७ एते द्वात्रिंशत्प्रकारास्तथा संसारभीरुता प्रमादहानं सद्भावार्पणं क्षांत्यादयोपि च ८ दर्शने धार्मिकाणां च संभ्रमः स्वागतक्रिया
परोपकारसारत्वमाश्रवाः शुभनाम्नि ९ उक्ता नाम्नो बंधहेतवः संप्रति गोत्रस्य द्विविधस्यापि तानाह ॥ ५९ गुणप्रेक्षी म
यरहिओ अज्झयणज्झावणारुई निच्चं पकुणइ जिणाइभत्तो उच्चं नीअं इयरहाउ ६० गुणप्रेक्षी यस्य यावंतं गुणं पश्यति ता
वंतमेव प्रेक्षते परस्कारोति दोषेषु सत्स्वपि उदास्त इत्यर्थः मदरहितो विशिष्टजातिलाभकुलैश्वर्यबलरूपतपःश्रुतादिसंपत्

समन्वितोपि निरहंकारः निसं सर्वदाध्ययनाध्यापनारुचिः स्वयं पठति अन्यतरांश्च पाठयति अर्थतश्च स्वयमतीहलं विमृश
ति परेषां च आख्यानयति अन्यसंवापठनादिराक्तो तीवबहुमानः परान् अध्ययनाध्यापनपरायणान् अनुमोदते तथा जिना
दिसक्तो जिनानां तीर्थनाथानामादिशब्दात् सिद्धाचार्योपाध्यायसाधुचैत्यानामन्येषां च गुणगरिष्ठानां सक्तो बहुमानपरः एवंकरो
ति प्रकर्षेण समुपार्जयत्युच्चैर्गोत्रं नीचं नीचैर्गोत्रमितरथा उक्तगुणविपरीतस्वभावः उक्तं च परस्य निंदावज्ञोपहासाः
सद्गुणलोपनं सदसद्दोषकथनमात्मनस्तु प्रशंसनं १ सदसद्गुणशंसा च स्वदोषाच्छादनं तथा जात्यादिभिर्मदश्चेति नीचैर्गो
त्राश्रवा अमी २ नीचैर्गोत्राश्रवविपर्यासो विगतगर्वता वाक्कायचित्तैर्विनय उच्चैर्गोत्राश्रवा अमी ३ उक्तौ गोत्रस्य बंधहेतवः
सांप्रतमंतरायस्य बंधहेतवस्तानभिधित्सुः शास्त्रमिदं समर्थयन्नाह छ ५९ जिणपूआविग्घकरो हिंसाइपरायणो ज
यइविग्घं इअ कम्मविवागोयं लिहिओ देविंदसूरीहिं ६० इति प्रथमकर्मविपाकसूत्रं समाप्तं छ १ ॥ जिनपूजाविघ्नकरः
सावद्यदोषोपेतत्वात् गृहिणामप्येषा अविधेयेत्यादि कुदेशनादिभिः समयांतरस्तत्त्वहरीकृतो निषेधकः इत्यर्थः हिंसाजीवव
धआदिशब्दात् अनृतभाषणस्तेन्याब्रह्मपरिग्रहरात्रिभोजनाविरमणादिपरिग्रहस्तेषु परायणस्तत्परस्तपलक्षणमेत २
त्मोक्षमार्गस्य ज्ञानदर्शनचारित्रादेस्तद्दोषप्रदर्शनादिना विघ्नं करोति साधुभ्यो वा सकौपानोपाश्रयोपकरणेषु भक्तादिकं
दीयमानं निवारयति तेन चैतद्विदधनात् मोक्षमार्गः सर्वोपि विघ्नितो भवति अपरेषामपि सत्त्वानां दानलाभभोगपरिभोग
विघ्नं करोति मंत्रादिप्रयोगेण च परस्य ~~रस्तुकः समस्तास्त्वे वोपितेनजनः ६० छ~~ वीर्यमपहरति इत्यादि बधबंधादिभिः परं नि
श्चेष्टं करोति छेदन ~~भे~~ भेदनादिभिश्च परस्येंद्रियशक्तिमुपहंति सकिमित्याह जयति धातूनामनेकार्थत्वाद्दर्शयति विघ्नं पंच
प्रकारमप्यंतरायं कर्म इति पूर्वोक्तप्रकारेण कर्मविपाकः कर्मविपाकनामकं शास्त्रमयं संपत्तेव निगदितस्वरूपः लिखितो

रविन्यासीकृतो देवेंद्रसूरिभिः करालकलिकालपातालतलावमग्नविशुद्धधर्मधरोद्धरणकारिण श्रीमज्जगच्चंद्रसूरि
चरणसरसीरुहचंचरीकैरिति छः इति श्री देवेंद्रसूरिविरचिता स्वोपज्ञकर्मविपाकटीका समाप्ता ॥ विष्णोरिवयस्य विभोः
पदत्रयी व्यानशे जगन्निखिलं कर्ममलपटलजलदः स वीरो जिनो जयतु १ कुंदोज्ज्वलकीर्तिभरः सुरस्रीकृतसकलवि
ष्टपाभोगः आतमखमतविनतपदः श्रीगौतमगणधरः पातु २ तदनु सुधर्मस्वामी जंबूप्रभवादयो मुनिवरिष्ठाः श्रुतज
लनिधिपारीणाः भूयांसः श्रेयसे संतु ३ ततः प्राप्ततपाचार्येत्याख्या सिद्धांतनायकाः समभूवन् कुले चांद्रे श्रीजगच्चंद्रसू
रयः ४ जगज्जनितबोधानां तेषां शुद्धचरित्रिणां विनेयाः समजायंत श्रीमद्देवेंद्रसूरयः ५ स्वाऽन्ययोरुपकाराय श्रीमद्देवेंद्र
सूरिणा टीका कर्मविपाकस्य सुबोधेयं विनिर्ममे ६ विबुधवरधर्मकीर्ति श्रीविद्यानंदसूरिमुख्यबुधैः स्वपरसमयैककु
शलैस्तदैव संशोधिता चेयं ७ यदवादि किमल्पमतिना सिद्धांतविरुद्धमिह किमपि शास्त्रे विद्वद्भिस्तत्क्षेः प्रसादमाधाय तच्छोध्यं
८ कर्मविपाके विवृतिं वितन्वता यन्मयार्जितं सुकृतं कर्मविपाकविमुक्तः समस्तु सर्वोपि तेन जनः ९ छः ग्रंथाग्रं १८८२
॥ ८० ॥ नमः श्रीपार्श्वनाथाय बंधोदयोदीरणसत्वदक्षं निःशेषकर्माखिलं निरस्य यः सिद्धिसाम्राज्यमलं चकार श्रियेस वः
श्रीजिनवीरनाथः १ नत्वा गुरुपदकमलं गुरूपदेशाद्यथाश्रुतं किंचित् कर्मस्तवस्य विवृतिं विदधे स्वपरोपकाराय २
तत्रादावेव मंगलार्थमभीष्टदेवतास्तुतिमाह छ तह थुणिमो वीरजिणं जह गुणठाणेसु सयलकम्माइं बंधुदओदीरण
यासत्ता पत्ताणि खविआणि १ तथा तेन प्रकारेण स्तुमो ऽसाधारणसद्भूतसकलकर्मनिर्मूलनरूपणलक्षणगुणोत्कीर्त
नेन स्तवनगोचरीकुर्मः कं वीरजिनं तत्र विशेषेण पुनरावर्तनवर्त्म ईरि गतिकंपनयोरिति वचनात् ईरयति याति
शिवं कंपयति वा स्फोटयत्यपनयति कर्माणि वीरः १ यदि वा सूरवीरणक्रांतौ वीरयति स्म कषायोपसर्गपरीषहादिरिपुग

२
कर्मग्रंथवृ०
पत्र १

॥ वे ॥

णमिय जिणं वतिसमवीरः उत्पत्त्यात्र लिहादित्वात् अच् प्रत्ययः ईरणमीरः भावेऽकर्त्तरि इति घञ् ततश्च विशिष्ट ईरो गमनं स
र्वगत्यर्था ज्ञानार्था इति वचनात् ज्ञानं यस्य स वीरः अनेन च मुपतिशयेन भगवतश्चरमजिनेश्वरस्य स्वार्थसंपदमाह अथवा १
विशिष्टां सकलभुवनाद्भुतां नायिकां स्वर्गापवर्गादिकां ईं लक्ष्मीं राति ददाति भव्येभ्यः प्रयच्छति राक् दाने इति वचनाद्वीरः आतो
ऽनुपसर्गे कः इति कप्रत्ययः राति च भगवान् सुरासुरनरोरगतिर्यग् साधारणया वाण्या निःश्रेयसाभ्युदयसाधनोपायोपदेशे
न भव्यानां भुवनाद्भुतां श्रियं तथा चोक्तं अरहंता भगवंतो अहियं च हियं च न वि इह किंचि वारंति कारवेंति य घित्तूण जणं
बला हत्थे १ उवएसं पुण तं दिंति जेण चरिएण कित्तिनिलयाणं देवाण वि हुंति पहू किमंग पुण मणुयमित्ताणमिति अनया स्तुत्या
चापसिद्धसिद्धार्थपार्थिवविपुलकुलविमलनभस्तलनिशीथिनीनाथस्य जिननाथस्य परार्थसंपदमाह वीरश्चासौ जिन
श्च कषायादिपरिषहभङ्ग्या वीरजिनस्तं वीरजिनं यथा येन प्रकारेण अभिनवकर्मग्रहणं बंधो ओहेण तत्थ वीससयं ति
त्थयराहारगदुगवज्जं मिच्छंमि सतरसयमित्यादि वक्ष्यमाणेषु गुणस्थानेषु परमपदप्रासादशिखरारोहणसोपानकल्पेषु
व्याख्यास्यमानस्वरूपेषु मिथ्यादृष्ट्यादिषु सकलानि समस्तानि मतिज्ञानावरणप्रमुखनरकदुरितकदंबकसहितानि
कर्माणि ज्ञानावरणीयादिमूलप्रकृतिरूपाण्यष्टौ कर्माणि च स्वोपज्ञकर्मविपाके ~~कर्म~~ विस्तरेण व्याख्यातानि कृतवन्त १
मिति बंधोदयोदीरणासत्ताप्राप्तानि तत्र मिथ्यात्वादिभिर्बंधहेतुभिरंजनचूर्णपूर्णसमुद्गकवन्निरंतरं पुद्गलनिचिते लोके
कर्मयोग्यवर्गणापुद्गलैरात्मनः क्षीरनीरवद्वह्न्ययःपिंडवद्वा अन्योन्यानुगमाभेदात्मकः संबंधो बंधः १ तेषां च यथा १ ४१
स्वस्थितिबद्धानां कर्मपुद्गलानां अपवर्तनादिकरणविशेषकृते स्वाभाविके वा स्थितिक्षये सत्युदयसमयप्राप्तानां वि
पाकवेदनमुदयः २ तेषामेव कर्मपुद्गलानामकालप्राप्तानां जीवसामर्थ्यविशेषादुदयावलिकायां प्रवेशनमुदीरणा ३

तेषामेव कर्मपुद्गलानां बंधसंक्रमाभ्यां लब्धात्मलाभानां निर्जरणसंक्रमणकृतस्वरूपप्रच्युत्यभावे सद्भावः सत्ता ४ बंध
श्च उदयश्च उदीरणा च सत्ता च बंधोदयोदीरणसत्ताः ताः प्राप्तानि गतानि सूत्रे च उदीरणय इत्यत्र कं प्रत्ययः स्वार्थिकः
क्षपितानि निर्मूलोच्छेदेनाभावत्वमापादितानीति ३ गुणस्थानेषु कर्माणि क्षपितानीत्युक्तं ततो गुणस्थानान्येव तावत्
स्वरूपतो निर्दिशति ३ १ मिच्छे सासण मीसे अविरय देसे पमत्त अपमत्ते नियट्टि अनियट्टि सुहुमुवसम खीणसजो
गि अजोगि गुणा २ गुणत्ति गुणस्थानानि सूचनात्सूत्रमिति न्यायात् पदैकदेशेऽपि पदसमुदायोपचाराद्वा इहैव गुणस्था १
नकनिर्देशो द्रष्टव्यः तद्यथा मिथ्यादृष्टिगुणस्थानं १ सास्वादनसम्यग्दृष्टिगुणस्थानं २ सम्यग्मिथ्यादृष्टिगुणस्थानं ३
अविरतसम्यग्दृष्टिगुणस्थानं ४ देशविरतिगुणस्थानं ५ प्रमत्तसंयतगुणस्थानं ६ अप्रमत्तसंयतगुणस्थानं ७ अपूर्व निवृत्ति
बादर
करणगुणस्थानं ८ अनिवृत्तिबादरसंपरायगुणस्थानं ९ सूक्ष्मसंपरायगुणस्थानं १० उपशांतकषायवीतरागछद्म
स्थगुणस्थानं ११ क्षीणकषायवीतरागछद्मस्थगुणस्थानं १२ सयोगकेवलिगुणस्थानं १३ अयोगकेवलिगुणस्था
नमिति १४ तत्र गुणा ज्ञानदर्शनचारित्ररूपा जीवस्वभावविशेषाः स्थानं पुनरत्र तेषां विशुद्ध्यविशुद्धिप्रकर्षापकर्षकृतः
स्वरूपभेदः तिष्ठंत्यस्मिन् गुणा इति कृत्वा गुणानां स्थानं गुणस्थानं मिथ्या विपर्यस्ता दृष्टिरर्हत्प्रणीतजीवाजीवादिव
स्तुप्रतिपत्तिर्यस्य भक्षितहृत्पूरपुरुषस्य सिते पीतप्रतिपत्तिवत् स मिथ्यादृष्टिस्तस्य गुणस्थानं ज्ञानादिगुणानामविशु
द्धिप्रकर्षविशुद्ध्यपकर्षकृतः स्वरूपविशेषो मिथ्यादृष्टिगुणस्थानं ननु यदि मिथ्यादृष्टिस्ततः कथं तस्य गुणस्थानसंभवः
गुणा हि ज्ञानादिरूपास्तत्कथं ते दृष्टौ विपर्यस्तायां भवेयुरिति उच्यते इह यद्यपि सर्वथातिप्रबलमिथ्यात्वमोहनीयाद
+वस्तु र्हत्प्रणीतजीवाजीवादिप्रतिपत्तिरूपा दृष्टिरसुमतो विपर्यस्ता भवति तथापि काचिन्मनुष्यपश्वादिप्रतिपत्तिरविपर्यस्ता

ततो निगोदावस्थायामपि तथाभूताव्यक्तस्पर्शमात्रप्रतिपत्तिरविपर्यस्तापि स्यादन्यथाजीवत्वप्रसंगात् यदागमः
सव्वजीवाणं पियणं अक्खरस्स अणंतभागो निच्चुग्घाडिओ चिट्ठइ जइ पुण सो वि आवरिज्जा ता णं जीवो अजीवत्तणं
पाविज्जति तथाहि समुन्नतातिबहुलजीमूतपटलेन दिनकररजनीकरकरनिकरतिरस्कारेऽपि नैकांतेन तत्प्रभाना १
शः संपद्यते प्रतिप्राणिप्रसिद्धदिनरजनिविभागाभावप्रसंगात् उक्तं च सुट्ठु वि मेहसमुदए होइ पहा चंदसूराणमिति एवमि
हापि प्रबलमिथ्यात्वोदयेपि काचिदविपर्यस्तापि दृष्टिर्भवतीति तदपेक्षया मिथ्यादृष्टेरपि गुणस्थानसंभवः यद्येवं तर्हि
कथमसौ मिथ्यादृष्टिरेव मनुष्यपश्वादिप्रतिपत्त्यपेक्षया ततो निगोदावस्थायामपि तथाभूताव्यक्तस्पर्शमात्रप्रतिपत्त्यपेक्ष
या वा सम्यग्दृष्टित्वादपि नैष दोषः यतो भगवदर्हत्प्रणीतं सकलमपि प्रवचनार्थमभिरोचयमानोऽपि यदि तदुदितमे
कमप्यक्षरं न रोचयति तदानीमप्येष मिथ्यादृष्टिरेवोच्यते तस्य भगवति सर्वज्ञे प्रत्ययनाशात् तदुक्तं पयमक्खरं पि इक्कं पि
जो न रोएइ सुत्तनिद्दिट्ठं सेसं रोयंतो वि हु मिच्छदिट्ठी जमालि व्व इति किं पुनर्भगवदर्हदभिहितसकलजीवाजीवादिवस्तुतत्त्वप्र
तिपत्तिविकलेति ॥ अथ आयामौपशमिकसम्यक्त्वलक्षणं सादयति अपनयतीत्यासादनं अनंतानुबंधिकषायवे
दनं अत्र पृषोदरादित्वाद्यशब्दलोपः आसादनमिति कर्त्तर्यनट् सति तस्मिन् परमानंदरूपानंतसुखफलदो निःश्रे
यसतरुबीजभूतः औपशमिकसम्यक्त्वलाभो जघन्यतः समयमात्रेण उत्कर्षतः षडावलिकाभिरपगच्छतीति ततः स
ह आसादनेन वर्त्तत इति सासादनः सम्यग् अविपर्यस्ता दृष्टिर्जिनप्रणीतवस्तुप्रतिपत्तिर्यस्य स सम्यग्दृष्टिः सासाद ४२
नश्चासौ सम्यग्दृष्टिश्च सासादनसम्यग्दृष्टिस्तस्य गुणस्थानं सासादनसम्यग्दृष्टिगुणस्थानं यत्र तु सास्वादनसम्य
ग्दृष्टिगुणस्थानमिति पाठः तत्र सम्यक्त्वलक्षणरसास्वादनेन वर्त्तत इति सास्वादनः यथा हि भुक्तक्षीरान्नविषयव्यली

कचित्तपुरुषस्तद्वमनकाले क्षीरान्नरसमास्वादयति तथैषोऽपि मिथ्यात्वाभिमुखतया सम्यक्त्वस्योपरि व्यलीकचित्तः स
म्यक्त्वमुद्वमन् तद्रसमास्वादयति ततः स चासौ सम्यग्दृष्टिश्च तस्य गुणस्थानं सास्वादनसम्यग्दृष्टिगुणस्थानं तच्चैवं भ एत॥
वति इह गंभीरापारसंसारसागरमध्यमध्यासीनो मिथ्यात्वप्रत्ययमनंतान् पुद्गलपरावर्त्तान् अनंतदुःखलक्षणाननुभूय कथ
मपि तथाभव्यत्वपरिपाकवशतो गिरिसरिदुपलघोलनाकल्पेनानाभोगनिवर्त्तितयथाप्रवृत्तकरणेन करणं परि
णामो चेति वचनात् अध्यवसायविशेषरूपेणायुर्वर्जानि ज्ञानावरणीयादिकर्माणि सर्वाण्यपि पल्योपमासंख्येयभा १
गन्यूनैककसागरोपमकोटाकोटीस्थितिकानि करोति अत्र चांतरे जीवस्य कर्मजनितो घनरागद्वेषपरिणामः कर्कश
निबिडचिरप्ररूढगुपिलवक्रग्रंथिवत् दुर्भेदो अभिन्नपूर्वो ग्रंथिर्भवति तदुक्तं तीरविबोवमित्ते खविए इक्कंतरंमि जीवस्स
दुब्भेओ अभिन्नपुव्वो गंठी एवं जिणा बिंति गंठि त्ति सुदुब्भेओ कक्खडघणरूढगूढगंठि व्व जीवस्स कम्मजणिओ रागदोसपरि
णामो इति इमं च ग्रंथिं यावदभव्या अपि यथाप्रवृत्तिकरणेन कर्म क्षपयित्वाऽनंतशः समागच्छंति उक्तं चावश्यकटी १
कायां अभव्यस्यापि कस्यचिद्यथाप्रवृत्तकरणतो ग्रंथिमासाद्य अर्हदादिविभूतिदर्शनतः प्रयोजनांतरतो वा प्रव
र्त्तमानस्य श्रुतसामायिकलाभो भवति न शेषलाभ इति एतदनंतरं कश्चिदेव महात्मा आसन्नपरमनिर्वृतिसुखः समु
ल्लसितप्रचुरदुर्निवारवीर्यप्रसरो निशितकुठारधारयेवापूर्वकरणरूपतया परमविशुद्ध्या यथोक्तस्वरूपस्य ग्रं
थेर्भेदं विधाय मिथ्यात्वस्थितेरंतर्मुहूर्त्तमुदयक्षणादुपर्यतिक्रम्य अपूर्वकरणानिवृत्तिकरणलक्षणविशुद्धिजनित
सामर्थ्यादंतर्मुहूर्त्तकालप्रमाणं तत्प्रदेशवेद्यदलिकाभावरूपमंतरकरणं करोति अत्र यथाप्रवृत्तकरणापूर्वक
रणानिवृत्तिकरणानामयं क्रमः जा गंठी ता पढमं गंठिं समइच्छओ भवे बीयं अनियट्टीकरणं पुण सम्मत्तपुरक्खडे जी

वेगं ठिंसमइ ज्ञउत्ति ग्रंथिं समतिक्रामतो भिंदानस्येति संमत्तपुरक्खडत्ति सम्यक्त्वं पुरस्कृतं येन तस्मिन्नासन्नस
म्यक्त्वे जीवे निवृत्तिकरणं भवतीत्यर्थः तस्मिंश्चांतकरणे कृते सति तस्य मिथ्यात्वकर्मणः स्थितिद्वयं भवति अंतःक
रणादधस्तनी प्रथमा स्थितिरंतर्मुहूर्त्तप्रमाणा तस्मादेवांतरकरणादुपरितनी शेषा द्वितीया तत्र प्रथमा स्थितौ मिथ्या १
त्वदलिकवेदनादसौ मिथ्यादृष्टिरेव अंतर्मुहूर्त्तेन पुनस्तस्यामपगतायामंतरकरणप्रथमसमय एवौपशमिकस
म्यक्त्वमाप्नोति मिथ्यात्वदलिकवेदनाभावात् यथा हि वनदावानलः पूर्वदग्धेंधनमूषरं वा देशमवाप्य विध्मापय
ति तथा मिथ्यात्ववेदनवनदवोऽन्तरकरणमवाप्य विध्मापयति तथाप्यसति तस्यौपशमिकसम्यक्त्वलाभ उक्तं च
ऊसरदेसं दड्ढिल्लयं विज्झाइ वणदवो पप्प इय मिच्छस्स अणुदए उवसमसम्मं लहइ जीवो तस्यां चांतर्मुहूर्त्ति
क्यामुपशांताद्धायां परमनिधिलालकल्पायां जघन्यतः समयशेषायामुत्कृष्टतः षडावलिकाशेषायां स
त्यां कस्यचिन्महाविभीषिकोत्थानकल्पोऽनंतानुबंध्युदयो भवति तदुदये चासौ सास्वादनसम्यग्दृष्टिगुण
स्थाने वर्त्तते उपशमश्रेणिप्रतिपतितो वा कश्चित्सासादनत्वं याति तदुत्तरकालं चावश्यं मिथ्यात्वोदयो मिथ्यादृष्टि
र्भवति २ तथा सम्यक्त्वमिथ्यात्वे दृष्टिर्यस्यासौ सम्यग्मिथ्यादृष्टिस्तस्य गुणस्थानं सम्यग्मिथ्यादृष्टिगुणस्थानं इद
मंतरात्रिति विधिना लब्धेनौपशमिकसम्यक्त्वेनौषधविशेषकल्पेन मदनकोद्रवस्थानीयं मिथ्यात्वमोहनीयं
कर्म्म शोधयित्वा त्रिधा करोति तद्यथा शुद्धमर्द्धविशुद्धमशुद्धं चेति स्थापना ∩ △△ तत्र त्रयाणां पुंजानां म ४३
ध्ये यदार्द्धविशुद्धः पुंज उदेति तदा तदुदयाज्जीवस्यार्द्धविशुद्धं जिनप्रणीततत्त्वश्रद्धानं भवति तेन तदासौ सम्य
ग्मिथ्यादृष्टिगुणस्थानं अंतर्मुहूर्त्तकालं स्पृशति तत ऊर्द्धमवश्यं सम्यक्त्वं मिथ्यात्वं वा गच्छतीति ३ तथा विरतिर्वि

रतं जीवेऽत्रप्रत्ययः तस्य पुनः सावद्ययोगप्रत्याख्यानं तच्च ज्ञानाभिनाभ्युपगच्छति न च तत्पालनाय यतते इति त्रयाणां पदा
नां अष्टौ भंगाः स्थापना ऽऽऽ तत्र प्रथमेषु चतुर्षु भंगेषु मिथ्यादृष्टिरज्ञानित्वात् शेषेषु सम्यग्दृष्टिर्ज्ञानित्वात् सप्तसु भं
गेषु नास्य विरतं सम्यक्त्वी ऽऽ। त्वविरतोऽस्त्यादिभ्य इत्यप्रत्ययः चरमभंगे तु विरतिरस्तीति यद्वा विरमति स्म सावद्य
योगेभ्यो निवर्त्तते स्मेति ऽ।ऽ विरतः गत्यर्थाकर्मकमपि बन्धुरुहेरिति कर्त्तरि क्तप्रत्यये विरतो विरतः स चासौ सम्यग्दृष्टि
श्चाविरतसम्यग्दृष्टिश्चा ऽ।। विरतिसम्यग्दृष्टिरित्युक्तं भवति यः सर्वथौपशमिकसम्यग्दृष्टिः शुद्धदर्शनमोह
पुंजोदयवर्त्ती वा क्षायो ।ऽऽ पशमिकसम्यग्दृष्टिर्वा क्षीणदर्शनसप्तको वा क्षायिकसम्यग्दृष्टिर्वा परममुनिप्रणीतं १
सावद्ययोगविरतिं सि ।ऽ। द्धसौधधारोहणश्रेणिकल्पां जानन् प्रत्याख्यानकषायोदयविघ्नितत्वान्नाभ्युपगच्छ
ति न च तत्पालनाय यत ।।ऽ ।।। ते इत्यसावविरतसम्यग्दृष्टिरुच्यते तस्य गुणस्थानमविरतसम्यग्दृष्टिगुणस्थानं
उक्तं च बंधं अविरइहेउं जाणंतो रागदोसदुक्खं च विरइसुहं इच्छंतो विरइं काउं च असमत्थो १ एस असंजयसम्मो निंद
तो पावकम्मकरणं च अहिगयजीवाजीवे अचलियदिट्ठी चलियमोहो २ ४ तथा सर्वसावद्ययोगस्य देशे एकव्रतादि
विषयस्थूलसावद्ययोगाद्विरतं विरतिर्यस्यासौ देशविरतः सर्वसावद्यविरतिः पुनरस्य नास्ति प्रत्याख्यानावरणकषायो
दयात् सर्वविरतिरूपं प्रत्याख्यानमावृणोतीति प्रत्याख्यानावरणाः उक्तं च सम्मदंसणसहिओ गिण्हंतो विरइ
मप्पसत्तीए एगवयाइ चरिमो अणुमइमित्तं ति देससइ देशविरतस्य गुणस्थानं देशविरतिगुणस्थानं ५ तथा संयच्छ
ति स्म सम्यगुपरमति स्म संयतः गत्यर्थाकर्मकेति क्तः प्रमाद्यति स्म प्रमत्तः कर्त्तरि क्तः प्रमत्तो यद्वा प्रमदनं प्रमत्तं प्रमादः
स च मदिराविषयकषायनिद्राविकथानामन्यतमः सर्वो वा प्रमत्तमस्यास्तीति प्रमत्तः प्रमादवान् अभ्रादिभ्य इत्यप्र

स्यः प्रमत्तश्चासौ संयतश्च प्रमत्तसंयतस्तस्य गुणस्थानं प्रमत्तसंयतगुणस्थानं विशुद्ध्यविशुद्धिप्रकर्षापकर्षकृ
तः स्वरूपभेदः तथाहि देशविरतिगुणापेक्षया एतद्गुणानां विशुद्धिप्रकर्षोऽविशुद्ध्यपकर्षश्च अप्रमत्तसंयतापेक्ष
या तु विपर्ययः एवमन्येष्वपि गुणस्थानेषु पूर्वोत्तरापेक्षया विशुद्ध्यविशुद्धिप्रकर्षापकर्षयोजना द्रष्टव्या ६ न प्रम
त्तोऽप्रमत्तः यद्वा नास्ति प्रमत्तमस्य सोऽयमप्रमत्तः स चासौ संयतश्च अप्रमत्तसंयतस्तस्य गुणस्थानं अप्रमत्तसंयत
गुणस्थानं ७ ८ अपूर्वमतिनवं प्रथममित्यर्थः करणं स्थितिघात १ रसघात २ गुणश्रेणि ३ गुणसंक्रमं ४ स्थितिबं
धानां ५ पंचानामर्थानां निर्वर्त्तनं यस्यासावपूर्वकरणः तथाहि तावत्प्रमाणाया ज्ञानावरणीयादिकर्म्मस्थितेरपव
र्तनाकरणेन खंडनं अल्पीकरणं स्थितिघात उच्यते रसस्यापि प्रचुरीकृतस्यासतो अपवर्त्तनाकरणेन खंडनं अल्पीकरणं र
सघात उच्यते एतौ द्वावपि पूर्वगुणस्थानेषु विशुद्धेरल्पत्वादल्पावेव कृतवान् अत्र पुनर्विशुद्धेः प्रकृष्टत्वात् बृहत्प्र
माणतया अपूर्वाविमौ करोति तथा उपरितनस्थितेर्विशुद्धिवशादपवर्त्तनाकरणेनावतारितस्य दलिकस्यांतर्मुहूर्त्तप्र
माणमुदयक्षणादुपरि क्षिप्रतरक्षपणाय प्रतिक्षणमसंख्येयगुणवृद्ध्या विरचनं गुणश्रेणिः स्थापना



एतां च पूर्वगुणस्थानेषु विशुद्धत्वात्कालतो द्राघीयसीं दलिकरचनामाश्रित्याल्पीयसीं च द
लिकस्याल्पस्यापवर्त्तनाद्विरचितवान् इह तु तामेव विशुद्धत्वादपूर्वां कालतो ह्रस्वतरां दलिक विरचनामाश्रित्य पुन
:पृथुतरां बहुतरदलिकस्यापवर्त्तनाद्विरचयतीति तथा बध्यमानशुभप्रकृतिष्वबध्यमानाशुभप्रकृतिदलिक क ४४
स्य प्रतिक्षणमसंख्येयगुणवृद्ध्या विशुद्धिवशान्नयनं गुणसंक्रमस्तमप्यसावपूर्वं करोति तथा स्थितिक
र्म्मणामशुद्धत्वात् प्राग्द्राघीयसीं बद्धवान् इह तु तामपूर्वां विशुद्धत्वाद्ध्रस्वीयसीं बध्नातीति अथ एवापूर्वकर

णो द्विधा क्षपक उपशमकश्च क्षपणोपशमनार्हत्वाच्चैवमुच्यते राज्यार्हकुमारराजवत् न पुनरसौ क्षपयत्युपशमयत्य
ति वा तस्य गुणस्थानमपूर्वकरणगुणस्थानं एतच्च गुणस्थानप्रपन्नानां कालत्रयावर्त्तिनो नानाजीवानपेक्ष्य सामा २
न्यतोऽसंख्येयलोकाकाशप्रदेशप्रमाणान्यध्यवसायस्थानानि भवंति कथं पुनस्तानि भवंतीति विनेयजनानुग्रहार्थं
विशेषतोऽपि प्ररूप्यंते इह तावदिदं गुणस्थानकमंतर्मुहूर्त्तकालप्रमाणं भवति तत्र च प्रथमसमयेऽपि ये प्रतिपन्नाः प्रपद्यं
ते प्रपद्यंते च तदपेक्षया जघन्यादीन्युत्कृष्टांतान्यसंख्येयलोकाकाशप्रदेशप्रमाणान्यध्यवसायस्थानानि लभ्यंते प्रति
पत्तॄणां बहुत्वादध्यवसायानां च विचित्रत्वादिति भावनीयं ननु यदि कालत्रयापेक्षया क्रियते तदैतद्गुणस्थानकं प्रति
पन्नानामनंतान्यध्यवसायस्थानानि कस्मान्न भवंति अनंतजीवैरस्य प्रतिपन्नत्वादनंतैरेव प्रतिपत्स्यमानत्वादिति
सत्यं स्यादेवं यदि तत्प्रतिपत्तॄणां सर्वेषां पृथक् पृथग्भिन्नान्येवाध्यवसायस्थानानि स्युस्तच्च नास्ति बहूनामेकाध्यवसा
यस्थानवर्त्तित्वादपीति ततो द्वितीयसमये तदन्यान्यधिकतराण्यध्यवसायस्थानानि लभ्यंते तृतीयसमये तदन्यान्य
धिकतराणि चतुर्थसमये तदन्यान्यधिकतराणीत्येवं तावन्नेयं यावच्चरमसमयः एतानि च प्राप्यमाणानि विषमचतुर



स्रक्षेत्रमभिव्याप्नुवंति तद्यथा ब: अत्र प्रथमसमये जघन्याध्यवसायस्थानात्प्रथमसमयोत्कृष्टम
ध्यवसायस्थानमनंतगुणविशुद्धं तस्माच्च द्वितीयसमयजघन्यमनंतगुणविशुद्धं ततोऽपि द्वितीयस
मयजघन्यात् तदुत्कृष्टमनंतगुणविशुद्धं तस्माच्च तृतीयसमयजघन्यमनंतगुणविशुद्धं ततोऽपि तदुत्
कृष्टमनंतगुणविशुद्धमित्येवं तावन्नेयं यावद्द्विचरमसमयोत्कृष्टाच्चरमसमयजघन्यमनंतगुणविशुद्ध
मिति एकसमयगतानि चामून्यध्यवसायस्थानानि परस्परमनंतभागवृद्ध्याऽसंख्यातभागवृद्ध्या संख्यातभागवृद्ध्या

संख्येयगुणवृद्ध्यासंख्येयगुणवृद्ध्यानंतगुणवृद्धिरूपषट्स्थानिकपतितानि युगपदेव गुणस्थानप्रविष्टानां च परस्पर
मध्यवसायस्थानस्य व्यावृत्तिर्लक्षणा निवृत्तिरप्यस्तीति निवृत्तिगुणस्थानकमप्येतदुच्यते अत एवोक्तं सूत्रे निय
ट्टिअनियट्टीसादि ८ ः तथा युगपदेव गुणस्थानकं प्रतिपन्नानां बहूनामपि जीवानामन्योन्यमध्यवसायस्थान
स्य व्यावृत्तिर्निवृत्तिर्नास्त्यस्येति अनिवृत्तिः समकालमेतद्गुणस्थानकमारूढस्य परस्परमध्यवसायस्थाने विव
क्षितोन्योपि कश्चिन्न वर्तत इत्यर्थः संपरैति पर्यटति संसारमनेनेति संपरायः कषायोदयः बादरस्सूक्ष्मकिट्टीकृत
संपरायापेक्षया स्थूलतरः संपरायो यस्य स बादरसंपरायः अनिवृत्तिश्चासौ बादरसंपरायश्च अनिवृत्तिबादरसंप
रायस्तस्य गुणस्थानमनिवृत्तिबादरसंपरायगुणस्थानं इदमप्यंतर्मुहूर्त्तप्रमाणमेव तत्र चांतर्मुहूर्त्तप्रमाणमेव तत्र चां
तर्मुहूर्ते यावंतस्समयास्तत्प्रविष्टानां तावंत्येवाध्यवसायस्थानानि भवंति एकसमयप्रविष्टानामेकस्यैवाध्य
वसायस्थानस्यानुवर्त्तनादिति स्थापना० प्रथमसमयादारभ्य प्रतिसमयमनंतगुणवृद्ध्या चोत्तरमध्यवसायस्थानं भव
तीति वेदितव्यं स चानिवृत्तिबादरो द्विधा० क्षपक उपशमकश्च ९ ः तथा सूक्ष्मसंपरायः किट्टीकृतलोभकषायो
दयरूपो यस्य सोयं सूक्ष्मसंपरायोद ० यः द्विधा सोपि क्षपको उपशमको वा क्षपयत्युपशमयति लोभमेकमपीति कृ
त्वा तस्य गुणस्थानं सूक्ष्मसंपरायगुणस्थानं १० ः तथा छाद्यते केवलज्ञानं केवलदर्शनं चात्मनोनेनेति छद्मस्थ
ज्ञानावरणदर्शनावरणमोहनीयांतरायकर्मोदयः सतितस्मिन् केवलस्यानुत्पादात् तदपगमानंतरं चोत्पादात्
छद्मस्थैनि तिष्ठतीति छद्मस्थः स च सरागोपि भवतीत्यतस्तद्व्यवच्छेदार्थं वीतरागग्रहणं वीतो विगतो रागो माया
लोभकषायोदयरूपो यस्य सः वीतरागः स चासौ छद्मस्थश्च वीतरागछद्मस्थः स च क्षीणकषायोऽपि भवतीत

स्यापि यथोक्तरागापगमात् अतस्तद्व्यवच्छेदार्थं उपशांतकषायग्रहणं कषंति हिंसंत्यादिदंडकधातु हिंसार्थं कषंतिक
ष्यंते च परस्परमस्मिन् प्राणिनेति कषः संसारः कषमयंते निच्छंते गच्छंत्येवहतिकषायाः क्रोधादय उपशांता उ
पशमिता विद्यमाना एव संक्रमेणोद्वर्त्तनादिकरणोदयायोग्यत्वेन व्यवस्थापिताः कषाया येन स उपशांतकषायः
स चासौ वीतरागछद्मस्थश्चेति उपशांतकषायवीतरागछद्मस्थः तस्य गुणस्थानं इति प्राप्ते तत्रा विरतसम्यग्
दृष्टेः प्रत्यत्यनंतानुबंधिनः कषाया उपशांताः संभवंति उपशमश्रेणिप्रारंभेऽपि अनंतानुबंधिकषाया न विरतो देश
विरतः प्रमत्तो अप्रमत्तो वा सन्नुपशमय्य दर्शनमोह त्रितयमुपशमयति तदुपशमानंतरं प्रमत्ताप्रमत्तगुणस्थाने परि
वृत्तिशतानि कृत्वा ततोऽपूर्वकरणगुणस्थानोत्तरकालमनिवृत्तिबादरसंपरायगुणस्थाने चारित्रमोहनीयस्य प्रथ
मं नपुंसकवेदमुपशमयति ततः स्त्रीवेदं ततो हास्यरत्यरतिशोकभयजुगुप्सारूपं युगपत् षट्कं ततः पुरुषवेदं ततो
युगपदप्रत्याख्यानावरणप्रत्याख्यानावरणौ क्रोधौ ततः संज्वलनक्रोधं ततो युगपदप्रत्याख्यानावरणप्रत्या
ख्यानावरणौ क्रोधौ ततः संज्वलनक्रोधं ततो युगपत् द्वितीयतृतीयौ मानौ
ततः संज्वलनमानं ततो युगपत् द्वितीयतृतीये माये ततः संज्वलनमायां
ततो युगपत् द्वितीयतृतीयौ लोभौ ततः सूक्ष्मसंपरायगुणस्थाने संज्वलनलो
भमुपशमयतीत्युपशमश्रेणिः स्थापना चेयं विस्तरतस्तूपशमश्रेणिः स्वो
पज्ञशतकटीकायां व्याख्याता ततः परिभावनीया तदेवमन्येष्वपि गुणस्था
केष्वप्येतानामपि कषायाणामुपशांतत्वसंभवात् उपशांतकषायव्यपदेशः सं



संभवत्यतस्तद्व्यवच्छेदार्थं वीतरागग्रहणं उपशांतकषायवीतराग इत्येतावतीपीष्टसिद्धौ छद्मस्थग्रहणं स्वरूपक
थनार्थं व्यवच्छेद्याभावात् न च छद्मस्थोपशांतकषायवीतरागः संभवति यस्य सछद्मस्थग्रहणेन व्यवच्छेदः स्या
दिति अस्मिंश्च गुणस्थाने एते विंशतिरधिप्रकृतयः उपशांता ज्ञातव्या उपशांतकषायश्च जघन्येनैकसमयं भवति
उत्कर्षेण चांतर्मुहूर्तकालं यावत् न तदूर्ध्वं नियमादसौ प्रतिपतति प्रतिपातश्च द्विधा भवक्षयेण अद्धाक्षयेण च त
त्र भवक्षयो म्रियमाणस्य अद्धाक्षय उपशांताद्धायां समाप्तायां अद्धाक्षयेण च प्रतिपतन् यथैवारूढस्तथैव प्रति
पतति यत्र यत्र बंधोदयोदीरणाव्यवच्छिन्नास्तत्र तत्र प्रतिपतता सता ते आरभ्यंत इति यावत् प्रतिपतंश्च तावत् प्रतिपतति
यावत्प्रमत्तगुणस्थानं कश्चित्तु ततोप्यधस्तनं गुणस्थानकद्विकं याति कोपि सासादनभावमपि यः पुनर्भवक्षयेण प्रतिप
तति स प्रथमसमय एव सर्वाण्यपि बंधनादीनि करणानि प्रवर्तयतीति विशेषः उत्कर्षतश्चैकस्मिन् भवे द्वौ वारा उपश
मश्रेणिं प्रतिपद्यते यश्च द्वौ वारा उपशमश्रेणिं प्रतिपद्येते तस्य नियमात् तस्मिन् भवे क्षपकश्रेण्यभावः यः पुनरे
कं वारं प्रतिपद्यते तस्य क्षपकश्रेणिर्भवेदपीति उक्तं च सप्ततिकाचूर्णौ जो दुवे वारे उवसमसेढिं पडिवज्जइ तस्स नि
यमा तंमि भवे खवगसेढी नत्थि जो इक्कसिं उवसमसेढीं पडिवज्जइ तस्स खवगसेढी विज्जइत्ति एष कार्मग्रंथिकाभि
प्रायः आगमाभिप्रायेण त्वेकस्मिन् भवे एकामेव श्रेणिं प्रतिपद्यते यदुक्तं कल्पभाष्ये एवं अप्परिवडिए संमत्ते देवमणु
एसु अन्नयरसेढिवज्जं एगभवेणं च सव्वाइं सर्वाणि देशविरतादीनि अन्यत्राप्युक्तं मोहोपशम एकस्मिन् भवे ४६
द्विः स्यादसंततः यस्मिन् भवे तूपशमः क्षयो मोहस्य तत्र नेति ११ तथा क्षीणा अभावमापन्नाः कषाया यस्य स क्षीण
कषायः तत्रानंतानुबंधिकषायान् अप्रमत्तविरतसम्यग्दृष्ट्याद्यप्रमत्तांतगुणस्थानेषु क्षपयित्वा आरभते ततो मिथ्यात्वमि

श्रं सम्यक्त्वं ततोऽप्रत्याख्यानावरणाः ४ कषायान् अष्टौ क्षपयितुमारभते तेषु चार्धक्षपितेष्वेवातिविशुद्धिवशादंतराल एव
स्त्यानर्द्धित्रिकं नरकद्विकं तिर्यग्द्विकं एकेंद्रियद्वींद्रियत्रींद्रियचतुरिंद्रियजातयः आतपं उद्योतं स्थावरं सूक्ष्मं साधारण
मिति प्रकृतिषोडशकं क्षपयति तस्मिंश्च क्षीणे कषायाष्टकस्य क्षपितशेषं क्षपयति ततो नपुंसकवेदं स्त्रीवेदं हास्यादि
षट्कं पुंवेदं संज्वलनं क्रोधं मानं मायां क्षपयति एताश्च प्रकृतीरनिवृत्तिबादरसंपरायगुणस्थाने क्षपयति संज्वलनलोभं सू



क्ष्मसंपरायगुणस्थाने इति क्षपकश्रेणिः स्थापना चेयं विस्तरतस्तु क्षपकश्रेणिस्वरूपं स्वोपज्ञशतकटीकायां निरू
पितं ततएव परिभावनीयं तदेवमन्येष्वपि गुणस्थानेषु क्षीणकषायव्यपदेशः संभवति कापि कियतामपि क
षायाणां क्षीणत्वात् तस्य तद्व्यवच्छेदार्थं वीतरागग्रहणं क्षीणकषायवीतरागश्च ग्रहणं क्षीणकषायवीतरागत्वं
च केवलिनोप्यस्तीति तद्व्यवच्छेदार्थं छद्मस्थग्रहणं कृते सरागव्यवच्छेदार्थं वीतरागग्रहणं वीतरागश्चासौ १
छद्मस्थश्च वीतरागछद्मस्थः स उपशांतकषायोऽप्यस्तीति तद्व्यवच्छेदार्थं क्षीणकषायग्रहणं क्षीणश्चासौ वीत
रागछद्मस्थस्तस्य गुणस्थानं क्षीणकषायवीतरागछद्मस्थगुणस्थानमिति १२ तथा योगो वी
र्यं शक्तिरुत्साहः पराक्रम इति पर्यायाः स च मनोवाक्कायभेदाः करणभेदात् त्रिसंज्ञां लभते मनोयो १
गो वाग्योगः काययोगश्चेति तथा चोक्तं कर्मप्रकृतौ परिणामालंबणगहणकारणं तेण लद्धनामतिगं क
ज्जाभ्यासमन्नम्प्पवेसविसमीकायपएसं तत्र भगवतो मनोयोगो मनःपर्यायज्ञानिभिरनुत्तरसुरादिभिर्वा
मनसा पृष्टस्य सतो मनसैव देशनान्निर्दिष्ट भगवत्प्रयुक्तानि मनोद्रव्याणि मनःपर्यायज्ञानेनावधिज्ञानेन वा पश्यंति दृष्ट्वा च ते
विवक्षितवस्त्वाकारान्यथानुपपत्त्या लोकस्वरूपादिबाह्यमर्थमवगच्छंतीति वाग्योगो धर्मदेशनादौ काययोगो नि

मेपो मेषवंक्रमणादेो ततोऽनेन योगत्रयेण सद्वर्त्तत इति सयोगी सर्वादेरिन् इतीनूप्रत्ययः केवलं केवलज्ञानं
केवलदर्शनं च विद्यते यस्य स केवली सयोगी चासौ केवली च सयोगी केवली तस्य गुणस्थानं सयोगिकेवलिगुणस्थानं
१३ तथा न विद्यंते योगाः उर्वोक्ता यस्यासावयोगी कथमयोगित्वमसौ उपगच्छतीति चेदुच्यते स भगवान् सयोगिके
वली जघन्यतोऽन्तर्मुहूर्त्तं मुत्कृष्टतो देशोनां पूर्वकोटिं विहृत्य कश्चिद्कर्मणां समीकरणार्थं समुद्घातं करोति यस्य वेदनीय १
दिकमायुषः सकाशादधिकतरं भवति अन्यस्तु न करोति यदाहुः श्रीआर्यश्यामपादाः सव्वे वि णं भंते केवली समु
ग्घायं गच्छंति गोयमा नो इणमठ्ठे समठ्ठे जस्साउएण तुल्लाइं बंधणेहिं ठिईहि य भवोवग्गाहिकंमाइं न समुग्घायं स गच्छइ
१ अगंतूणं समुग्घायं अणंता केवली जिणा जरामरणविप्पमुक्का सिद्धिं वरगइं गया २ अत्र बंधणेहिं बध्यंत इति बंधना
नुजिपत्यादिस्यः कर्म्मपादान इति कर्मण्यनट् कर्म्मपरिमाणवःतैः शेषं सुगमं गत्वा वा गत्वा ताः समुद्घातं समुद्घातस्वरू
पं च स्वोपज्ञषष्ठशीतिकटीकायां विस्तरतः प्ररूपितं तत एवावधारणीयं सवोपग्राहिकर्म्मक्षपणाय लेश्यातीतमसंता
प्रकंपपरमनिर्ज्जराकारणं ध्यानं प्रतिपत्सुर्योगनिरोधार्थमुपक्रमते तत्र पूर्वं बादरकाययोगेन बादरमनोयोगं निरु
णद्धि ततो वाग्योगं ततः सूक्ष्मकाययोगेन बादरकाययोगं तेनैव सूक्ष्मकाययोगेन मनोयोगं सूक्ष्मवाग्योगं च सूक्ष्म
काययोगं तु सूक्ष्मक्रियमनुवर्तिशुक्लध्यानं ध्यायन् स्वावष्टंभेनैव रुणद्धि अन्यस्यावष्टंभनीयस्य योगांतरस्य त
दासत्वात् तद्ध्यानसामर्थ्याच्च वदनोदरादिविवरपूरणेन संकुचितदेहत्रिभागवर्त्तिप्रदेशो भवति तदनंतरं समुच्छिन्न ४७
क्रियमप्रतिपातिशुक्लध्यानं ध्यायन् मध्यमप्रतिपत्त्या ह्रस्वपंचाक्षरोच्चिरणमात्रकालं शैलेशीकरणं प्रविशति तत्र शै
लेशो मेरुस्तस्येयं स्थिरता साम्यावस्था शैलेशी यद्वा सर्वसंवरः शीलं तस्य यः ईशः स शीलेशः तस्येयं योगनिरोधावस्था शै

लेशी तस्यां करणं पूर्वविरचिता शैलेशीसमयसमानगुणश्रेणी वेदनीयनामगोत्राख्याघातिकर्मत्रितयस्यासंख्येय
गुणया श्रेण्या आयुःशेषस्य तु यथास्वस्थितया श्रेण्या निर्ज्जरणं शैलेशीकरणं तत्रासौ प्रविष्टोऽयोगी स्यात् सो केव
ली चायोगिकेवली अयं च शैलेशीकरणं चरमसमयानंतरमुच्छिन्नचतुर्विधकर्मबंधनत्वात् दग्धमृत्तिकालेपतिमाषी नि
मग्नक्रमापनीतमृत्तिकालेपजलतलमर्यादोर्ध्वगामितया विधलाबुवदूर्ध्वं लोकांते गच्छति न परतो पि मत्स्यस्य जलकल्प
गत्युपष्टंभकधर्म्मास्तिकायाभावात् स चोर्ध्वं गच्छन् ऋजुश्रेण्या यावत्स्वाकाशप्रदेशेष्ववगाढः तावत एव प्रदे
शानूर्ध्वमप्यवगाहमानो विवक्षितसमयाच्च समयांतरमसंस्पृशन्नुगच्छति तदुक्तमावश्यकचूर्णौ उज्जुसेढीं पत्तो जावइ १
ठो तावइयाए ओगाहणाए उड्ढं उज्जुगं गच्छइ न वक्कं बीयं च समयं बीयं च समयं न फुसइ त्ति दुःखमांधका
र निमग्नजिनप्रवचनप्रदीपप्रतिमाः श्रीजिनभद्रगणिक्षमाश्रमणपादाः अप्याहुः पज्जत्तमित्तसन्निस्स जं तिमणो दव्वाइं तव्वावार १
यजं मज्झो १ तदसंखगुणविहीणं समए समए निरुंभमाणोसो मणसो सव्वनिरोहं कुणइ असंखिज्जसमएहिं २ अप
ज्जत्तमित्तबेंदिय जहन्नवइयोगपज्जया जे उ तदसंखगुणविहीणे समए समए निरुंभंतो ३ सव्ववइजोगरोहं संख १
ईएहिं कुणइ समएहिं तत्तो य सुहुमपणयस्स पढमसमओववन्नस्स ४ जो किर जहन्नजोगो तदसंखिज्जगुणहीण
मिक्केक्के समए निरुंभमाणो देहतिभागं च मुंचंतो ५ रुंभइ स कायजोगं संखाईएहिं चेव समएहिं तो कायजोगनिरोहे
सेलेसीभावणामेइ ६ कस्स रकराइं मज्झेण जेण कालेण पंचहस्संति अच्छइ सेलेसिगओ तत्तियमित्तं तओ कालं ७
तणुरोहारंभाओ झायइ सुहुमकिरियानियट्टिं सो वुच्छिन्नकिरियमप्पडिवाइं सेलेसिकालंमि ८ तदसंखिज्जगुण १
ए गुणसेढीइ रइयं पुरा कंमं समए समए खवियं कमेण सव्वं तहिं कंमं ९ रिजुसेढीपडिवन्नो समयपएसंतरं अफुसमाणो १
एगसमएण सिज्झइ अह सागारोवउत्तो।

से। १० इति तस्य गुणस्थानमयोगिकेवलिगुणस्थानमिति व्याख्यातानि समासार्थानि चतुर्दशापि गुणस्थानानीति ॥ १४
अथ यथैतेषु गुणस्थानेषु भगवता बंधमुदयमुदीरणां सत्तां चाश्रित्य कर्माणि प्ररूपितानि तथाभिधित्सुः प्रथमं तावद्बंध-
माश्रित्य कगुणस्थाने कियत्यः कर्मप्रकृतयो व्यवच्छिन्ना इत्येतद्बंधलक्षणकथनपूर्वकं प्रचिकटयिषुराह ॥ २ अ
भिनवकम्मग्गहणं बंधो ओहेण तत्थ वीससयं तित्थयराहारगदुग वज्जं मिच्छंमि सतरसयं ॥ २ व्या० मिथ्यात्वादिभिर्हेतुभि-
रभिनवस्य नूतनस्य कर्मणो ज्ञानावरणादेर्ग्रहणमुपादानं बंध इत्युच्यते तच्चैन सामान्येनैकं किंचित्गुणस्थानकमनाश्रि
त्येत्यर्थः तत्र तत्र बंधे विंशशतं विंशत्युत्तरं शतं कर्मप्रकृतीनां भवतीति शेषः तद्यथा मतिज्ञानावरणं श्रुतज्ञानाव
रणं अवधिज्ञानावरणं मनःपर्यवज्ञानावरणं केवलज्ञानावरणं इति पंचधा ज्ञानावरणं निद्रा १ निद्रानिद्रा २ प्रचला ३ प्र
चलाप्रचला ४ स्त्यानर्द्धि ५ चक्षुर्दर्शनावरणं अचक्षुर्दर्शनावरणं अवधिदर्शनावरणं केवलदर्शनावरणं इति नवविधं द
र्शनावरणं वेदनीयं द्विधा सातावेदनी असातावेदनीयं च मोहनीयमष्टाविंशतिभेदं तद्यथा मिथ्यात्वं सम्यग्मिथ्यात्वं सम्यक्त्व
मिति दर्शनत्रिकं अनंतानुबंधी क्रोधो मानो माया लोभः अप्रत्याख्यानावरणः क्रोधो मानो माया लोभः ४ प्रत्याख्यानावरणः
क्रोधो मानो माया लोभः संज्वलनः क्रोधो मानो माया लोभः ४ इति षोडश कषायाः स्त्री पुमान्नपुंसकमिति वेदत्रयं हा
स्यं रतिः अरतिः शोको भयं जुगुप्सेति हास्यषट्कं मिलितं नव नोकषायाः आयुश्चतुर्धा नरकायुः तिर्यगायुः मनुष्या
देवायुरिति अथ नामकर्म द्विचत्वारिंशद्विधं तद्यथा चतुर्दशपिंडप्रकृतयः अष्टौ प्रत्येकप्रकृतयः त्रसदशकं स्थावर
दशकं चेति तत्र पिंडप्रकृतय इमाः गतिनाम जातिनाम शरीरनाम अंगोपांगनाम स्पर्शनाम बंधननाम संहनननाम
म संस्थाननाम वर्णनाम रसनाम स्पर्शनाम आनुपूर्वीनाम विहायोगतिनामेति आसां भेदा दर्श्यंते नरकतिर्यङ्मनुष्य
संघातननाम+

देवगतिनाम भेदाच्चतुर्धा गतिनाम एकेंद्रिय द्वींद्रिय त्रींद्रिय चतुरिंद्रिय पंचेंद्रिय जातिनामेति पंचधा जातिनाम औदारिक
वैक्रिय आहारक तैजस कार्मण शरीरनामेति पंचधा शरीरनाम औदारिकांगोपांग आहारकांगोपांग वैक्रियांगोपांग
मिति त्रिविधं अंगोपांग बंधननाम पंचधा औदारिकादिबंधनानि शरीरवत् एवं संघातनामपि संहनननाम षट्भेदं वज्रर्ष
भनाराचं ऋषभनाराचं नाराचं अर्द्धनाराचं कीलिका सेवार्त्तं चेति संस्थाननाम षड्विधं समचतुरस्रं न्यग्रोधपरिमं
डलं सादि वामनं कुब्जं हुंडं चेति वर्णनाम पंचधा कृष्णं नीलं लोहितं हारिद्रं शुक्लं चेति गंधनाम द्विधा सुरभिगंधनाम दु
सुरभिगंधनामेति रसनाम पंचधा तिक्तं कटुकं कषायं आम्लं मधुरं च स्पर्शनामाष्टधा कर्कशं मृदु लघु गुरु शीतमुष्णं
स्निग्धं रूक्षं च आनुपूर्वी चतुर्धा नरकानुपूर्वी तिर्यगानुपूर्वी मनुष्यानुपूर्वी देवानुपूर्वी विहायोगति द्विधा प्रशस्तवि
हायोगतिः अप्रशस्तविहायोगतिरिति आसां चतुर्दशपिंडप्रकृतीनां उत्तरभेदा अमी पंचषष्टि प्रत्येकप्रकृतयस्त्विमाः परा
घातनाम उपघातनाम उच्छ्वासनाम आतपनाम उद्योतनाम अगुरुलघुनाम तीर्थकरनाम निर्माणनामेति त्रसदश
कमिदं त्रसनाम बादरनाम पर्याप्तनाम प्रत्येकनाम स्थिरनाम शुभनाम सुभगनाम सुस्वरनाम आदेयनाम यशः
कीर्त्तिनामेति स्थावरदशकं पुनरिदं स्थावरनाम सूक्ष्मनाम अपर्याप्तनाम साधारणनाम अस्थिरनाम अशुभनाम दुर्भग
नाम दुःस्वरनाम अनादेयनाम अयशःकीर्त्तिनामेति पिंडप्रकृत्युत्तरभेदाः पंचषष्टिः प्रत्येकप्रकृतयोऽष्टौ त्रसदशकं
१० स्थावरदशकं च सर्वमीलने त्रिनवतिः ९३ गोत्रं द्विधा उच्चैर्गोत्रं नीचैर्गोत्रं च अंतरायं पंचधा दानांतरायं लाभांतरायं
भोगांतरायं उपभोगांतरायं वीर्यांतरायं चेति एवं च कृत्वा ज्ञानावरणे कर्मप्रकृतयः पंच ५ दर्शनावरणे नव ९ वेदनीये
२ मोहनीये अष्टाविंशतिः २८ आयुषि चतस्रः नाम्नि त्रिनवतिः ९३ गोत्रे द्वे २ अंतराये पंच ५ सर्वपिंडे अष्टचत्वारिंशं

DR BHAU DAJI

तं तं वति तेन च सत्तायामधिकारः उदयोदीरणयोः पुनरौदारिकादिबंधनानां पंचानामौदारिकादिसंघातनानां च
पंचानां यथास्वमौदारिकादिषु पंचसु शरीरेष्वंतर्भावः वर्णगंधरसस्पर्शानां यथा पंच द्वि पंचाष्टभेदानां तद्भेदकृतां विंशति
मपनीयते तेषामेव चतुर्णामभिन्नानां ग्रहणे षोडशकमिदं बंधनसंघातनसहितमष्टचत्वारिंशत् शतादपनीयते शेषेण
द्वाविंशेन शतेनाधिकारः बंधे तु सम्यग्मिथ्यात्वसम्यक्त्वयोः संक्रमेणैव निष्पाद्यमानत्वात् बंधेन संभवतीति तयोर्द्वावि
शतिशतादपनीतयोः शेषेण विंशत्युत्तरशतेनाधिकार इति प्रकृतिसमुत्कीर्तना कृता प्रकृत्यर्थः स्वोपज्ञकर्मविपाकटी
कायां विस्तरेण निरूपितस्तत एवावधार्य इत्यलं प्रसंगेन प्रकृतं प्रस्तुमः तत्र बंधे सामान्येन विंशशतं तीर्थंकराहारक
द्विकवर्जं तीर्थकराहारकद्विकरहितं सत् मिथ्यमिति सीमसेनो सीमेत्यादिवत्पदस्याप्यस्यार्थस्य पदैकदेशेनाप्यभिधान
दर्शनात् मिथ्यात्वे मिथ्यादृष्टिगुणस्थाने इत्यर्थः एवमुत्तरेष्वपि पदवाच्योर्थः पदैकदेशप्रयोगो द्रष्टव्यः सत्तरसयं ति सप्त
दशाधिकं शतं सप्तदशशतं बंधे भवतीति अयमत्राभिप्रायः तीर्थकरनाम तावत्सम्यक्त्वगुणनिमित्तमेव बध्यते आ
हारकशरीर आहारकांगोपांगलक्षणमाहारकद्विकं त्वप्रमत्तयतिसंबंधिना संयमेनैव यदुक्तं श्रीशिवशर्मसूरिपादैः
: शतके सम्मत्तगुणनिमित्तं तित्थयरं संजमेण आहारमिति मिथ्यादृष्टिगुणस्थाने एतत्प्रकृतित्रयवर्जनं कृतं शेषं पुनः
सप्तदशशतं मिथ्यात्वादिभिर्हेतुभिर्बध्यत इति मिथ्यादृष्टिगुणस्थाने तद्बंध इति ॥ ननु त्वेता मिथ्यादृष्टिप्रायोग्याः सप्त
दशशतसंख्याः सर्वा अपि प्रकृतयः उत्तरगुणस्थानेषु गच्छंस्तत्काश्चिद्देवेत्याशंक्याह ॥ नरयतिगजाइथावर ४९
चउहुंडायवछिवट्ठनपुमिच्छं सोलंतो इगाहियसयसासणि तिरिथीणदुहगतिगं ॥४॥ नरकत्रिकं नरकानुपूर्वी न
रकायुर्लक्षणं जाइथावरचउत्ति चतुःशब्दस्य प्रत्येकमभिसंबंधात् जातिचतुष्कं एकेंद्रियजाति द्वींद्रियजाति त्री

न्द्रियजाति चतुरिंद्रियजातिस्वरूपं स्थावरचतुष्कं स्थावरसूक्ष्मापर्याप्तसाधारणलक्षणं हुंडं आतपं छेवट्ठं न
पुंत्ति नपुंसकवेदः मिच्छत्ति मिथ्यात्वमित्येतासां सोलंतत्ति षोडशानां प्रकृतीनां मिथ्यादृष्टिगुणस्थाने तत्र सावत्तन्नस्त
साव इत्येवंलक्षणोऽन्तो विनाशः क्षयो विच्छेदो बंधव्यवच्छेद इति पर्यायाः इदमत्र भावना एता हि षोडश प्रकृतयो मि
थ्यादृष्टिगुणस्थाने एव बंधमायांति मिथ्यात्वप्रत्ययत्वादेतासां नोत्तरत्र सास्वादनादिषु मिथ्यात्वाभावादेव यथ एता
: प्रायो नारकैकेंद्रियविकलेंद्रिययोग्यत्वादत्यंताशुभत्वाच्च मिथ्यादृष्टिरेव बध्नातीति सप्तदशशतात्पूर्वोक्तादेत
दपगमे शेषमेकोत्तरं प्रकृतिशतमेवाविरत्यादिहेतुभिः सास्वादने बंधमायात्यत एवाह इगहियसयसासणित्ति ए
काधिकशतं सास्वादने बध्यते इगहियसय इत्यत्र विभक्तिलोपः प्राकृतत्वात् एवमन्यत्रापि विभक्तिलोपः प्राकृत
त्वात् एवमन्यत्रापि विभक्तिलोपः प्राकृतलक्षणवशादवसेयः तिरिथीणदुहगतिगंति त्रिकशब्दः प्रत्येकं संबध्य
ते तिर्यक्त्रिकं तिर्यग्गति तिर्यगानुपूर्वी तिर्यगायुर्लक्षणं स्त्यानर्द्धित्रिकं निद्रानिद्रा प्रचलाप्रचला स्त्यानर्द्धिस्वरूपं
दुर्भगत्रिकं दुर्भगदुःस्वरअनादेयमिति ॥ अणमज्झागिइसंघयणचउनिउज्जोअकुखगइथित्ति पणवीसंतो मी
से चउसयरि दुआउअअबंधा ॥५॥ चतुःशब्दस्य प्रत्येकं योजनात् अणत्ति अनंतानुबंधिचतुष्कं अनंतानुबंधिक्रोधमा
नमायालोभाख्यं मध्या मध्यमा आद्यंतवर्जा आकृतयः संस्थानानि मध्याकृतयस्तासां चतुष्कं न्यग्रोधपरिमंडलसंस्था
ने सादिसंस्थानं वामनसंस्थानं कुब्जसंस्थानमिति तथा काकाक्षिगोलकन्यायात् मध्यशब्दस्यात्रापि योगस्ततो मध्यमानि मध्यानि
प्रथमांतिमवर्जानि संहननानि अस्थिनिचयात्मकानि तेषां चतुष्कं ऋषभनाराचसंहननं नाराचसंहननं अर्द्धनाराचसंहन
नं कीलिकासंहननमिति निउत्ति नीचैर्गोत्रं उद्योतं कुः कुत्सिता अप्रशस्ता खगतिर्विहायोगतिः "कुखगति" अप्रशस्तविहा

योगतिरित्यर्थः इक्किन्नि स्त्रीवेदस्तेतासां पंचविंशतिप्रकृतीनां सास्वादनेऽतोऽत्रबध्यंतेनोत्तरत्रेत्यर्थः यतोऽनंतानुबंधि
प्रत्ययोयासांबंधः सचोत्तरत्रनास्तीति ततश्चैकाधिकशतात्पंचविंशतिरपगमेमीसत्ति मिश्रेसम्यग्मिथ्यादृष्टिगुणस्थाने षट्
सप्ततिर्बंधिभवतीति ततोऽपिडआउअ अबंधत्ति द्वयोर्मनुष्यायुर्देवायुषोरबंधो घायुरबंधस्तस्मा घायुरबंधादिति हेतो
श्चतुःसप्ततिर्भवति इदमुक्तंभवति इहनारकतिर्यगायुषीयथासंख्यं मिथ्यादृष्टि सास्वादनगुणस्थानयोर्व्यवच्छिन्ने शे
षंतुमनुष्यायुर्देवायुर्द्वयमवतिष्ठते तदपिमिश्रोनबध्नाति मिश्रस्यसर्वथाआयुर्बंधप्रतिषेधात् उक्तंच सम्मामिच्छदिट्ठी आ
उअबंधंपिनकरेइति ततःषट्सप्ततेर्भवतिइति सम्मेसगसयरिजिणाउबंधिवइरनरतिअबिअकसायाउरलदुगंतोदे
सेसत्तट्ठीतिअकसायंतो ६ संमित्ति अविरतसम्यग्दृष्टि गुणस्थानेसगसयरत्ति सप्तसप्ततिप्रकृतीनांबंधोभवति कथ
मितिचेदुच्यते पूर्वोक्तैवचतुःसप्ततिर्जिणाउबंधित्ति तीर्थकरनाम मनुष्यायुर्देवायुर्द्वयबंधेसति सप्तसप्ततिर्भवति एत
दुक्तंभवति तीर्थकरनाम तावत्सम्यक्त्वप्रत्ययादेवाऽत्रबंधमायाति येचतिर्यङ्मनुष्या अविरतसम्यग्दृशस्तेदेवायु
र्बध्नंति येतुनारकदेवास्तेमनुष्यायुर्निर्वर्तयति ततोवेयंप्रकृतित्रयीसमधिकालभ्यते साचपूर्वोक्तायांचतुःस
प्ततौक्षिप्यते जातासप्तसप्ततिरितिवइरनत्ति वज्रर्षभनाराचसंहननं नरतिअत्ति नरत्रिक नरगति नरानुपूर्वी नरायु
र्लक्षणं बियकसायत्ति द्वितीयकषायाअप्रत्याख्यानावरणाः क्रोधमानमायालोभा उरलगति औदारिकद्विकं औ
दारिकशरीरं औदारिकांगोपांगलक्षणमित्येतासां दसप्रकृतीनामविरतसम्यग्दृष्टावेतोभवस्येता अत्रबध्यंतेनोत्त ५०
रत्रेत्यर्थः अयमत्राभिप्रायः द्वितीयकषायास्तावत्तदुदयाभावान्नबध्नाति देशविरतादिः कषायाह्यनंतानुबंधिवर्ज्ज १
वेद्यमानाएवबध्यंतेजोवेएइतेबंधइति वचनात् अनंतानुबंधिनस्तुचतुर्विंशति सत्कर्मानंतवियोजको मिथ्यात्वंग

तोबंधावलिकामात्रंकालमनुदितानूबध्नाति यदाहुःसप्ततिकाटीकायांमोहनीयचतुर्विंशतिकावसरे श्रीमल
यगिरिपादाः इहसम्यग्दृष्टिनासताकेनचित्प्रथमतोऽनंतानुबंधिनोविसंयोजिता एतावतैवसविश्रांतोनमिथ्यात्वादिक्ष
यायउद्युक्तवान् तथाविधसामग्र्यभावात् ततःकालांतरेमिथ्यात्वंगतःसन् मिथ्यात्वप्रत्ययतो भूयोप्यनंतानुबंधिनोब
ध्नाति ततोबंधावलिकांयावन्नाद्यापतिक्रामति तावत्तेषामुदयंविनाबंधइति नरत्रिकंपुनरेकांतेनमनुष्यवेद्यएवब
ध्नाति नान्यत्तेनासांदेशप्रकृतीनामविरतसम्यग्दृष्टिगुणस्थाने ऽतस्ततएतत्सप्ततिदशकं पूर्वोक्तसप्तसप्ततेरपनीयते
ततोदेशेसत्तट्ठित्ति देशोदेशविरतगुणस्थाने सप्तषष्टिर्बध्यते तियकसायउत्ति तृतीयकषायाणां प्रत्याख्यानावरणक्रो १
धमानमायालोभानां देशविरतेऽन्तस्तदुत्तरेषुतेषामुदयाभावात् अनुदितानांचाबंधात् जोवेयइतेबंधइतिवच
नादितिभावः एतच्चप्रकृतिचतुष्टयपूर्वोक्तसप्तषष्टेरपनीयते ततः ७ः तेवट्ठिपमत्ते सोगअरइअथिरदुगअजसअ
स्सायंवुच्छिज्जछच्चसत्तवनेइसुराउंजयानिट्ठं ७ तेवट्ठिपमत्तित्ति त्रिषष्टिःप्रमत्तेबध्यते शोकःअरति अथिरदुगत्ति
अस्थिरद्विकंअस्थिरअशुभलक्षणं अजसत्ति अयशःकीर्त्तिनाम असातमित्येताःषट्प्रकृतयःप्रमत्तेवुच्छिज्जत्ति प्राकृ
तत्वादादेशास्यव्यवच्छिद्यंते क्षीयंते बंधमाश्रित्येतिभावः यत्रास्मत्वांव्यवच्छिद्यंते कथमित्याह नेइसुराउंजयानिट्ठं
ति यदाकश्चित्प्रमत्तःसन्सुरायुर्बद्धमारभते निष्ठांचनयति सुरायुर्बंधंसमापयतीत्यर्थः तदापूर्वोक्ताषट्सुरायुःस
हिताःसप्तव्यवच्छिद्यंतेइति ७ ॥ गुणसट्ठिअप्पमत्तेसुराउबंधंतुजइइहागच्छे अन्नहअट्ठावन्ना जंआहारगदुगंबंधे
८ गुणसट्ठित्ति एकोनषष्टिरप्रमत्तेबध्यते इतिशेषः कथमित्याह सुरायुर्बध्नन् देवायुर्बंधकुर्वन् यदिचेदिहाप्रमत्तगु
णस्थानेआगच्छेत् इयमत्रभावना सुरायुर्बंधंहिप्रमत्तएवारभते नाप्रमत्तादिस्तस्यातिविशुद्धत्वादायुष्कस्यचघोलन १

परिणामेनैव बंधनात् परं सुरायुर्बध्नन् प्रमत्ते किंचित्सावशेषे सुरायुर्बंधेऽप्रमत्तेऽप्यागच्छेत्तत्सावशेषं सुरायुर्निष्ठां
नयति तत एकोनषष्टिरप्रमत्ते भवति देवाउयं च इक्कं नायव्वं अप्पमत्तंमि वचनात् अन्ने द अगावेनत्ति अन्ने बायदि सुरा
युर्बंधः प्रमत्तेनारब्धः प्रमत्तेनैव निष्ठां नीतः स्यात् ततोऽष्टापंचाशदप्रमत्ते भवतीति ननु यदि शुविन्निषष्टेः शोकारतिअस्थिर
द्विकः अयशः असातलक्षणं प्रकृतिषट्कमपनीयते तर्हि सा सप्तपंचाशद्भवति अथ सुरायुःसहितं पूर्वोक्तप्रकृतिष
ट्कमपनीयते तर्हि षट्कमपनीयते तर्हि षट्पंचाशत् ततः कथमुक्तमेकोनषष्टिरष्टपंचाशद्वा अप्रमत्ते इत्याशंक्याह
उआहारगजुगं बंधेत्ति यद्यस्मात्कारणादाहारकद्विकं बंधे भवतीति शेषः अयमत्राशयः अप्रमत्तयतिसंबंधिना सं
यमविशेषेणाहारकद्विकं बध्यते तच्चेह लभ्यते इति सर्वापनीतमप्यत्र क्षिप्यतेऽतः षट्पंचाशत् आहारकद्विकक्षेपे
अष्टपंचाशद्भवति सप्तपंचाशत्पुनराहारकद्विकक्षेपे एकोनषष्टिरिति ३ः अडवन्न अपुव्वाइंमि निद्दुगंतो छपन्न पण
भागे सुरदुगपणिंदिसुखगइ तसनव उरलविणु तणुवंगा ए समचउर निमिण जिण वन्न अगुरुलहुचउछलं
सितीसंता चरमे छवीसबंधो हासरईकुच्छभयभेओ १० अडवन्न अपुव्वाइंमि त्ति इह किलापूर्वकरणाद्धायाः सप्त
भागाः क्रियंते तत्रापूर्वस्य पूर्वकरणस्यादिमे प्रथमे सप्तभागेऽष्टपंचाशत्पूर्वोक्ता भवति तत्र चाद्ये सप्तभागे निद्राद्विक
स्य निद्राप्रचलालक्षणस्यांतो भवत्यत्र बध्यते नोत्तरत्रापि तत्र तद्बंधाध्यवसायस्थानाभावात् उत्तरेष्वप्येवमेव द्र
ष्टसरणीयः ततः परं षट्पंचाशद्भवति कथमित्याह पणभागित्ति पंचानां भागानां समाहारः पंचभागं तस्मिन् पंचभा ५१
गे पंचसु भागेष्वित्यर्थः इदमुक्तं भवति अपूर्वाकरणाद्धायाः सप्तसु भागेषु विवक्षितेषु प्रथमे सप्तभागेऽष्टपंचाशत् तत्र
च व्यवच्छिन्ननिद्राप्रचलापनयने षट्पंचाशत् सा च द्वितीये सप्तभागे तृतीये सप्तभागे चतुर्थे सप्तभागे पंचमे सप्तभागे

५१

षष्ठे सप्तभागे भवतीत्यर्थः तत्र च षष्ठे सप्तभागे आसां त्रिंशत्प्रकृतीनामंतो भवतीत्याह सुरद्विकेत्यादि सुरद्विकं
सुरगति सुरानुपूर्वी स्वरूपं पणिंदीत्यादि पंचेंद्रियजातिः सुखगतिः प्रशस्तविहायोगतिः तसनवत्ति त्रसनवकं
त्रसबादरपर्याप्तप्रत्येकस्थिरशुभसुभगसुस्वरआदेयलक्षणं उरलविणुत्ति औदारिकशरीरं विना औदारिकांगोपां
गं विनेत्यर्थः तणुत्ति तनवः शरीराणि उवंगत्ति उपांगं इदमुक्तं भवति वैक्रियशरीरं तैजसशरीरं कार्मणशरीरं वैक्रि
यांगोपांगं चेति समचउरंति समचतुरस्रसंस्थानं निमिणत्ति निर्माणं जिणत्ति जिननाम तीर्थकरनामेत्यर्थः वन्नअगु
रुलहुचउत्ति चउःशब्दस्य प्रत्येकमभिसंबंधात् वर्णचतुष्कं वर्णगंधरसस्पर्शरूपं अगुरुलघुचतुष्कं अगुरुलघु
उपघातपराघातउच्छ्वासलक्षणमित्येतासां त्रिंशत्प्रकृतीनां छलंसित्ति षष्ठोंऽशो भागः षडंशो मयूरव्यंसकादित्वात्समासे
यथा तृतीयो भागः त्रिभाग इत्यत्र ष्ठकारस्य डकारो ष्ठो ल इति प्राकृतलक्षणेन तस्मिन् षडंशे ततः पूर्वोक्तषट्पंचाशतस्त्रिंशत्प्र
कृतयोऽपनीयंते शेषाः षड्विंशतिप्रकृतयोऽपूर्वकरणस्य चरिममित्ति चरमेऽंतिमे सप्तमे सप्तमभागे बंधे भवंतीत्यर्थः चरमे च
सप्तमभागे हास्यं रतिश्च कुत्सा तिकुत्सा च जुगुप्सा भयं च हास्यरतिकुत्साभयानि तेषां भेदो व्यवच्छेदो हास्यरतिकुत्साभय
भेदो भवतीति एतांश्चतस्रः प्रकृतयः पूर्वोक्तषड्विंशतेरपनीयंते शेषा द्वाविंशतिः सा चानिवृत्तिबादरप्रथमभागे भवतीत्येतदे
वाह ३ः अनियट्टिभागपणगे इगेगहीणो दुवीसविहबंधो पुमसंजलणचउण्हं कमेण छेओ सतर सुहुमे ११ अनिवृत्तिभा
गपंचके अनिवृत्तिबादराद्धायाः पंचसु भागेष्वित्यर्थः स पूर्वोक्तो द्वाविंशतिबंधः एकैकहीनो वाच्यः एकैकस्मिन् भागे ए
कैकस्याः प्रकृतेर्बंधव्यवच्छेदात् कथमित्याह पुमसंजलणचउण्हं कमेण छेओत्ति क्रमेणानुपूर्व्या प्रथमे भागे पुंवेदस्य
छेदः ततः एकविंशतेर्बंधः द्वितीये संज्वलनक्रोधस्य छेदः ततो विंशतेर्बंधः तृतीये भागे संज्वलनमानस्य छेदः ततः

कोनविंशतेर्बंधः चतुर्थे भागे संज्वलनमायायाश्छेदस्ततोऽष्टादशानां बंधः पंचमभागे संज्वलनलोभस्योच्छेदः उत्तर
त्र तद्बंधाध्यवसायस्थानाभावः छेदहेतुः संज्वलनलोभस्य च बादरसंपरायप्रत्ययो बंधः स चोत्तरत्र नास्तीत्यतस्तच्छेदः
ततः सूक्ष्मसंपराये सप्तदशप्रकृतीनां बंधो भवतीत्यत आह सत्तरसुहुमसरागित्ति स्पष्टं ॥ चउदंसणुच्चजसनाणविग्घदसगंति
सोलसुच्छेओ तिसु सायबंध छेओ सजोगि बंधंतुणंतो अ १२ बंधेसमन्तो चउदंसणत्ति चतुर्णां दर्शनानां समाहारः चतुर्द
र्शनं चक्षुर्दर्शन अचक्षुर्दर्शन अवधिदर्शन केवलदर्शनरूपं उच्चत्ति उच्चैर्गोत्रं जसत्ति यशःकीर्तिनाम नाणविग्घदस
गंति ज्ञानावरणपंचकं विघ्नपंचकमंतरायपंचकं उभयमीलने ज्ञानविघ्नदशकमित्येतासां षोडशप्रकृतीनां सूक्ष्मसंपरा
ये बंधस्योच्छेदो भवति एतद्बंधस्य सांपरायिकत्वादुत्तरेषु च सांपरायिकस्य कषायोदयलक्षणस्याभावादिति तिसुसा
यबंधत्ति त्रिषूपशांतमोहक्षीणमोहसंयोगिकेवलिगुणस्थानेषु सातबंधः सातस्य केवलयोगप्रत्ययस्य द्विसामायिक
स्य तृतीये समये ऽत्रस्थानाभावादिति भावः न सांपरायिकस्य तस्य कषायप्रत्ययत्वात् आह च साप्पसुपंनोनिधिः उ
वसंतखीणमोहा केवलिणो एगविहबंधी ते पुण दुसमयठिइयस्स बंधगा न उण संपरायस्सत्ति छेओ सजोगित्ति क्रमकम
णिकायात्सातबंधशब्दस्येह संबंधस्ततः सयोगिकेवलिगुणस्थाने सातबंधस्योच्छेदो ध्रुवबंधे इह सातबंधोस्ति योगसद्भा
वात् नोत्तरत्रायोगिकेवलिगुणस्थाने योगाभावात् ततो ऽबंधका अयोगिकेवलिनः उक्तं च सेलेसीपडिवन्ना अबंधगा इत्यादि
तिना यथा बंधंतुणंतो यत्ति बंधस्यांतो ऽनंतश्च बंधशब्दस्यात्र षष्ठीलोपः प्राकृतत्वात् ततश्चेदमुक्तं भवति यत्र गुणस्थाने यस्याः
प्रकृतीनां बंधहेतुर्व्यवच्छेदस्तत्र तासां बंधस्यांतः यथा मिथ्यादृष्टिगुणस्थाने व्यवच्छिन्नबंधानां षोडशानां प्रकृतीनां मि
थ्याविरतिकषाययोगा बंधहेतवस्तेषु मिथ्यात्वं तत्रैव व्यवच्छिन्नं ततश्च मिथ्यात्वं तत्रैव व्यवच्छिन्नं ततश्च मिथ्यादृष्टिगु ५२

णस्थाने तासां बंधस्यांतस्तत उत्तरेषु कारणवैकल्येन बंधाभावादितरासां बंधस्यानंतस्तत उत्तरेष्वपि तद्बंधकारणसाक
ल्येन बंधसद्भावादित्येवमन्येष्वपि गुणस्थानेषु प्रकृतीनां स्वस्वबंधहेतुव्यवच्छेदाभावैकल्यवशात् बंधस्यांतो ऽनंतश्च भाव
नीय इति ॥ इति श्रीदेवेंद्रसूरिविरचितायां स्वोपज्ञकर्मस्तवटीकायां बंधाधिकारः समाप्तः ॥ बंधाधिकारमेनं विभाव्य
तामया [illegible] इह कर्मबंधमुक्तो लोकः स बोधिपतेनास्तु ॥ सांप्रतमुदयस्याभावात्तदनुगमान् बाउदीरणयाश्च
लक्षणकथनपूर्वकं कस्मिन् गुणस्थाने कियत्यः प्रकृतयः तस्य भगवतः क्षीणस्येत्यभिधित्सुराह ॥ उदउ विवाग
वेअण मुदीरण मपत्ति इह दुवीससयं सतरसयं मिच्छे मीससमआहारजिणणुदया १३ इह कर्मपुद्गलानां यथास्थि
तिबद्धानामुदयसमयप्राप्तानां यद्विपाकेनानुभवनेन वेदनं स उदय उच्यते उदीरणा अपत्तित्ति कर्मपुद्गलानां यथा
स्वस्थिति बद्धानां यदप्राप्तकालवेदनमुदीरणा सा प्रोच्यते इह त्रिविधोदये उदीरणायां च दुवीससयंति द्वाविंशतं द्वा
भ्यामधिकं विंशं शतं द्वाविंशशतं मयूरव्यंसकादित्वात्समासस्तत्संभावनतो विक्रियते लिंगलोपः सप्तदशशतं मिच्छे
त्ति मिथ्यादृष्टिगुणस्थानेउदये भवति कथमित्याह मीससम्मआहारजिणणुदयत्ति मिश्रं च सम्यक्त्वं च आहा
रत्ति इहाहारकशब्देन सर्वत्रापि आहारकशरीर आहारकांगोपांगलक्षणमाहारकद्विकं गृह्यते ततश्चाहारकं च जिणत्ति जिनना
म च मिश्रसम्यक्त्वाहारकजिनास्तेषामनुदयात् इदमत्र हृदयं मिश्रोदयस्तावत्सम्यग्मिथ्यादृष्टिगुणस्थान एव भवति स
म्यक्त्वोदयस्त्वविरतसम्यग्दृष्ट्यादौ आहारकद्विकोदयः प्रमत्तादौ जिननामोदयः सयोगिकेवल्यादौ भवति तत इदं प्रकृ
तिपंचकं द्वाविंशतिशतादपनीयते ततो मिथ्यादृष्टिगुणस्थाने सप्तदशशतं भवतीति ॥ सुहुमतिगायवमिच्छं मिच्छंतं सा
सणेइगारसयं नरयाणुपुव्विणुदया अणथावरइगविगलअंतो १४ सूक्ष्मत्रिकं सूक्ष्मापर्याप्तसाधारणरूपं आतपं

च मिथ्यात्वं च सूक्ष्मत्रिकातपमिथ्यात्वं मिथ्यात्वे मिथ्यादृष्टावन्तो यस्य तन्मिथ्यात्वान्तं एतत्प्रकृतिपंचकस्य मिथ्यात्वे
ऽन्तो भवतीत्यर्थः अयमत्राशयः सूक्ष्मनाम्नोदयः सूक्ष्मैकेन्द्रियेषु अपर्याप्तनाम्नस्तु सर्वेष्वप्यपर्याप्तकेषु साधा
रणनाम्नो अनंतवनस्पतिषु आतपनाम्नोदयस्तु बादरपृथिवीकायकेषु न चैतेषु स्थितो जीवः सास्वादनादित्वं
लभते नापि पूर्वप्रतिपन्नस्तेषूत्पद्यते सास्वादनस्तु यद्यपि बादरपर्याप्तकेंद्रियेषूत्पद्यते तथापि न तस्यातपनाम्नो
दयस्तत्रोत्पन्नमात्रस्यातपनाम्नोदयस्तत्रोत्पन्नमात्रस्य समाप्तशरीरस्यैव सास्वादनत्ववमनात् समाप्ते च शरीरे त
त्रातपनाम्नोदये भवति मिथ्यात्वोदयः पुनर्मिथ्यादृष्टावेवेत्येतासां पंचप्रकृतीनां मिथ्यादृष्टावुदयस्यान्तस्ततः इदं प्रकृ
तिपंचकं पूर्वोक्तसप्तदशशतादपनीयते शेषं द्वादशशतं सास्वादने उदयं प्रतीत्य भवति नरकानुपूर्व्यपनयनेन एका
दशशतं उदये भवति नरकानुपूर्व्यनुदयात् नरकानुपूर्व्युदयो हि नरके वक्रेण गच्छतो जीवस्य भवति न च सास्वा
दने नरकं गच्छति यदुक्तं बृहत्कर्मस्तवभाष्ये नरयाणुपुव्विया ए सासणसम्मे मि होइ न उदउ नरयं मि जं न गच्छ
इ अवणिज्जइ तेण सा तस्स ततो नरकानुपूर्वी मिथ्यादृष्टिव्यवच्छिन्नसूक्ष्मत्रिकातपमिथ्यात्वलक्षणप्रकृतिपंचकं
सप्तदशशतादपनीयते शेषं सासादने एकादशशतं भवतीति अणथावरइगविगलअंतोत्ति अनंतानुबंधिनश्च
त्वारः क्रोधमानमायालोभाः स्थावरनाम इगत्ति एकेंद्रियजाति विकलाः पंचेंद्रियजात्यपेक्षया असंपूर्णा द्वीन्द्रि
यजाति त्रीन्द्रियजाति चतुरिन्द्रियजातय इत्यर्थः इत्येतासां नवानां प्रकृतीनां सास्वादनेऽन्तो उदयमाश्रित्य भवति ५२
इयमत्र भावना अनंतानुबंधिनामुदये हि सम्यक्त्वलाभ एव न भवति यदाहुः श्रीभद्रबाहुस्वामिपादाः पढमि
ल्लुआण उदए नियमा संजोयणाकसायाणं सम्मदंसणलंभं भवसिद्धीया वि न लहंति १ नापि सम्यग्मिथ्यात्वं कोऽप्यनं

तानुबंध्युदये गच्छति योऽपि पूर्वप्रतिपन्नसम्यक्त्वोऽनंतानुबंधिनामुदयं करोति सोऽपि सास्वादन एव भवतीत्यत
उत्तरेषां समुदयाभावः स्थावरएकेंद्रियजाति विगलेंद्रियजातयस्तु यथास्वमेकेंद्रियविकलेंद्रिया वेद्या एव उत्त
रगुणस्थानानि तु संज्ञिपंचेंद्रिय एव प्रतिपद्यते पूर्वप्रतिपन्नोऽपि पंचेंद्रियेष्वेव गच्छतीत्युत्तरेषां समुदयाभाव इति ॥
मीसे सयमणुपुव्वीणुदया मीसोदएण मीसंतो चउसयमजए सम्माणुपुव्विखेवा बिअकसाया १५ मिश्रे सम्यग्
मिथ्यादृष्टौ शतमुदये भवति कथमित्याह अणुपुव्वीणुदयत्ति इहानुपूर्वीशब्देन तिर्यगानुपूर्वी मनुजानुपूर्वी
देवानुपूर्वीलक्षणानुपूर्वीत्रयी गृह्यते तस्या अनुदयान्मिश्रोदयेन च अयमत्र भावः नरकानुपूर्वी तावदुद
यमाश्रित्य सास्वादने व्यवच्छिन्ना इह सा न गृह्यते शेषमानुपूर्वीत्रिकं मिश्रदृष्टेर्नोदेति तस्य मरणाभावात् न सम्मी
सो कुणइ कालमितिवचनात् मिश्रप्रकृतिः पुनरत्रोदयं प्राप्यते ततः सास्वादनव्यवच्छिन्नप्रकृतिनवकं आनुपू
र्वीत्रिकं च पूर्वोक्तैकादशशतादपनीयते शेषातिरिक्तप्रकृतीनां नवनवतिः तत्र मिश्रप्रकृतिप्रक्षेपे जातं शतं मिश्रे
मीसंतोत्ति मिश्रगुणस्थाने मिश्रप्रकृतेरन्तो भवति एतदुदये हि मिश्रदृष्टिरेव भवति नान्येति चउसयमजए सम्मा
णुपुव्विखेवत्ति चतुरधिकं शतं चतुःशतमुदये भवति केत्याह अयते अविरतसम्यग्दृष्टौ कथमित्याह सम्म
त्ति सम्यक्त्वं आणुपुव्वित्ति आनुपूर्व्यश्चतस्रस्तासां क्षेपात् प्रक्षेपात् इदमुक्तं भवति पूर्वोक्तशतान्मिश्रगुणस्थानव्य
वच्छिन्नैका मिश्रप्रकृतिरपनीयते शेषा नवनवतिस्तत्र सम्यक्त्वानुपूर्वीचतुष्कलक्षणं प्रकृतिपंचकं क्षिप्यते जा
तं चतुःशतं यतः सम्यक्त्वमत्र गुणे उदयत एव तथाविरतसम्यग्दृशां यथास्वं चतस्रोऽप्यानुपूर्व्य इति बियकसायत्ति
द्वितीयकषाया अप्रत्याख्यानावरणाश्चत्वारः क्रोधमानमायालोभाः मणुतिरिणुपुव्वि विउव्वट्ठ दुहगअणाइ।

ऊडगसतरछेउ सगसीइदेसिमि तिरिगइ आउनिउज्जोअ तिकसाया १६ मणुतिरिणुपुव्विति आणुपुव्वीश
ब्दस्य प्रत्येकं योजना मनुजानुपूर्वी तिर्यगानुपूर्वी विउव्वछक्कंति वैक्रियाष्टकं वैक्रियशरीर वैक्रियशरीरांगोपांग
देवगति देवानुपूर्वी देवायुः नरकगतिः नरकानुपूर्वी नरकायुर्लक्षणं दुभगअनादेयदुगं अनादेय अय
शः कीर्तिरूपमित्येतासां सप्तदशप्रकृतीनामविरतसम्यक्दृष्टावुदयं प्रतीत्य व्यवच्छेदो भवति ततः इमाः सप्तदशप्रकृत
यः पूर्वोक्तचतुःशतादपनीयंते शेषासप्ताशीतिदेसित्ति सप्ताशीतिर्देशविरते उदये भवति इदमत्र तात्पर्यं
द्वितीयकषायोदये हि देशविरतेर्लाभ आगमे निषिद्धः यदागमः बीयकसायाणुदये अपच्चक्खाणनामधिज्जाणं
सम्मदंसणलंभं विरयाविरयं न उ लहंति १ नापि पूर्वप्रपन्नं देशविरत्यादेर्जीवस्य तदुदयसंभवस्तेनोत्तरेषु तदुदय १
भावः मनुजानुपूर्वी तिर्यगानुपूर्व्यौ तु परभवादिसमये विग्रहांतरालगतावुदयसंभवः स च यथायोगं मनुजति
र्यश्चां वर्षाष्टकादुपरिष्टात्संभविदेशविरत्यादिगुणस्थानेषु न संभवति देवत्रिकं नारकत्रिकं च देवनारकवेद्यमेव
न च तेषु देशविरत्यादेः संभवः वैक्रियशरीर वैक्रियांगोपांग नाम्नोस्तु देवनारकेषूदयः तिर्यग्मनुष्येषु तु प्राचु
र्येणाविरतसम्यग्दृष्टिं तेषु यद्यप्युत्तरगुणस्थानेष्वपि केषांचिदागमे विष्णुकुमारस्थूलभद्रादीनां वैक्रियद्विकस्योद
यः श्रूयते स च विरलतरत्वादिना केनापि कारणेन पूर्वाचार्यैर्न विवक्षित इत्यस्माभिरपि नेह विवक्षितेति दुर्भगमनादे
यद्विकमित्येतास्तु तिस्रः प्रकृतयाः देशविरत्यादिगुणप्रत्ययान्नोदयं इत्येता अविरते व्यवच्छिन्ना इति तिरिगइ ५४
आउत्ति तिर्यग्शब्दस्य प्रत्येकं योगात्तिर्यग्गतिः तिर्यगायुः निउज्जोयत्ति नीचैर्गोत्रं उद्योतं च तिकसायत्ति तृती
याः त्रिकषायाः मयूरव्यंसकादित्वात्तृतीयप्रत्ययलोपी समासः प्रत्याख्यानावरणाश्चत्वारः क्रोधमानमायालोभ १

भः अट्ठच्छेउ इगसीपमत्ति आहारदुगअलपक्खेवा थीणतिगाहारदुग छेउ छस्सयरिअपमत्ते १७ पूर्वोक्ताष्टप्रकृता
ष्टप्रकृतीनां देशविरते उदयमाश्रित्य छिन्नो भवति ततः प्रमत्ते एकाशीतिर्भवति आहारकयुगलप्रक्षेपात् इदमत्रहृ
दयं तिर्यग्गति तिर्यगायुस्तिर्यग्वेद्ये एव तेषु च देशविरतो तान्येव गुणस्थानानि घटंते नोत्तराणि अतस्तेषु तदुदयाभाव
ः नीचैर्गोत्रं च तिर्यग्गति स्वाभाव्यात् ध्रुवमोदयिकं न परावर्तते ततश्च देशविरतस्यापि तिरश्चो नीचैर्गोत्रोदयो भव
मनुजेषु पुनः सर्वस्य देशविरत्यादेर्गुणिनो गुणप्रत्ययाद् उच्चैर्गोत्रमेवोदेत्यतस्तत्र नीचैर्गोत्रोदयाभावः उद्योतनामस्वभा
वः उद्योतनामस्वभावतस्तिर्यग्वेद्यं तेषु च देशविरतो तान्येव गुणस्थानानि नोत्तराणि अतस्तेषु तदुदयाभावः यद्यपि यति
वैक्रिये तूद्योतनामोदेति उत्तरदेहेसु देवजई इति वचनात् तथापि स्वल्पत्वादिना केनापि कारणेन पूर्वाचार्यैर्न विवक्षित इ
त्यस्माभिरपि न विवक्षितः तृतीयकषायोदये हि चारित्रलाभ एव न भवति उक्तं च तइयकसायाणुदए पच्चक्ख १
णावरणनामधिज्जाणं देसिक्कदेसविरई चरित्तलंभं न उ लहंति १ न च पूर्वप्रतिपन्नचारित्रस्य तदुदयसंभव इत्युत्तरेषु त
दुदयाभाव इत्येता अष्टौ प्रकृतयः पूर्वोक्तसप्ताशीतेरपनीयंते शेषा एकोनाशीतिः ततः आहारकयुगलं क्षिप्यते य
तः प्रमत्तयतेराहारकयुगलस्योदयो भवतीत्येकाशीतिः थीणतिगात्ति स्त्यानर्द्धित्रिकं निद्रानिद्रा प्रचलाप्रचला स्त्यान
र्द्धिरूपं आहारकद्विकं आहारकशरीर आहारकांगोपांगलक्षणमिति प्रकृतिपंचकस्य प्रमत्ते छेदो भवति ततः पूर्वोक्तैका
शीतेरिदं प्रकृतिपंचकमपनीयते शेषाः षट्सप्ततिरप्रमत्ते उदये भवति अत्रायमाशयः स्त्यानर्द्धित्रिकोदयः प्रमादरू
पत्वादप्रमत्ते न संभवति आहारकद्विकं च विकुर्विणो यतिरौत्सुक्यादवश्यं प्रमादवशगो भवत्यत इदमप्यप्रमत्ते उदय
माश्रित्य न जाघटीति यत्पुनरिदमन्यत्र श्रूयते अप्रमत्तयतिराहारकं विकृत्य पश्चाद्विशुद्धिवशात्तत्र स्यादप्रमत्ततायांती

तितत्केनापि स्वल्पत्वादिति कारणेन सर्वघात्यायैर्न विवक्षितमित्यस्मात् सर्वघातिन विवक्षितमिति ॥ ब: संप्रति तिमसंघयण ति
अरइछक्कवेयतिग अपुव्वे हासाइछक्कअंतो छसट्ठि अनिअट्टिवेअतिगं १९ सम्प्रति तिमसंहननत्रिकं अर्धनाराचसंहनन
कीलिकासंहनन सेवार्तसंहननरूपमित्येतत्प्रकृतिचतुष्टयस्याप्रमत्ते छेदो भवति ततश्च प्रकृतिचतुष्कं सर्वैकषट्सप्तते
रपनीयते शेषा द्वासप्ततिरुदये भवति अपूर्वकरणे उदये भवतीति अयमत्राशयः सम्यक्त्वे क्षपिके उपशमिते वा श्रेणिद्वय
मारुह्यत इत्यपूर्वकरणादौ तदुदयाभावः अंतिमसंहननत्रयोदये उ श्रेणिरारोढुमेव न शक्यते तथाविध विशुद्धेरभाव १
दित्युक्तेषु तदुदयाभावः हासाइछक्कअंत त्ति हास्यादेः षट्कस्य तत्र हास्यादिरति अरति शोक भय जुगुप्साख्य तस्यांतो
ऽपूर्वकरणे भवति संक्लिष्टतरपरिणामत्वात्तेषु तदुदयाभाव इति उत्तरेष्वप्ययमुदयव्यवच्छेदहेतुरनुसरणीयः ततश्च प्रकृ
तिषट्कं सर्वैकद्विसप्ततेरपनीयते शेषा छसट्ठि अनियट्टि त्ति षट्षष्टिरनिवृत्तिबादरे भवति उदयमाश्रित्येति शेषं वेय
तिगं ति वेदत्रिकं स्त्रीवेद पुंवेद नपुंसकवेदाख्यं ॥ ब: संजलतिगं छच्छेओ सट्ठि सुहुमंमि तुरिअलोभंतो उवसंतगुणे गुणस
ट्ठि रिसहनारायदुगअंतो १९ संज्वलनत्रिकं संज्वलनक्रोधमानमायारूपमित्येतासां षण्णां प्रकृतीनामनिवृत्तिबादरे छे
दो भवति तत्र स्त्रिया श्रेणिमारोहंत्या स्त्रीवेदस्य प्रथममुदयच्छेदः ततः क्रमेण पुंवेदस्य नपुंसकवेदस्य संज्वलनत्रयस्य
चेति पुंसस्तु श्रेणिमारोहतः प्रथमं पुंवेदस्योदयच्छेदः ततः क्रमेण स्त्रीवेदस्य षंढवेदस्य संज्वलनत्रयस्य च षंढस्य तु श्रे
णिमारोहतः प्रथमं षंढवेदस्योदयच्छेदः ततः स्त्रीवेदस्य पुंवेदस्य संज्वलनत्रयस्य चेत्येतत्प्रकृतिषट्कं सर्वैकषट्षष्टेरपनीय ५५
ते शेषा सट्ठि सुहुमंमि त्ति षष्टिः सूक्ष्मसंपराये उदये भवति अत्र च तुर्यलोभांतः चतुर्थलोभांतः संज्वलनलोभव्यवच्छेद
इत्यर्थः ततश्चायमेका प्रकृतिः षष्टेरपनीयते शेषा उपशांतमोहगुणस्थाने एकोनषष्टिरुदये भवति रिसहनारायदुगअंतो

त्ति ऋषभनाराचद्विकं ऋषभनाराचसंहनन नाराचसंहननाख्यं तस्यांत उपशांतगुणे भवति प्रथमसंहननेनैव क्षपकश्रे
ण्यारोहणात् क्षीणमोहादौ तदुदयाभावः उपशमश्रेणिस्तु प्रथमसंहननत्रयेणारुह्यते ततश्च प्रकृतिद्वयं सर्वैकैको
नषष्टेरपनीयते शेषाः ॥ ब: सगवंन खीणदुचरिमि निद्ददुगंतो अचरिमि पणपंना नाणंतरायदंसण चउ छेउ सजोगि ब १
यालाउ २० सप्तपंचाशत् खीण त्ति क्षीणमोहस्य दुचरिमि त्ति द्विचरमसमयादर्वाक् द्वितीये निद्राद्विकस्य निद्राप्रचला
रूपस्य क्षीणद्विचरमसमयेऽन्त इत्येतत्प्रकृतिद्वयं सर्वैकसप्तपंचाशतोऽपनीयते ततश्चरिमि त्ति चरमसमये क्षीणमोह
स्येति शेषाः पणपन्न त्ति पंचपंचाशदुदये भवति इदमुक्तं भवति निद्राप्रचलयोः क्षीणमोहस्य द्विचरमसमये उदयच्छेदः
अपरे तु नराक्षः उपशांतमोहे निद्राप्रचलयोरुदयच्छेदः पंचानामपि निद्राणां घोलनापरिणामेन भवत्युदयः क्षपका
णां त्वतिविशुद्धत्वान्न निद्रोदयसंभवः उपशमकानां तु नरनिति विशुद्धत्वात्स्यादपीति नाणंतरायदंसणचउ त्ति
ज्ञानावरणपंचकं मतिश्रुतावधिमनःकेवलज्ञानावरणरूपं अंतरायपंचकं दानलाभभोगोपभोगवीर्यांतरायाख्यं द
र्शनचतुष्कं चक्षुरचक्षुरवधिकेवलदर्शनावरणलक्षणमित्येतासां क्षीणमोहचरमसमये छेदो भवति तदनंतरं क्षीणमो
हत्वादित्येतत्प्रकृतिचतुर्दशकं सर्वैकपंचपंचाशतोऽपनीयते शेषे एकचत्वारिंशत्तीर्थकरनामोदयाच्च तत्क्षेपे द्वाचत्व १
रिंशत्सयोगिकेवलिनि भवतीत्येतदेवाह सयोगि बायाल त्ति स्पष्टं ॥ ब: तित्थुदया उरला थिर खगइदुग परित्ततिग छसं
ठाणा अगुरुलहुवन्नचउ निमिणतेअकंमाइसंघयणं २१ नतु पंचपंचाशतो ज्ञानावरणपंचकं अंतरायपंचकदर्शन
चतुष्कलक्षणप्रकृतिचतुर्दशकापनयने एकचत्वारिंशदेव भवति ततः कथमुक्तं सयोगिनि द्वाचत्वारिंशदित्याशंक्य १
ह तित्थुदय त्ति तीर्थोदयात्तीर्थंकरनामोदयादित्यर्थः यतः सयोग्यादौ तीर्थंकरनामोदयो भवति यदुक्तं उदये कस्स।

सुरासुरनरवइनिवहनिवहेहिं पूइज्जइ तं तित्थयरंनामं तस्स विवागो उ केवलिणो १ ततः सर्वोक्के कचत्वारिंशति
तीर्थकरनाम क्षिप्यते जाता द्विचत्वारिंशत् सा च सयोगिनि भवतीति उरलाथिरखगइदुगंत्ति द्विकशब्दस्य प्रत्येकं योगात्
औदारिकद्विकं औदारिकशरीर औदारिकांगोपांगलक्षणं अस्थिरद्विकं अस्थिराशुभलक्षणं खगतिद्विकं शुभविहायोग
ति अशुभविहायोगतिरूपं परित्ततिगंत्ति प्रत्येकत्रिकं प्रत्येकस्थिरशुभलक्षणं छसंठाणत्ति षट्संस्थानानि समचतुरस्र
न्यग्रोधपरिमंडलसादिवामनकुब्जहुंडस्वरूपाणि संस्थानशब्दस्य च पुंस्त्वं प्राकृतलक्षणवशात् यदाह पाणिनिः स्वप्राकृत
लक्षणे लिंगं व्यभिचार्यपि अगुरुलहुवन्नचउत्ति चउःशब्दस्य प्रत्येकं संबंधात् अगुरुलघुचतुष्कं अगुरुलघूपघा
तपराघातउच्छ्वासाख्यं वर्णचतुष्कं वर्णगंधरसस्पर्शरूपं निमिणत्ति निर्माणं तेयत्ति तेजसशरीरं कंमत्ति कार्मणशरीरं
आइसंहननं चत्ति प्रथमसंहननं वज्रऋषभनाराचसंहननमित्यर्थः ॥ दूसरसूसरसायासाएगयरं च तीस वुच्छेउ बा
रस अयोगि सुभगाइज्जजसंन्नयरवेअणिअं २२ दुस्वरं सुस्वरं सातं च सुखं असातं च दुःखं सातासाते तयोरेकतरमन्य
तरत् सातं वा असातं वेत्यर्थः ततः एतासां त्रिंशतः प्रकृतीनां सयोगिकेवलिन्युदयः व्यवच्छेदः तत्रैकतरवेदनीयं यद
योगिकेवलिनि न वेदयितव्यं तत्सयोगिकेवलिचरमसमये व्युच्छिन्नोदयं भवति पुनरन्यतरत्रोदयात् सा वा तु दुःस्वर
सुस्वरनाम्नोस्तु भाषापुद्गलविपाकित्वात् योगिनामेवोदयः शेषाणां पुनः शरीरपुद्गलविपाकित्वात्काययोगिना
मेव ते नेदियोगेन पुद्गलग्रहणपरिणामालंबनानि ततः तेषु गृहीतेषु तेषां कर्मणां स्वविपाकतोदयो भवति तेनायो
गिकेवलिनि तद्योगाभावात् उदयाभावः इत्येता त्रिंशत्प्रकृतयः सर्वोक्तद्विचत्वारिंशतोऽपनीयंते ततः शेषा द्वा
दशप्रकृतयो योगकेवलिन्युदयमाश्रित्य भवंतीत्येतदेवाह बारस अयोगी इत्यादि द्वादश प्रकृतयोऽयोगिकेवलि

नि चरमसमयांता चरमसमयेऽयोगिकेवलिगुणस्थानस्यांते व्यवच्छेदो यासां ताश्चरमसमयांतास्ता एवाह सुभगं आ
देयं जसन्नियशःकीर्त्तिनाम अन्यतरवेदनीयं सयोगिकेवलिचरमसमयव्यवच्छिन्नोदरितं वेदनीयमित्यर्थः ॥ तस
तिगपणिंदिमणुआउगइजिणुच्चंति चरमसमयंता उदउव्वुदीरणा परमपमत्ताईसगगुणेसु २३ त्रस
त्रिकं त्रसबादरपर्याप्ताख्यं पणिंदित्ति पंचेंद्रियजातिः मणुआउगइत्ति मनुजशब्दस्य प्रत्येकं योगान्मनुजायुः मनुज
गतिः जिणत्ति जिननाम उच्चंति उच्चैर्गोत्रमिति शब्दो द्वादशप्रकृतिपरिसमाप्तिद्योतके ति ॥ इति श्रीदेवेंद्रसूरिविरचिता
यां स्वोपज्ञकर्मस्तववृत्तिकायामुदयाधिकारः समाप्तः उदयाधिकारमेनं विवृण्वता यन्मयाऽर्जितं सुकृतं दुःकर्मोदयरहि
तो लोकः सर्वोऽपि तेनास्तु ॥ अथ तस्य भगवतः कस्मिन् गुणस्थाने कियत्यः प्रकृतयः उदीरणामाश्रित्य व्यवच्छिन्ना इत्ये
तन्निर्देशद्वारेणाह उदयवदुदीरणा सर्वोक्तशब्दार्थ गुणस्थाने वक्तव्या किमुक्तं भवति यावतीनां प्रकृतीनां यो मि
थ्यादृष्टिकउदयस्वामी तावतीनां प्रकृतीनां स उदीरणास्वाम्यपीति अत्र निषसंगं निरूपयन्नाह परमपमत्ताईसगगुणेसु
त्ति परं केवलमियान्विशेषः अप्रमत्त आदौ येषां तेऽप्रमत्तादयो गुणा गुणस्थानानि सप्त च ते गुणाश्च सप्तगुणास्तेष्वप्रमत्तादि सप्तसु
गुणेष्वित्यादि ॥ एसापयडितिगूणा वेअणिआहारजुअलथीणतिगं मणुआउपमत्तंता अजोगि अणुदीरगो भयवं २४ उदी
रणा सप्तत्रा ॥ एषा उदीरणाप्रकृतित्रिकेण ऊना हीना वक्तव्या इयमत्र भावना मिथ्यादृष्टेः सप्तदशोत्तरशतस्योदय उदीरणाप्ये
वं सास्वादनस्य एकादशशतस्योदयस्तथैवोदीरणापि मिश्रस्योदयः शतस्य उदीरणापि अविरतसम्यग्दृष्टेरुदयश्चतुरुत्तरशत
स्य तथैवोदीरणा देशविरतस्य सप्ताशीतेरुदय उदीरणापि च अप्रमत्ते उदयः षट्सप्ततेरुदीरणा त्रिसप्ततेः १ अपूर्वकरणे उदये
द्विसप्ततेरुदीरणा एकोनसप्ततेः २ अनिवृत्तिबादरे उदयः षट्षष्टेरुदीरणा त्रिषष्टेः ३ सूक्ष्मसंपराये उदयः षष्टेः उदीरणा स

प्रमत्ते एकाशीतेरु
दयः उदीरणा
पि च

त्रिपंचाशतः ४ उपशांतमोहे उदयः एकोनषष्टेः उदीरणा षट्पंचाशतः ५ क्षीणमोहे उदयः सप्तपंचाशतः उदीरणा चतुः
पंचाशतः ६ सयोगिकेवलिन्युदयो द्विचत्वारिंशतः उदीरणा एकोनचत्वारिंशतः ननु केन प्रकृतित्रिकेण प्रमत्तादिषू
दीरणा नेत्यारेकायाह वेयणीआहारजुयलत्ति युगलशब्दस्य प्रत्येकं योजनाद्वेदनीययुगलं सातवेदनीय असा
तवेदनीयरूपं आहारयुगलं आहारकशरीर आहारकांगोपांगलक्षणं थीणतिगत्ति स्त्यानर्द्धित्रिकं निद्रानिद्रा प्रच
लाप्रचला स्त्यानर्द्धिरूपं मनुष्यायुरित्येतासामष्टानां प्रकृतीनां प्रमत्तोऽतोऽप्यवच्छेद उदीरणां प्रतीत्य यासां ताः प्रमत्तांताः
। अयमत्र भावार्थः स्त्यानर्द्धित्रिकं प्रमादरूपत्वादप्रमत्तादिषु नास्त्येव कुतस्तेषु तदुदीरणा आहारशरीरी च विकुर्व १
ण उत्सुकत्वाद्यतिः प्रमत्त एवेत्यप्रमत्तादिषु तदपि नास्ति कुतस्तेषु तदुदीरणा सातासातमनुजायुषोरपि प्रमादसद्भावे नैव
योगो नोदीरणा भवति नान्येन त्वितरेषु न तदुदीरणा तदयमत्र तात्पर्यार्थः उदयमाश्रित्य प्रमत्ते स्त्यानर्द्धित्रिकाहारकद्विका
ख्यपंचप्रकृतयो व्यवच्छिद्यंते उदीरणामाश्रित्य पुनः स्त्यानर्द्धित्रिकाहारकद्विकसातासातमनुजायुर्लक्षणा अष्टौ प्रकृतयः
इति मनुजायुः सातासातरूपप्रकृतित्रयेण अप्रमत्तादिषु न उदीरणा वाच्येति अयोगी अयोगिकेवली अनुदीरको न कि
मपि कर्मोदीरयत्याद्विपति योगाभावात् उदीरणा हि योगकृतः करणविशेष इति भगवान् परमपदप्रयत्नवान् सर्वसंवर
रूपचारित्रधर्म्मवानित्यर्थः इति श्रीदेवेंद्रसूरिविरचितायां स्वोपज्ञकर्मस्तवटीकायां उदीरणाधिकारः समाप्तः ॥ सुक्त
तं मयायं दातं विहृत एवतोदीरणाधिकारः तेन स्तुसर्वज्ञो कोऽप्यकर्मोदीरणारहितः १ ॥ अथ सत्तालक्षणकथनपूर्वकं ५७
यथा तेन भगवता त्रिलोकीपतिना श्रीमद्वर्द्धमानस्वामिना सत्तामाश्रित्य गुणस्थानेषु कर्माणि क्षपितानि तथा प्रतिपादयन्ना
ह ॥ सत्ता कम्माण ठिई बंधाईलद्धअत्तलाभाणं संते अडयालसयं जा उवसमु विजिण बिअतइए २५ सत्तोच्यत इति

विशेषः किमित्याह कर्माणां ज्ञानावरणादियोग्यपरमाणूनां स्थितिरवस्थानं सद्भाव इति पर्याया किंविशिष्टानां कर्मणा
मित्याह बंधादिलब्धात्मलाभानां तत्र मिथ्यात्वादिभिर्हेतुभिः कर्मयोग्यपुद्गलैरात्मनो वह्न्ययःपिंडवदन्योन्यानुगमात्मे
त्मकः संबंधो बंधः आदिशब्दात् संक्रमकरणादिपरिग्रहः ततो बंधादिभिर्लब्धः प्राप्त आत्मलाभः आत्मस्वरूपं यैस्तानि बं
धादिलब्धात्मलाभानां कर्म्माणां या स्थितिः सा सत्ता तस्यां संते तत्र सत्कर्माणि सत्तायामष्टचत्वारिंशशतं प्रकृतीनां भवति कि
यंति गुणस्थानानि यावदित्याह जा उवसमुत्ति यावदुपशमं उपशांतमोहं अयमर्थः मिथ्यादृष्टिगुणस्थानात् प्रभृति उप
शांतमोहगुणस्थानं यावदष्टचत्वारिंशशतं सत्तायां भवति किं सर्वविशेषेणेत्याह विजिण बियतइए इयत्ति विगतं जिनना
म यस्मात्तद्विजिनं जिननामविरहितं तदेवाष्टचत्वारिंशशतं भवति केत्याह द्वितीये सास्वादने तृतीये मिश्रदृष्टौ सासणमि
स्सरहिए सुवा तित्थमितिवचनात् सासादनमिश्रयोः सप्तचत्वारिंशशतं भवतीत्यर्थः इयमत्र हृदयं इह मिथ्यादृष्टिरष्ट
चत्वारिंशमपि शतं सत्तायां यदापि प्राग्बद्धनरकायुः क्षायोपशमिकं सम्यक्त्वमवाप्य तीर्थंकरनाम्नो बंधमारभते तदा सोन
रकेषूत्पद्यमानः सम्यक्त्वमवश्यं वमति मिथ्यादृष्टेः तीर्थंकरनाम्नोपि सत्ता संभवति सास्वादनमिश्रयोस्तु तस्मिन्नेव जिनना २
मरहिते सप्तचत्वारिंशशतं सत्तायां जिननामसत्कर्मणो जीवस्य तद्भावानवाप्तेस्तद्बंधारंभस्य च शुद्धसम्यक्त्वप्रत्ययत्वात्
यदुक्तं बृहत्कर्मस्तवभाष्ये तित्थयरेण विहीणं सीयालसयं तु संतए होइ सासायणम्मि गुणे सम्मामीसे य पयडीणं अविर
तसम्यग्दृष्ट्यादीनामविशिष्टदर्शनसप्तकानामष्टचत्वारिंशस्यापि शतस्य सत्ता संभवतीति ॥ अपुव्वाइचउक्के अण तिरि
नरयाउ विणु बिआलसयं सम्माइचउसु सत्तग खयंमि इगचत्तसयमहवा २६ गाथापर्यंतवर्त्तिवाशब्दस्य संबं
धान्मुक्तावदष्टचत्वारिंशशतं सत्तायामुक्तमथवायमपरः सत्तामाश्रित्य भेदः तथाहि अपुव्वाइचउक्के अपूर्वकरण

अनिवृत्तिबादरसूक्ष्मसंपराय उपशांतमोहरूपेष्वाणत्ति अनंतानुबंधिचतुष्कं तिरिनराउत्ति आयुःशब्दस्य प्रत्येकं योगात्ति
र्यगायुर्नरकायुश्च विना द्विचत्वारिंशं शतं सत्तायां भवतीति अयमाशयः यः कश्चिद् विसंयोजितानंतानुबंधिचतुष्कोऽबद्धदेवायु
र्मनुजायुषि वर्तमान उपशमश्रेणिमारोहति तस्य तिर्यगायुर्नरकायुरनंतानुबंधिचतुष्कलक्षणप्रकृतिषट्करहितं शेषं द्वि
चत्वारिंशं शतं सत्तायां प्राप्यते यदुक्तं बृहत्कर्मस्तवभाष्ये अण तिरिनारय रहियं बायालसयं वियाण संतमि उव
सामगस्स उ बा नियट्टिसुहुमोवसंतंमि १ संमाइचउसुत्ति सम्यक्त्वादिषु चतुर्षु अविरतसम्यग्दृष्टिदेशविरतप्रमत्ताप्रम
त्तेषु सप्तक्षये सति अनंतानुबंधिचतुष्कमिथ्यात्वमिश्रसम्यक्त्वलक्षणसप्तकक्षये सति एकचत्वारिंशं शतमथवा सत्तायां भ
वति इदमप्यथवा शब्द आशंसायो ज्यते यदुक्तं बृहत्कर्मस्तवसूत्रे अण मिच्छमीससम्मं अविरयसंमाउ अप्पमत्तंता खत्ति
६ः खवगं उ पप्पच उसुवि पणयालं नरयतिरिसुराउविणा सत्तगविण अडतीसं जा अनियट्टीपढमभागो २७ क्षपकं
३ः पुनर्वेदक्षपकजिनं पुनः प्रतीत्याश्रित्य चतुर्ष्वपि अविरतदेशविरतप्रमत्ताप्रमत्तेषु पणयालंति पंचचत्वारिंशं शतम
थवा सत्पथवा शब्दः इहापि संबध्यते कथमित्याह नरयतिरिसुराउविणत्ति आयुःशब्दस्य प्रत्येकं योगात् नरकायुस्ति
र्यगायुः सुरायुर्विनांतरेण इदमुक्तं भवति यो जीवो नारकतिर्यग्सुरेषु चरमं तद्भवमनुष्यभवं मनुष्यत्वे आसन्नस्तस्य
नारकतिर्यक्सुरायूंषि स्वस्वभवे व्यवच्छिन्नसत्ताकानि जातानि पुनः सद्भावात् उक्तं च सुरनरयतिरियआउं निय
नियभवे सव्व जीवाणमिति इयं चैतेषु गुणस्थानेषु सामान्यजीवानां संभवमाश्रित्य सत्तावलिता न त्वधिकृतस्तवस्तुत ५८
स्य चरमजिनपरिवृढस्य अस्याः सुरनारकतिर्यगायुःसंभवापेक्षणीयत्वात् जिनस्य तदसंभवात् तस्यापि चरमशरीरापे
क्षया संभवो वाच्यः इदमेव पंचचत्वारिंशं शतं सप्तकमनंतानुबंधिमिथ्यात्वमिश्रसम्यक्त्वाख्यं विना अष्टत्रिंशं शतं भवति

क्रियंते गुणस्थानानि यावदित्याह जा अनियट्टीपढमभागुत्ति इहानिवृत्तिबादरांशका नव भागाः क्रियंते ततोऽवि
रतोऽविरते देशविरते प्रमत्तेऽप्रमत्ते निवृत्तिबादरेऽनिवृत्तिबादरस्य च प्रथमो भागः तावदष्टत्रिंशं शतं भवति उक्तं च स
ते अडयाल सयं खवगं अपुव्वहोइ पणयालं आउतिगं नत्थितहिं सम्मगखीणंमि अडतीसं १ पणयालं अडतीसं अ
विरयसंमाउ अप्पमत्तुत्ति अपुव्वे अडतीसं नवरं खवगंमि बोधव्वं इति अथ क्षपकश्रेणिमधिकृत्यानिवृत्तिबादरादिषु प्रकृ
तिसत्तावल्पिते उपशमश्रेणिसत्तायास्त्विह नाधिकार इति ८ः थावरतिरिनरयायवदुगथीणतिगेगविगलसाहारं सो
लखउ दुवीससयं बिअंसि बिअतिअकसायंतो २८ इहानिवृत्तिबादरस्य प्रथमे भागेऽष्टत्रिंशं शतं सत्तायां भवति तत्र
थावरतिरिनरयायवदुगत्ति द्विकशब्दस्य प्रत्येकं संयोगात् स्थावरद्विकं स्थावरसूक्ष्मलक्षणं तिर्यग्द्विकं तिर्यग्गति ति
र्यगानुपूर्वीरूपं नरकद्विकं नरकगति नरकानुपूर्वीलक्षणं आतपद्विकं आतपउद्योताख्यं स्त्यानर्द्धित्रिकं निद्रानिद्रा प्र
चलाप्रचला स्त्यानर्द्धिलक्षणं इगत्ति एकेंद्रियजातिः विगलत्ति विकलेंद्रियजातयः द्वींद्रियजाति त्रींद्रियजाति चतुरिंद्रिय
जातिलक्षणाः साहारंति साधारणनाम एतासां षोडशानां प्रकृतीनां क्षयः सत्तामाश्रित्य भवति ततोऽनिवृत्तिबादरस्य
द्वितीये भागे द्वाविंशं शतं भवति तत्र बियतियकसायंतोत्ति कषायशब्दस्य प्रत्येकं योगात् द्वितीयकषाया अप्रत्याख्यान
वरणाश्चत्वारः इत्येतासामष्टानां प्रकृतीनामंतः क्षयस्ततस्तृतीयांशे चतुर्दशशतं भवतीत्येतदेवाह ३ तइयाइसु चउदस
तेरबारछपणचउतिहियसय कमसो नपुइत्थिहासछगपुंसतुरियकोहमयमायखउ २९ तृतीयादिषु भागेषु चतु
र्दश च त्रयोदश च द्वादश च षट् च पंच च चत्वारि च त्रीणि चेति द्वंद्वस्ते अधिकं शतं तितिहियसय इत्यत्राकारलोपो विभक्ति
लोपश्च प्राकृतत्वात् क्रमशः क्रमेण सत्तायां भवति कथमित्याह नपुइत्थि इत्यादि नपुंसकवेदः स्त्रीचस्त्रीवेदः हास्यप

Dr. BHAU DAJI

कं च हास्य रति अरति शोक भय जुगुप्सारूपं पुमांश्च पुंवेदः नपुंसकं स्त्री हास्य षट्कं पुमांसः क्रोधश्च कोपः मदश्च मदो मानोऽहंक
रइति पर्यायाः मायाच निकृतिः क्रोधः मद माया स्तुर्याश्चतुर्थाः संज्वलनाः क्रोध मद माया स्तुर्य क्रोध मद मायाः नपुंसक स्त्री हा १
स्य षट्कं पुमांसश्च तुर्य क्रोध मद माया श्च नपुंस स्त्री हास्य षट्क पुंतुर्य क्रोध मद माया स्तासां क्षयः नपुंस स्त्री हास्य षट्कं तुर्य क्रोध म १
द माया क्षयः मायक्षपत्रक्षपत्र कस्वदीर्घकस्तौ मिश्रो द्वौ इत्यनेन प्राकृत सूत्रेण तिगाथाक्षरार्थः तावार्थस्त्वयं अनिवृ
त्ति बादरस्य तृतीये भागे द्वितीय तृतीय कषायाष्टक क्षये चतुर्दशा धिकं शतं चतुर्थ भागे नपुंसक वेद क्षये त्रयोदशा
धिकं शतं पंचमे भागे स्त्री वेद क्षये द्वादशाधिकं शतं षष्ठे भागे हास्य षट्क क्षये षड धिकं शतं सप्तमे भागे पुंवेद क्षये पंचा
धिकं शतं अष्टमे भागे संज्वलन क्रोध क्षये चतुरधिकं शतं नवमे भागे संज्वलन मान क्षये त्र्यधिकं शतं नवमे भागे संज्व
लन माया क्षये द्व्यधिकं शतं सत्तायां भवति तत्र सूक्ष्म संपराये च तथा चाह छ सुहुमि दुसय लोभंतो
खीणदुचरिमेगसउ दुनिद्दखउ नवनवइ चरमसमए चउदंसणनाणविग्घंतो ३० सुहुमिति सूक्ष्म संपराये द्विश
तं द्व्यधिकं शतं सत्तायां भवति तत्र च लोभांतः संज्वलन लोभस्य क्षयः ततः खीणदुचरिमेगसउत्ति क्षीणमोह द्विच
रम समये एकाधिकं शतं सत्तायां तत्र च दुनिद्दखउत्ति निद्रा प्रचलयोर्द्वयोः क्षयो भवति ततो नवनवति श्चरम स
मये क्षीणमोह गुणस्थानस्ये ति शेषः तत्र च भावि तानि दर्शनानि च चउदंसणानि चक्षुरचक्षुरवधि केवल दर्शनाव
रणाख्यानि ज्ञानानि ज्ञानावरणानि मति श्रुताव धि मनः पर्याय केवल ज्ञानावरण लक्षणानि पंच विघ्ना नि दान लाभ ५७
भोगोपभोग वीर्य विघ्न रूपाणि पंच तेषामंतो भवति ततः छः पणसीइ सजोगि अजोगि दुचरिमे देव खगइ गंध दुगं फास ठ
वंन रस तणु बंधण संघाय पण निमिणं ३१ पंचाशीतिः सयोगि केवलिनि सत्तायां भवति ततो अजोगि दुचरिमेत्ति अ
योगि केवलिनि द्विचरम समये इत्येतासां द्विसप्तति प्रकृतीनां क्षयो भवति ता एवाह देव खगइ गंध दुगंति द्विक शब्दस्य प्रत्ये
कं योगात् देव द्विकं देवगति देवानुपूर्वी रूपं खगति द्विकं शुभ विहायोगतिः अशुभ विहायोगति रूपं गंध द्विकं सुरभि गंध
असुरभि गंधाख्यं फासिअट्ठत्ति स्पर्शाष्टकं गुरु लघु मृदु खर शीत उष्ण स्निग्ध रूक्षाख्यं वंन रस तणु बंधण संघाय पणत्ति पंचक
शब्दस्य प्रत्येकं संबंधात् वर्ण पंचकं कृष्ण नील लोहित हारिद्र शुक्लाख्यं रस पंचकं तिक्त कटुक कषाय आम्ल मधुर रूपं तनु पंच
कं औदारिक वैक्रिय आहारक तैजस कार्मण तनु लक्षण मेवं तनु नाम्ना बंधन पंचकं संघातन पंचकं च वाच्यं निमिणंत्ति निम १
र्माणमिति छः संघयण अथिर संठाण छक्क अगुरुलहु चउ अपज्जत्तं सायं व असायं वा परित्तुवंग तिग सुसर निअं ३२ छः
षट्क शब्दस्य प्रत्येकं योगात् संहनन षट्कं वज्र ऋषभ नाराच ऋषभ नाराच नाराच अर्द्ध नाराच कीलिका सेवार्त संहननाख्यं अ
स्थिर षट्कं अस्थिर अशुभ दुर्भग दुःस्वर अनादेय अयशःकीर्त्ति रूपं संस्थान षट्कं समचतुरस्र न्यग्रोध परिमंडल सादि वामन कुब्ज
हुंड संस्थानाख्यं अगुरुलघु चतुष्कं अगुरुलघु उपघात पराघात उच्छ्वासाख्यं अपर्याप्तं सातं वा असातं वा एकतर वेदनीयं
यदनुदयावस्थं परित्तुवंग तिगत्ति त्रिक शब्दस्य प्रत्येकं संबंधात् प्रत्येक त्रिकं प्रत्येक स्थिर शुभाख्यं उपांग त्रिकं औदारिक वै
क्रिय आहारकांगोपांग रूपं सुस्वरं निअंति नीचैर्गोत्रमिति छः बिसयरि खउ अ चरिमे तेरस मणुअतस तिग जस आइज्जं सुभ
ग जिणुच्च पणिंदिअ साया साएगयर छेउ ३३ इत्येतासां द्विसप्तति प्रकृतीनामयोगि केवलि द्विचरम समये सत्तामाश्रित्य क्ष
यो भवति ततो अर्वाक् पंचाशीते रिमा द्विसप्तति प्रकृतयो अपनीयंते शेषास्त्रयोदश प्रकृतयोऽयोगि चरम समये क्षीयंते तथा
चाह बिसयरि खउत्ति स्पष्टं च पुनरर्थे च भवस्थित संबंधश्च चरम समये पुनः सयोगि केवलिन स्त्रयोदश प्रकृतीनां क्षयो भवति
मणुय तस तिग त्ति त्रिक शब्दस्य प्रत्येकं योगात् मनुज त्रिकं मनुज गति मनुजानुपूर्वी मनुजायुर्लक्षणं त्रस त्रिकं। त्रस बादर प॰

र्यसारव्यं जसाइज्जंति यशः कीर्त्तिनाम आदेयनाम सुभगं जिणमुच्चंति जिननाम उच्चैर्गोत्रं पणिंदियत्ति पंचेंद्रियजातिः साता
सातयोरेकतरं तस्य छेदः सत्तामाश्रित्य क्षय इति अत्रैव मतांतरमाह ॥ नरअणुपुव्वि विणा वा बारस चरमसमयंमि जो खवि
उं पत्तो सिद्धिं देविंद वंदिअं नमह तं वीरं ३४ इति बीयं कम्मत्थवसुत्तं सम्मत्तं २ ॥ नरानुपूर्वीं विना मनुष्यानुपूर्वीमंतरेण वा
शब्दो मतांतरसूचको द्वादशप्रकृतीरयोगिकेवलिचरमसमये यः क्षपयित्वा सिद्धिं प्राप्तः तं वीरं नमतेति संटंकः अयमत्राभिप्रा
यः मनुजानुपूर्व्यास्त्वयोगिद्विचरमसमये सत्ताव्यवच्छेदः उदयाभावात् उदयवतीनां हि प्रकृतीनां स्तिबुकसंक्रमाभावात् स्वानु
भावेन दलिकं चरमसमयेऽपि दृश्यते इति युक्तः तासां चरमसमये क्षयः आनुपूर्वीनाम्नां चतुर्णामपि क्षेत्रविपाकित्वात् भवां
तरालांतरालगतावेवोदयस्तेन न भवस्थस्य नास्ति तदुदयस्तदुदयाभावाच्चायोगिद्विचरमसमये मनुजानुपूर्व्या अपि सत्ता
व्यवच्छेदः तन्मतेऽयोगिकेवलिनो द्विचरमसमये त्रिसप्ततिः प्रकृतीनां चरमसमये द्वादशानां क्षय इति ततो यो भगवान् मा
तापित्रोर्दिवंगतयोः संपूर्णनिजप्रतिज्ञो भक्तिसंभारभासुरसुरविसरलोकांतिकत्रिदशसमूहकृन्माशिः बुध्यमाणेविरिव सबहु
गजीवहितं स्वयंबुद्धं प्रवर्त्तय तीर्थमित्यादिवचोभिर्निवेदिते निष्क्रमणसमये संवत्सरं यावन्निरंतरं स्थूलचामीकरधारासारैः
प्रावर्षेणप्रधाराधरेव सुदरिद्रसंतापप्रसरमवनीमंडलस्योपशमय्य परस्परमहमहमिकया समयात सुरासुरनरो
रगनायकनिकरैर्जयजीवनंदप्रसिद्धवरवृषभेत्यादिवचनरचनया स्तूयमानः संप्राप्तजातपंचवर्षप्रतिपन्न निरवद्यचा
रित्रभार साधिकं द्वादशसंवत्सरी यावत्परीषहोपसर्गवर्गसंसर्गेऽप्युग्रमधिसह्य परमसितध्यानांकुरवज्ज्वगरधारया सक ६०
लघनघातिकर्मवनं खंडखंडनमरवंमनमाधाय निर्मलाविकलकेवलबलावलोकित निखिललोकालोकः श्रीगौत
मप्रभृतिमुनिपुंगवानां तत्त्वमुपदिश्य संसारसरितः सुखंसुखेन समुत्तरणाय सकलजनानां धर्मतीर्थप्रवृत्त्या योगिकेवलि

चरमसमये त्रयोदशप्रकृतीर्द्वादशप्रकृतीर्वा क्षपयित्वा सिद्धिं परमानंदरूपां प्राप्तस्तं नमत प्रणमत वीरं श्रीवर्द्धमान
स्वामिनं किंविशिष्टं देवेंद्रवंदितं देवानां भवनपतिव्यंतरज्योतिष्कवैमानिकानामिंद्राः स्वामिनो देवेंद्राः तैर्वंदितः शशधर
करनिकरविमलतरगुणगुणकीर्त्तनेन स्कृतः शिरसा प्रणतो बहुकृत्वः अभिवादनया रीतिर्वा वचनात् यद्वा पदैकदेशे प
दसमुदायोपचारात् देवेंद्रेण देवेंद्रसूरिणा आचार्येण श्रीमज्जगच्चंद्रसूरिचरणसरसीरुहचंचरीकेण वंदितः सकलकर्म
क्षयलक्षणासाधारणगुणसंकीर्त्तनेन स्तुतः कार्ये भवप्रणत इति नमतेति प्रेरणायां पंचम्यंतं क्रियापदं तच्च श्रोतृणां क
र्मविदनालोभवशात् प्रमादसंस्वेपाचार्येण नो विजितव्यं किंतु मृजमकरवचोभिः शिक्षानिबंधनैः श्रोतृणामनाभिप्रा १
यं यथार्थं सन्मार्गप्रवृत्तिरूपदेशमेति ज्ञापनार्थं यदाह प्रवचनोपनिषद्वेदी भगवान् श्रीहरिभद्रसूरिः अणवाज्ञाणस्से
हपायं फवंति इयएयं परमंरयणंपि गुणकरिसं उवेइ सो इंमणगुणेणं १ इत्ताय पमायखलिआ पुव्वभासेण कस्सन्नवं जंति
जोतेवणेइसंमं गुरुत्तणं तस्ससफलंति २ को नाम सारहीणं सहज्जो जेह वाइणो दमए ज्वेविय जो आसो दमेइ तं सार
हिं विंतिइति ॥ इति श्रीदेवेंद्रसूरिविरचितायां स्वोपज्ञकर्मस्तवटीकायां सत्ताधिकारः समाप्तः तत्समाप्तौ च समाप्ता द्वि
तीयकर्मस्तवटीका ॥ सत्ताधिकारमेनं विवृण्वता यन्मयार्जितं सुकृतं निःशेषकर्मसत्तारहितस्तेनास्तु लोको
यं १ विशेषाविषयस्य पितोः प्रदत्रयी ध्यानयोगान्निखिलं कर्ममलपटलमुक्तः सर्वो हि जिनो जयतु २ कंदोज्ज्वल
कीर्त्तिभरैः सुरभीकृतसकलविष्टपाभोगः शतमखशतविनतपदः श्रीगौतमगणधरः पातु ३ तदनु सुधर्मस्वा
मी जंबूप्रभवादयो मुनिवरिष्ठाः श्रुतजलनिधिपारीणा भूयांसः श्रेयसे संतु ४ क्रमात् प्राप्ततपाचार्य इत्यभिख्याति
र्भुनायकाः समभुवन् कुलेचांद्रे श्रीजगच्चंद्रसूरयः ५ जगज्जनितबोधानां तेषां शुद्धचारित्रिणां विनेयाः स

महायंत श्रीमद्देवेंद्रसूरयः ६ स्वान्ययोरुपकाराय श्रीमद्देवेंद्रसूरिणा कर्मस्तवस्य टीकेयं सुखबोधा विनिर्ममे ७ विबु
धवरधर्मकीर्त्ति श्रीविद्यानंदसूरिमुख्यबुधैः स्वपरसमयैककुशले स्तदैवसंसोधितावेयं ८ यत्र दितमल्पमतिना
सिद्धांतविरुद्धमिह किमपि शास्त्रे विवद्भिः तत्वज्ञैः प्रसादमाधाय संशोधितावेयं ९ यत्र दितमल्पमतिना सिद्धांतविरुद्ध
मिह किमपि शास्त्रे विद्वद्भिः तत्वज्ञैः प्रसादमाधाय तच्छोध्यं १० कर्मस्तवसूत्रमिदं विहरएवतायन्मया र्जितं सर्वेऽपिक
र्मबंधास्तेन उद्धं उज्जगातोपि ११ ग्रंथाग्रं ८३० ॥६०॥श्रीपरमात्मनेनमः सम्यग्बंधस्वामित्वदेशकं वर्द्धमानमानम्य बंधस्वा
मित्वस्य व्याख्येयं लिख्यते स्वपरोपकाराय यथावीतिधानं बंधस्वामित्वप्रकरणमारिप्सुराचार्यो मंगलादिप्रतिपादिकं १
गाथामाह बंधविहाणविमुक्कं वंदिअ सिरिवद्धमाणजिणचंदं गइआईसुं वुच्छं समासओबंधसामित्तं १ व्याख्या इहप्रथमा
र्धेन मंगलं द्वितीयार्धेनाभिधेयं साक्षाडक्तं प्रयोजनसंबंधौ उसामर्थ्यगम्यौ तत्रबंधः कर्मपरमाणूनां जीवप्रदेशैः सहसंबं
धस्तस्यविधानं मिथ्यात्वादिभिर्बंधहेतुभिर्निवर्तनं बंधविधानं तेन विमुक्तः सतघातं बंधविधानविमुक्तं वंदित्वा श्रीवर्द्धमान
जिनचंद्रं वक्ष्येऽभिधास्ये समासतः संक्षेपतो नविस्तरेण किमित्याह बंधस्वामित्वं बंधः कर्मपरमाणूनां जीवप्रदेशैः सहसंबंधस्तस्यस्वा
मित्वमाधिपत्यं जीवानामितिगम्यते केषुगईयाईसु त्ति गतिरादिर्येषां तानि गत्यादीनि आदिशब्दात् इंद्रियादिपरिग्रहस्ते
षु गत्यादिषुमार्गणास्थानेषु अत्रचेयं मार्गणास्थानप्रतिपादिका वृद्धबंधस्वामित्वगाथा गइइंदिएकाए जोएवेएकसा
यनाणेसु संजमदंसणलेसा भवसम्मेसन्निआहारे १ व्याः तत्रगतिश्चतुर्धा नरकगतिः तिर्यग्गतिः मनुष्यगति र्देवगतिरि ६१
ति १ इंद्रियस्पर्शनरसनघ्राणचक्षुःश्रोत्रभेदात्पंचधा इंद्रियग्रहणेनचे तदुपलक्षिता एकेंद्रियद्वींद्रियत्रींद्रियचतुरिं
द्रिय पंचेंद्रियगृह्यंते २ कायःषोढाः पृथिव्यप्तेजोवायुवनस्पतित्रसकायभेदात् ३ योगाः पंचदशधाः सत्यमनोयोगःअ

सत्यमनोयोगः सत्यासत्यमनोयोगः असत्यामृषामनोयोगः सत्यवाग्योगः असत्यवाग्योगः सत्यासत्यवाग्योगः असत्यामृषा
वाग्योगः वैक्रियकाययोगः आहारककाययोगः औदारिककाययोगः वैक्रियमिश्रकाययोगः आहारकमिश्रकाययोग:
औदारिकमिश्रकाययोगः कार्मणकाययोगइति ४ वेदस्त्रिधा स्त्रीवेदः पुरुषवेदो नपुंसकवेदश्च ५ कषायाः क्रोधमानमाय १
लोभाः ६ ज्ञानं पंचधा मतिज्ञानं श्रुतज्ञानं अवधिज्ञानं मनःपर्यायज्ञानं केवलज्ञानंच ज्ञानग्रहणेन चाज्ञानमपि तत्प्रतिप
क्षत्वात् मपिलक्ष्यते तच्चत्रिविधं मत्यज्ञानं श्रुताज्ञानं विभंगज्ञानं चेति ज्ञानमार्गणास्थानमष्टधाः ७ संयमश्चारित्रं तच्चपंचधासा
मायिकं छेदोपस्थापनीं परिहारविशुद्धिकं सूक्ष्मसंपरायं यथाख्यातंच संयमग्रहणेन तत्प्रतिपक्षत्वात् देशसंयमोऽसंयम
श्च लक्ष्यत इतिसंयमः सप्तधा ८ दर्शनंचतुर्विधं चक्षुर्दर्शनं अचक्षुर्दर्शनं अवधिदर्शनं केवलदर्शनंच ९ लेश्याषोढा कृष्ण
लेश्या नीललेश्या कापोतलेश्या तेजोलेश्या पद्मलेश्या शुक्ललेश्या १० भव्यस्तथारूपानादिपारिणामिकभावात्सिद्धिगम
नयोग्यो भव्यग्रहणेनच तत्प्रतिपक्षत्वातोऽभव्योपिगृह्यते ११ सम्यक्त्वं त्रिधा क्षायोपशमिकं औपशमिकं क्षायिकंच सम्यक्त्व
ग्रहणेनच तत्प्रतिपक्षत्वात् मिथ्यात्वं सासादनं मिश्रंच परिगृह्यते १२ संज्ञी विशिष्टस्मरणादिरूपमनोविज्ञानसहितेंद्रियपंचक
•कं• समन्वितस्तत्प्रतिपक्षत्वात् सर्वोप्येकेंद्रियादिरसंज्ञी सोपिसंज्ञिग्रहणेनसूचितोऽष्टव्यः १३ आहारयतिओजोलोमप्रक्षेपाहा
राणामन्यतमाहारमित्याहारकस्तत्प्रतिपक्षत्वातोऽनाहारकः १४ ननुज्ञानादिषु किमर्थमज्ञानादिप्रतिपक्षग्रहणंकृतं उच्य
ते चतुर्दशस्वपि मार्गणास्थानेषुप्रत्येकं सर्वसांसारिकसत्वसंग्रहार्थं इत्युक्तरूपेषु गत्यादिषु बंधस्वामित्वंवक्ष्ये तत्र बंधं चप्रती
त्य विंशत्युत्तरं प्रकृतिशतमधिक्रियते तथाहि ज्ञानावरणे पंचप्रकृतयः पंच दर्शनावरणेनव वेदनीये द्वे मोहे सम्यक्त्व मिश्रवर्ज्जा
ः षड्विंशतिः आयुषिचतस्रः नाम्नि भेदांतरसंभवेऽपि सप्तषष्टिः गोत्रे द्वे अंतराये पंच सर्वमीलने विंशत्युत्तरंशतमित्येतच्च

प्राक् सविस्तरं कर्मविपाके सामान्येनैव संप्रति विंशत्युत्तरशतमध्यगतानामेव वक्ष्यमाणार्थोपयोगित्वेन प्रथमं कियत्
नां संग्रहं प्रथमं करोति १ जिण सुरविउव्वाहारदु देवाउ अ नरयसुहुमविगलतिगं एगिंदिथावरायव नपु मिच्छं हुंडछेवट्ठं
२ अणमज्झागिइ संघयण कुखगनियइत्थि दुहगथीणतिगं उज्जोअतिरिदुगतिरिनराउ नरउरलदुगरिसहं ३ आ० जि
ननाम १ सुरद्विकं सुरगति २ सुरानुपूर्वीरूपं ३ वैक्रियद्विकं वैक्रियशरीर ४ वैक्रियांगोपांगलक्षणं ५ आहारकद्विकमाहार
कशरीरं ६ तदंगोपांगं च ७ देवायुष्कं ८ नरकत्रिकं नरकगतिः ९ नरकानुपूर्वी १० नरकायुष्करूपं ११ सूक्ष्मत्रिकं सूक्ष्म १२
पर्याप्त १३ साधारणलक्षणं १४ विकलत्रिकं द्वि १५ त्रि १६ चतुरिंद्रियजातयः १७ एकेंद्रियजातिः १८ स्थावरनाम १९ आतपना
म २० नपुंसकवेदः २१ मिथ्यात्वं २२ हुंडसंस्थानं २३ सेवार्त्तसंहननं २४ अणत्ति अनंतानुबंधि क्रोध २५ मान २६ माया २७
लोभाः २८ मध्याकृतयो मध्यमसंस्थानानि न्यग्रोधपरिमंडलसादिवामनकुब्जेति ३२ मध्यमसंहननानि ऋषभनाराचं
नाराचमर्द्धनाराचं कीलिका चेति ३६ कुखगति अप्रशस्तविहायोगतिः ३७ नीचैर्गोत्रं ३८ स्त्रीवेदः ३९ दुर्भगत्रिकं दुर्भगदुःस्वरा
नादेयरूपं ४२ स्त्यानर्द्धित्रिकं निद्रानिद्रा प्रचलाप्रचला स्त्यानर्द्धिलक्षणं ४५ उद्योतनाम ४६ तिर्यग्द्विकं तिर्यग्गति तिर्य
गानुपूर्वीरूपं ४८ तिर्यगायुः ४९ नरायुः ५० नरद्विकं नरगतिनरानुपूर्वीलक्षणं ५२ औदारिकद्विकमौदारिकशरीरमौदा
रिकांगोपांगनाम च ५४ वज्रऋषभनाराचसंहननं ५५ मिति पंचपंचाशत्प्रकृतिसंग्रहः अथैतस्य प्रकृतिसंग्रहस्य यथास्था
नमुपयोगं दर्शयन्मार्गणास्थानानां प्रथमं गतिमार्गणास्थानमाश्रित्य बंधः प्रतिपाद्यते २ ३ ॥ सुरइगुणवीसवज्जं इगसउ ६२
ओहेण बंधहिं निरया तित्थविणा मिच्छि सयं सासणि नपुचउविणा छनुई ४ जिणसुरविउव्वाहारेइत्यादि गाथोक्ताः क्रमेण
सुरद्विकाद्येकोनविंशतिप्रकृतीर्वर्जयित्वा शेषमेकोत्तरशतमोघेन नारका बध्नंति अयमत्राभिप्रायः एता एकोनविंश

तिप्रकृतीर्बंधाधिकृतकर्मप्रकृतिविंशत्युत्तरशतमध्यान्मुक्त्वा शेषस्यैकोत्तरशतस्य नरकगतौ नानाजीवापेक्षया साम
स्त्येन बंधः सुरद्विकाद्येकोनविंशतिप्रकृतीनां तु तत्र भवप्रत्ययादेव नारकाणामबंधकत्वात् सामान्येन नरकगतौ बंधमभिधा
य संप्रति तस्यामेव मिथ्यादृष्ट्यादिगुणस्थानचतुष्टये विशिष्टं तं दर्शयति तित्थविणेत्यादि प्रागुक्तमेकोत्तरशतं तीर्थकरना
म विना मिथ्यादृष्टिगुणस्थानके शतं भवति एतच्छतं नपुंसकवेदमिथ्यात्वहुंडसंस्थानसेवार्त्तसंहननप्रकृतिचतुष्कं विना
सासादनगुणस्थानके षण्णवतिर्नारकाणां बंधे ४ विणअणछवीसमीसे बिसयरिसम्मंमि जिणनराउजुआ इअ रयण
इसु भंगो पंकाइसु तित्थयरहीणो ५ प्रागुक्ता षण्णवतिरनंतानुबंध्यादिषड्विंशतिप्रकृतीर्विना मिश्रगुणस्थाने सप्ततिः सैव
जिननाम नरायुष्कयुता सम्यग्दृष्टिगुणस्थानके द्विसप्ततिः इत्येवं बंधमाश्रित्य भंगो रत्नादिषु रत्नप्रभाशर्कराप्रभावालुकाभि
धान प्रथम नरकपृथिवीत्रये द्रष्टव्यः पंकप्रभादिषु पुनरेष एव भंगस्तीर्थकरनामहीनो विज्ञेयः अयमर्थः पंकप्रभाधूमप्रभा
तमःप्रभासु सम्यक्त्वसद्भावेपि क्षेत्रमाहात्म्येन तथाविधाध्यवसायाभावात्तीर्थकरनामबंधो नारकाणां नास्तीति ततस्तत्र
सामान्येन शतं मिथ्यादृष्टौ च शतं सासादनानां षण्णवतिः मिश्राणां सप्ततिः अविरतसम्यग्दृष्टीनामेकसप्ततिः इह सामान्यप
दे अविरतसम्यग्दृष्टिगुणस्थाने च रत्नप्रभादिभंगस्तीर्थकरनाम्ना हीन उक्तो मिथ्यादृष्ट्यादित्रिषु गुणस्थानेषु पुनस्तस्य भं
गे वापनीतत्वाभावादवस्थ एव ५ अजिणमणुआउ ओहे सत्तमिए नरदुगुच्चविणु मिच्छे इगनवई सासाणे तिरिआउ नपुंसचउ
वज्जं ६ व्याख्या रत्नप्रभादिनरकत्रयसामान्यबंधाधिकृतैकोत्तरशतमध्यात् जिननाममनुजायुषी मुक्त्वा शेषा नवनवति
रोघबंधे सप्तमपृथ्वीनारकाणां भवति सैव नवनवतिः नरगति नरानुपूर्वीरूप नरद्विकोच्चैर्गोत्रे विना षण्णवतिर्मिथ्यादृष्टिगु
णस्थाने भवति सैव षण्णवतिः तिर्यगायुर्नपुंसकवेदमिथ्यात्वहुंडसंस्थानसेवार्त्तसंहननवर्जिताः एकनवतिः सासादने स

सम्यक्त्वं नारकाणां ६ अणचउवीसविरहिआ सनरदुगुच्चा य सयरि मीसदुगे सतरससउ ओहि मिच्छे पज्जतिरिआ विणु जिणा-
हारं ७ व्या० प्रागुक्ता एकनवतिरनंतानुबंध्यादि चतुर्विंशतिप्रकृतिभिर्विरहिता नरद्विकोच्चैर्गोत्राभ्यां च सहिता
सप्ततिर्भवति सा च मीसदुगे त्ति मिश्राविरतगुणस्थानद्वये दृष्टव्या इह सम्यग् नरायुस्तावन्न बध्यत एव तद्बंधसा-
वेऽपि च मिश्रगुणस्थानकेऽविरतगुणस्थानके च नरद्विकं बध्यते अयमर्थो नरद्विकस्य नरायुषा सह नावश्यं प्र-
तिबंधो यदुत यत्रैवायुर्बध्यते तत्रैवास्यानुपूर्वीद्वयमपि तस्यान्यदापि बंधात् मिथ्यात्वसासादनयोस्तु कलुषा-
ध्यवसायत्वेन नरद्विकं न बध्यते एवं नरकगतौ बंधस्वामित्वं प्रतिपाद्याथ तिर्यग्गतौ तदाह सतरससउ इत्यादि वि-
शत्युत्तरशतं जिननामआहारकद्विकं च विना शेषं सप्तदशोत्तरशतमोघे मिथ्यादृष्टिगुणस्थाने च पर्याप्तास्तिर्यंचो
बध्नंति अत्रौघे तिरश्चां सत्यपि सम्यक्त्वे भवप्रत्ययादेव तथाविधाध्यवसायाभावात्तीर्थकरनाम्नः संयमासंयम १
त्वाच्चाहारकद्विकस्य च बंधो नास्तीति हृदयं ७ विणु नरयसोल सासणि सुराउ अण एगतीस विणु मीसे सम्मु
राउसयरि संमे बीअकसाए विणा देसे ८ व्या० प्रागुक्तं सप्तदशोत्तरशतं नरकत्रिकादिषोडशप्रकृतिभिर्विन-
२ एकोत्तरशतं सासादने पर्याप्ततिरश्चो एतदेवैकोत्तरशतं सुरायुरनंतानुबंध्याद्येकत्रिंशत्प्रकृतिभिश्च विना एके
२नसप्ततिः सा मिश्रगुणस्थाने बध्यते अयं भावार्थः सम्मामिच्छद्दिट्ठी आउगबंधं पि न करेइ इति वचनात् अत्र सुरन-
रायुषोरबंधः अनंतानुबंध्यादयश्च पंचविंशतिप्रकृतयः सासादन एव व्यवच्छिन्नबंधास्तथा मनुष्यास्तिर्यंचश्च ६३
मिश्रगुणस्थाने अविरतसम्यग्दृष्टिवद् देवार्हमेव बध्नंति तेन नरद्विकोदारिकद्विकवज्रर्षभनाराचानामपि बंधा-
भावः एषैवैकोनसप्ततिः सुरायुषा सहिता सप्ततिः सम्यक्त्वे अविरतिगुणस्थानके भवति सा सप्ततिर्द्वितीयकषा-

यैरप्रत्याख्यानक्रोधमानमायालोभैर्विना षट्षष्टिर्देशविरतगुणस्थाने बध्यते अथ तिर्यग्गतिबंधाधिकार एवायं
प्रसंगाद्वा धर्ममनुष्यगतावपि बंधं दर्शयति ८ इय चउगुणेसु वि नरा उघतः १२० ११७ १०१ ६९ परमजया सजिण ओह
देसाई जिणइक्कारसहीणं नवसउ अपज्जतिरिअनरा ९ व्या० यथा पर्याप्ततिरश्चो मिथ्यादृष्ट्यादिषु चतुर्षु गुण-
स्थानकेषु सप्तदशोत्तरशतादिको बंध उक्त इत्येवं पर्याप्तनरा अपि चतुर्षु मिथ्यादृष्टिसासादनमिश्राविरतिगुणस्था- १
नेषु सप्तदशोत्तरशतादिबंधस्वामिनो मंतव्याः परमयं ता अविरतसम्यग्दृष्टयः पर्याप्तनराः सजिण त्ति अविरत
सम्यग्दृष्टिपर्याप्ततिर्यग्बंधयोग्यसप्ततिर्जिननामसहिता एकसप्ततिस्तां बध्नंति जिननामकर्मणोऽपि बंधकत्वा-
त्तेषां उज्ज देसाई इति देशविरतादिगुणस्थानकेषु गुणस्थानिकाऽनाश्रयणे च पर्याप्तनराणां पुनरोघः सामान्यो बंधोऽ-
वसेयः स च कर्मस्तवोक्त एव यतः कर्मस्तवे बंधे सामान्यतो गुणस्थानकेषु बंधः प्रतिपादितो न पुनः किंचिन्गत्यादि
मार्गणास्थानमाश्रित्य स चात्र बहुषु स्थानकेषूपयोगीति मूलतोऽपि दर्श्यते अभिनवकम्मग्गहणं बंधो ओहेण
तहिं वीससयं तित्थयराहारदुग वज्जं मिच्छंमि सतरसयं १ नरयतिगजाइथावरचउहुंडायवछिवट्ठनपु-
मिच्छं सोलंतो इगहियसय सासणि तिरिथीणदुहगतिगं २ अणमज्झागिइसंघयणचउनिउज्जोयकुखग-
इत्थि त्ति पणवीसंतो मीसे चउसयरि दुआउअअबंधा ३ सम्मे सगसयरि जिणाउ बंधि वइर नरतियबियकसाया उर-
लदुगंतो देसे सत्तट्ठी तियकसायंतो ४ तेवट्ठी पमत्ते सोगअरइअथिरदुगअजसअस्सायं वुच्छिज्ज छच्च सत्त व नेइ
सुराउं जया निट्ठं ५ गुणसट्ठि अप्पमत्ते सुराउ बंधं तु जइ इहागच्छे अन्नह अट्ठावन्ना जं आहारगदुगं बंधे ६ अडव-
न्न अपुव्वाइमि निद्ददुगंतो छपन्न पणभागे सुरदुग पणिंदि सुखगइ तसनव उरल विणु तणुवंगा ७ समचउरनिमि-

ण जिणवज्जं अगुरुलहु जाव तणुबलं सितीसं तो चरमे छवीस बंधो हास रई कुच्छ भय भेउ ८ अनियट्टि भागपणगे
इगेगहीणो ऽडवीस विहबंधो पुमसंजलणचउण्हं कमेण छेउ सतर सुहुमे ९ चउदंसणुच्च जसनाण विग्घ दसगं ति सोल
जि सच्छेउ तिसु सायबंध छेउ सजोगि बंधंतुणंतो य १० इत्येतासां दशानामपि गाथानां व्याख्यानं कर्मस्तवटीकातो बोद्धव्यं
इत्योघबंधः इह कर्मस्तवोक्तगुणस्थानकबंधान्नरतिरश्चां मिश्राविरतगुणस्थानकयोरयं विशेषः कर्मस्त
वे मिश्रगुणस्थानके चतुःसप्ततिरविरतसम्यग्दृष्टिगुणस्थानके सप्तसप्ततिः तिरश्चां पुनर्मनुष्यद्विकौदारिकद्विक
वज्रऋषभनाराचसंहननरूपप्रकृतिपंचकस्य बंधाभावान्मिश्रगुणस्थानके एकोनसप्ततिरविरतसम्यग्दृष्टौ
सप्ततिः केवलं नराणां तु मिश्रे एकोनसप्ततिरविरतसम्यग्दृष्टौ तीर्थकरनामसुरायुषोरपि एकसप्ततिः तस्यां च एक
सप्ततौ यदि मनुष्यद्विकौदारिकद्विकवज्रऋषभनाराचसंहननपंचकं नरायुष्कं च क्षिप्यते तदा कर्मस्तवोक्ता स
प्तसप्ततिर्भवत्यविरतःगुणस्थानके तथा कर्मस्तवे देशविरतगुणस्थानके या सप्तषष्टिरुक्ता सा तिरश्चां जिनना
मरहिता षट्षष्टिर्देशविरतगुणस्थानके भवति प्रमत्तादीनि गुणस्थानानि तिरश्चां न संभवंति नराणां तु गुणस्थान
कसंभवेन देशविरतादिगुणस्थानकेषु कर्मस्तवोक्त एव सर्वोऽप्यन्यूनाधिक ओघबंधो वाच्यः ततश्च पर्याप्तनराणां
सामान्येन बंधो विंशत्युत्तरशतं प्रकृतीनां प्राप्यते १२० तेषामेव मिथ्यादृशां सप्तदशोत्तरशतं ११७ सासादनानामेको
त्तरशतं १०१ मिश्राणामेकोनसप्ततिः ६९ अविरतसम्यग्दृष्टीनामेकसप्ततिः ७१ देशविरतानां सप्तषष्टिः ६७ प्रमत्ता ६४
नां त्रिषष्टिः ६३ अप्रमत्तानामेकोनषष्टिरष्टपंचाशद्वा ५९ ५८ निवृत्तिबादराणां प्रथमभागेऽष्टपंचाशत् ५८ भाग
पंचके षट्पंचाशत् ५६ सप्तमे भागे षड्विंशतिः २६ अनिवृत्तिबादराणामाद्ये भागे द्वाविंशतिः २२ द्वितीये एकविंश

॥

तिः २१ तृतीये विंशतिः २० चतुर्थे एकोनविंशतिः १९ पंचमे अष्टादश १८ सूक्ष्मसंपरायाणां सप्तदश १७ उपशांतमोह
क्षीणमोहसयोगिनामेका सातलक्षणा प्रकृतिर्बंधे प्राप्यते अयोगिनां तु बंधाभावः एवमन्यत्राप्योघबंधः कर्मस्तवानुसा
रेण भावनीयः उक्तस्तिर्यग्नराणां पर्याप्तानां बंधोऽथ तेषामेवापर्याप्तानां तमाह जिण इक्कारस हीणं मिच्छादि यदेव
नराणामोघबंधे विंशत्युत्तरशतं तदेव जिननामाद्येकादशप्रकृतिहीनं नवोत्तरशतमपर्याप्ततिर्यग्नरा ओघतो
मिथ्यात्वे च बध्नंति यद्यपि करणपर्याप्तो देवो मनुष्यो वा जिननामकर्म सम्यक्त्वप्रत्ययेन बध्नाति तथापीह नराणां
लब्ध्या अपर्याप्तत्वेन विवक्षणान्न जिननामबंधः तिर्यग्गतौ मनुष्यगतौ च बंधस्वामित्वमुक्तं संप्रति देवगतिमधि
कृत्याह ९ निरयव्व सुरा नवरं ओहे मिच्छे इगिंदितिगसहिया कप्पदुगे वि य एवं जिणहीणो जोइभवणव
णे १० व्या० सुरा अपि नारकवदोघतो विशेषतश्च तत्र बंधस्वामिनो वक्तव्या नवरमयं विशेषः ओघे मिथ्यात्वगु
णस्थानके च बंधमाश्रित्य सुरा एकेंद्रियादित्रिकसहिता द्रष्टव्या इत्ययमर्थः यो नारकाणामेकोत्तरशतरूप
ओघबंधः स एकेंद्रियजातिः स्थावरनामातपनामप्रकृतित्रयसहितः सुराणां सामान्यतो बंधश्चतुरुत्तरशतं १०४ त
देव मिथ्यात्वे जिननामरहितं त्र्युत्तरशतं १०३ एतदेवैकेंद्रियजातिस्थावरातपनपुंसकवेदमिथ्यात्वहुंडसेवार्त्तरू
पप्रकृतिसप्तकहीनं सासादने षण्णवतिः ९६ षण्णवतिरेवानंतानुबंध्यादिषड्विंशतिप्रकृतिरहिता मिश्रे सप्ततिः ७०
सैव जिननामनरायुष्कयुता द्विसप्ततिस्त्वविरतसम्यग्दृष्टयो देवा बध्नंतीति सामान्यदेवगतिबंधः सांप्रतं देववि
शेषनामोच्चारणपूर्वकमाह कप्पदुगे इत्यादि कल्पद्विकेऽपि सौधर्मेशानाख्यदेवलोकद्वयेऽप्येवं सामान्यदेवबंध
ग्र० वद्बंधो द्रष्टव्यः तथाहि सामान्येन चतुरुत्तरशतं १०४ मिथ्यादृशां त्र्युत्तरशतं १०३ सासादनानां षण्णवतिः ९६ मिश्राणां सप्ततिः

७० अविरतानां द्विसप्ततिः ७२ देवौघो जिननामकर्मादीनोद्योतिक लवनपतिव्यंतरदेवेषु तद्देवीषु च विज्ञेयो जिन
कर्मसत्ताकस्य तेषूत्पादाभावेन तत्र तद्बंधासंभवात् ततः सामान्यतस्त्र्यधिकशतं १०३ मिथ्यात्वेनाऽपि त्र्यधिकशतं १०३
सासादने षण्णवतिः ९६ मिश्रे सप्ततिः ७० अविरते एकसप्ततिः ७१ ७० बः रयणव्व सणंकुमाराइ आणयाई उज्जो
अचउरहिआ अपज्जतितिरिअव्व नवसय मिगिंदिपुढविजलतरुविगले ११ व्या० सनत्कुमाराद्याः सहस्रारांता
देवा रत्नप्रभादिपृथ्वीत्रयनारकवत् बंधमाश्रित्य द्रष्टव्याः तद्यथा सामान्येनैकाधिकशतं १०१ मिथ्यादृष्टौ शतं
१०० सासादनानां षण्णवतिः ९६ मिश्राणां सप्ततिः ७० अविरतानां द्विसप्ततिः ७२ आनताद्या ग्रैवेयकनवकांता देवा
अपि उद्योतनाम तिर्यग्गति तिर्यगानुपूर्वी तिर्यगायुः प्रकृतिचतुष्करहिता रत्नप्रभादिनारकवद्द्रष्टव्यास्ततः सामा
न्यतः सप्तनवतिः ९७ ते बध्नंति मिथ्यादृष्टयः षण्णवतिः ९६ सासादने द्विनवतिः ९२ मिश्रेऽविरते चोद्योतादिचतुष्क
स्य प्रागेवापनीतत्वात् संपूर्ण एव रत्नप्रभादितुल्यास्ततो मिश्राः सप्ततिः ७० अविरता द्विसप्ततिं बध्नंति ७२ मिथ्यात्वादिगु
णस्थानत्रये सासादनासंवादानुत्तरविमानादेवा एतामेवाविरतगुणस्थानकसत्कां द्विसप्ततिं ७२ बध्नंतीत्यनुक्तमपि ज्ञेयं इत्युक्तं
देवगतौ बंधस्वामित्वं तदुक्तौ चागतिबंधमार्गणा समाप्ता बः संप्रतमिंद्रियेषु कायेषु च वक्तव्यतावसरस्तत्र अपज्जत्ताइ अप
र्याप्ततिर्यग्वत् नवोत्तरशतमेकेंद्रियपृथ्वीजलेतरुविकलेषु द्रष्टव्यं अयमर्थो विंशत्युत्तरशतमध्याज्जिननामाद्येका
दशप्रकृतीर्मुक्त्वा शेषं नवोत्तरशतमेकेंद्रिया विकलेंद्रियाः पृथ्वीजलवनस्पतिकायाश्च सामान्यपदे नो मिथ्यात्वाश्च ६५
बध्नंति अथैतेषामेव सासादनगुणस्थाने बंधमाह ११ बः छनवइसासणि विणुसुहुमतेरकेइ पुणबिंति चउनवइं
तिरिअनराऊहिं विणा तणुपज्जतिं नतेजंति १२ मा० षायुक्तं नवोत्तरशतं सूक्ष्मत्रिकादिप्रकृतित्रयोदशकं मिथ्य

त्वे एव व्यवच्छिन्नबंधमिति कृत्वा तद्विना षण्णवतिः सासादने एकेंद्रियविकलेंद्रियपृथ्वीजलवनस्पतिकायानां भवति के
चित्तु नराचार्याः ब्रुवते चतुर्नवतिं तिर्यग्नरायुष्कास्यां विना यतस्ते एकेंद्रियविकलेंद्रियादयः सासादनाः संतस्तनुपर्याप्ति
पर्याप्तास्ते तिर्यग्नरायुरबंधकाः अयमत्राशयः तिर्यग्नरायुषोस्तनुपर्याप्तिपर्याप्तैरेव बध्यमानत्वात् पूर्वं मतेन शरीरपर्या
प्त्यनंतरकालमपि सासादनभावस्पष्टत्वादायुर्बंधोऽस्ति एतद्वत्र प्रथममेव तन्निवृत्ते नेष्ट इति षण्णवते स्तिर्यग्नरायुषी वि
नामतांतरेण चतुर्नवतिः उक्ता एकेंद्रियानाबंधोऽथ पंचेंद्रियाणां त्रसकायकानां चैतमाह १२ ओहुपणिंदितसेगइ
तसे जिणिक्कारनरतिगुच्चविणा मणवयजोगे ओहो उरले नरभंगु तम्मिस्से १३ व्या० ओघो विंशत्युत्तरशतसुत्तरशतादि
लक्षणः कर्मस्तवोक्तः पंचेंद्रियेषु त्रसकायिकेषु चावगंतव्यः तद्यथा सामान्यतः १२० मि ११७ सा १०१ मि ७४ अवि
रते ७७ देशे ६७ प्रमत्ते ६३ अप्रमत्ते ५९ निवृत्तिबादरे प्रथमे भागे ५८ भाग ५ चके ५६ सप्तमभागे २६ अनिवृत्तिबादरे प्रा
थमे भागे २२ द्वितीये २१ तृतीये २० चतुर्थे १९ पंचमे १८ सूक्ष्मे १७ शेषगुणस्थानत्रये सातस्यैकस्य बंधः १ अयोगि
न बंधकाः तावत् गतित्रसास्तेजोवायुकायास्तेषु जिननामाद्येकादशप्रकृतिर्नरत्रिकमुच्चैर्गोत्रं च विना विंशत्यु
त्तरशतं शेषं पंचोत्तरशतं बंधेत्वसंते सासादनादितावत्स्वेनेषां संभवति यतउक्तं नजंति किंचित्तस्य इत्युक्तमस्मा
त्सूक्ष्मत्रसास्ते तेजोवायुकायजीवाः इति एवमुक्त इंद्रियेषु कायेषु च बंधः संप्रति योगेषु तं प्रतिपादयन्नाह मणव
इ योगेत्यादि इह च कालत्वात्तत्र तत्र सत्यादिमनोयोगचतुष्कं तत्पूर्वके सत्यादिवाग्योगचतुष्केच ओघबंधो विंशत्युत्तर
शतादिलक्षणः कर्मस्तवोक्तो ज्ञेयः तत्र सत्यादिस्वरूपं त्विदं सत्यं यथा अस्ति जीवः सदसद्रूपो देहमात्रव्यापीत्यादि
दरूपतया यथावस्थितवस्तु तत्त्वचिंतनपरं सत्यं विपरीतं त्वसत्यं मिश्रस्वभावसत्यासत्यं यथा धवखदिरपला

ज्ञादिनि श्रेणुबकुष्टशोकश्छेषशोकवनमेवेदमिति विकल्पनापरतयायन्न सत्यं वापि मृषा तदसत्या मृषाऽस्य
विप्रतिपत्तौ सत्यां यद्वस्तुप्रतिष्ठाशया सर्वज्ञमतानुसारेण विकल्प्यते यथाऽस्ति जीवः सदसद्रूप इत्यादि तत्किल सत्ये
परिभाषितं यस्तु न विप्रतिपत्तौ सत्यां वस्तुप्रतिष्ठाशया सर्वज्ञमतोत्तीर्णं विकल्प्यते यथा अस्ति जीव एकांतनित्यो
वेत्यादि तदसत्यं यत्पुनर्वस्तुप्रतिष्ठाशामंतरेण स्वरूपमात्रपर्यालोचनपरं यथा देवदत्त घटमानय गां देहि म
ह्यमित्यादि चिंतनपरं तदसत्यामृषा इदं हि स्वरूपमात्रपर्यालोचनपरत्वान्न यथोक्तलक्षणं सत्यं स्रवति नापि मृषे
ति इदमपि व्यवहारनयमतेन द्रष्टव्यं निश्चयनयमतेन त्वविप्रतारणादिबुद्धिपूर्वकमसत्येंतर्भवत्यथाऽसत्ये
तरालवति मनोवाग्योगपूर्वकेऽौदारिककाययोगे नरत्नांगः इयत्तगुणेषु विनरायुत्यादिनाप्याशुरुक्तस्वरूपो य
था ओघे १२० मिथ्यात्वे ११७ सासादने १०१ मिश्रे ७४ अविरते ७७ इत्यादि मनोरहितवाग्योगे विकलेंद्रियत्वेऽगः के
वलकाययोगे त्वेकेंद्रियत्वेऽगः तन्मिस्सेति तन्मिश्रे औदारिकमिश्रयोगे संप्रति बंधकथ्यते ११ आहारछगवि
णोहे चउदससउ मिच्छि जिणपणगहीणं सासणि चउनवइ विणा नरतिरिआउ सुहुमतेर १४ व्याख्या विंशत्यु
त्तरशतमाहारकादिप्रकृतिषट्कं विना शेषं चतुर्दशाधिकशतमोघे बंधे प्राप्यतेऽयं तावार्थः औदारिकमिश्रं कार्मणे
न सह तच्चापर्याप्तावस्थायां केवलिसमुद्घातावस्थायां वा तत्र निर्देशादि पूर्वत्वादनंतरमागतो जीवः प्रथमसम
ये कार्मणेनैव केवलेनाहारयति ततः परमौदारिकांस्याप्यारब्धत्वादौदारिकेण कार्मणमिश्रेण यावच्छरीरस्य ६६
निष्पत्तिः केवलिसमुद्घातावस्थायां द्वितीयषष्ठसप्तमसमयेषु कार्मणेन मिश्रमौदारिकमिति अपर्याप्तावस्थायां १
च नाहारकादिषट्कं बध्यत इति तन्निषेधः केवलिसमुद्घातावस्थायां पुनरेकस्यैव सातस्यैव बंधोऽभिधास्यते एतद्

वचतुर्दशोत्तरशतमौदारिकमिश्रकाययोगी मिथ्यात्वे जिननामादिप्रकृतिपंचकरहितं शेषं नवोत्तरशतं बध्नाति
स एव सासादने चतुर्नवतिं बध्नाति नवोत्तरशतमध्यान्मुक्तानरतिर्यगायुषी सूक्ष्मत्रिकादित्रयोदशप्रकृती नरतिर्यगायु
षोरपर्याप्तत्वेन सासादने बंधाभावात् सूक्ष्मत्रिकादित्रयोदशकस्य तु मिथ्यात्व एव व्यवच्छिन्नबंधत्वाच्च १४ अः अणचउ
वीसाइ विणा जिणपणजुअसंमि जोगिणोसायं विणु तिरिनराउ कम्मेवि एवमाहारदुगि ओहो १५ व्याख्या प्रागुक्ता चउ
र्नवति रनंतानुबंध्यादि चतुर्विंशप्रकृति विना जिननामादिप्रकृतिपंचकयुता च पंचसप्ततिस्तामौदारिकमिश्रकाययोग
ऽसम्यक्के बध्नाति तथा सयोगिन औदारिकमिश्रस्थाः केवलिसमुद्घाते द्वितीयषष्ठसप्तमसमयेषु सातमेवैकं बध्नंतीत्येवं
गुणस्थानकचतुष्क एवौदारिकमिश्रयोगो लभ्यते नान्यत्र अथ कार्मणयोगादिषु बंधः प्रतिपाद्यते विणु तिरीत्यादि य
थौदारिकमिश्रे बंधविधिरोघतो विशेषतश्चोक्त एव कार्मणयोगेऽपि तिर्यग्नरायुषी विना वाच्यः कार्मणकाययोगे तिर्यग्नरा
युषोर्बंधाभावात् कार्मणकाययोगो ह्यपांतरालगतावुत्पत्तिप्रथमसमये च जीवस्य मिथ्यात्वसासादनाविरतिगुण-
स्थानकत्रये पि तस्य लभ्यते उक्तं च मिच्छे सासाणे वा अविरयसंमंमि अहव गहियंमि जंतु जिया परलोए सेसिक्कारसगुणे
मुत्तुं तथा सयोगिनः केवलिसमुद्घाते तृतीयचतुर्थपंचमसमयेषु चेति गुणस्थानकचतुष्टय एव कार्मणकाययोगो ना
न्यत्र ततो विंशत्युत्तरशतमध्यादाहारकषट्कतिर्यग्नरायुः प्रकृतीर्मुक्त्वा द्वादशोत्तरशतस्य सामान्येन कार्मणकाय
योगे बंधस्तदेव द्वादशोत्तरशतं जिनादिपंचकं विना शेषं सप्तोत्तरशतं कार्मणकाययोगे मिथ्यादृशो बध्नंति तदेव सप्तोत्त
रशतं सूक्ष्मादित्रयोदशप्रकृतिर्मुक्त्वा शेषां चतुर्नवतिं कार्मणयोगे सासादना बध्नंति चतुर्नवतिरेवानंतानुबंध्यादिचतु
र्विंशतिप्रकृतीर्विना जिननामादिप्रकृतिपंचकसहिता च पंचसप्ततिस्तं कार्मणयोगेऽविरता बध्नंति सयोगिनस्तु कार्म

ण काययोगे सातामवैकं बध्नंति तथा आहारककाययोग चतुर्दशपूर्वविद् आहारकमिश्रकाययोगश्च तस्यैव
आहारकशरीरस्य प्रारंभसमये परित्यागसमये च औदारिकेण सह दृष्टव्यः ततआहारकद्विके आहारकशरीरतन्मि
श्रलक्षणे योगद्वये ओघः कर्मस्तवोक्तप्रमत्तगुणस्थानवर्त्ती त्रिषष्टिप्रकृतिरूपबंध एतत्काययोगद्वयं हि लब्धकजीव
नाप्रमत्तस्यैव नत्वप्रमत्तस्य १५ सुरओहो वेउव्वे तिरिअनराउरहिउत्तं मिस्से वेअतिगाइम बिअतिअकसाय
नवदुचउपंचगुणा १६ व्या० सुरौघः सामान्यदेवबंधो वैक्रियकाययोगे द्रष्टव्यस्तद्यथा सामान्येन चतुरधिकशतं १०४
मिथ्यात्वे त्र्युत्तरशतं १०३ सासादने षण्णवति ९६ मिश्रे सप्तति ७० अविरते द्विसप्तति ७२ तथा तन्मिश्रे वैक्रियमिश्रे स एव
स्तिर्यग्नरायुष्करहितो वाच्य इह देवनारका निजायुः षण्मासावशेषा एवायुर्बध्नंति अतो वैक्रियमिश्रयोगे उत्पत्ति
प्रथमसमयादनंतरमपर्याप्तावस्थायां संभवतीति आयुर्बंधाभावः तथा चात्रौघे द्व्युत्तरशतं १०२ मिथ्यात्वे एकोत्तरशतं
१०१ सासादने चतुर्नवतिः ९४ अविरते एकसप्ततिः ७१ वैक्रियमिश्रयोगे मिश्रता वास्यात्र कार्मणकाययोगेनैव सा
द्धमंतव्या अयमपि च मिथ्यात्वसासादनअविरतगुणस्थानकत्रयस्यैव लभ्यते नान्यत्र यद्यपि देशविरतस्यांऽबडादेः
प्रमत्तस्य च विष्णुकुमारादेवैक्रियं कुर्वतो वैक्रियमिश्रे वैक्रियसंभवः श्रूयते परं स्वल्पावस्थस्य वैक्रिययोगस्यात्वग्र
हीतत्वाद्यद्वा स्वल्पत्वादन्यतो वा कुतोपि हेतोः पूर्वाचार्यैः स नोक्तः एवं योगेषु बंधस्वामित्वमुक्तमथ वेदादिषु तदभि
धित्सुः प्रथमं गुणस्थानकानि तेषामाह वेदतिगे सादि वेदत्रिके स्त्रीवेदपुंवेदनपुंसकवेदरूपेन नवनवसंख्याकानि संजल ६७
णत्यादि अस्यैतन्गाथाखंडस्य पढमेतिपदस्यात्रापि संबंधात् प्रथमानि मिथ्यादीनि अनिवृत्तिबादरांतानि गुणस्था
नकानि संभवंति ततः परं वेदानामभावात् एतेषु यः कर्मस्तवोक्तः सामान्यबंधः स द्रष्टव्यस्तद्यथा सामान्यतो नानाजीव

पेक्षया १२० मि ११७ सा १०१ मिश्रे ७४ अविरते ७७ देशे ६७ प्र ६३ अप्र ५९ ५८ नि ५८ २६ अनि २२ एवमन्यत्रापि गुणस्था
नकेषु यथासंभवं कर्मस्तवोक्तो बंधो वाच्यः कषायद्वारे आद्येऽनंतानुबंधिक्रोधमानमायालोभरूपे कषायचतुष्के द्वे
प्रथमे मिथ्यात्वसासादनाख्ये गुणस्थानके तत्र तीर्थंकरबंधस्य सम्यक्त्वप्रत्ययत्वादाहारकद्विकबंधस्य च संयमहेतुत्वा
दनंतानुबंधिषु तदभावात् सामान्येन ११७ मिथ्यात्वे ११७ सासादने १०१ द्वितीयेऽप्रत्याख्यानाख्ये कषायचतुष्के चत्वारि
प्रथमानि मिथ्यात्वसासादनमिश्राविरतनामकानि गुणस्थानकानि तत्राहारकद्विकबंधाभावेन सामान्येन ११८ मि ११७
सा १०१ मि ७४ अवि ७७ तृतीये प्रत्याख्यानावरणाख्ये कषायचतुष्के पंच आद्यानि मिथ्यात्वादीनि देशविरतांतानि गुणः
स्थानकानि देशविरते सप्तषष्टिः शेषाणि तथैव १६ ॥ संजलणतिगे नव दस लोहे चउ अजइ दुति अनाणतिगे बारस
अचक्खुचक्खुसु पढमा अहखाइ चरमचउ १७ व्या० संज्वलनत्रिके संज्वलनक्रोधमानमायारूपे नवाद्यानि गुण
स्थानकानि तत्र सामान्यबंधोऽनिवृत्तिबादरं यावद्वेदत्रिकन्यायेन विंशत्युत्तरशतादिको बंधोऽनिवृत्तिबादरे तु प्रथम
भागे २२ द्वितीये पुवेदरहिता २१ तृतीये संज्वलनक्रोधरहिता २० चतुर्थे संज्वलनमानरहिता १९ पंचमे संज्वलन
मायारहिता १८ संज्वलनलोभस्य तु सूक्ष्मसंपरायेऽपि सद्भावात्तत्र दश प्रथमानि गुणस्थानकानि तत्र नवस्वेवं दशमे
तु सूक्ष्मसंपराये सप्तदश प्रकृतयः संयमद्वारे अयतेऽसंयते चत्वार्याद्यानि गुणस्थानानि तत्र सामान्यतोऽविरत
सम्यक्दृष्टेरपि संगृहीतत्वाज्जिननामक्षेपात्सप्तदशोत्तरशतं जातं अष्टादशोत्तरशतं ११८ मिथ्यात्वे ११७ सा १०१ मि ७४
+मति+ अवि ७० ज्ञानद्वारे अज्ञानश्रुताज्ञानविभंगरूपे द्वे मिथ्यात्वसासादने त्रीणि वा गुणस्थानकानि मिश्रेण सह अयमाश
यो मिश्रे ज्ञानांशोऽज्ञानांशश्चास्ति तत्र यदा ज्ञानांशप्राधान्यविवक्षा तदाऽज्ञानत्रिके गुणस्थानकद्वयमेव अज्ञानांश

प्राधान्य विवक्षायां तु तृतीयं मिश्रमपि तत्रौघे ११७ मिथ्या ११७ सासादने १०१ मिश्रे ७४ दर्शनद्वारे चक्षुरचक्षुर्दर्शनयो १:
श्चप्रमानि द्वादश गुणस्थानानि परतस्तु चक्षुरचक्षुरूपयोः सतोरप्यनुपयोगित्वेनाऽव्यापारात् तत्रौघे १२० मिथ्यात्वे ११७
इत्यादियावत् क्षीणमोहे सातबंधः १ यथाख्याते चरमगुणस्थानकचतुष्कं तत्र सामान्यतः १ उपशान्ते १ क्षीणमोहे १ सयो
१ अयोगि ० मणनाणि सग जयाइ समइय छेय चउ दुन्नि परिहारे केवलदुगि दो चरमा जयाइ नव मइ सुओहि दुगे १८
व्या० मनःपर्यायज्ञाने सप्त यतादीनि प्रमत्तसंयतादीनि क्षीणमोहांतानि तत्र सामान्यत आहारकद्विकसहिता त्रिष
ष्टिर्जाता पंचषष्टिः ६५ प्रमत्ते ६३ इत्यादियावत् क्षीणमोहे १ सामायिकच्छेदोपस्थापनेषु चत्वारि यतादीनि गुणस्थानानि त
त्र सामान्यतः ६५ प्रमत्ते त्रिषष्टिरित्यादि प्राग्वत् सूक्ष्मसंपरायगुणस्थानकादौ तु सूक्ष्मसंपरायादिषु चारित्रभावात् तथा द्वे
गुणस्थानके प्रमत्ताप्रमत्तरूपे परिहारविशुद्धिकचारित्रे नोपशाणि तस्मिंश्चारित्रे वर्तमानस्य श्रेण्यारोहणप्रतिषेधात् तत्र
सामान्यतः ६५ प्रमत्ते ६३ अप्रमत्ते ५९ केवलद्विके केवलज्ञानकेवलदर्शनरूपे द्वे चरिमे अंतिमे सयोगकेवल्ययोगिके
वलाख्ये गुणस्थानके भवतः तत्रौघे एकस्य सातस्य बंधः सयोगिनि च अयोगिनि शून्यं तथा मतिश्रुतयोरवधिद्विके
चावधिज्ञानावधिदर्शनलक्षणेऽयतादीनि अविरतसम्यग्दृष्ट्यादीनि क्षीणमोहपर्यवसानानि नवगुणस्थानकानि
भवंति सयोग्यादौ केवल्योरसत्त्वान्मिथ्यादेरलाभात् तत्रौघतोऽप्रमत्तादेर्मत्यादिमत आहारकद्विकस्यापि बंधसंभवाद्दे १
नाशीतिः ७९ विशेषचिंतायामविरतादिगुणस्थानकेषु कर्मस्तवोक्तः सप्तसप्तत्यादिमितो बंधो द्रष्टव्यः १८ अड उवसमि च ६८
उवेयगि खइए इक्कार मिच्छतिग देसे सुहुमि सठाणं तेरस आहारगि नियनियगुणोहो १९ व्या० इहायतादीनि प
दं सर्वत्र योज्यते ततोऽयतादीनि उपशांतमोहांतान्यष्टौ गुणस्थानान्योपशमिकसम्यक्त्वे भवंति तत्र सामान्यत उपश
मिकसम्यक्त्वे वर्तमानानां देवमनुष्यायुषो बंधाभावात् ७७ प्रमत्ते ६३ अप्रमत्ते ५८ इत्यादियावदुपशांते १ वेदके क्षायोपशमि
केऽपर्यायेऽयतादीन्यप्रमत्तांतानि चत्वारि गुणस्थानकानि तत्रौघे ७९ अविरते ७७ देशे ६७ प्रमत्ते ६३ अप्रमत्ते ५९ ५८ अ
तः परमुपशमश्रेण्यां वोपशमिकं क्षपकश्रेण्यां तु नः क्षायिकं क्षायोपशमिकसम्यक्त्वं उदीर्णमिथ्यात्वक्षयेऽनुदीर्णमिथ्यात्वोपश
मे च भवति उक्तं च मिच्छत्तं जमुइण्णं तं खीणं अणुइयं च उवसंतं मीसीभावपरिणयं वेइज्जंतं खओवसमं तथा क्षायकसम्यक्त्वे
ऽयतादीन्ययोगिकेवलिपर्यवसानान्येकादशगुणस्थानकानि तत्रौघे ७९ अविरते ७७ देशे ६७ इत्यादियावदयोगिनि शू
न्यं क्षायिकसम्यक्त्वस्वरूपं त्विदं खीणे दंसणमोहे तिविहंमि वि भवनियाणभूयंमि निप्पच्चवायमउलं संमत्तं खाइयं होइ तथा
मिथ्यात्वत्रिके मिथ्यादृष्टिसास्वादनमिश्रलक्षणे देशे देशविरते सूक्ष्मे सूक्ष्मसंपराये स्वस्थाने निजस्थानमेयमर्थः मिथ्यात्वम १
र्गणास्थाने मिथ्यादृष्टिगुणस्थानं सासादनमार्गणास्थाने सासादनं गुणस्थानं मिश्रमार्गणास्थाने मिश्रगुणस्थानं देशसं
यममार्गणास्थाने देशविरतं गुणस्थानं सूक्ष्मसंपरायसंयमे सूक्ष्मसंपरायगुणस्थानं अत्र च स्वस्वगुणस्थानीयो बंधः य
था मिथ्यात्वे ओघतो विशेषतश्च ११७ एवं सासादने १०१ मिश्रे ७४ देशे ६७ सूक्ष्मे १७ आहारकद्वारे त्रयोदश गुणस्थानानि मिथ्या १
दृष्ट्यादीनि सयोगकेवल्यंतानि आहारकेऽपी वेतस्य तेऽयोगीत्वनाहारकस्तत्रौघतः १२० मिथ्यात्वे ११७ इत्यादियावत्सयो
गिनि सातरूपैकाप्रकृतिर्बंधो भवति एवं वेदादिषु मार्गणास्थानेषु गुणस्थानकानुपदर्श्य संप्रति तेषु बंधमाह तिसु दुसु म
इ नियनियगुणोहो निनियनियगुणोघः एतेषु वेदादिषु यानि स्वस्वगुणस्थानानि तेषु ओघः कर्मस्तवोक्तो बंधो द्रष्टव्य इ
त्यर्थः सच स्वस्थाने यथा भावित एव यच्च प्रागुक्तमष्टौ पशमिकसम्यक्त्वे गुणस्थानानीति तत्र किंचित् विशेषमाह १९ परमु
वसमि वट्टंता आउ न बंधंति तेण अजयगुणे देवमणुआउहीणो देसाइसु पुण सुराउं विणा २० व्या० सर्वत्र वेदादि

षु निजकगुणौघो वाच्य इत्युक्तं परमौपशमिकेऽयं विशेषः अपशमिके वर्त्तमाना जीवा आयुर्न बध्नंति तेनायतगुण ६.४२४
स्थानके देवमनुजायुर्भ्यां हीनस्तदोघो वाच्यो नरकतिर्यगायुषोः प्रागेव मिथ्यात्वसासादनयोरपनीतत्वात्तद्धीनता त
स्मादेशविरतिप्रमत्ताप्रमत्तेषु पुनरोघः सुरायुर्विना ज्ञेयः अपशमिकसम्यक्त्वं ह्युपशमश्रेण्यां प्रथमसम्यक्त्वा
ले वा लभ्यते जीवस्य उक्तं च उवसामसेढिगयस्स होइ उवसामियं तु सम्मत्तं जो वा अकयतिपुंजो अखवियमिच्छो लहइ
सम्मं न च द्वयोरौपशमिकसम्यक्त्वयोः पुनर्विद्यते अपशमिके उपदेशतोऽपि नास्तीति विशेषः उक्तं वेदादिषु बंधस्वा २
मित्वं अथ लेश्याद्वारमुच्यते २० छः तेउ अहारसयं आहारदुगूण आइलेसतिगे तं तित्थोणं मिच्छे साणाइसु सव्वहिं
ओहो २१ व्या० आद्यलेश्यात्रिके कृष्णनीलकापोतलेश्यात्रये वर्त्तमाना जीवा ओघे सामान्येन विंशत्युत्तरशतमाहा
रद्विकोनं ज्ञातमष्टादशाधिकशतं बध्नंति आहारकद्विकस्य शुभलेश्याभिर्बध्यमानमानत्वात् तदष्टादशाधिकशतं
तीर्थकरनामोनं सप्तदशोत्तरशतं मिथ्यात्वगुणस्थानके बध्नंति सासादनादिषु गुणस्थानेषु पुनः सर्वत्र लेश्याषट्केऽप्यो
घः सामान्यबंधो द्रष्टव्यस्ततोऽत्र सासादनमिश्राविरतेषु सप्तोत्तरशतोघः कर्मस्तवोक्तः २१ छः तेऊ नरयनवू
णा उज्जोअ चउ नरयबार विणु सुक्का विणु नरयबार पम्हा अजिणाहारा इमा मिच्छे २२ व्या० विंशत्युत्तरशतं नरके
त्रिकादिप्रकृतिनवकं तेजोलेश्यायामोघत एकोनद्वादशोत्तरशतं बध्यते कृष्णाद्यशुभलेश्याप्रत्ययत्वान्नरकत्रिकादिप्र
कृतिनवकबंधस्याभावात् इदमेवैकादशोत्तरशतं जिननामाहारकद्विकरहितं शेषमष्टोत्तरशतं मिथ्यात्वे बध्यते सासादना
दिषु गुणस्थानकेषु ओघः विंशत्युत्तरशतमध्यादुद्योतादिचतुष्कं नरकत्रिकादिद्वादशकं च मुक्त्वा शेषं चतुरुत्तरशत
मोघतः शुक्ललेश्यायां बध्यते उद्योतादिप्रकृतीनां तिर्यग्नरकप्रायोग्यत्वेन देवनरप्रायोग्यबंधके शुक्ललेश्यादित्रि

रबध्यमानत्वात् एतदेव चतुरुत्तरंशतं जिननामाहारकद्विकरहितं शेषमेकोत्तरशतं मिथ्यात्वे बध्यते सासादने तदीयेकोत्तरशत
रूपोघ बध्यते उद्योतादिप्रकृतिचतुष्टयापसारणे शेषाः सप्तनवतिर्बध्यते मिश्रादिषु एकादशगुणस्थानकेषु तदवस्थः स्वगुण
स्थानीयो बंधो द्रष्टव्यः विंशत्युत्तरशतमध्यान्नरकत्रिकादिप्रकृतिद्वादशकं विना शेषमष्टोत्तरशतं पद्मलेश्यायामोघतो बध्यते त
ल्लेश्यावतां सनत्कुमारादिदेवानां तिर्यक्प्रायोग्यं बध्नतामुद्योतादिप्रकृतिचतुष्कस्य बंधसंभवान्नात्र तद्बंधाभावः एतदेवाऽष्टो
त्तरशतं जिननामाहारकद्विकरहितं शेषं पंचोत्तरशतं मिथ्यात्वे बध्यते सासादनादिषु षट्सु गुणस्थानकेषु यथास्थित एकोत्त
रशतादिरूपः स्वस्वौघबंधो द्रष्टव्यः अजिणाहारा इमा मिच्छे त्ति प्रथमलेश्यात्रिकस्य तेउ अहारसयमित्यादिना निर्धारितलेश्या
स्तेजःपद्मशुक्ललेश्या मिथ्यात्वगुणस्थानके जिननामाहारकद्विकरहिता विज्ञेया स्तेजोलेश्यादिषु नरकनवकाद्यूनो
यः सामान्यबंधः प्रतिपादितः स मिथ्यात्वगुणस्थानके जिनादिप्रकृतित्रयरहितो विधेय इत्यर्थः तथा च दर्शितमेव संप्रति भव्या
हारामार्गणे विधीयंते २२ सव्वगुण भव्वसंनिसु ओहु अभव्वा असंनि मिच्छसमा सासणि असंनि सन्निव कंमणभंगो अणाहारे २३ व्या
० सर्वगुणस्थानकोपेतेषु भव्येषु संज्ञिषु च मार्गणास्थाने सर्वगुणस्थानकेष्वोघः कर्मस्तवोक्तः अभव्या असंज्ञिनश्च चिंत्यमाना मि
थ्यादृष्टिगुणस्थानकसमाः अयमर्थो यथा मिथ्यात्वे सप्तदशोत्तरशतबंधः कर्मस्तवोक्तस्तथाऽभव्योऽसंज्ञी च सामान्यतो मि
थ्यात्वे च सप्तदशोत्तरशतं बध्नाति सासादने पुनरसंज्ञी संज्ञिवदेकोत्तरशतबंधकेत्यर्थः अनाहारके उ मार्गणास्थाने कार्मणका
ययोगभंगो विग्रहगतिरेनिरात्मकर्मेदीत्यादिना योगमार्गणास्थाने प्रतिपादितोऽवगंतव्यः कार्मणकाययोग इव संसारिणोऽना
हारकत्वात्कार्मणभंगप्रायं विंशत्युत्तरशतमध्यादाहारकद्विकदेवायुर्नरकत्रिकतिर्यग्नरायुः प्रकृत्यष्टकं मुक्त्वा द्वादशोत्तरशत
मनाहारके सामान्येन बंधस्तथा जिननामसुरद्विकं वैक्रियद्विकं च द्वादशोत्तरशतमध्यात्मुक्त्वा शेषसप्तोत्तरशतस्याऽनाहारके
मिथ्यादृष्टौ बंधस्तथा सूक्ष्मादित्रयोदशप्रकृतीर्मुक्त्वा शेषायायाश्चतुर्नवतेः सासादनस्थेऽनाहारके बंधस्तथाऽनंतानुबंध्यादिचतुर्वि

शातिप्रकृतीश्चतुर्नवतेर्मध्यात्सुक्ताशेषायाः सप्ततेर्जिननामसुरद्विकवैक्रियद्विकरहितायाः पंचसप्ततेरविरते ऽनाहारके
बंधस्तथा सयोगिनि केवलिसमुद्घाते स्त्रीयचतुर्थपंचमसमयेष्वनाहारके एकस्याः सातप्रकृतेर्बंधः अथ प्रागयुक्तं लेश्य १
द्वारे सा एण इत्युक्तं द्विक्र्येरोऽन्नि सासादनादिषुगुणस्थानकेषु सर्वत्र लेश्याषट्कं उद्यो दृष्टम् इति तत्र न ज्ञायते आदिलेश्यात्रिकस्य १
लेश्यायां कियंति गुणस्थानानि गृह्यंत इत्यतो लेश्यागुणस्थानकान्युपदर्शयन् प्रकरणसमर्थानां प्रकरणज्ञानोपा
यं चाह २३ तिसुडुसुसुक्का इगुणा चउसगतेरत्ति बंधसामित्तं देविंदसूरिरइअं नेअं कम्मत्थयं सोउं २४ इति बंधसा
मित्रसु त्रं समस्तं ३ व्याः तिसृष्वाद्यासु कृष्णनीलकापोतलेश्यासु चतुर्षु इत्यादिना यथाक्रमं संबंधाच्चत्वारि मिथ्यात्वसा
सादनमिश्राऽविरतरूपाण्याद्यानि गुणस्थानानि प्राप्यंते एतद्गुणस्थानचतुष्कपरिणामविशेषतः षण्णामपि लेश्या
नां भावात् द्वयोस्तेजःपद्मलेश्ययोर्मिथ्यात्वादीनि सप्त गुणस्थानानि तयोरप्रमत्तगुणस्थानकांतमपि यावत्सद्भावात्
शुक्ललेश्यायां त्रयोदश मिथ्यात्वादीनि गुणस्थानानि तस्या मिथ्यादृष्टिगुणस्थानात्प्रभृति यावत्सयोगिकेवलिगुणस्था
नकं तावदपि भावात् अयोगी त्वलेश्यः इह च लेश्यानां प्रत्येकमसंख्येयानि लोकाकाशप्रदेशप्रमाणान्यध्यव
सायस्थानानि ततो मंदाध्यवसायस्थानापेक्षया शुक्ललेश्यादीनामपि मिथ्यादृष्ट्यादौ संभवो न विरुध्यते तथा कृष्णादिले
श्यात्रयं यद्यऽविरतगुणस्थानकं यावदुक्तं तत् इह बंधस्वामित्वानुसारेण प्रकृतीति केचित्तु प्रमत्तगुणस्थानकांतं य
वदिच्छंति तथा हि लेसा तिन्नि पमत्तंता तेऊपम्हाउ अप्पमत्तंता सुक्का जाव सजोगी निरुद्धलेसो अजोगित्ति न ७0
त्वेतन्मतं श्रुतधरा विदंति इति प्रतिपादितं गत्यादिषु बंधस्वामित्वं तत्प्रतिपादनाच्च समर्थितं बंधस्वामित्वप्रकरणं इति शब्दः पं
रिसमाप्तौ बंधस्वामित्वं पतलज्ञेयं बोधव्यं कर्मस्तवं श्रुत्वा ऽत्र बहुषु स्थानेषु तदुक्तबंधातिदेशद्वारेणानात् एतं छ
ग्रस्पटीकासूत्रस्थलं गाविनसाधतस्थानर ।। श्रूयमाणे देवेंद्रसूरिरचितोऽवचूर्णिका इति बंधस्वामित्वावचूरिः समाप्ता ग्रंथाग्रं ४२०

॥र्द०॥ ॐ नमः श्रीप्रवचनाय यज्ञाधिताघेन्वमाप्ड्रापमासु श्रीगौतमप्रस्तयः श्रमिनामधीशाः स्वस्वार्थसार्थपरमार्थविदो
बभूवुः श्रीवर्द्धमानविभुरस्तु सवः शिवाय १ निजधर्माचार्येभ्यो नत्वा निष्कारणैकबंधुभ्यः श्रीषडशीतिकशास्त्रे विवृणोमि
यथागमं किंचित् २ तत्रादावेवाभीष्टदेवतास्तुत्यादिप्रतिपादिकामिमां गाथामाह ॥ नमिय जिणं जिअमग्गणगुणठाणु
वओगजोगलेसाओ बंधप्पबहूभावे संखिज्जाइं किमवि वुच्छं १ व्या० जिनं नत्वा जीवस्थानादि वक्ष्ये इति संबंधः
तत्र नत्वा नमस्कृत्य नमस्कारो हि चतुर्धा द्रव्यतो नामैको न भावतो यथा पालकादीनां १ भावतो नामैको न द्रव्यतो यथानुत्तरो
पपातिसुरादीनां २ एको द्रव्यतोऽपि भावतोऽपि यथा शांबकुमारप्रभृतीनां ३ एको न द्रव्यतो नापि भावतो यथा कपिलादीनां ४ त
तोऽत्र भावरूपेण भावनमस्कारेण नमस्कृत्य कमित्याह जिनं रागद्वेषमोहादिरूपांतरवैरिवारजेतारं वीतरागं परमार्हंत्यमहि
मालंकृतं तीर्थंकरमित्यर्थः अनेन परमाभीष्टदेवतानमस्कारेण एकांतिकमात्यंतिकं भावमंगलमाह तेन च शास्त्रस्यापरिसमाप्ते
निःप्रत्यूहता भवतीति क्त्वाप्रत्ययस्य चोत्तरक्रियासापेक्षत्वादुत्तरक्रियामाह जीवमार्गणागुणस्थानादि वक्ष्ये इह स्थानशब्दस्य प्र
त्येकं योगात् जीवस्थानानि मार्गणास्थानानि गुणस्थानानि तत्र जीवंति यथायोगं प्राणान् धारयंतीति जीवाः प्राणिनः शारी
रस्तत इति पर्यायास्तेषां जीवानां स्थानानि सूक्ष्मापर्याप्तैकेंद्रियत्वादयो ऽवांतरविशेषास्तिष्ठंति जीवा एष्विति कृत्वा जीवस्था
नानि १ मार्गणं जीवादीनां पदार्थानामन्वेषणं मार्गणा तस्याः स्थानानि आश्रया मार्गणास्थानानि वक्ष्यमाणानि गत्यादीनि २
गुणा ज्ञानदर्शनचारित्ररूपा जीवस्वभावविशेषाः स्थानं पुनरेतेषां शुद्ध्यशुद्धिप्रकर्षापकर्षकृतः स्वरूपभेदः तिष्ठंति गुणा अ
स्मिन्निति कृत्वा गुणानां स्थानानि गुणस्थानानि परमपदप्रासादशिखरारोहणसोपानकल्पानि तानि चोपरिष्टात्कर्मस्तवटीकायां
सविस्तरमभिहितानि इह त्ववकाशाभावात् किंचिद्वक्ष्यमाणानि मिथ्यादृष्टिप्रभृतीनि चतुर्दश ३ उवओगा उपयोजनमुपयोगो बोधरू

नमिय जिणं वत्त-
व्वा चउदस जिअठाण
एसु गुणठाणजोगा
उवओगलेसा बंधोदय
दीरणा सत्ता ४ तह
चउदसमग्गणठाण
एसु विसेसिऊन चउ
च जिअगुणजोगुव
ओगा लेसप्पबहुं च
ठाणा ५ चउदसगुणे
सु जिअजोगुवओगले
साय बंधहेऊ य बंध
इ चउ अप्पाबहुं च तो
भावसंखाई ॥ ७४

पोजीवव्यापारो सावेघञ् यदा उपयुज्यते वस्तुपरिच्छेदं प्रतिव्यापार्यत इत्युपयोगः कर्मणि घञ् यदा उपयुज्यते वस्तु
परिच्छेदं प्रति जीवोऽनेनेत्युपयोगः पुंनाम्नि घ इति करणे घप्रत्ययः सर्वत्र जीवस्वतत्त्वभूतोऽवबोधव्यापारो उपयोगो मंतव्यः
जोगत्ति युज्यते योगो जीवस्य वीर्यपरिस्पंद इति यावत् यद्वा युज्यते धावनवल्गनादिक्रियासु व्यापार्यत इति योगः
+ना+ कर्मणि घञ् यद्वा युज्यते संबध्यते धावनवल्गनादिक्रियासु जीवोऽनेनेति पुंनाम्नीति करणे घः प्रत्ययः स च मनोवाक्कायल
क्षणसहकारिकारणभेदात् त्रिविधो वक्ष्यमाणस्वरूपं लेसाओत्ति लिश्यते श्लिष्यते कर्मणा सहात्माऽनयेति लेश्या कृष्णादिद्र
व्यसाचिव्यादात्मनः शुभाशुभरूपपरिणामविशेषः यदुक्तं कृष्णादिद्रव्यसाचिव्यात्परिणामोऽयमात्मनः स्फटिकस्येव तत्रा
यं लेश्याशब्दः प्रवर्त्तत इति सा च षोढा कृष्णलेश्या नीललेश्या कापोतलेश्या तेजोलेश्या पद्मलेश्या शुक्ललेश्या आसां
स्वस्वरूपं जंबूफलखादकषट्पुरुषदृष्टांतेन ग्रामघातनप्रवृत्तचौरषट्कदृष्टांतेन वा एवमवसेयं जह जंबुपायवेगो सुप
क्कफलभरियनमियसालग्गो दिट्ठो छहिं पुरिसेहिं ते बिंती जंबु भक्खेमो १ किह पुण ते बिंतेगो आरुहमाणाण जीयसंदेहो
तो छिंदिऊण मूलाओ पाडिमं ताहे भक्खेमो २ बीयाह एद्दहेणं किं छिन्नेणं तरुणा उ अम्हं ति साहा महल्ल छिंदह तइओ बेइ प
साहाओ ३ गुच्छे चउत्थओ पुण पंचमओ बेइ गिण्हह फलाइं छट्ठो उ बेइ पडिया एए च्चिय खायह घित्तुं ४ दिट्ठंतस्सोवणओ जो बेइ
तरुं छिंद मूलाओ सो वट्टइ किण्हाए साह महल्ला उ नीलाए ५ हवइ पसाहा काऊ गुच्छा तेऊ फलाइं पम्हाए पडियाइं सु
क्कलेसा अहवा अन्नं इमं उदाहरणं ६ चोरा गामवहत्थं विणिग्गया एगु बेइ घाएह जं पिच्छह तं सव्वं दुपयं चउप्पयं वावि ७ बिंत ३१
माणुस पुरिसे य तइओ साउह चउत्थओ पंचमओ जुज्झंते छट्ठो पुण तत्थ भिमंतएणं ८ एकं ता हरह धणं बीयं मारेह मा कुणह एव
गं केवल हरह धणं तीउ य संहारो इमो तेसिं ९ सव्वे मारेयव्वा वट्टइ सो किण्हलेसपरिणामे एवं कमेण सेसा जा चरमो सुक्क

साए १० अस्येवं दृष्टांतद्वयस्य संग्रहगाथा मूलं साह पसाहा गुच्छ फले छिन्न पडिय तरु कणया सव्वं माणुस पुरिसा साउह जुज्झ
त धणहरणा आसु च लेश्यासु यो जीवो यस्यां लेश्यायां वर्त्तते तस्य यद्रूपं तद्वेरेण निरणुकंपो अद्धवंतो मुहो रकरो फरुसो
किण्हाइलेसाणज्झप्पो वट्टकराण वय तक्कालं १ माया अणंते कुसलो वक्को जीवुब्ववलविन्नो मेहुणतिव्वासित्ते अलियपलावी
य नीलाए २ मूढो आरंभपिउ पावं नागणेइ सव्वकज्जेसु न गणेइ हाणिवुड्ढी कोरज्जुत काउलेसाए ३ दरकोसंवरसीलो रिजुसा
वो दाणसीलगुणजुत्तो धम्मंमि होइ बुद्धि अरूसणो तेउलेसाए ४ सत्तगुणकंपो अ थिरो दाणं खलु देइ सव्वजीवाणं अज्झसत
बुद्धिमंतो थियमंगो पम्हलेसाए ५ धम्मंमि हवइ बुद्धी पावं वज्जेइ सव्वकज्जेसु आरंभे सु न रज्जइ अपरक्कवाइ य सुक्काए ६ ततो जीव
स्थानानि च मार्गणास्थानानि च गुणस्थानानि च उपयोगाश्च योगाश्च लेश्याश्चेति द्वंद्वे द्वितीयाबहुवचनं बंधत्ति मिथ्यात्वादिभिर्बंधहे
तुभिरंजनचूर्णपूर्णसमुद्गकवन्निरंतरं पुद्गलनिचिते लोके कर्मयोग्यवर्गणापुद्गलैरात्मनः क्षीरनीरवद्वह्न्ययःपिंडवद्वा अन्यो
न्यानुगमभेदात्मकः संबंधो बंधः उपलक्षणत्वादुदीरणासत्तानां परिग्रहः तत्र तेषामेव कर्मपुद्गलानां यथावस्थितिबद्धा
नामपवर्त्तनादिकरणकृते स्थाने किंवा स्थित्युपचये सत्युदयसमयप्राप्तानां विपाकवेदनमुदयः २ तेषामेव कर्मपुद्गलानां
मकालप्राप्तानां जीवसामर्थ्यविशेषादुदयावलिकायां प्रवेशनमुदीरणा ३ तेषामेव कर्मपुद्गलानां बंधसंक्रमाभ्यां लब्धात्मला
भानां निर्जरणसंक्रमकृतस्वरूपप्रच्युत्यभावे सति सद्भावः सत्ता ४ यद्वा बंधशब्दे तिपदैकदेशेऽपि नामा सत्यसामेति न्यायेन पदस
योगदर्शनात् बंधहेतवो मिथ्यात्वाविरतिकषाययोगरूपा वक्ष्यमाणा गृह्यंते अल्पबहुत्वं तिसावप्रधानत्वान्निर्देशस्य अल्प
बहुत्वं गत्यादिरूपमार्गणास्थानादीनां परस्परं स्तोकत्वाद्यः त्वं सावान्ने जीवाजीवानां तेनतेनरूपेण भवनानि परिणमनानि
भावा औपशमिकादयः ततो बंधश्चाल्पबहुत्वं च भावाश्चेति द्वंद्वे द्वितीयाबहुवचनं शस् संख्ये च अत्र प्रत्यक्षत्वात्र दीर्घत्वं दी

र्घ्यकस्त्वौ मिथो वृत्तावितिप्राकृतसूत्रेण संखिज्जा इति संख्यायन्ते वा उः पल्यादिप्ररूपणया परिमीयन्ते इति संख्येयमादिशब्दाद
संख्येयानंतकपरिग्रहः ततश्च जीवस्थानादिकमनंतकपर्यवसानं द्वारकलापकमत्र वक्ष्ये इत्यनेनाभिधेयमाह कथं वक्ष्ये इ
त्याह किमपि किंचित् स्वल्पं न विस्तरवत् इः प्रमाणवतां वेनाऽपचीयमानमेधायुर्बलादिगुणानामेदंयुगीनजनानामवि
स्तरादिप्रदर्शनेऽसत्युपकारासंभवात् उपकारार्थं चेषशास्त्रारंभप्रयासः एतेन संक्षिप्तरुचिसत्वानाश्रित्य प्रयोजनमावेदितं संबंधः
स्त्वर्थापत्तिगम्यः स चोपायोपेयोलक्षणः साध्यसाधनलक्षणो गुरुपर्वक्रमलक्षणो वा स्वयमभ्यूह्यः इह च मार्गणास्थानगुण
स्थानादयः सर्वेपदार्था जीवपदार्थमंतरेण विचारयितुं न शक्यंते इति प्रथमं जीवस्थानग्रहणं १ जीवाश्च पुनस्ते निरूप्यमा
णा गत्यादिमार्गणास्थानैरेव निरूपयितुं शक्यंते इति तदनंतरं मार्गणास्थानग्रहणं २ तेषु च मार्गणास्थानेषु वर्त्तमाना जीवा न कदा
चिदपि मिथ्यादृष्ट्याद्यन्यतमगुणस्थानकविकला भवंतीति ज्ञापनाय मार्गणास्थानकानंतरं गुणस्थानकग्रहणं ३ अथ च गु
णस्थानकानि परिणामशुद्ध्यशुद्धिप्रकर्षापकर्षरूपाण्युपयोगवतामेवोपपद्यंते नान्येषामाकाशादीनां तेषां ज्ञानादिरूपपरिण
मरहितत्वादिति प्रतिपत्त्यर्थं गुणस्थानकग्रहणानंतरमुपयोगग्रहणं ४ उपयोगवंतश्च मनोवाक्कायचेष्टासु वर्त्तमाना नियमतः
कर्मसंबंधभाजो भवंति तथा चागमः जावणं एस जीवे एयइ वेयइ चलइ फंदइ घट्टइ खुब्भइ तं तं भावं परिणमइ तावणं अट्ठवि
हबंधए वा सत्तविहबंधए वा छव्विहबंधए वा एगविहबंधए वा नो णं अबंधए इति ज्ञापनार्थमुपयोगग्रहणानंतरं योगग्रहणं ५ यो
गवशाच्चोपात्तस्यापि कर्मणो यावन्न कृष्णाद्यन्यतमलेश्यापरिणामो जायते तावन्न तस्य स्थितिपाकविशेषो भवति स्थितिपा ७२
कविशेषस्तस्य भवति लेश्याविशेषेणेति वचनप्रामाण्यात् ततो योगवशादुपात्तस्य कर्मणो लेश्याविशेषतः स्थिति
पाकविशेषो भवतीति प्रतिपत्त्ये योगानंतरं लेश्याग्रहणं ६ लेश्यावंतश्च यथायोगं बंधहेतुभिः कर्मबंधोदयोदीरणास

त्ताः प्रवर्तंतीति ज्ञापनाय लेश्यानंतरं बंधहेतुग्रहणं ७ बंधोदयादियुक्ताश्च जीवा मार्गणास्थानाद्याश्रित्य नियमतः परस्परमल्पे
वा तवेषु बहवो वेति निवेदनार्थं बंधानंतरमल्पबहुत्वग्रहणं ८ ते च जीवा मार्गणास्थानादिष्वल्पे वा बहवो वा भवंतोऽवश्यं
पशमौपशमिकादिभावानां केषुचिद्भावेषु वर्त्तंते इति ज्ञापनार्थमल्पबहुत्वानंतरं भावग्रहणं ९ औपशमिकादिभाववर्त्तिनां च
जीवानामल्पबहुत्वं नियमतः संख्येयकेनासंख्येयकेनानंतकेन वा निरूपणीयमिति भावग्रहणानंतरं संख्येय
कादिग्रहणमिति यद्यपि चेह सामान्येनोक्तं जीवस्थानादि वक्ष्ये तथाप्येवं विशेषतो द्रष्टव्यं जीवस्थानेषु गुणस्थानकयो
गोपयोगलेश्याकर्मबंधोदयोदीरणासत्ता वक्ष्ये मार्गणास्थानकेषु पुनर्जीवस्थानकगुणस्थानकयोगोपयोगले
श्याऽल्पबहुत्वानि गुणस्थानकेषु च जीवस्थानकयोगोपयोगलेश्याबंधहेतुबंधोदयोदीरणासत्ताल्पबहुत्वानि तथा च
गाथा चउदसजियठाणेसु चउदसगुणठाणगाणि जोगा य २ उवओग ३ लेसा ४ बंध ५ दय ६ उदीरणा ७ संत ८ अठपए १ चउद
समग्गणठाणेसु मूलपएसुं बिसट्ठि इयरेसु जिय १ गुण २ जोगो ३ वओगा ४ लेसप्पबहुं च ६ छट्ठाणा २ चउदसगुणठाणेसुं
जिय १ जोग २ उवओग ३ लेस ४ बंधा य ५ बंधुदयुदीरणा ७ संतप्पबहुं च दसठाणा ३ तत्र यथोद्देशं निर्देश इति
न्यायात् प्रथमं तावज्जीवस्थानानि निरूपयन्नाह इह सुहुमबायरेगिंदि बितिचउ असन्निसन्निपंचिंदी अप
ज्जत्तापज्जत्ता कमेण चउदस जियठाणा २ व्या० इहास्मिन् जगति अनेन क्रमेण चतुर्दश जीवस्थानानि प्रागभिहितशब्दा
र्थानि भवंति केन क्रमेणेत्याह सूक्ष्मबादरैकेंद्रियद्वित्रिचतुरसंज्ञिसंज्ञिपंचेंद्रियाः एते च सर्वेऽपि प्रत्येकं पर्याप्तक
अपर्याप्तकाश्चेति तत्र एकं स्पर्शलक्षणमिंद्रियं येषां ते एकेंद्रियाः पृथिव्यप्तेजोवायुवनस्पतयः ते च प्रत्येकं द्विधा सूक्ष्मा बा
दराश्च सूक्ष्मनामकर्मोदया बादरास्ते च लोकप्रतिनियतदेशवर्त्तिनः द्वित्रिचतुरसंज्ञिपंचेंद्रिया इति इंद्रियशब्दः प्रत्ये

कं योगात् द्वीन्द्रियाः त्रीन्द्रियाः चतुरिन्द्रियाः असंज्ञिसंज्ञिभेदभिन्नाश्च पंचेन्द्रियाः तत्र देहस्पर्शनरसनलक्षणे इन्द्रिये ये
षां ते द्वीन्द्रियाः कृमिपूतरकचंदनकसंखकपर्दजलौकाप्रभृतयः त्रीणि स्पर्शनरसनघ्राणरूपाणीन्द्रियाणि येषां ते त्रीन्द्रियाः
कुंथुमत्कुणयूकागर्दभेंद्रगोपमर्कोटिकादयः चत्वारि स्पर्शनरसनघ्राणचक्षुर्लक्षणानीन्द्रियाणि येषां ते चतुरिन्द्रि
याः भ्रमरमक्षिकामशकवृश्चिकादयः पंच स्पर्शनरसनघ्राणचक्षुःश्रोत्रलक्षणानीन्द्रियाणि येषां ते पंचेन्द्रियाः मत्स्यम
करेलकलहंससारसदंसनरसुरनारकादयः ते द्विविधाः संज्ञिनोऽसंज्ञिनश्च तत्र संज्ञानं संज्ञा भूतभवद्भाविभावस्व
भावपर्यालोचनं अपरपर्यायदातद्रस्त्वद्भ प्रत्ययः सा विद्यते येषां ते संज्ञिनः विशिष्टस्मरणादिरूपमनोविज्ञानभाज इति यावत् त
द्विपरीता असंज्ञिनो विशिष्टस्मरणादिरूपमनोविज्ञानविकला इत्यर्थः एते च सर्वेऽप्येकेन्द्रियादयः प्रत्येकं अपर्याप्तकाश्च
पर्याप्तकाश्च पर्याप्तिर्नाम पुद्गलोपचयतः पुद्गलग्रहणपरिणमनहेतुः शक्तिविशेषः सा च विषयभेदात् षोढाः आहार
पर्याप्तिः शरीरपर्याप्तिः उच्छ्वासपर्याप्तिः भाषापर्याप्तिर्मनःपर्याप्तिश्चेति तत्र यया बाह्यमाहारमादाय खलरसरूपत
या परिणमयति साहारपर्याप्तिः १ यया रसीभूतमाहारं रसासृग्मांसमेदोऽस्थिमज्जाशुक्रलक्षणसप्तधातुरूपतया
परिणमयति सा शरीरपर्याप्तिः २ यया धातुरूपतया परिणमितमाहारमिन्द्रियरूपतया परिणमति सा इन्द्रियपर्याप्तिः ३
यया पुनरुच्छ्वासप्रायोग्यवर्गणादलिकमादाय उच्छ्वासरूपतया परिणमय्यालंब्य च मुंचति सा उच्छ्वासपर्याप्तिः ४
यया तु भाषाप्रायोग्यवर्गणाद्रव्यं गृहीत्वा भाषात्वेन परिणमय्यालंब्य च मुंचति सा भाषापर्याप्तिः ५ यया पुनर्मनोयो- ७२
ग्यवर्गणादलिकं गृहीत्वा मनस्त्वेन परिणमय्यालंब्य च मुंचति सा मनःपर्याप्तिः ६ एताश्च यथाक्रममेकेन्द्रियाणां
+दी+ द्वीन्द्रियाणां संज्ञिनां च चतुःपंचषट्संख्या भवंति यदुक्तं आहारसरीरिंदियपज्जत्ती आणपाणभासमणे चत्तारि

चउ पंच य पणिंदियविगलसन्नीणं १ पर्याप्तयो विद्यंते येषां ते पर्याप्ताः अभ्रादिभ्यः इति मत्वर्थीयोऽप्रत्ययः स्वार्थीक
प्रत्ययो वा दानात् पर्याप्तकाः ये पुनः स्वयोग्यपर्याप्तिः परिसमाप्तिविकलास्तेऽपर्याप्तकाः ते द्विविधा लब्ध्या करणेन च
तत्र येऽपर्याप्तका एव संतो म्रियंते न पुनः स्वयोग्यपर्याप्तीः सर्वा अपि समर्थयंते ते लब्ध्यपर्याप्तकाः ये पुनः करणानि
शरीरेन्द्रियादीनि न तावन्निर्वर्तयंति अथ चावश्यं पुरस्तान्निर्वर्तयिष्यंति ते करणापर्याप्तकाः इदं चैवमागमः लब्ध्य
पर्याप्तका अपि नियमादाहारशरीरेन्द्रियपर्याप्तिसमाप्तावेव म्रियंते नार्वाक् यस्मादागामिभवायुर्बध्वा म्रियंते सर्व ए
व देहिनस्तच्चाहारशरीरेन्द्रियपर्याप्तानामेव बध्यत इति तदेवं निरूपितानि जीवस्थानानि अथ तेष्वेव जीवस्थानेषु गुणस्थ
नानि प्रचकटयिषुराह ब २ बायरअसन्निविगले अपज्जि पढमबियसंनिअपज्जत्ते अजयजुअसंनि पज्जे सव्वगु
णमिच्छ सेसेसु ३ गा० इह चतुर्दश गुणस्थानानि भवंति तद्यथा मिथ्यादृष्टिगुणस्थानं १ सासादनसम्यग्दृष्टिगुणस्था
नं २ सम्यग्मिथ्यादृष्टिगुणस्थानं ३ अविरतसम्यग्दृष्टिगुणस्थानं ४ देशविरतिगुणस्थानं ५ प्रमत्तसंयतगुणस्थानं
६ अप्रमत्तसंयतगुणस्थानं ७ अपूर्वकरणगुणस्थानं ८ अनिवृत्तिबादरसंपरायगुणस्थानं ९ सूक्ष्मसंपरायगु
णस्थानं १० उपशांतकषायवीतरागछद्मस्थगुणस्थानं ११ क्षीणकषायवीतरागछद्मस्थगुणस्थानं १२ सयोगिकेव
लिगुणस्थानं १३ अयोगिकेवलिगुणस्थानं १४ एतेषामर्थलेशोऽयं जीवाइपयत्थेसु जिणेवइट्ठेसु जा असद्दहणा सद्दह
णा विय मिच्छा विवरीयपरूवणा जा य १ संसयकरणं जं पिय जं तेसु अणायरो पयत्थेसु तं पंचविहं मिच्छं तद्दिट्ठी मि
च्छदिट्ठीय २ उवसमअद्धाए ठिओ मिच्छमपत्तो तमेव गंतुमणो सम्मं आसायंतो सासायणमो मुणेयव्वो ३ जह गुडदहीणि वि
समाइं भाववसद्धियाणि जं तिमीसा णि तु जं तस्स तहोभय दिट्ठी एमीसदिट्ठी उ ४ तिविहे विजसंमत्ते थोवा वि न विरइज

सास कंमवसासो अविरउत्ति तन्नइ देसे देसविरई त्ति ५ विगहा कसाय निद्दा मद्दाइ रहिउ सो वे पमत्तु त्ति पंचमित्तउ इयरो
अपमत्तउ इउ ठाणयंबो ६ अपुव्वं अपुव्वं उ ज्जत्तरं जो करेइ ठिइकंडं रसकंडं तग्घायं सो होइ अपुव्वकरणु त्ति ७ विनिवट्टंति
विसुद्धिं ॥ समय पइट्ठाविकं मि अन्नुन्नं तत्तो नियट्टि ठाणं विवरीय मयो वि अनियट्टी ८ थूलाणं लोहखंडाणं वेयगो बायर
रो सुहुमेयव्वो सुहुमाण होइ सुहुमो उवसंते हिं उवसंतो ९ खीणंमि मोहणिज्जे खीणकसाओ सजोगजोगी त्ति होइ पउ
त्ताइ तउ अपउत्ता होइ अजोगी १० अविरयसासणमिच्छा पत्तेय विअनउ ण सेस गुणठाण मिच्छस्स तिन्नि संगा आवलियं
होइ सासाणं ११ तिन्नी सयरस्स उद्द पुव्वाणं कोडिकोडि तेरसमं लहु पंचक्खर सरिमं अंतमुहुत्तं सेस गुणठाण १२ ततो बादरा
श्च बादरैकेंद्रियाः पृथिव्यंबुवनस्पतिलक्षणाः असंज्ञी च विशिष्टस्मरणादिरूपमनोविज्ञानविकलः विकलाश्च द्वित्रिचतुरिंदि
याः द्वींद्रियत्रींद्रियचउरिंद्रिया बादरासंज्ञिविकलास्तस्मिन् बादरासंज्ञिविकले किंविशिष्टे अपज्जत्ति अपर्याप्तकेऽयं अ
पर्याप्तबादरैकेंद्रियेषु पृथिव्यंबुवनस्पतिषु तथा अपर्याप्तेऽसंज्ञिनि तथा विकलेषु द्वींद्रियत्रींद्रियचउरिंद्रियेष्वपर्याप्ते
षु किमित्याह पढम बियत्ति इह सव्वगुणा इति पदानुवृत्त्याकर्षणं ततः प्रथमं मिथ्यादृष्टिगुणस्थानं द्वितीयं सासा
दनगुणस्थानं भवति अथ तेजोवायुवर्जनं किमर्थमिति चेदुच्यते तेजोवायूनां मध्ये सम्यक्त्वलेशवतामप्युत्पादाभावात्
सम्यक्त्वं चासादयतां सासादनभावासुपगमात् तत्रैकेंद्रियाणामागमे सासादनभावो नेष्यते उभयाभावो पुढवाएसु २
सम्मत्तलद्धीए इति परमगुरुनिप्रणीतवचनप्रामाण्यात् अत एवागमे एकेंद्रिया अज्ञानिन एवोक्ता द्वींद्रियादयश्च केचि ७४
दपर्याप्तावस्थायां सासादनभावासुपगमात् ज्ञानिनोक्ताः केचिच्च तद्भावात् ज्ञानिनोक्ताः यदि पुनरेकेंद्रियाणामपि
सासादनभावः स्यात्तर्हि तेऽपि द्वींद्रियादिवत् उभयथापि उच्येरन् न चोच्यंते यदुक्तं एगेंदियाणं भंते किं नाणी अन्नाणी गो

यमा नो नाणी नियमा अन्नाणी तथा बेंदियाणं भंते किं नाणी अन्नाणी गोयमा नाणी वि अन्नाणी वि इत्यादि तन्न कथमिदा
पर्याप्तबादरैकेंद्रियेषु पृथिव्यंबुवनस्पतिलक्षणेषु सासादनगुणस्थानकं भावोक्तः सत्यमेतत् किं तु भगवत्त्वरिष्टाः सर्वगीत
दयेश्च इति विधास्यामेति सन्नि अपज्जत्ति अजययजुय त्ति संज्ञिन्यपर्याप्तके तद्वस्वोक्तं मिथ्यादृष्टिसासादनलक्षणं गुणस्था
नकद्वयमयतयुक्तं भवति यमनं यतं विरतिरित्यर्थः न विद्यते यतं यस्य सोऽयतोऽविरतसम्यग्दृष्टिरित्यर्थः तेन युतं सं
युक्तम् अयुतयुतं इदमुक्तं भवति संज्ञिन्यपर्याप्ते त्रीणि मिथ्यादृष्टिसासादनाविरतिसम्यग्दृष्टिलक्षणानि गुणस्थानानि भ
वंति नारकाणां सम्यग्मिथ्यादृष्ट्यादीनि तेषां पर्याप्तावस्थायामेव भावात् सन्नि पज्जे सव्वगुण त्ति संज्ञिनि पर्याप्ते
सर्वाण्यपि मिथ्यादृष्ट्यादीन्ययोगिपर्यंतानि गुणस्थानकानि भवंति संज्ञिनः सर्वपरिणामसंभवात् अथ कथं संज्ञि
नः सयोग्ययोगिरूपगुणस्थानकद्वयसंभवस्तद्भावे तस्यामनस्कतया संज्ञित्वायोगात् न तद्वानीमपि द्रव्यतस्य द्रव्य
मनः संबंधोऽस्ति समनस्काश्चाविशेषेण संज्ञिनो व्यवह्रियंते ततो भगवतः संज्ञिता व्याघातः यदुक्तं सप्तति
काचूर्णौ मणं करणं केवलिणो विज्जइ तेण सन्निणो भन्नंति मणोविन्नाणं पडुच्च ते सन्निणो न भवंति त्ति मिच्छु सेसेसु त्ति
मिथ्यात्वं शेषेष्वेतावद्विशिष्टेषु पर्याप्तापर्याप्तसूक्ष्मपर्याप्तबादरैकेंद्रियद्वींद्रियत्रींद्रियचउरिंद्रियाऽसंज्ञिपंचेंद्रियल
क्षणेषु सप्तसु जीवस्थानकेषु मिथ्यादृष्टिगुणस्थानमेव भवति न सासादनमपि यतः परभवादागच्छतामेव प्रायो लाभा
र्थेन सम्यक्त्वलेशमास्वादयतामुत्पत्तिकाल एवापर्याप्तावस्थायां तद्भावो लभ्यते न पर्याप्तावस्थायामतः पर्याप्तसूक्ष्म
बादरद्वित्रिचउरसंज्ञिपंचेंद्रियाणां ६ तद्भावः अपर्याप्तसूक्ष्मैकेंद्रियेऽपि न सासादनसंभवः सासादनस्य मना
क्शुभपरिणामरूपत्वात् महासंक्लिष्टपरिणामस्य च सूक्ष्मैकेंद्रियमध्ये उत्पादाभिधानादिति तदेवं निरूपिता निजीव

स्थानेषु गुणस्थानकानि सांप्रतं योगा वक्तुमवसरः प्राप्तास्ते च पंचदश तद्यथा सत्यमनोयोगः असत्यमनोयोगः सत्यमृ
षामनोयोगः असत्यामृषामनोयोगश्च तत्स्वरूपं चेदं सब्भावा हियासच्च मिह संतो मुणयो गुणा पयत्था वा तव्विवरीया मो
सा मीसा जा तदुभयसहावा अणहिगया जा तीसु विसइ त्ति असच्चमुसा एवं मनोयोगो पि चतुर्द्धा द्रष्टव्यः का
ययोगः सप्तधा औदारिकं औदारिकमिश्रं वैक्रियं वैक्रियमिश्रं आहारकं आहारकमिश्रं कार्मणं च तत्रौदारिककाय
योगस्तिर्यङ्मनुष्ययोः तयोरेवापर्याप्तयोरौदारिकमिश्रकाययोगः वैक्रियकाययोगो देवनारकयोस्तिर्यग्मनुष्ययो
र्वा वैक्रियलब्धिमतां वैक्रियमिश्रकाययोगोऽपर्याप्तयोर्देवनारकयोस्तिर्यङ्मनुष्ययोर्वा वैक्रियस्यारंभकाले परि
त्यागकाले च आहारकं चतुर्द्दशपूर्वविदः आहारकमिश्रकाययोगः आहारकस्यारंभसमये परित्यागकाले च का
र्मणकाययोगोऽष्टप्रकारकर्मविकारस्वरूपं शरीरचेष्टास्वरूपोऽपांतरालगतानामुत्पत्तिप्रथमसमये केवलिसमुद्घा
तावस्थायां च तानेतान् योगान् जीवस्थानेषु व्याचिख्यासुराह ॥ अपज्जत्तछक्कि कम्मुरल मीसजोगा अपज्जसन्निसु
ते सविउव्वमीस एसु तणुपज्जेसु उरलमन्ने ॥४॥ व्या० अपर्याप्तानां सूक्ष्मबादरद्वित्रिचतुरसंज्ञिपंचेंद्रियाणां षट्कं अपर्याप्त
षट्कं तस्मिन्नपर्याप्तषट्के संज्ञिपंचेंद्रियपर्याप्तवर्जितेषु षट्कं अपर्याप्तेषु योगौ भवतः द्विवचनस्य बहुवचनं प्राकृतत्वा
त् यथा हत्थापाया इत्यादौ कौ योगौ विशदं कार्मणौदारिकमिश्रौ तत्र कार्मणकाययोगोऽपांतरालगतावुत्पत्तिप्रथम
समये च शेषकालं चौदारिकमिश्रकाययोगः अपज्जसंनिसु ते सविउव्वमीस त्ति अपर्याप्तसंज्ञिषु संज्ञ्यपर्याप्तजीवे ७५
षु तौ पूर्वोक्तौ कार्मणौदारिकमिश्रकाययोगौ भवतः किं केवलौ नेत्याह सह वैक्रियमिश्रेण वर्त्तते यः स सवैक्रियमि
श्रौ तथा चापर्याप्तसंज्ञिनि त्रयो योगा भवंति कार्मणकाययोग औदारिकमिश्रकाययोगः वैक्रियमिश्रकाययोगश्च तत्र

कार्मणकाययोगोऽपांतरालगतावुत्पत्तिप्रथमसमये च शेषकालं तु तिर्यङ्मनुष्ययोरौदारिकमिश्रकाययोगः
संज्ञिनोऽपर्याप्तस्य देवनारकेषूत्पद्यमानस्य वैक्रियमिश्रकाययोगो द्रष्टव्यो न शेषस्य असंभवात् मिश्रता चात्र का
र्मणेन सह द्रष्टव्या अत्रैव मतांतरमुपदर्शयन्नाह एषु सर्वनिर्द्दिष्टेषु शेषपर्याप्त्यपेक्षया अपर्याप्तेषु तनुपर्याप्त्या पर्याप्तेषु
शरीरपर्याप्तेष्वित्यर्थः औदारिकमौदारिककाययोगं अन्ये केचिदाचार्याः शीलांकाद्यः प्रतिपादयंतीति शेषः शरी
रपर्याप्त्या हि परिसमाप्तिवस्थायां किल तेषां शरीरपरिस्फुटं निष्पन्नमिति कृत्वा तथा च तद्ग्रंथः औदारिककाययोगस्तिर्यङ्मनु
ष्ययोः शरीरपर्याप्तेरूर्द्ध्वं तदारतस्तु संज्ञिनो मिश्र इति नन्वनया युक्त्या संज्ञिनोऽपर्याप्तस्य देवनारकेषूत्पद्यमानस्य तनुप
र्याप्त्या पर्याप्तस्य वैक्रियमपि शरीरमुत्पद्यत एव किमिदं तन्नोक्तमिति उच्यते उपलक्षणत्वात् एतदपि द्रष्टव्यमिति चेदे १
वः यद्यसंज्ञपर्याप्ता लब्ध्यपर्याप्तिका ये अंतर्मुहूर्त्तायुषो द्रष्टव्यास्ते च तिर्यङ्मनुष्या एव घटंते तेषामेवांतर्मुहूर्त्तायुष्कत्वसंभव
त् न देवनारकास्तेषां जघन्यतोऽपि दशवर्षसहस्रायुष्कत्वात् लब्ध्यपर्याप्तकाश्चापि जघन्यतोऽपि इंद्रियपर्याप्त्यापरिसमाप्त
या म्रियंते नार्वाग् इत्युक्तमागमाभिप्रायेण ततस्तेषां लब्ध्यपर्याप्तिकानां शरीरपर्याप्त्या पर्याप्तानामौदारिकशरीरमु
त्पद्यते न वैक्रियमिति दोषः किं चान्यमतकथनेनायमभिप्रायः सूच्यते यद्यपि तेषां शरीरपर्याप्तिः समजनिष्ट तथापि इंद्रि
योच्छ्वासादीनामद्याप्यनिष्पन्नत्वेन शरीरस्यासंपूर्णत्वात् कार्मणस्याप्यद्यापि व्याप्रियमाणत्वादौदारिकमिश्रमेव ते
षां युक्त्या घटमानकमिति ॥४॥ सव्वे सन्निपज्जत्ते उरलं सुहुमे सभासु तं चउसु बायरि सविउव्विदुगं पज्जसंनिसु बारउवउग
॥५॥ व्या० सर्वे पंचदशापि योगा भवंति तथाहि चतुर्द्धा मनोयोगः चतुर्द्धा वाग्योगः सप्तधा काययोगः केवलाद् संज्ञिपर्या
प्ते संज्ञी वा सोऽपर्याप्तश्च संज्ञिपर्याप्तस्तस्मिन् संज्ञिपर्याप्ते न चौदारिकमिश्रवैक्रियमिश्रकार्मणकाययोगाः कथं संज्ञिप।

र्याप्तः स्य घटंते तेषामपर्याप्तावस्थाभावित्वादुच्यते वैक्रियमिश्रं संयतादेर्वैक्रियं प्रारभमाणस्य प्राप्यते औदारिकमिश्रका
र्मणकाययोगौ तु केवलिनः समुद्घातावस्थायां यदाह भगवान् भद्रबाहुस्वामिवाचकवरः औदारिकप्रयोक्ता प्रथमाष्टमसमय
योरसाविष्टः मिश्रौदारिकयोक्ता सप्तमषष्ठद्वितीयेषु १ कार्मणशरीरयोगी चतुर्थके पंचमे तृतीये चेति पर्याप्तस्य स्थूलस्यै
केंद्रिये औदारिककाययोगो भवति पर्याप्तशब्द इह सर्वेष्वपि पदेषु संबध्यते इति पदानां क्रमस्तु कमणिन्यायेन सर्वत्र योज्यः चतुर्षु
द्वींद्रियत्रींद्रियचतुरिंद्रियासंज्ञिपंचेंद्रियेषु पर्याप्तेषु तदेवौदारिकं भवति किं केवलं नेत्याह सत्यासत्यामृषाभाषया असत्या
मृषास्वरूपया विकलेषु असच्चमोसत्ति वचनानुवर्तनात् तिसत्याषंको ऽर्थः विकलत्रिकासंज्ञिपंचेंद्रियेषु पर्याप्तेषु औदारि
ककाययोगः १ असत्यामृषालक्षणो वाग्योगो द्वितीयोऽर्थः तदपि च अनुवर्ततत दौदारिकं सह वैक्रियद्विकेन वैक्रियवैक्रियमि
श्रलक्षणेन वर्तत इति सवैक्रियद्विकं बादरैकेंद्रियपर्याप्ते भवति अयमर्थो बादरैकेंद्रियपर्याप्ते वैक्रियकाययोगमौदारि
ककाययोगः वैक्रियकाययोगः २ वैक्रियमिश्रकाययोगलक्षणाः त्रयो योगा भवंति तत्रौदारिककाययोगः पृथ्व्यंबु
तेजोवनस्पतीनां वैक्रियद्विकं तु वायुकायस्यैवेति प्ररूपिताः जीवस्थानेषु योगाः सांप्रतमुपयोगाः प्ररूपणावसरप्राप्तास्ते
च द्वादश तद्यथा मतिज्ञान १ श्रुतज्ञान २ अवधिज्ञान ३ मनःपर्यवज्ञान ४ केवलज्ञान ५ पंच ज्ञानानि मत्यज्ञान १ श्रुताज्ञान २
विभंगरूपाणि त्रीण्यज्ञानानि चक्षुर्दर्शन १ अचक्षुर्दर्शन २ अवधिदर्शन ३ केवलदर्शनरूपाणि चत्वारि दर्शनानीत्येतानुप ३६
योगान् जीवस्थानकेषु दर्शयितुमाह पज्जसंनिसु बारस उवउग पज्जस्सिन्न पर्याप्त उच्यते ततः पर्याप्ताश्चते संज्ञिनश्च पर्या
प्तसंज्ञिनस्तेषु पर्याप्तसंज्ञिषु द्वादशापि उपयोगा भवंति ते च क्रमेणैव न तु युगपत् उपयोगानां तथा जीवस्वाभाव्यतो योगप
द्यासंभवात् उक्तं च समएदो एग वउगा इति श्रीभद्रबाहुस्वामिपादा अप्याहुः नाणंमि दंसणंमि अ पत्तो एगयरयंमि उवउत्ता स

॥ ५ ॥

व्वस्स केवलिस्सा युगवं दो नत्थि उवओगा इति ७ ६ पज्जचउरिंदिअसन्निसु दुदंस दुअनाण दससु चक्कु विणा सन्निअपज्जे म
णनाण चक्कु केवलदुगविहूणा ६ व्याख्या चतुरिंद्रियासंज्ञिनः पर्याप्ताश्चते चतुरिंद्रियासंज्ञिनश्च तेषु पर्याप्तचतुरिंद्रियासंज्ञिषु
चत्वार उपयोगा भवंतीत्याह दुदंसदुअनाणत्ति दर्शनं दर्शनं द्वयोर्दर्शयोः समाहारो द्विदर्शं चक्षुर्दर्शनाचक्षुर्दर्शनल
क्षणं द्वयोरज्ञानयोः समाहारो द्व्यज्ञानं मत्यज्ञान १ श्रुताज्ञान २ चक्षुर्दर्शनाचक्षुर्दर्शनलक्षणाश्चत्वार उपयोगा भवंति
दशसु जीवस्थानकेषु पर्याप्तापर्याप्तसूक्ष्मबादरैकेंद्रिय ४ द्वींद्रियत्रींद्रिय २ अपर्याप्तचतुरिंद्रिया ८ संज्ञिपंचेंद्रियलक्ष
दशसु जीवस्थानकेषु चक्षुर्दर्शनवर्जा अचक्षुर्दर्श
णेषु पूर्वोक्ता श्चत्वार उपयोगाश्चक्षुर्दर्शनं विना भवंति अयमर्थः पूर्वोक्तदशसु जीवस्थानकेषु चक्षुर्दर्शनवर्जा अचक्षुर्दर्श
नं मत्यज्ञानं श्रुताज्ञानं श्रुताज्ञानलक्षणास्त्रयः उपयोगा भवंति न तु स्पर्शनेंद्रियावरणक्षयोपशमसंभवात्तत्त्वमार्तिरे
केंद्रियाणां यत्तु श्रुतं तत्कथं संजाघटीतीति भाषालब्धिश्रोत्रेंद्रियलब्धिमतो हि तदुपपद्यते नान्यस्य तदुक्तं भावसुयं भासा
सोअलद्धिणो जुज्जए न इअरस्स भासाभिमुहस्स सुयं सोऊण य जं हविज्जा हित्ति उच्यते इह तावदेकेंद्रियाणामाहारादि
संज्ञा विद्यते तथास्त्वे ऽभिधानात् संज्ञा त्वभिलाष उच्यते यदवादि परोपकारस्फूर्तिः श्रीहरिभद्रसूरिभिरावश्यकटीकायां ३७
आहारसंज्ञा आहाराभिलाषः क्षुद्वेदनीयप्रभवः खल्वात्मपरिणामविशेष इति अभिलाषश्च ममैवंरूपं वस्तु पुष्टिक
रि तद्यदीदृशमवाप्यते ततः समीचीनं भवतीत्येवं शब्दार्थोल्लेखानुबद्धः स्वपुष्टिनिमित्तं तत्प्रतिनियतवस्तुप्राप्त्यध्यवसाय
रूपः स च श्रुतमेव शब्दार्थपर्यालोचनानुसारित्वात् श्रुतस्यैव चैतल्लक्षणत्वात् यदवादि दलितप्रवादिकवादाः श्रीजिनभद्रग
णिक्षमाश्रमणपादा इंदियमणोनिमित्तं जं विन्नाणं सुआणुसारेणं नियय[?]त्तिसमत्थं तं तावसुयं मई सेसं सुआणुसारे
णंति शब्दार्थपर्यालोचनानुसारेण केवलमेकेंद्रियाणामव्यक्त एव कश्चनाप्यनिर्वचनीयः शब्दार्थोल्लेखो ऽवसेयः अन्यथा

रादिसंज्ञानुपपत्तेः यदप्युक्तं नाम लब्धिश्रोत्रेंद्रियलब्धिविकलत्वादेकेंद्रियाणां श्रुतमनुपपन्नमिति तदप्यसमीक्षित
रभिधानं तथाहि बकुलादेः स्पर्शनेंद्रियातिरिक्तद्रव्येंद्रियलब्धिविकलत्वेऽपि किमपि सूक्ष्मं भावेंद्रियपंचकविज्ञानम
प्युपलभ्यते पंचिंदिउव्व बउलो नरुव्व सव्वविसउवलंभाउ इत्यादिवचनप्रामाण्यात् तथा भावश्रोत्रेंद्रियलब्धिविकलत्वे
ऽपि तेषां किमपि सूक्ष्मं श्रुतमपि न विरुध्यते अन्यथाऽऽहारादिसंज्ञानुपपत्तेः यदाह यथा सुप्तस्य साधोः श्रुतोपयोगरूपाकारस्पर्शरूपी कल्पः श्रीजि
नभद्रगणिक्षमाश्रमणैः जह सुहुमं भावेंदियनाणं दव्विंदियाण विरहे वि दव्वसुयाभावंमि वि भावसुयं पत्थिवाईणं
ति संज्ञी चासौ पर्याप्तश्च संज्ञिपर्याप्तस्तस्मिन् संज्ञिपर्याप्ते मनःपर्यवज्ञानचक्षुर्दर्शनकेवलज्ञानकेवलदर्शनलक्ष
णाधिकविहीनाः शेषा मतिज्ञानश्रुतज्ञानावधिज्ञानमत्यज्ञानश्रुताज्ञानविभंगज्ञानाचक्षुर्दर्शनावधिदर्शनरूपा अष्टावु
पयोगा भवंति उक्ता जीवस्थानेषूपयोगाः सांप्रतं जीवस्थानेष्वेव लेश्याः प्रतिपादयिषुराह ७ सन्निदुगि छलेस अप
ज्जबायरे पढम चउ तिसेसेसु सत्तठ बंधुदीरण संतुदया अठ तेरससु ७ व्या० संज्ञिनो द्विकं पर्याप्तापर्याप्तलक्षणं संज्ञि
द्विकं तस्मिन् संज्ञिनि पर्याप्ते संज्ञिन्यपर्याप्ते चेत्यर्थः षट् लेश्याः कृष्णनीलकापोततेजःपद्मशुक्ललक्षणा भवंति अपर्याप्त
बादरे प्रथमाश्चतस्रः कृष्णनीलकापोततेजोरूपा भवंति तेजोलेश्या कथमस्मिन् प्राप्यत इति चेदुच्यते यदा पुढवीआउवण
स्सइगब्भे पज्जत्तसंखजीवीसु सग्गचुयाणं वासो सेसा पडिसेहिया ठाणा इति वचनात् कश्चनापि देवो स्वर्गलोकाच्च्यु
तः सन् बादरैकेंद्रियतयाऽस्पृष्टकं तत्र शुभमध्ये समुत्पद्यते तदा तस्य घंटालालान्यायेन सा प्राप्यत इत्यदोषः तिसेसु त्ति ११
च ग्राह्यमनुवर्तते प्रथमास्तिस्रः कृष्णनीलकापोतलक्षणाः शेषेष्वागुक्तापर्याप्तपर्याप्तसंज्ञिपंचेंद्रियापर्याप्त
बादरैकेंद्रियवर्जितेषु अपर्याप्तपर्याप्तसूक्ष्मैकेंद्रिय २ द्वींद्रिय ४ त्रींद्रिय ६ चतुरिंद्रिय ८ असंज्ञिपंचेंद्रिय १० पर्याप्तबा

दरैकेंद्रियलक्षणेष्वेकादशसु जीवस्थानेषु भवंति नाद्याः तेषां सदैवाशुभपरिणामत्वात् शुभपरिणामरूपाश्च तेजोलेश्या
दयस्तदेवं जीवस्थानकेषु लेश्या अभिधाय सांप्रतमेतेष्वेव बंधोदीरणासत्तोदयस्थानचतुष्टयमभिधित्सुराह सत्त
ठ बंध इत्यादि सप्त वा अष्ट वा सप्ताष्टाः सुजर्थे संख्यासंख्येये संख्यया बहुव्रीहिरिति सूत्रेण बहुव्रीहिसमासो यथा द्वि
त्रा इत्यादौ बंधश्च उदीरणा च बंधोदीरणे सप्ताष्टानां बंधोदीरणे सप्ताष्टबंधोदीरणे त्रयोदशसु जीवस्थानकेषु संज्ञिप
र्याप्तवर्जितेषु शेषेषु भवतः एतदुक्तं भवति अपर्याप्तसूक्ष्मैकेंद्रिय १ पर्याप्तसूक्ष्मैकेंद्रिय २ अपर्याप्तबादरैकेंद्रिय ३
पर्याप्तबादरैकेंद्रिय ४ अपर्याप्तद्वींद्रिय ५ पर्याप्तद्वींद्रिय ६ पर्याप्तत्रींद्रिय ७ पर्याप्तत्रींद्रिय ८ अपर्याप्तचतुरिंद्रिय ९ पर्या
प्तचतुरिंद्रिय १० अपर्याप्तासंज्ञिपंचेंद्रिय ११ पर्याप्तासंज्ञिपंचेंद्रिय १२ अपर्याप्तसंज्ञिपंचेंद्रिय १३ रूपेषु त्रयोदशसु जीव
स्थानकेषु सप्तानामष्टानां वा बंधः सप्तानामष्टानां वा उदीरणा तथाहि यदानुभूयमानभवायुषस्त्रिभागनवभागादि
रूपे शेषे सति परभवायुर्बध्यते तदा अष्टानामपि कर्मणां बंधः शेषकालं त्वायुषो बंधाभावात् सप्तानामेव बंधः तथा
यदा अनुभूयमानभवायुरुदयावलिकाशेषं भवति तदा सप्तानामुदीरणा अनुभूयमानभवायुषोऽनुदीरणात् आ
वलिकाशेषस्योदीरणाऽनर्हत्वात् उदीरणा हि उदयावलिकाबहिर्वर्तिनीस्थितिस्थः सकाशात् कषायसहितेन
कषायासहितेन वा योगकरणेन दलिकमाकृष्योदयसमयप्राप्तदलिकेन सहानुभवनं तथा चोक्तं कर्मप्रकृति
चूर्णौ उदयावलिआ बाहिरिल्लठिईहिंतो कसायसहिया सहिएणं योगकरणेणं दलियमाकड्ढिय उदयपत्तदलिए
णं समं अणुभवणं उदीरणा ततः कथमावलिकागतस्योदीरणा भवति तत्परभवायुषस्तदोदीरणासंभवस्तस्योदया
भावात् अनुदितस्य च उदीरणानर्हत्वात् शेषकालं त्वष्टानामुदीरणा सत्तोदयश्च प्रागुक्तवत् सत्तोदया अष्ट

नामैव कर्म्मणां त्रयोदशसु जीवस्थानकेषु सर्वेष्वपि भवतः तथाहि एतेषु त्रयोदशसु जीवस्थानकेषु सर्वकालमष्टानाम
पि सत्ता यतो ऽष्टानामपि कर्म्मणां सत्ता उपशांतमोहगुणस्थानकं यावदनुवर्त्तते एते च जीवा उत्कर्षतो यथासंभवमविरत
॥ वर्त्तितण्ठेति ॥ ३ सम्यग्दृष्टिगुणस्थानकसंभवइति एवमुदयोप्येतेषु जीवस्थानकेष्वष्टानामेव कर्म्मणां द्रष्टव्यः तथाहि सूक्ष्मसंपराय
गुणस्थानकं यावदष्टानामपि कर्म्मणामुदयो ऽवाप्यते एतेषु च जीवस्थानकेषूत्कर्षतो ऽपि यथासंभवमविरतसम्यग्दृष्टि
गुणस्थानकसंभवइति ॥ ७ ॥ सत्तछव्बेगबंधो संतुदयासत्तअट्ठचत्तारि सत्तट्ठछपंचदुगं उदीरणासंनिपज्जत्ते ॥ व्या
ख्या संज्ञी चासौ पर्याप्तश्च संज्ञिपर्याप्तस्तस्मिन् संज्ञिपर्याप्ते चत्वारो बंधो भवति तद्यथा सप्तानां प्रकृतीनां बंध एकः अ
ष्टानां प्रकृतीनां बंधो द्वितीयः षण्णां प्रकृतीनां बंधस्तृतीय एकस्याः प्रकृते र्बंधश्चतुर्थो बंधः तत्रायुर्वर्ज्जानां सप्तानां कर्म्मप्र
कृतीनां बंधो जघन्येनांतर्मुहूर्त्तं यावत् उत्कर्षेण त्रयस्त्रिंशत् सागरोपमाणि षण्मासोनानि अंतर्मुहूर्त्तोनपूर्वकोटि
त्रिभागाभ्यधिकानि तथा आयुर्बंधकाले तासामष्टानां बंधो ऽजघन्योत्कर्षेणांतर्मुहूर्त्तप्रमाणः आयुषि बध्यमाने ऽष्टानां प्र
कृतीनां बंधः प्राप्यते आयुषश्च बंधो ऽंतर्मुहूर्त्तमेव कालं भवति न ततो ऽप्यधिकं तथा एताः चाष्टौ वायुर्मोहनीयवर्ज्जा
ः षट् एतासां च जघन्येनैकं समयं बंधः तथाहि ज्ञानावरणदर्शनावरणवेदनीयनामगोत्रांतरायरूपाणां षण्णां प्रकृती
नां बंधः सूक्ष्मसंपरायगुणस्थाने तत्र चोपशमश्रेण्यां कश्चिदेकं समयं स्थित्वा द्वितीयसमये भवक्षयेण देवंगतः सन्
अविरतो भवति अविरते चावश्यं सप्तप्रकृतीनां बंधो जघन्येनैकं समयं यावत् उत्कर्षेण त्वंतर्मुहूर्त्तं सूक्ष्मसंपरायगु १८
णस्थानस्यांतर्मुहूर्त्तिकत्वात् तथा सप्तानां प्रकृतीनां बंधव्यवच्छेदे सत्येकस्याः सातवेदनीयरूपायाः प्रकृतेर्बंधः स
च जघन्येनैकं समयं एकसमयवानुपशमश्रेण्यामुपशांतमोहगुणस्थाने प्राग्वद्भावनीया उत्कर्षेण तु देशोना पूर्व

कोटिं यावत् स चोत्कर्षतः कस्य वेदितव्य इति चेत् उच्यते यो गर्भवासे माससप्तकमुषित्वा ऽनंतरं शीघ्रमेव योनिनिष्क्रमणे
जन्मना जातो वर्षाष्टकाच्चोर्ध्वं संयमं प्रतिपन्नः प्रतिपत्त्यनंतरं च क्षपकश्रेणिमारूढो ऽसावुत्पादितकेवलज्ञानदर्शनस्तस्य सयोगि
केवलिनो वेदितव्यः अयं चात्र तात्पर्यार्थः मिथ्यादृष्ट्याद्यप्रमत्तांतेषु सप्तानामष्टानां वा बंधः आयुर्बंधाभावादपूर्वकरणानि
वृत्तिबादरयोश्च सप्तानां बंधः सूक्ष्मसंपराये षण्णां बंधः उपशांतमोहादिष्वेकस्याः प्रकृतेर्बंधः तथा सत्त्वउदयश्च प्राकृतत्वात्सं
तोदया ततः संज्ञिपर्याप्ते सत्तामाश्रित्य त्रीणि स्थानानि तद्यथा सत्त अट्ठ चत्तारि एवमुदयमप्याश्रित्य त्रीणि स्थानानि तद्यथा सप्त
अष्ट चत्वारि तत्र सर्वप्रकृतिसमुदायो ऽष्टौ ॥ तासां चाष्टानां सत्ता अभव्यानधिकृत्यानाद्यपर्यवसाना भव्यानधिकृत्यानादि
सपर्यवसाना तथा मोहे क्षीणे सप्तानां सत्ता सा च जघन्योत्कर्षेणांतर्मुहूर्त्तप्रमाणा सा हि क्षीणमोहगुणस्थाने तस्य च काल
मानमंतर्मुहूर्त्तं घातिकर्म्मचतुष्टयक्षये च चतसृणां सत्ता सा च जघन्येनांतर्मुहूर्त्तप्रमाणा उत्कर्षेण तु देशोना पूर्वकोटिमाना
तथा सर्वप्रकृतिसमुदायो ऽष्टौ तासां चोदयो ऽभव्यानाश्रित्य अनाद्यपर्यवसानः भव्यानाश्रित्यानादिसपर्यवसानः उपशां
तमोहगुणस्थानकान् प्रतिपतितानाश्रित्य पुनः सादिसपर्यवसानः स च जघन्येनांतर्मुहूर्त्तप्रमाण उपशमश्रेणीतः प्र
तितस्य पुनरप्यंतर्मुहूर्त्तेन कस्याप्युपशमश्रेणिप्रतिपत्तेः उत्कर्षेण तु देशोनापार्द्धपुद्गलपरावर्त्तः तथा ता एवाष्टौ मोहनीय
वर्ज्जाः सप्त तासां समुदायो जघन्येनैकं समयं तथाहि मोहवर्ज्जासप्तानां प्रकृतीनामुदय उपशांतमोहे क्षीणमोहे चावाप्य
ते तत्र कश्चिदुपशांतगुणस्थानके एकं समयं स्थित्वा द्वितीयसमये भवक्षयेण देवं गच्छन्नविरतो भवति अविरते चावश्यम
ष्टानां प्रकृतीनामुदयस्ततः सप्तानामुदयो जघन्येनैकं समयं यावदवाप्यते उत्कर्षेण त्वंतर्मुहूर्त्तं उपशांतमोहक्षीणमोह
गुणस्थानयोरांतर्मौहूर्त्तिकत्वात् तथा घातिकर्म्मवर्ज्जाश्चतस्रः प्रकृतयस्तासां च जघन्यत उदयश्चांतर्मौहूर्त्तिकः उत्कर्षेण दे

शोन सर्वकोट्यिमाण इति पिंडार्थः अथायं मिथ्यादृष्टिगुणस्थानकमारभ्य यावदुपशांतमोहगुणस्थानकं तावदष्टानाम
पि सत्ता क्षीणमोहगुणस्थाने सप्तानां सत्ता सयोग्ययोगिगुणस्थानकयोश्चतसृणां सत्ता तथा मिथ्यादृष्टेः प्रभृति सूक्ष्मसंप
रायं यावदष्टानामुदयः उपशांतमोहगुणस्थाने क्षीणमोहगुणस्थाने च सप्तानां प्रकृतीनामुदयः सयोग्ययोगिगुणस्था
नयोश्चतसृणामुदय इति तथा संज्ञिपर्याप्तेरुदीरणास्थानानि पंच तद्यथा सप्ताष्टषट्पंचद्वे इति तत्र यदा अनुभूयमा
न भवायुरावलिकावशेषं तदा तस्यावलिकाप्रविष्टत्वेन तस्यानुदीर्यमाणत्वात् सप्तानामुदीरणा यदा त्वनुभूयमानभवायुराव
लिकावशेषं न भवति तदाष्टानां प्रकृतीनामुदीरणा तत्र मिथ्यादृष्टिगुणस्थानकात् प्रभृति यावत् प्रमत्तसंयतगुण-
स्थानकं तावत्सप्तानामष्टानां चोदीरणा सम्यग्मिथ्यादृष्टिगुणस्थानके तु सदैवाष्टानामेवोदीरणा आयुष आवलि
काशेषे मिश्रगुणस्थानस्याभावात् तथाप्रमत्तगुणस्थानकात् प्रभृति सूक्ष्मसंपरायगुणस्थानकस्यावलिकाशे
षो न भवति तावद्वेदनीयायुर्वर्जानां षण्णां प्रकृतीनामुदीरणा तदानीमतिविशुद्धत्वेन वेदनीयायुरुदीरणायोग्य
अध्यवसायस्थानाभावात् आवलिकाशेषे तु मोहनीयस्यावलिकाप्रविष्टत्वेनोदीरणाया असंभवात् ज्ञानाव
रणदर्शनावरणनामगोत्रांतरायाणामेवोदीरणा एतेषामेव चोपशांतमोहगुणस्थानके उदीरणा क्षीणमोहगुणस्था
नकेपि एतेषामेव यावदावलिकामात्रमवशेषो न भवति आवलिकावशेषे तु ज्ञानावरणदर्शनावरणांतरायाणामप्याव
लिकाप्रविष्टत्वान्नोदीरणेति द्वयोरेव नामगोत्रयोरुदीरणा एवं सयोगिकेवलिगुणस्थानकेपि अयोगिकेवलि ७९
गुणस्थानके तु वर्त्तमानो जीवः सर्वथानुदीरक एव ननु तदानीमप्ययोगिकेवलिगुणस्थानके भवोपग्रा
हककर्मचतुष्टयोदयवान् वर्त्तते ततः कथं तदापि तयोर्नामगोत्रयोरुदीरको न भवति नैष दोषः उदयसद्भावेपि योग

सव्यपेक्षत्वादुदीरणायास्तदानीं च तस्यायोगित्वादिति तदेवं जीवस्थानकेषु गुणस्थानकाद्यभिधाय सांप्रतं
मार्गणास्थानेषु जीवस्थानकादि विवक्षुस्तान्येव तावन्निर्दिशन्नाह ॥ गइ इंदिए काए जोए वेए कसाय नाणेसु संज
म दंसण लेसा भव सम्मे सन्नि आहारे ॥ ९ ॥ व्याख्या गम्यते तथाविधकर्मसचिवैर्जीवैः प्राप्यत इति गतिर्नारकत्वादिपर्यायपरि
णतिः इंदनादिंद्र आत्मा ज्ञानैश्वर्ययोगात् तस्येदमिंद्रियं इंद्रियमिति सूत्रेणाभीष्टरूपनिष्पत्तिः ततो गतिश्च इंद्रियं च
गतींद्रिये तस्मिन् गतींद्रिये एवमन्यत्रापि द्वंद्वः कार्यः चः समुच्चये २ चीयते यथायोगमौदारिकादिवर्गणागणैरुप
चयं नीयत इति कायः चितिदेहावासोपसमाधाने कश्चादेरिति घञ्प्रत्यय आदेश्च ककारः ३ युज्यते धावनवल्ग
नादिचेष्टास्वात्मानेनेति पत्रामन्नीति योगः ४ वेद्यते अनुभूयते इंद्रियोद्भूतं सुखमनेनेति वेदः ५ कष शिष जष झष
शषादिदंडकधातुः कष्यंते हिंस्यंते परस्परमस्मिन् प्राणिन इति कषः संसारः कषमयंते गच्छंत्येभिर्जंतवः इति कषा
याः यद्वा कषस्यायो लाभो येभ्यस्ते कषायाः ६ ज्ञातिर्ज्ञानं यद्वा ज्ञायते परिच्छिद्यते वस्त्वनेनेति ज्ञानं सामान्यविशेष
आत्मके वस्तुनि विशेषग्रहणात्मको बोध इत्यर्थः ७ संयमनं संयमः सम्यगुपरमणं सावद्ययोगादिति संयमः यद्वा संयम्यते नि
यम्यते आत्मा पापव्यापारसंभारादनेनेति संयमः संनिव्युपाद्यम इति सूत्रेणाल्प्रत्ययः यद्वा सम्यग्योगम्यनायमाः प्रा
णातिपातानृतस्तेयमैथुनादानाब्रह्मपरिग्रहविरमणलक्षणा अस्मिन्निति संयमः चारित्रं ८ दृश्यते विलोक्यते वस्त्वने
नेति दर्शनं यद्वा दृष्टिर्दर्शनं सामान्यविशेषात्मके वस्तुनि सामान्यात्मको बोध इत्यर्थः ९ लिप्यते श्लिष्यते कर्मणा स
ह आत्मा अनयेति लेश्या १० भवति परमपदयोग्यतामासादयतीति भव्यः सिद्धिगमनयोग्यो भव्यगेयजन्यरम्याप्लाव्यापात्या वा
भवेति कर्त्तर्यपि प्रत्ययः सूत्रे च यकारलोपः प्राकृतत्वात् ११ सम्यगिति सम्यग्दृष्टेः प्रशंसार्थो विरुद्धार्थो वा सम्यक् इ १

DR BHAU DAJI MEMORIAL

तद्भावः सम्यक्त्वं प्रशस्तो मोक्षाऽविरोधी वा प्रशमसंवेगादिलक्षणः आत्मधर्म इति यावत् यदाहुः श्रीउव्वाञ्जस्वामिपा
दाः सेयसंमत्ते पसत्थं संमत्तमोहणीयकम्माणुवेयणोवसमखयसमुत्थे पसमसंवेगाइलिंगे सुहे आयपरिणामे पन्नत्ते इ
१२ संज्ञानं संज्ञा भूतभवद्भाविभावस्वभावपर्यालोचनं सा विद्यते येषां ते संज्ञिनो बाहुल्यादिसंस्तेऽ इति हेत्वपरः विशि
ष्टस्मरणादिरूपमनोविज्ञानसहितेंद्रियपंचकसमन्विता इत्यर्थः १३ ओजआहारलोमाहारकवलाहाराणामन्यतमा
हारस्य निगृह्णातीत्याहारः अविग्रहाहारक इत्यर्थः ओजआहारादीनां लक्षणमिदं सरीरेणोयाहारो तयाइफासे
ण लोमआहारो पक्खेवाहारो पुण कावलिओ होइ नायव्वो उक्तानि मूलद्वाराणि चतुर्दश मार्गणास्थानानि इदानीमेते
षामेवोत्तरभेदानाह ब १४ सुरनरतिरिनिरयगई इगबितिचउपणिंदिछक्काया भूजलजलणानिलवण तसा य मण
वयणतणु जोगा १० व्या० इह गतिः तत्र सुष्ठु राजंते इति सुराः यद्वा सुष्ठु रांति ददति प्रणतानामीप्सितमर्थं ज्वलन
१ धिप सुस्थित इवलवणजलधीमवपीड नाद्देनत्वे तिसुराः यद्वा सुरत ऐश्वर्यदीप्त्योः सुरंति विशिष्टमैश्वर्यमनुभवंति दिव्या
भरणसंसारसंसारसमभ्यासरूढनिजशरीरकांत्या च दीप्यंते इति सुराः सुरेषु विषये गतिः सुरगतिः १ नृणंति विवेकमासा
द्य नयधर्मपरा भवंतीति नरा मनुष्यास्तेषां विषये गतिः नरगतिः तिरि त्ति प्राकृतत्वात् तिरोंचति गच्छंतीत्येवं तिर्यंचः सुख
निमित्तं चैतन्यहेतुनिमित्तं तिर्यग्गतिनाम एते चैकेंद्रियादयस्तेन तिर्यक्ष्वविषये गतिस्तिर्यग्गतिः नरानुपलक्षणत्वात् ति
रश्चोपि प्रकृतपापकारिणः कायंती वा क्रायंतीवेति नरका नारकावासास्तत्रोत्पन्ना जंतवोऽपि नारकाः नरको वा विद्यते ८०
येषां ते अस्तादित्वात् इत्यप्रत्ययेन नरकास्तेषु विषये गतिः नरकगतिः १ इहापि इंद्रियशब्दस्य प्रत्येकं संबंधादेकेंद्रियद्वी
इय त्रीन्द्रिय चउरिंद्रिय पंचेंद्रिया इति २ षट्कायाः भूः पृथ्वी जलमापः ज्वलनं तेजः अनिलो वायुः वणत्ति वनस्पतिः त्रसा

द्वींद्रियादयः ततः प्रत्येकं कायशब्दस्य योगात् पृथिव्येव कायः शरीरं यस्य स पृथिवीकायः एवमप्कायः तेजस्कायः वायु
कायः वनस्पतिकायः त्रसकाय इति ३ चः समुच्चये योगशब्दस्य प्रत्येकं संबंधात्त्रयो योगाः तथाहि मनोयोगः वचन
योगः तनुयोगः तत्र तनुयोगेन मनःप्रायोग्यवर्गणास्योगृहीत्वा मनोयोगेन परिणमितानि वस्तुचिंताप्रवर्तकानि द्रव्या
णि मन इत्युच्यंते तेन मनसा सहकारिकारणभूतेन योगो मनोयोगो मानाविषयो वा योगो मनोयोगः उच्यते इति वचनं भा
षापरिणामापन्नः पुद्गलद्रव्यसमूह इत्यर्थः तेन वचनेन सहकारिकारणभूतेन योगो वचनयोगो वचनविषयो वा योगः
तनोतीति विस्तारयत्यात्मप्रदेशानमिति तनुरौदारिकादिशरीरं तया सहकारिकारणभूतया योगस्तनुयोगः तनुविषयो वा १
योगस्तनुयोगः ३ः १५ वेयनरित्थिनपुंसा कसाय कोहमयमायलोहत्ति ४ मइसुयअवहिमणकेवलविभंगमइसुयअन्न
नाणसागारा ४ व्या० वेदशब्दस्य प्रत्येकं संबंधात्त्रयो वेदाः नरवेदः स्त्रीवेदः नपुंसकवेदः तत्र नरस्य पुरुषस्य स्त्रियं प्रत्यभिला
षो नरवेदः स्त्रियो योषितः पुरुषं प्रत्यभिलाषः स्त्रीवेदः नपुंसकस्य षंढस्य स्त्रीपुरुषौ प्रत्यभिलाषो नपुंसकवेदः कषायाश्च
त्वारः क्रोधकषायः मदत्ति मदो मानोऽहंकारो गर्व इत्यर्थः मानकषायः मायाकषायः लोभकषाय इति शब्दः कषायाणाम
नंतानुबंध्यादिभेदभेदसूचनार्थः स्यात् चेवमायलोभत्ति कस्यत्वं प्राकृतत्वात् मइसुयवद्दीत्यादि इहावधिशब्दस्य अकार
लोपात् ज्ञानशब्दस्य प्रत्येकं संबंधात् एवं प्रयोगः मतिज्ञानं श्रुतज्ञानं अवधिज्ञानं मनःपर्यवज्ञानं केवलज्ञानं तथा वि
भंगमत्यज्ञान श्रुताज्ञानानीति एतानि पंचज्ञानानि त्रीण्यज्ञानानि साकाराणि वर्त्तंत इति वाक्यार्थः भावार्थस्त्वयं बुद्धि
मतिं विज्ञाने मननं मतिः यद्वा मन्यते इंद्रियमनोद्वारेण नियतं वस्तु परिच्छिद्यतेऽनयेति मतिः योग्यदेशावस्थितवस्तुवि
षयमिंद्रियमनोनिमित्तो वगमविशेषः मतिश्चासौ ज्ञानं च मतिज्ञानं १ श्रवणं श्रुतं अभिलापप्लाविता र्थग्रहणहेतुरूप

लब्धिविशेषः एवमाकारं वस्तु घटशब्दाभिलाप्यं जलधारणाद्यर्थक्रियासमर्थमित्यादिरूपतया प्रधानीकृतत्रिकालसा
धारणसमानपरिणामः शब्दार्थपर्यालोचनानुसारी इंद्रियमनोनिमित्तोवगमविशेषः इत्यर्थः श्रुतं च तत् ज्ञानं च श्रुतज्ञा
नं २ अवधानमवधिरिंद्रियाद्यनपेक्षमात्मनः साक्षादर्थग्रहणं अथवा अवशब्दोऽधःशब्दार्थः अव अधो अधो विस्तृतं वस्तु
धीयते परिच्छिद्यतेऽनेनेति अवधिः यद्वा अवधिर्मर्यादा रूपिष्वेव द्रव्येषु परिच्छेदकतया प्रवृत्तिरूपा तदुपलक्षितं ज्ञान
मप्यवधिः अवधिश्च तत् ज्ञानं च अवधिज्ञानं परिः सर्वतोभावेऽयनं अयः अवः इदादिसोऽनकाविसधिकारेऽकितो वेसने
नैणादिकोऽकारप्रत्ययः अयनं गमनं वेदनमिति पर्यायाः परि अवः पर्यवः मनसि मनसो वा पर्यवो वा मनःपर्यवः सर्व
तस्तत्परिच्छेद इत्यर्थः मनःपर्यवश्च तत् ज्ञानं च मनःपर्यवज्ञानं यद्वा मनःपर्यायज्ञानं तत्र संज्ञिभिर्जीवैः काययोगेन गृही
तानि मनःप्रायोग्यवर्गणाद्रव्याणि चिंतनीयवस्तुचिंतनव्यापृतेन मनोयोगेन मनस्त्वेन परिणमय्यालंब्यमानानि मनां
सीत्युच्यंते तेषां मनसां पर्यायाश्चिंतनानुगताः परिणामाः मनःपर्यायास्तेषु तेषां वा संबंधि ज्ञानं मनःपर्यायज्ञानं
यद्वा आत्मस्त्रिर्वस्तु चिंतने व्यापारितानि मनांसि पर्येति अवगच्छतीति मनःपर्यायं कर्मण्यण् इति अणप्रत्ययः मन
ःपर्यायं च तत् ज्ञानं च मनःपर्यायज्ञानं ४ केवलमेकं मत्यादिरहितत्वात् नट्ठंमि उ छाउमत्थिए नाणे इति परममुनि
प्रणीतवचनप्रामाण्यात् शुद्धं वा केवलं तदावरणमलकलंकपंकापगमात् सकलं वा केवलं तत्प्रथमतयैव निःशे
षतदावरणविगमतः संपूर्णोत्पत्तेः असाधारणं वा केवलं अनन्यसदृशत्वात् अनंतं वा केवलं ज्ञेयानंतत्वात् अपर्य ८१
वसितानंतकालावस्थायित्वात् निर्व्याघातं वा केवलं लोके लोके वा क्वापि व्याघाताभावात् केवलं च तत् ज्ञानं च के
वलज्ञानं यथावस्थितसमस्तवस्तुतत्वस्वभावावभासि ज्ञानमिति भावना तथा मतिश्रुतावधिज्ञानान्येव मिथ्यात्वं

कलुषितत्वात् यथाक्रमं मत्यज्ञान श्रुताज्ञान विभंगज्ञानव्यपदेशभांजि भवंति उक्तं च आद्यत्रयमज्ञानमपि भव
ति मिथ्यात्वसंयुक्तमिति विभंग इति विपरीतो भंगो ज्ञेयपरिच्छित्तिप्रकारो यस्मिन् तद्विभंगं विपर्यस्तमवधिज्ञानं विभं
गज्ञानमुच्यते अयमर्थः सह आकारेण ज्ञातिवस्तुप्रतिनियतग्रहणपरिणामरूपेण आगारो उ विसेसो इति वचनाद्विशेषेण व
र्त्तत इति साकाराणि अयमर्थः वक्ष्यमाणानि चत्वारि दर्शनान्यनाकाराणि अमूनि च पंच ज्ञानानि साकाराणि त
थाहि सामान्यविशेषात्मकं ज्ञेयं वस्तु कथमिति चेदुच्यते इह दूरे वृक्षतलतमालतालबकुलाशोकचंपककदंब
जंबूनिंबादिविशिष्टव्यक्तिरूपतयाऽनवधारितं तरुनिकरमवलोकयतः सामान्येन वृक्षमात्रप्रतीतिजनकं यदपरि
स्फुटं किमपि रूपं चकास्ति तत्सामान्यरूपमनाकारं दर्शनमुच्यते निर्विशेषं विशेषाणामग्रहो दर्शनमुच्यते इति वचन
प्रामाण्यात् यत्पुनस्तस्यैव निकटीभवतस्तालतमालशालादिव्यक्तिरूपतयाऽवधारितं तमेव महीरुहसमूहं वस्तुस्वरूप
तो विशिष्टव्यक्तिप्रतीतिजनकं परिस्फुटं रूपमाभाति तद्विशेषरूपं साकारं ज्ञानं प्रमेयप्रभावपारमेश्वरप्रवचनप्रवीण
चेतसः प्रतिपादयंति सह विशिष्टाकारेण वर्त्तत इति कृत्वा तदेवं प्रतिपादितप्रसिद्धप्रमाणाबाधितप्रतीतिवशात् सर्व
मपि वस्तुजातं सामान्यविशेषरूपतयात्मकं भावनीयमिति ७ १२ सामाइअ छेओवट्ठावण परिहार सुहुम अहक्खाय देसजु
यअजया चक्खु अचक्खु ओही केवलदंसण अणागारा १२ व्या० समता ज्ञानदर्शनचारित्राणामायो लाभः समा
यः समाय एव सामायिकं विनयादेराकृतिगणत्वादिकण् प्रत्ययः यद्वा समो रागद्वेषविप्रमुक्तो यः सर्वभूतान्यात्म
वत्पश्यति आयो लाभः प्राप्तिरिति पर्यायाः समस्य आयः समायः समो हि प्रतिक्षणमपूर्वैर्ज्ञानदर्शनचरणपर्यायै
र्भवाटवीभ्रमणसंक्लेशविच्छेदकैर्निरुपमसुखहेतुभिरधःकृतचिंतामणिकामधेनुकल्पद्रुमोपमैर्युज्यते समाय एसाम १

यिकं मूलगुणानामाधारस्ततं सर्वसावद्यविरतिरूपं चारित्रं यदाह श्रावकमुख्यः सामायिकं गुणानामाधारः
खमिव सर्वभावानां न हि सामायिकहीनाश्चरणादिगुणान्विता येन १ तस्माज्जगाद भगवान् सामायिकमेव निरुप
मोपायं शारीरमानसानेकदुःखनाशनस्य मोक्षस्य यद्यपि च सर्वमपि चारित्रमविशेषतः सामायिकं तथापि छेदादि
विशेषैर्विशेष्यमाणमर्थतः शब्दांतरतश्च नानात्वं लभते प्रथमं पुनरविशेषणात् सामान्यशब्द एवावतिष्ठते सामायि
कमिति तच्च द्विधा इत्वरं यावत्कथिकं च तत्रेत्वरं भाविव्यपदेशांतरत्वात् स्वल्पकालं तच्च प्रथमचरमतीर्थकरतीर्थे
भरतैरावतेषु यावद्यापि शैक्षकस्य महाव्रतानि नारोप्यंते तावद्विज्ञेयं आत्मनः कथा यावद्यथास्तेन यावत्क
थं यावज्जीवमित्यर्थः यावत्कथमेव यावत्कथिकं एतच्च भरतैरावतेषु प्रथमपश्चिमवर्जमध्यमद्वाविंशतितीर्थंकि
रतीर्थवर्त्तिरगतसाधूनां महाविदेहतीर्थंकरमुनीनां चावसेयं तेषामुपस्थापनाया अभावात् छेदयत्रि छेदोपस्था
पना तत्र पूर्वपर्यायस्य छेदो नोपस्थापना महाव्रतेषु यत्र चारित्रे तत् छेदोपस्थापनं भरतैरावतप्रथमचरमतीर्थ
कर[+तीर्थ+]एव नान्यत्र तच्च द्विधा सातिचारं निरतिचारं तत्रानतिचारं इत्वरसामायिकस्य शैक्षकस्य यदारोप्यते ती
र्थांतरं वा संक्रामतः साधो यथा श्रीपार्श्वनाथतीर्थाद्वर्द्धमानस्वामितीर्थं संक्रामतः पंचयामधर्मप्रतिपत्तौ सा
तिचारं पुनर्यन्मूलगुणघातिनः पुनर्व्रतोच्चारणं परिहारेति परिहारविशुद्धिकं परिहरणं परिहारः तपोविशेषस्तेन
विशुद्धिर्यस्मिन् चारित्रे तत्परिहारविशुद्धिकं तच्च द्विधा निर्विशमानकं निर्विष्टकायिकं च तत्र निर्विशमान ८२
का विवक्षितचारित्रसेवकाः निर्विष्टकायिका आसेवितविवक्षितचारित्रकायिका स्तद्व्यतिरेकाच्चारित्रम
प्येवमुच्यते इह नवको गणः तत्रैको वाचनाचार्यः चत्वारो निर्विशमानकाश्चत्वारश्चानुचारिणः निर्विशमानक १

नां चायं तपोविशेषः परिहारियाण उ तवो जहन्नमझो तहेव उक्कोसो सीउण्हवासकाले भणिउ धीरेहिं पत्तेयं
१ तत्थ जहन्नो गिम्हे चउत्थ छट्ठं तु होइ मज्झिमउ अट्ठममिह उक्कोसो इत्तो सिसिरे पवक्खामि २ सिसिरे उ जहन्नाई
छट्ठाई दसमचरमगो होई वासासु अट्ठमाई बारसपज्जंतगो नेउ ३ पारणे आयामं पंचसु गह दोसभिग्गहो +१०+
भिक्खे कप्पट्ठिआ वि पइदिण करंति एमेव आयामं ४ एवं छम्मासतवं चरिउं परिहारिया अणुचरंति अणुचरगे
परिहारिय पयट्ठिया जावछम्मासा ५ कप्पट्ठिओ वि एवं छम्मास तवं करेइ सेसा उ अणुपरिहारिगभावं वयंति क
प्पट्ठिगत्तं च ६ एवं सो अट्ठारसमासपमाणो उ वण्णिओ कप्पो संखेवओ विसेसो विसेससुत्ताउ नायव्वो ७ कप्पस
मत्तीइ तयं जिणकप्पं वा उविंति गच्छं वा पडिवज्जमाणगा उण जिणस्स गासे पवज्जंति ८ तित्थयरसमीवासे
व गस्स पासे व नाणओ अन्नस्स ९ इति संवरणं परिहारविशुद्धिकाः कस्मिन् क्षेत्रे काले वा स्युरिति उच्यते इह क्षेत्रादि
निरूपणार्थं विंशतिद्वाराणि तद्यथा क्षेत्रद्वारं १ कालद्वारं २ चारित्रद्वारं ३ तीर्थद्वारं ४ पर्यायद्वारं ५ आगमद्वारं ६
वेदद्वारं ७ कल्पद्वारं ८ लिंगद्वारं ९ लेश्याद्वारं ध्यानद्वारं गणद्वारं १२ अभिग्रहद्वारं १३ प्रव्रज्याद्वारं १४ मुंडापनद्वा १
रं १५ प्रायश्चित्तविधिद्वारं १६ कारणद्वारं १७ निःप्रतिकर्मद्वारं १८ भिक्षाद्वारं १९ वंधद्वारं २० तत्र क्षेत्रे द्विधा मार्ग
णा जन्मतः सद्भावतश्च यत्र क्षेत्रे जातस्तत्र जन्मतो मार्गणा यत्र च कल्पे स्थितो वर्त्तते तत्र सद्भावतः उक्तं च खि
त्ते दुहेह मग्गण जम्मणउ संतिभावउ जम्मण उ जहिं जाउ संतीभावो य जहिं कप्पो १ तत्र जन्मतः सद्भावतश्च
पंचसु भरतेषु पंचस्वैरवतेषु न तु महाविदेहेषु न चैतेषां संहरणमस्ति जिनकल्पिकादिवत्संहरणतः सर्वास्वक
र्मभूमिषु अकर्मभूमिषु वा प्राप्येरन् उक्तं च खित्ते भरहेरवएसु जंति संहरणवज्जियानियमा कालद्दारे अवस

र्पिण्यां तृतीये चतुर्थे वारके जन्मसद्भावं प्रतीत्य भवेऽपि उत्सर्पिण्यां द्वितीये तृतीये चतुर्थे वा जन्मसद्भावः पुनः
तृतीये चतुर्थे वा उक्तं च — ओसप्पिणीए दोसुं जम्मणओ तीसु संतिभावेणं उस्सप्पिणी विवरीओ जम्मणओ संतिभावे
ण १ नोत्सर्पिण्यवसर्पिणीरूपे चतुर्थारकप्रतिभागे काले न संभवंति महाविदेहक्षेत्रे तेषामसंभवात् चारित्रद्वारे
संयमद्वारेण मार्गणा तत्र सामायिकस्य छेदोपस्थापनस्य च चारित्रस्य यानि जघन्यानि संयमस्थानानि तानि प
रस्परं तुल्यानि समानपरिणामत्वात् ततोऽसंख्येयलोकाकाशप्रदेशप्रमाणानि संयमस्थानान्यतिक्रम्योर्ध्व
यानि संयमस्थानानि तान्यपि परिहारविशुद्धियोग्यानि तान्यपि केवलिप्रज्ञया परिभाव्यमानानाम् असंख्येयलोक २
काशप्रदेशप्रमाणानि तानि प्रथमद्वितीयचारित्राविरोधीनि तेषामपि संभवात् तत ऊर्ध्वं यानि संख्यातीतानि सं
यमस्थानानि तानि सूक्ष्मसंपराययथाख्यातचारित्रयोग्यानि उक्तं च — तुल्ला जहन्नगाणं संजमठाणाइं पढम
बिइयाणं तत्तो असंखलोए गंतुं परिहारियठाणा १ ते वि असंखा लोगा अविरुद्धा चेव पढमबीयाणं उवरिं
पि तो असंखा संजमठाणा उ दुण्हं पि २ तत्र परिहारविशुद्धिककल्पप्रतिपत्तिः स्वकीयेष्वेव संयमस्थानेषु व
र्त्तमानस्य भवति न शेषेषु यदा त्वतीतनयमधिकृत्य पूर्वप्रतिपन्नो विवक्ष्यते तदा शेषेष्वपि संयमस्थानेषु भवति परि तिप+
हारविशुद्धिककल्पसमाप्त्यनंतरमन्येष्वपि चारित्रस्थानेषु संभवात् तेष्वपि वर्त्तमानस्यातीतनयमपेक्ष्य पूर्वप्रति
पन्नत्वात् उक्तं च — सट्ठाणे पडिवत्ती अन्नेसु वि जुज्ज पुव्वपडिवन्नो तेसु वि वट्टंतो सो तीयनयं पप्प वुच्चइ उ १ तीर्थद्वारे ८२
परिहारविशुद्धिको नियमतः तीर्थे प्रवर्त्तमान एव सति भवति न तीर्थव्यवच्छेदे अनुत्पन्ने वा तत्र तदभावे जातिस्मरणादिना २
उक्तं च — तित्थे नियमा तव्विय होइ सतित्थंमि तव्वणे तदभावे विगमेऽपत्ते वा जाईसरणाइएहिं तु १ पर्यायद्वारे प

र्याये द्विधा गृहस्थपर्यायो यतिपर्यायश्च एकैकोऽपि द्विधा जघन्य उत्कृष्टश्च तत्र गृहस्थपर्यायो जघन्य एकोनत्रिंशद्वर्षा
णि यतिपर्यायो विंशतिः द्वावपि चोत्कृष्टतो देशोनपूर्वकोटीप्रमाणौ उक्तं च — एयस्स एस नेओ गिहिपरियाओ जहन्नि गु
णतीसा जइपरियाओ वीसा दोसु वि उक्कोस देसूणा १ आगमद्वारेऽपूर्वागमं स नाधीते यस्मात्तं कल्पमधिकृत्य प्रगृहीतो
चितयोगाराधनत एव स कृतकृत्यतां भजते पूर्वाधीतं तु विस्रोतसिकाक्षयनिमित्तं नित्यमेवैकाग्रमनाः सम्यगनुस्मर
ति उक्तं च — अप्पुव्वं नाहिज्जइ आगममेसो पडुच्च तं कप्पं उचियं च एगजोगा रोहणओ चेव कयकिच्चो १ पुव्वाहीयं तु त
यं पायं अणुसरइ निच्चमेवेसो एगग्गमणो सम्मं विस्सोत्तियखयट्ठाए २ वेदद्वारे प्रवृत्तिकाले वेदः पुरुषवेदो वा
भवेत् न स्त्रीवेदः स्त्रिया परिहारविशुद्धिककल्पप्रतिपत्त्यसंभवात् अतीतनयमधिकृत्य पुनः पूर्वप्रतिपन्नश्चिन्त्यमा
नः सवेदो वाऽवेदो वा तत्र सवेदः श्रेणिप्रतिपत्त्यभावे उपशमश्रेणिप्रतिपत्तौ क्षपकश्रेणिप्रतिपत्तौ वाऽवेदः इति
उक्तं च — वेदो पवित्तिकाले इत्थीवज्जो उ होइ एगयरो पुव्वपडिवन्नगो पुण होज्ज सवेओ अवेओ वा द्वारे स्थितकल्प एवा कल्प
यं नास्थितकल्पे ठियकप्पंमि य नियमा इति वचनात् तत्राचेलक्यादिषु दशस्वपि स्थानेषु स्थिताः साधवस्तत्क
ल्पः स्थितकल्प उच्यते ये पुनः चतुर्षु शय्यातरपिंडादिष्ववस्थितेषु कल्पेषु स्थिताः शेषेषु चाचेलक्यादिषु षट्स्वस्थि
तास्तत्कल्पोऽस्थितकल्पः उक्तं च — ठियअट्ठियकप्पे आचेलक्काइएसु ठाणेसु सव्वेसु ठिया पढमो चउ ठियछ
सु अठिया बीओ १ आचेलक्यादीनि च दशस्थानान्यमूनि — आचेलक्कुद्देसिय सिज्जायररायपिंडकिइकम्मे वयजिट्ठ
पडिक्कमणे मासं पज्जोसवण कप्पे १ चत्वारश्चावस्थिताः कल्पाः — सेज्जायरपिंडंमी चाउज्जामे य पुरिसजेट्ठे य कि
इकम्मस्स य करणे चत्तारि अवट्ठिया कप्पा १ लिंगद्वारे नियमतो द्विविधेऽपि लिंगे भवति तद्यथा द्रव्यलिंगे भाव

लिंगे च एकेनापि विना विवक्षितकल्पो वितसामाचार्ययोगात् लेश्याद्वारे तेजः प्रभृतिकासूत्तरासु तिसृषु वि
शुद्धासु परिहारविशुद्धिकं कल्पं प्रतिपद्यते पूर्वप्रतिपन्नः पुनः सर्वास्वपि कथंचिद्भवति तत्रापीतरासु विशुद्धलेश्या
सु नात्यंतसंक्लिष्टासु वर्त्तते तथाभूतासु वर्त्तमानो न प्रभूतं कालमवतिष्ठते किंतु स्तोकं यतः स्ववीर्यवशात् क
टिति वतास्योग्या वर्त्तते अथ प्रथममेव कस्मात् प्रवर्त्तते उच्यते कर्मवशात् उक्तं च लेसासु विसुद्धासु पडिवज्जे
इतीसु नवरं सेसासु पुव्वपडिवन्नउ पुण होज्जा सव्वासु वि कद्दवि १ नच्चंतसंकिलिट्ठासु थोवं कालं च हंदि इयरेसु वि
ना कंमणो गई तहा विवरीयं फलं देइ २ ध्यानद्वारे धर्मध्यानेन प्रवर्त्तमानेन परिहारविशुद्धिकं कल्पं प्रतिपद्यते पूर्वप्रति
पन्नः पुनरार्त्तरौद्रयोरपि भवति २ केवलं प्रायेण निरनुबंधः उक्तं च झाणंमि वि धम्मेणं पडिवज्जइ सो पवड्ढमाणेणं इय
रेसु वि झाणेसुं पुव्वपवन्नो न पडिसिद्धो १ एवं च अकुसलजोगे उदए वि तिव्वकम्मपरिणामा रुद्दट्टेसु वि सा वो हमस्स
रयं निरणुबंधो २ गणद्वारे जघन्यतः त्रयो गणाः प्रतिपद्यंते उत्कर्षतः शतसंख्याः पूर्वप्रतिपन्ना जघन्यतः उत्कर्ष
तो वा शतशः उत्सर्गेणनया जघन्यतः प्रतिपद्यमानाः सप्तविंशतिः उत्कर्षतः सहस्रं पूर्वप्रतिपन्नाः पुनर्जघन्यतः
शतशः उत्कर्षतः सहस्रशः आह च गणउ तिन्नेव गणा जहन्नपडिवत्तिसयसउक्कोसा उक्कोसजहन्नेणं सयसु
च्चिय पुव्वपडिवन्ना १ सत्तावीस जहन्ना सहस्समुक्कोसउ य पडिवत्ती सयसो सहस्ससो वा पडिवन्न जहन्न उक्कोसा २
अन्नच्च यदा पूर्वप्रतिपन्नः सकल्पमध्यादेको निर्गच्छति अन्यः प्रविशति तदोनप्रक्षेपे प्रतिपन्नो कदाचिदेकोऽपि भ ८४
वति पृथक्त्वं वा उक्तं च पडिवज्जमाणत्तइया एक्को वि जहन्नकणपक्खेवे पुव्वपडिवन्नया विय तइया एक्को पुहत्तं वा १
अभिग्रहद्वारे अभिग्रहाश्चतुर्विधाः तद्यथा द्रव्याभिग्रहाः क्षेत्राभिग्रहाः कालाभिग्रहाः भावाभिग्रहाश्च विचित्रास्त

वंति तत्र परिहारविशुद्धिकस्यैमे अभिग्रहा न भवंति यस्मादेतस्य कल्प एवायमभिहितरूपोऽभिग्रहो वर्त्तते उक्तं च दव्वाइया
अभिग्गह विचित्तरूवा न केंति पिएणो कइ एयस्स जावकप्पो कप्पु च्चिय अभिग्गहो जेण १ एयंमि गोयराई नियया नियमेण नि
रववायाय तप्पालणं चिय परं एयस्स विसुद्धिगणं उ २ प्रव्रज्याद्वारे नासावन्यं प्रव्राजयति कल्पस्थितिरेषेति कृत्वा उक्तं
च पव्वाएइ न एसो अन्नं कप्पट्ठिइत्ति काऊणं उवदेसं पुण यथाशक्ति प्रयच्छति मुंडापनाद्वारेऽपि नासावन्यं मुंडापयति अथ
प्रव्रज्यानंतरं नियमतो मुंडनमिति प्रव्रज्याग्रहणेनैव तद्गृहीतमिति किमर्थं पृथग्द्वारं तदयुक्तं प्रव्रज्यानंतरं नियमतो मुंड
नस्यासंभवात् अयोग्यस्य कथंचिद्वज्रायामपि प्रव्रज्यायां पुनरयोग्यतापरिज्ञाने मुंडनायोगात् अतः पृथगिदं द्वारमिति
प्रायश्चित्तविधिद्वारे मनसापि सूक्ष्ममप्यतिचारमापन्नस्य नियमतः चतुर्गुरुकं प्रायश्चित्तमस्य यत एष कल्पः एकाग्रता
प्रधानस्ततस्तद्भंगे गुरुतरो दोष इति कारणद्वारे कारणनामालंबनं तच्च पुनः सुपरिशुद्धं ज्ञानादिकं तच्चास्य न विद्यते ये
न तदाश्रित्यापवादपदसेवितास्यात् एष हि सर्वत्र निरपेक्षः क्लिष्टकर्मक्षयनिमित्तं प्रारब्धमेव स्वकं कल्पं यथोक्तविधिना
समापयन् महात्मा वर्त्तते उक्तं च कारणमालंबणमो तं पुण नाणाइयं सुपरिसुद्धं एयस्स तं न विज्जइ उचियं तवसाह
णोपायं १ सव्वत्थ निरवयक्खो आढत्तियं संदट्ठं समाणंतो वट्टइ एस महप्पा किलिट्ठकम्मक्खयनिमित्तं निःप्रतिकर्म
ताद्वारे एष महात्मा निःप्रतिकर्मशरीरोऽक्षिमलादिकमपि कदाचिन्नापनयति न च प्राणांतिकेऽपि व्यसने समापतिते
द्वितीयपदं सेवते उक्तं च निप्पडिकंमसरीरो अच्छिमलाई वि नावणेइ सया पाणंतियम्मि य महावसणंमि न वट्टए बीए
अप्पबहुत्तालोयणविसयाई ओहोइ एस त्ति अहवा सुहभावाउ बहुगं पेयं वियक्कमस्स त्ति ३ भिक्षाद्वारे भिक्षा विहार
क्रमश्चास्य तृतीयायां पौरुष्यां भवति शेषासु च पौरुषीषु कायोत्सर्गो निद्राप्रमादस्याभावात् यदि पुनः कथमपि

DR BHAU DAJI

जंघाबलमस्य परिक्षीणं भवति तथाप्येको विहरन्नपि महता यत्नेन द्वितीयपदमापद्यते किंतु तत्रैव यथाकल्पमात्मी
ययोगात् विदधाति उक्तं च तइयाए पोरिसीए भिक्खाकालो विहारकालो उ सेसासु अउ समयो पायं अप्पायनि
द्दाविजंघाबलंमि खीणे अविहरमाणो वि नवि रित्तावज्जे तत्थेव अहाकप्पं कुणइ जोगं महाभागो एते च परिहार
विशुद्धिका द्विविधास्तद्यथा इत्वरा यावत्कथिकाश्च तत्र ये कल्पसमाप्त्यनंतरमेव कल्पं गच्छमुपयास्यंति ते इत्वरा
: ये पुनः कल्पसमाप्त्यनंतरमव्यवधानेन जिनकल्पं प्रतिपत्स्यंते ते यावत्कथिका उक्तं च इत्तरिय थेरकप्पे जिणक
प्पे आवकहिय त्ति अत्र स्थविरकल्पग्रहणमुपलक्षणं स्वकल्पे चेति द्रष्टव्यं तत्रेत्वराणां कल्पप्रभावाद्देवमनुष्यतिर्य + त्रे +
ग्योनिकृता उपसर्गाः सद्योघातिनश्चातंका अतीव विषह्याश्च वेदना न प्रादुःषंति यावत्कथिकानां संभवेयुर
पि ते हि जिनकल्पं प्रतिपत्स्यमाना जिनकल्पभावमनुविदधति जिनकल्पिकानां चोपसर्गसंभवंतीति उक्तं च इत्तरिय
ाण वसग्गा आयंका वेयणा य न हवंति आवकहियाण भइया इति तथा सुहुमत्ति सूक्ष्मसंपरायं संपरैति पर्यटति
संसारमनेनेति सूक्ष्मसंपरायः क्रोधादिकषायः सूक्ष्मो लोभांशमात्रावशेषतया संपरायो यत्र तत्सूक्ष्मसंपरा
यं इदमपि संक्लिश्यमानकविशुध्यमानकभेदाद् द्विधा तत्र श्रेणिः प्रच्यवमानस्य संक्लिश्यमानकं श्रेणिमारोहतो वि
शुध्यमानकमिति अहक्खाय त्ति अथशब्दोऽत्र यथार्थे आङ् अभिविधौ आसमंताद्याथातथ्येन ख्यातमथा
ख्यातं कषायोदयाभावतो निरतिचारत्वात्पारमार्थिकरूपत्वात्पारमार्थिकरूपेण ख्यातं यथाख्यातं यथा यथावत्सर्व ८५
स्मिन् जीवलोके ख्यातं प्रसिद्धं अकषायं भवति चारित्रमिति यथाख्यातं देसजय त्ति देशो संकल्प निरपराध
त्रसवधविषये यतं यमनं संयमो यस्य स देशयतः सम्यग्दर्शनयुत एकाणुव्रतादिधारी अनुमतिमात्रश्राव

केत्यर्थः यदाह श्रीशिवशर्मसूरिवरः कर्मप्रकृतौ एगवयाई चरमो अणुमोयणमित्त त्ति देसजई अजय त्ति न विद्य
ते यतं विरतं विरतिर्यस्य सोऽयतः सर्वथा विरतिहीनः तथा दर्शनशब्दस्य प्रत्येकं संबंधाच्चक्षुर्दर्शनं १ अचक्षुर्दर्श
नं २ अवधिदर्शनं ३ केवलदर्शनरूपाणि चत्वारि दर्शनानि तत्र चक्षुषा दर्शनं वस्तु सामान्यांशात्मकं ग्रहणं चक्षुर्द
र्शनं अचक्षुषा चक्षुर्वर्जशेषेंद्रियचतुष्टयेन मनसा च यद्दर्शनं सामान्यांशात्मकं ग्रहणं तदचक्षुर्दर्शनं २ अवधि
ना रूपिद्रव्यमर्यादया दर्शनं सामान्यांशग्रहणमवधिदर्शनं ३ केवलेन संपूर्णवस्तुतत्वग्राहकबोधविशेषरूपे
ण यद्दर्शनं सामान्यांशग्रहणं तत्केवलदर्शनमिति किंलक्षणान्येतानि दर्शनानीत्याह अनाकाराणि सामान्याकारयु
क्तत्वे सत्यपि न विद्यते विशिष्टो व्यक्त आकारो येषु तान्यनाकाराणि तात्पर्यार्थः प्रागेवोक्तेति ॥ १२ ॥ किण्हा नीला काऊ
तेऊ पम्हा य सुक्क भव्वियरा वेयग खइगुवसम मिच्छ मीस सासाण सन्नियरे ॥ १३ ॥ व्या० इह कृष्णलेश्या
१ नीललेश्या २ कापोतलेश्या ३ तेजोलेश्या ४ पद्मलेश्या ५ चः समुच्चये व्यवहितसंबंधश्च स च शुक्ललेश्या ६ भव्यो योग्यः
तथा मुक्तिगमनार्ह इतरोऽभव्यः कदाचनापि सिद्धिगमनानर्हः वेयग त्ति वेदकं सम्यक्त्वपुंजवेदनात् क्षायोपश
मिकमित्यर्थः तत्रोदीर्णस्य मिथ्यात्वस्य क्षयेणानुदीर्णस्य चोपशमेन विष्कंभितोदयस्वरूपेण यन्निर्वृत्तं तत्क्षायोपश
मिकं उक्तं च मिच्छत्तं जमुइन्नं तं खीणं अणुदियं च उवसंतं मीसीभावपरिणयं वेइज्जंतं खओवसमं तथा खइग त्ति क्षये
णाप्तं तो भेदेन त्रिविधस्यापि दर्शनमोहनीयस्य निर्वृत्तं क्षायिकं तच्च क्षपकश्रेणावेव भवति पढमकसाएसु मयस्स वे
इ अंतोमुहुत्तमित्तेण तइयं विय मिच्छत्तं तत्तो य मीसत्तं सम्मं बद्धाऊ पडिवन्नो पढमकसायक्खयाउ समरिज्जा तोमि
च्छोदय उदयाइं विणिज्जं चुक्को न खीणंमि २ तंमि मर्डाइद्दिवं तप्परिणामो य सत्ताखीणे उवसमपरिणामो पुण पच्छा ॥

नाणं मइनाणाईओ ३ खीणंमि दंसणतिए किं होइ तओ तिदंसणाईओ तन्नइ सम्मद्दिट्ठी संमत्ते खवए कत्थ सम्मं ४ निव्वलिय
मयणकुद्दवरूवं मिच्छत्तमेव सम्मत्तं खीणं न उ जो भावो सद्दहणलक्खणो तस्स ५ सो तस्स विसुद्धयरो जायइ सस
म्मत्तपुग्गलक्खयओ दिट्ठिव्व सण्हसुद्धब्भपडलविगमे मणूसस्स ६ जह सुद्धजलाणुगयं वत्थं सुद्धं जलक्खए सु
द्धं संमत्तसुद्धपुग्गलपरिक्खए दंसणं पेवं ७ तं मियतइयक्खए जे खवगं मि सिद्धं तिरिक्खइयसंमत्ते सुरनरयजुगलिसु
ई इमं उ जिणकालियनराणं ८ पडिवज्जी एअविरयदेसपमत्तापमत्तविरयाण अन्नयरो पडिवज्जइ सुक्कज्झाणे
वगाय मित्तो ९ तथा उदीर्णस्य मिथ्यात्वस्य क्षये सति अनुदीर्णस्य उपशमो विपाकप्रदेशवेदनरूपस्य द्विविधस्याप्यु
दयस्य विष्कंभणं तेन निर्वृत्तमौपशमिकं तच्च द्विधा ग्रंथिभेदसंभवं उपशमश्रेणिसंभवं च तत्र ग्रंथिभेदसंभवमेवं इदं
त्नीरापारसंसारसागरमध्यमध्यासीनो जंतुर्मिथ्यात्वप्रत्ययमनंतान् पुद्गलपरावर्त्ताननंतदुःखलक्षणान् कथम
पि तथाभव्यत्वपरिपाकवशात् गिरिसरिदुपलघोलनाकल्पेनानाभोगनिर्वर्तितयथाप्रवृत्तिकरणेन करणं परिणा-
मो त्रैतिवचनादध्यवसायविशेषरूपेणायुर्वर्जानि ज्ञानावरणीयादिकर्माणि सर्वाण्यपि पल्योपमासंख्येयभागन्यू
नैकसागरोपमकोटाकोटीस्थितिकानि करोति अत्रांतरे जीवस्य कर्मजनितो घनरागद्वेषपरिणामरूपः कर्मग्रं र्क
=भित्त= निविडविरूपरूढगुप्फिलवक्रग्रंथिवत् दुर्भेदोऽभिन्नपूर्वो ग्रंथिर्भवति तदुक्तं तीए विधो व भित्ते खविए इत्थंतरंमि जीवस्स
हवइ अभिन्नपुव्वो गंठी एवं जिणा बिंति गंठि त्ति सुदुब्भेओ कक्खडघणरूढगूढगंठि व्व जीवस्स कम्मजणिओ घणरागद्दो ८६
सपरिणामो इति इमं च ग्रंथिं यावदभव्या अपि यथाप्रवृत्तिकरणेन कर्म क्षपयित्वा अनंतशः समागच्छंति उक्तं चावश्यक
टीकायां अभव्यस्यापि कस्यचिद्यथाप्रवृत्तिकरणतो ग्रंथिमासाद्य अर्हदादिविभूतिदर्शनतः प्रयोजनांतरतो वा प

वर्द्धमानस्य श्रुतसामायिकलाभो भवति न शेषलाभ इति एतदनंतरं कश्चिदेव महात्मा समासन्नपरमनिर्वृतिसुख
:समुच्छलितप्रचुरदुर्निवारवीर्यप्रसरो निशितकुठारधारयेव परमविशुद्ध्या यथोक्तस्वरूपस्य ग्रंथेर्भेदं विधाय मिथ्या
त्वस्थितेरंतर्मुहूर्त्तमुदयक्षणादुपर्यतिक्रम्यापूर्वकरणानिवृत्तिकरणलक्षणविशुद्धिजनितसामर्थ्योऽन्तर्मुहूर्त्तका
लप्रमाणं तत्प्रदेशवेद्यदलिकाभावरूपमंतरकरणं करोति अत्र यथाप्रवृत्तिकरणापूर्वकरणानिवृत्तिकरणाना
मयं क्रमः जा गंठी ता पढमं गंठिं समइच्छओ भवे बीयं अणियट्टीकरणं पुण संमत्तपुरक्खडे जीवे १ गंठिं समइच्छओ त्ति ग्रंथिं
समतिक्रामतो भिंदानस्येति सम्मत्तपुरक्खडे त्ति सम्यक्त्वपुरस्कृते येन तस्मिन्नासन्नसम्यक्त्वे जीवेऽनिवृत्तिकरणं भवती
त्यर्थः एतस्मिंश्चांतरकरणे कृते सति तस्य मिथ्यात्वकर्मणः स्थितिद्वयं भवति अंतरकरणादधस्तनी प्रथमा स्थितिरंतर्मु
हूर्त्तप्रमाणा तस्मादेवांतरकरणादुपरितनी शेषा द्वितीया स्थितिः स्थापना [०] तत्र प्रथमस्थितौ मिथ्यात्वदलिकवेदना
दसौ मिथ्यादृष्टिरेव अंतर्मुहूर्तेन पुनस्तस्यामुपगतायामंतरकरणप्रथमसमय एव औपशमिकसम्यक्त्वमवाप्नोति मिथ्यात्वद
लिकवेदनाभावात् यथा हि वनदवानलः पूर्वदग्धेंधनमूषरं वा देशमवाप्य विध्मायति तथा मिथ्यात्ववेदनवनदावोऽप्यं
तरकरणमवाप्य विध्मायति तथा च सति तस्यौपशमिकसम्यक्त्वलाभः यदाहुः श्रीपूज्यपादाः ऊसरदेसं दड्ढिल्लयं
च विज्झाइ वणदवो पप्प इय मिच्छस्स अणुदए उवसमसम्मं लहइ जीवो इति यावत् ग्रंथिभेदसंभवमौपशमिकस
म्यक्त्वं अथ उपशमश्रेणिसंभवमौपशमिकसम्यक्त्वं त्रिभुवनजनप्रथितप्रवचनोपनिषद्वेदि श्रीजिनभद्रगणिक्षमाश्र
मणप्रणीतगाथाभिरेव ताभ्यते उवसामगसेढीए पट्ठवओ अप्पमत्तविरओ वि पज्जवसाणे सो वा होइ पमत्तो अविरओ वा १ अ
न्ने भणंति अविरयदेसपमत्तापमत्तविरयाण अन्नयरो पडिवज्जइ दंसणसमियं मि उ नियट्टी २ संजलणाईणसमो जुत्ते १

संजोयणा रत्तउदेउ तेण चेव विअस्स मिस्सा नाणसंमत्तान्नतेतंमि ३ आचार्याः अणसिरवत्तुवसमेसिं समोजणा तणाइ
को विसेसो सिं नाणखीणंमि उइन्ने सेसो वसमे खउवसमो ४ सो चेव तणूवसमो उइए खीणंमि सेस उवसमिए सुक्कमोह
ययामीसे न खउवसमिए विसेसोयं ५ वेएइ संतकम्मं खउवसमिए सुनाणहत्ता वंसो उवसंतकसाउ पुण वेएइ न संतकम्मं
पि ६ संजोयणाइआणं नएइ उ संजुयस्स पडिसिद्धो सच्चमिस्सा साणहत्ता वंगा फुडुनपएसकम्मं उ ७ तणियं वत्तु
एडी वो वेएइ नवाणहत्ता गकम्मं उ उदएण पएसकम्मं नियमा वेएइ तं सव्वं ८ नाण दिअ निघाइए नासंतमुदेइडं
तउवसमं सव्वपएसकम्मं वेएइ मुव्वएसवो ९ किं दंसणइघाउ न होइ संजोयणाइ वेयए उ मंदाणहत्ता वयाए उ
दाणहत्ता वं मिविकहिं पि १० निच्चमुइन्नं पिऊ हासयल चक्कनाणिणो तहावरणं न विघायमंदयाए पएसकम्मं त
हावेयं ११ मिश्रत्ति मिथ्यात्वं अदेवे देवबुद्धिः अगुरौ गुरुबुद्धिः अतत्वे तत्वबुद्धिः लक्षणं मीसत्ति इहानंतरोक्ते त्रिविधि
नालब्धेनौपशमिकसम्यक्त्वेन यं विसंतवेन अपूर्वकरणविशेषकाल्पेन मदनकोद्रवस्थानीयं मिथ्यात्वमोहनीयं कर्म विशो
धयित्वा त्रिधा करोति तथाहि शुद्धमर्द्धविशुद्धं अविशुद्धं चेति स्थापना ।◻△▲। तत्र त्रयाणां पुंजानां मध्ये यासाव
र्द्धविशुद्धः पुंजः स मिश्रमुच्यते सम्यक्त्वमिथ्यात्वमिश्रः एतदुदयात् किल प्राणी जिनप्रणीततत्वं न सम्यक् श्रद्द
धाति नापि निंदति उक्तं च इहहमतकडहस्स जूर्णो जहा नालिकेरदीववासिस्स अइछुदियस्स विपुरिसस्स इत्थउत्पणा
दुइइणेग इढाइ हए तस्स आहारस्स उवरि न रुई न य निंदा जेण कायाणं संयणाइउ आहारो न कयाइ दिट्ठो नावि
सुउ एवं सम्मामिच्छदिट्ठिस्स जिणे वा इप्पयड्डाणउवरि न रुई न य निंदा इत्यादि तथा सासायणत्ति सासादनं तत्र आ ७
यमौपशमिकसम्यक्त्वलक्षणं सादयत्यपनयति आसादनं अनंतानुबंधिकषायवेदनं अत्र पृषोदरादित्वाद्यराद्धे लो

पः रूपादिस्पः क्वचित्र्यर्थन व्यत्ययः सति हि अस्मिन् परमानंदरूपानंतसुखदो निःश्रेयसतरुबीजकल्पतोयं विसं
तवौपशमिकसम्यक्त्वलाभो जघन्यतः समयमात्रेण उत्कर्षतः षडावलिकावशेषो भवतीति ततः सह आसाद
नेन वर्त्तत इति सासादनं यद्वा सास्वादनं तत्र सम्यक्त्वलक्षणरसास्वादनेन वर्त्तत इति सास्वादनं यथाहि भुक्त
क्षीरान्नविषयव्यलीकचित्तपुरुषस्त द्वमनकाले क्षीरान्नरसमास्वादयति तथात्रापि गुणस्थाने मिथ्यात्वाभिमुखत
यासम्यक्त्वस्योपरि व्यलीकचित्तस्य पुरुषस्य सम्यक्त्वमुद्वमत स्तद्रसास्वादो भवतीति इदं सास्वादनमुच्यते इति तथा
सन्निति विशिष्टस्मरणादिरूपमनोविज्ञानवान् संज्ञी इतरोऽसंज्ञी सर्वोप्येकेंद्रियादिः ब: १२ आहारे अरस्तेआ सु
रनरयविलंगमइसुउहिंगे सम्मत्ततिगे पम्हा सुक्का सन्नीसु सन्नि दुगं १४ गा० उजोजोमपइपाहार पाममपत
मग्गा हारयतीत्याहारक इतरोऽनाहारको विग्रहगत्यादिगतः भेयत्ति चतुर्दशमो लमार्गणास्थानानि अमीष्वांतरा श्च
उत्तरादिसंख्या भेदा भवंतीति शेषः सर्वेऽपि षष्टिर्भेदाः तथाहि गतिश्चतुर्द्धा इंद्रियं पंचधा कायः षोढा योगस्त्रिधा क
षायश्चतुर्द्धा ज्ञानपंचकमज्ञानत्रिकमिति ज्ञानमार्गणास्थानमष्टधा संयमपंचकं देशसंयमो संयमसहितं सप्तधा
दर्शनं चतुर्द्धा लेश्या षोढा भव्यो भव्यश्चेति भव्यमार्गणास्थाने द्विधा सम्यक्त्वत्रय मिथ्यात्वमिश्रसास्वादनभेदात् सम्य
क्त्वमार्गणास्थानं षोढा संज्ञिमार्गणास्थानं षोढा संज्ञिमार्गणास्थानं सप्ततिपदं सर्वेऽप्येते एकत्रमीलिते तत उत्तरभेदा द्वा
षष्टिरिति अत्र गाथा चउ १ पण २ छ ३ तिय ४ तिय ५ चउ ६ छ ७ अड ८ सग ९ नव १० अ ११ बा १२ दो १३ छ १४ गइयाइसु
णाणं इय चउत्तरभेयबासट्ठी १ इत्येवमुक्तागत्यादिमार्गणास्थानामवांतरभेदाः सांप्रतमेतेष्वेव जीवस्थानानि चिंतय
न्नाह सुरनरविलंगेत्यादि सुरगतौ च संज्ञिद्विकं पर्याप्तापर्याप्तलक्षणं भवति अपर्याप्तश्चेह करणापर्याप्तो गृह्यते नल

ऽपर्याप्तस्य देवनरकगामिनोऽसास्वादनत्वात् तथा विभंगे विभंगज्ञाने मतौ मतिज्ञाने श्रुते श्रुतज्ञाने ३ दिक्गति अ
वधिद्विके अवधिज्ञान अवधिदर्शनलक्षणे सम्यक्त्वत्रिके क्षायोपशमिकक्षायिकौपशमिकलक्षणे पद्मलेश्यायां
संज्ञिनि च संज्ञिद्विकमपर्याप्तपर्याप्तलक्षणं भवति नरो प्राणि जीवस्थानानि तेषु मिथ्यात्वादिकारणतो मतिज्ञाना
दीनामसंभवात् अत एव देवेतो रिक्त पर्याप्तकः करणपर्याप्तको गृह्यते न लब्ध्यपर्याप्तादीनां को गृह्यते तस्य मि
थ्यादृष्टित्वाद् शुक्ललेश्याकत्वाद् संज्ञित्वाच्चेति आह क्षायिकक्षायोपशमिकौपशमिकेषु कथं संज्ञी अपर्याप्तको ल
भ्यते उच्यते इह यः कश्चित्पूर्वबद्धायुष्कः क्षपकश्रेणिमासानंतानुबंध्यादिसप्तकक्षयं कृत्वा क्षायिकसम्यक्त्वमु
त्पादयति यदा गतिचतुष्टयस्यान्यतरस्यां गतावुत्पद्यते तदासौऽपर्याप्तः क्षायिकसम्यक्त्वे प्राप्यते क्षायोपशमिकस
म्यक्त्वयुक्तश्च देवादिभवेभ्योऽनंतरमिहोत्पद्यमानस्तीर्थकरादिरपर्याप्तकः सुप्रतीत एव औपशमिकं सम्यक्त्वं पुनर
पर्याप्तावस्थायामनुत्तरसुरस्य दृष्टव्यं इहौपशमिकसम्यक्त्वमपर्याप्तस्य केचिन्नेच्छंति तथाहि ते प्राहुः न तावदस्यामे
वापर्याप्तावस्थायामिदं सम्यक्त्वमुपजायते तदानीं तथाविधशुद्धत्वाभावात् अथैतन्नदानीमोत्पादि यत्तु पारभविकं
तन्न वक्तुकेन विति वार्यत इति मन्येथाः तदपि न युक्तियुक्तमुत्पश्यामः यतो यो मिथ्यादृष्टिः तस्य प्रथमतया सम्यक्त्व
मौपशमिकमवाप्नोति स तावत्तद्भावमापन्नः सन् कालं न करोत्येव यदुक्तमागमे अणबंधोदयमाउगबंधकालं
च सासणो कुणइ उवसमसम्मदिट्ठी चउण्हमिक्कं पि नो कुणइ उपशमश्रेण्यां मृत्वानुत्तरसुरेषूत्पन्नस्यापर्याप्त ८८
कस्यैतत् भवत्विति चेन्न तेतदपि न बहुमन्यामहे तस्य प्रथमसमय एव सम्यक्त्वपुंजोदयात् क्षायोपशमिकं
सम्यक्त्वं भवति न त्वौपशमिकं उक्तं च शतकबृहच्चूर्णौ जो उवसमसम्मदिट्ठी उवसमसेढीए कालं करेइ सो पढम

समयेचेव संमत्तपुंजं उदयावलियाए छोढूण सम्मत्तपुग्गले वेएइ तेण न उवसमसम्मदिट्ठी अपज्जत्तगो लब्भइ
त्यादि तस्मात् पर्याप्तसंज्ञिलक्षणमेकमेव जीवस्थानमत्र प्राप्यत इति स्थितं अपरे पुनराहुः भवत्येवापर्याप्तावस्थाया
मप्यौपशमिकं सम्यक्त्वं सप्ततिचूर्ण्यादिषु तथाभिधानात् सप्ततिचूर्णौ द्विगुणस्थानकेषु नामकर्मणो बंधोदयादि
मार्गणावसरेऽविरतसम्यग्दृष्टेरुदयस्थानचिंतायां पंचविंशत्युदयः सप्तविंशत्युदयश्च देवनारकाः क्षायि
कवेदकसम्यग्दृष्टयः देवास्तु त्रिविधसम्यग्दृष्टयोऽपि तथा च तद्ग्रंथः पणवीससत्तावीसोदया देवनेरइए गोरव
इयाः गवेदगसंमद्दिट्ठी देवो तिविहसम्मद्दिट्ठी वि पंचविंशत्युदयश्च शरीरपर्याप्तिं निवर्त्तयतः तथाहि निर्माण १
स्थिरा २ स्थिरा अगुरुलघु २ शुभा अशुभ २ तैजसकार्मण वर्णगंधरसस्पर्श इति अष्टकं देवगति देवानुपूर्वी पंचेंद्रियजा १
ति त्रस बादर पर्याप्तकं सुभग दुर्भगयोरेकतरं आदेयानादेययोरेकतरं यशःकीर्त्ययशःकीर्त्योरेकतरं इत्येक
विंशतिः ततः शरीरपर्याप्त्या पर्याप्तस्य वैक्रियद्विकोपघातप्रत्येकं समचतुरस्रलक्षणप्रकृतिपंचके क्षिप्ते देवा
नुपूर्व्यपनयने च पंचविंशतिर्भवति ततः शरीरपर्याप्त्या पर्याप्तस्य शेषपर्याप्तिभिः पुनरपर्याप्तस्य पराघातप्रशस्त
विहायोगतिक्षेपे सप्तविंशतिर्भवति ततोऽपर्याप्तावस्थायामपीह देवस्यौपशमिकं सम्यक्त्वमुक्तं तथा पंचसंग्रहेऽ
प्यमार्गणास्थानकेषु जीवस्थानकचिंतायामौपशमिकसम्यक्त्वे उवसमे दिदो सन्नी इत्यनेनार्थेन संज्ञिद्विकमु
क्तं ततः सप्ततिचूर्ण्यभिप्रायेण पंचसंग्रहाभिप्रायेण चास्मात्तिरपि औपशमिकसम्यक्त्वे संज्ञिद्विकमुक्तं तत्त्वं तु केव
वि॰३ लिनो विदंति १४ बहुश्रुता वा विदंतीति १४ ७ः तमसंनिअपज्जत्तुगं नरे सबायरे अपज्जत्ते कए थावरइगिंदि पढ
मा चउ बार असन्नि दुदु विगले १५ गा० तत्र कोक्तं संज्ञिद्विकमपर्याप्तसंज्ञियुतं नरे नरेषु लभ्यते ज्ञातावेकव

कर्मस्तवसू०२ टीका

+ सम्मूर्छिमा

वनं अयमर्थः इह द्वये मनुष्या गर्भव्युत्क्रांतिकाः सम्मूर्छिमाश्च तत्र ये गर्भव्युत्क्रांतिकास्तेषु यथोक्तं संज्ञिद्विकं ल
भ्यते ये पुनर्वांतपित्तादिषु सम्मूर्छंतीति तेऽन्तर्मुहूर्तायुषोऽसंज्ञिनो लब्ध्यपर्याप्तकाश्च इष्यंते यदाहुः श्रीमदाचार्य
श्यामपादाः प्रज्ञापनायां कहिणं भंते संमुच्छिममणुस्सा संमुच्छंति गोयमा अंतो मणुस्सखित्तस्स पणयालीसाए जोयणसयसहस्सेसु
अड्ढाइज्जेसु दीवसमुद्देसु पन्नरससु कम्मभूमीसु तीसाए अकम्मभूमीसु छप्पन्नाए अंतरदीवेसु गब्भवक्कंतियमणुस्सा
णं चेव उच्चारेसु वा पासवणेसु वा खेलेसु वा सिंघाणेसु वा वंतेसु वा पित्तेसु वा सुक्केसु वा सोणिएसु वा सुक्कपुग्गलप
रिसाडेसु वा विगयकलेवरेसु वा थीपुरिससंजोगेसु वा नगरनिद्धमणेसु वा सव्वेसु चेव असुइट्ठाणेसु इत्थ णं संमुच्छिममणु
स्सा संमुच्छंति अंगुलस्स असंखेज्जभागमित्ताए ओगाहणाए असंनी मिच्छदिट्ठी अन्नाणी सव्वाहिं पज्जत्तीहिं अपज्जत्ता
अंतमुहुत्ताउया चेव कालं करंतीति तेनानुसमुच्छिममनुष्यानाश्रित्य इतीयमप्यसंज्ञ्यपर्याप्तलक्षणं जीवस्थानं प्राप्यत
इति सव्वाय अपज्जत्ते त्ति एतदेवेहानुवर्तते तदेव पूर्वोक्तं संज्ञिद्विकं सह बादरापर्याप्तेन वर्त्तत इति सबादराप
र्याप्तं तेजोलेश्यायां लभ्यते एतदुक्तं भवति तेजोलेश्यायां त्रीणि जीवस्थानकानि भवंति संज्ञ्यपर्याप्तः संज्ञिपर्याप्तः
बादरैकेंद्रियापर्याप्तश्च बादरोऽपर्याप्तः कथमवाप्यत इति चेदुच्यते इह भवनपतिव्यंतरज्योतिष्कसौधर्मेशानदे
वाः पृथिव्यब्वनस्पतिषु मध्ये उत्पद्यंते यदाह दुःषमांधकारनिमग्नजिनप्रवचनप्रदीपो भगवान् जिनभद्रगणिक्ष
माश्रमणः पुढवीआउवणस्सइ गब्भे पज्जत्तसंखजीवीसु सग्गचुयाणं वासो सेसा पडिसेहिया ठाणे १ तेषु तेजोले ८९
श्यावंतः यदाह किण्हा नीला काऊ तेऊलेसा य भवणवंतरिया जोइससोहम्मीसाणे तेऊलेसा मुणेयव्वा १ य
ल्लेश्यश्च म्रियते तल्लेश्य एवान्यत्रापि समुत्पद्यते यदाह जल्लेसे मरइ तल्लेसे उववज्जइ इति वचनात् अतो बादरापर्याप्तावस्था १

॥

यां कियत्कालं तेजोलेश्याऽवाप्यत इति सिद्धं जीवस्थानकत्रयं तेजोलेश्यायामिति कायद्वारे स्थावरेषु पृथिव्यप्तेजोवा २
युवनस्पतिलक्षणेषु इंद्रियद्वारे एकेंद्रिये च प्रथमानि चत्वारि स्थानानि सूक्ष्मैकेंद्रियापर्याप्त १ सूक्ष्मैकेंद्रियपर्याप्त २ बा
दरैकेंद्रियापर्याप्त ३ बादरैकेंद्रियपर्याप्तलक्षणानि भवंति असंज्ञिनि संज्ञिव्यतिरिक्ते कोलिकनलकन्यायेन प्रथ
मगाथस्य संबंधात् प्रथमानि आदिमानि षड् जीवस्थानानि पर्याप्तापर्याप्तसूक्ष्मबादरैकेंद्रियद्वित्रिचतुरसंज्ञिपंचें
द्रियलक्षणानि भवंति सर्वेषामपि विशिष्टमनोविकलतया संज्ञिप्रतिपक्षत्वाविशेषानुसंज्ञिप्रतिपक्षरूपत्वादसंज्ञित्वेन
व्यवहारात् इह विगलत्ति विकलेषु द्वींद्रियत्रींद्रियचतुरिंद्रियेषु द्वे द्वे जीवस्थानके भवतः तत्र द्वींद्रियेषु द्वींद्रियोऽपर्याप्तः
पर्याप्त इति द्वे त्रींद्रियेषु त्रींद्रियोऽपर्याप्तः पर्याप्त इति द्वे चतुरिंद्रियेषु चतुरिंद्रियोऽपर्याप्तः पर्याप्त इति द्वे ॥ १५ ॥ दस चरम
तसे अजयाहारगतिरितणुकसायदुअनाणे पढमतिलेसाभवियरअचक्खुनपुमिच्छि सव्वेवि ॥ १६ ॥ व्या० दस च
रमत्ति त्रसे त्रसकाये चरमाणि पर्यंतिमानि पर्याप्तापर्याप्तद्वित्रिचतुरसंज्ञिसंज्ञिपंचेंद्रियलक्षणानि दश जीवस्थानानि भ
वंति द्वींद्रियादीनामेव त्रसत्वात् अयमत्र अविरते सर्वाण्यपि जीवस्थानानि भवंति तथा आहारके तिरश्चि तिर्यग्गतौ त
नुयोगे काययोगे कषायचतुष्टये द्वयोरज्ञानयोर्मत्यज्ञानश्रुताज्ञानरूपयोः प्रथमत्रिलेश्यासु कृष्णलेश्या नीललेश्या
कापोतलेश्यालक्षणासु भव्येतरस्मिन् अभव्ये अचक्षुर्दर्शने नपुंसकवेदे मिच्छत्ति मिथ्यात्वे सर्वाण्यपि
चतुर्दशापि जीवस्थानकानि भवंति सर्वजीवस्थानकव्यापकत्वादमीषामिति ॥ १६ ॥ पज्जसन्नी केवलदुग संजममण
नाणदेसमणमीसे पणचरमपज्ज वयणे तिअछ व पज्जियरचक्खुमि ॥ १७ ॥ व्या० पज्जसन्नित्ति पर्याप्तसंज्ञिलक्षणमेकमे
व जीवस्थानं भवति केष्वित्याह केवलद्विके केवलज्ञानकेवलदर्शनलक्षणे संयतेषु सामायिकच्छेदोपस्थापनपरिहारविशु

द्विकसूक्ष्मसांपराययथाख्यातरूपपंचप्रकारसंयमवत्सु मणनाणेत्ति मनःपर्ययज्ञाने देशविरते देशयतेषु विरताविरतश्रा
वके केवलद्विके च पर्यः संयतेषु मनःपर्ययज्ञाने देशविरते च संज्ञिपर्याप्तलक्षणं एकं जीवस्थानकं विना नान्यज्जीवस्थान
कं संभवति तत्र सर्वविरतिदेशविरत्योरसंभवात् मनोयोगेप्येतदंतरेण नान्यज्जीवस्थानकं न घटते तत्र मनःसद्भावायोगात्
मिश्रे पुनः पर्याप्तसंज्ञिव्यतिरेकेणैकं जीवस्थानकं तथाविधपरिणामाभावादेव न संभवतीति तथा पंचजीवस्थानानि
वयणे पंचेति इमानि पर्याप्तानि पर्याप्तद्वींद्रियपर्याप्तत्रींद्रियपर्याप्तचतुरिंद्रियपर्याप्तासंज्ञिपंचेंद्रियपर्याप्तसंज्ञिपंचेंद्रिय
लक्षणानि वयणेत्ति वचनयोगे वाग्योगे भवंति न शेषाणि तेषु वाग्योगासंभवात् तियअच्छपज्जियचक्खुमित्ति
+ पर्याप्तचउरिंद्रिय + चक्षुर्दर्शने त्रीणि जीवस्थानानि पर्याप्तासंज्ञिपंचेंद्रियपर्याप्तसंज्ञिपंचेंद्रियरूपाणि नान्यानि तेषु चक्षुष एवाभावात् अत्र
त्रैव मतांतरेण विकल्पमाह षड् वा जीवस्थानानि चक्षुर्दर्शने भवंति कथमित्याह पज्जियरत्ति पूर्वप्रदर्शितपर्याप्त
त्रिकं सेतरमपर्याप्तत्रिकसहितं षट् भवंति इदमुक्तं भवति अपर्याप्तपर्याप्तचउरिंद्रियासंज्ञिपंचेंद्रियसंज्ञिपंचेंद्रिय
रूपाणि षड्जीवस्थानानि चक्षुर्दर्शने भवंति चउरिंद्रियादीनामिंद्रियपर्याप्त्या पर्याप्तानां शेषपर्याप्त्यपेक्षया अप
र्याप्तानामपि आचार्यैरेतैश्चक्षुर्दर्शनाभ्युपगमात् यदुक्तं पंचसंग्रहमूलटीकायां करणापर्याप्तेषु चउरिंद्रि
यादिषु इंद्रियपर्याप्तौ सत्यां चक्षुर्दर्शनं भवतीति ॥ १७ ॥ थीनरपणिंदिचरमा चउ अणहारे दुसन्नि छ अपज्जा तेसुहु
मअपज्जविणा सासणि इत्तो गुणे वुच्छं ॥ १८ ॥ व्या॰ स्त्रीवेदे नरवेदे पंचेंद्रियेषु चरमाणि इमानि पर्याप्तापर्याप्तौ वा सर्वथा ९०
नपुंसक एवोक्तं तथा चोक्तं श्रीभगवत्यां तेणं भंते असन्निपंचेंदियतिरिक्खजोणिया किं इत्थिवेयगा पुरिसवे
यगा नपुंसकवेयगा गोयमा नो इत्थिवेयगा नो पुरिसवेयगा नपुंसगवेयगत्ति तथापीह स्त्रीपुंसलिंगाकारमात्रमंगी

कृत्य स्त्रीवेदे नरवेदे च संज्ञा निर्दिष्टेत्यदोषः उक्तं च पंचसंग्रहमूलटीकायां यद्यपि संज्ञिपर्याप्तापर्याप्तो नपुंसको + अ +
तथापि स्त्रीपुंसलिंगाकारमात्रमंगीकृत्य स्त्रीपुंसावुक्ताविति अपर्याप्तकश्चेह करणापर्याप्तको गृह्यते न लब्ध्यपर्या
प्तकः लब्ध्यपर्याप्तकस्य सर्वस्य नपुंसकत्वात् अनाहारके द्वौ संज्ञिनौ अपज्जत्ति द्विविधः संज्ञी पर्याप्तापर्याप्तलक्षणः षट्
अपर्याप्ताश्चेति सप्त जीवस्थानानि भवंति अयमर्थः अपर्याप्तसूक्ष्मबादरैकेंद्रियद्विचउरसंज्ञिसंज्ञिपंचेंद्रियलक्षणा त्रि
नि सप्त जीवस्थानानि अनाहारके विग्रहगतावेकं द्वौ त्रीन्वा समयान् यावदनाहारसंभवात् संभवंति विग्रहगइमा
वन्ना केवलिणो समुग्घाय अयोगीय सिद्धा य अणाहारा इति वचनात् संज्ञिपर्याप्तलक्षणं जीवस्थानमनाहारके केवलि
समुद्घातावस्थायां तृतीयचतुर्थपंचमसमयेषु लभ्यते उक्तं च कार्मणशरीरयोगी तृतीयके चतुर्थे पंचमे च समयत्रये च
तस्मिन् भवत्यनाहारको नियमात् ते सुहुमअपज्जविणा सासणित्ति सास्वादने सम्यक्त्वे तान्येवानंतरोक्तानि षट् अपर्याप्तप
र्याप्तसंज्ञिद्विकलक्षणान्यष्टौ जीवस्थानानि सूक्ष्मापर्याप्तं विना सप्त भवंति एतदुक्तं भवति अपर्याप्तबादरैकेंद्रियद्वित्रिचउर
संज्ञिसंज्ञिपंचेंद्रियपर्याप्तसंज्ञिपंचेंद्रियापर्याप्तलक्षणानि सप्त जीवस्थानकानि सास्वादनसम्यक्त्वं घटामियर्त्ति सास्वा
दनसम्यक्त्वस्य मनाक् शुभपरिणामरूपत्वान्महासंक्लिष्टपरिणामस्य च सूक्ष्मैकेंद्रियमध्ये तदासिधनात् सूत्रे च सर्वत्र
लिंगव्यत्ययः प्राकृतत्वात् प्राकृते हि लिंगमतिवार्यपि यदाह पाणिनिः स्वप्राकृतलक्षणे लिंगमतिवार्यपीति उक्ता
नि मार्गणास्थानकेषु जीवस्थानकानि अत ऊर्ध्वमेतेष्वेव मार्गणास्थानकेषु गुणित्ति गुणस्थानकानि वक्ष्ये प्रतिपादयि
ष्य इति अथ यथाप्रतिज्ञातमेव निर्वाहयन्नाह ॥ १८ ॥ पण तिरिचउसुरनरए नरसन्निपणिंदिभवतसि सव्वे इगविगल
भूदगवणे दुदुएगंगइतसिअभव्वे ॥ १९ ॥ व्या॰ पंचगुणस्थानकानि मिथ्यादृष्टिसास्वादनमिश्राविरतिसम्यग्दृष्टिदेशविर

तिलक्षणानि तिस्रन्ति तिर्यग्गतौ भवंति ॥ चउ: ॥ आद्यस्य प्रत्येकं योगात् सुरेसुरगतौ चत्वारि प्रथमगुणस्थानकानि नरकेन
रकगतौ च प्रथमानि चत्वारि गुणस्थानकानि भवंति नाद्यानि विरतादीनि तेषु भवस्वभावतो देशतोपि विरतेरसंभवादिति नरेनर
गतौ संज्ञिनि विशिष्टमनोविज्ञानशालिपंचेंद्रिये सर्वत्र सेत्रसकायेव सर्वाण्यपि चतुर्दश गुणस्थानकानि भवंति एतेषु मिथ्या
दृष्ट्यादीनामयोगिकेवल्यवसानानां सर्वेषामपि संभवात् ॥ इगति ॥ एकेंद्रियेषु सामान्यतः विगलत्ति विकलेंद्रियेषु चतुरिंद्रि
येषु तु विपृथ्वीकायेउदके अप्काये वने वनस्पतिकाये ॥ दु ॥ त्रिकद्वे आद्ये मिथ्यात्वसास्वादनलक्षणे भवतः तत्र मिथ्यात्वमविशे
षेण सर्वेष्विष्टव्यं सासादनं तु तेजोवायुवर्जाभिः द्वैकेंद्रियद्वित्रिचतुरिंद्रियपृथिव्यंबुवनस्पतिषु लब्ध्यापर्याप्तकेषु करणेन त्व
पर्याप्तेषु न भवेदिति तथा एकं मिथ्यात्वलक्षणं गुणस्थानं भवति केचित्सादि गत्यागमनेन त्रसानत्रसनामकर्मोदयाद् इति त्र
सास्तेजोवायवस्तेषु सासादनभावोपगतस्य तेषु मध्ये उत्पादाभावात् ॥ असन्येष्वेवेति ॥ ब: १९ ॥ वेअतिकसायनवदसलोभेच
उ अजयदुति अनाणतिगे बारसअचक्खुचक्खुसु पढमाअहखाइचरमचउ २० व्या० वेदे वेदत्रये त्रयाणां कषायाणां स
माहारस्त्रिकषायं क्रोधमानमायालक्षणं तस्मिन् त्रिकषाये पढमेति प्रथमानीति पदं क्रमरुकमणिन्यायेन सर्वत्र योज्यं ततो
वेदे स्त्रीपुंसनपुंसकलक्षणे कषायत्रये च प्रथमानि मिथ्यादृष्ट्यादीनि अनिअट्टित्ति बादरपर्यंतानि नव गुणस्थानकानि भवंति
नत्वेषाणि ॥ निअट्टित्ति बादरगुणस्थान एव वेदत्रिकस्य कषायत्रिकस्यो पशांतत्वेन क्षीणत्वेन वा शेषेषु गुणस्थानेषु तदसंभवात्
लोभेलोभकषाये दश गुणस्थानानि तत्र नव पूर्वोक्तानि दशमं तु सूक्ष्मसंपरायलक्षणं तत्र किट्टीकृतसूक्ष्मलोभकषायद ९२
लिकस्य वेद्यमानत्वात् चत्वारि प्रथमानि अयते विरतिहीनइत्यर्थः कोर्थः विरतिहीने मिथ्यात्वसास्वादनमिश्राविरतिसम्य
ग्दृष्टिलक्षणानि चत्वारि गुणस्थानानि भवंति ॥ दुति अनाणतिगेति ॥ अज्ञानत्रिके मत्यज्ञान श्रुताज्ञान विभंगज्ञानलक्षणे

प्रथमे द्वे गुणस्थानके मिथ्यादृष्टिसास्वादनरूपे भवतः न मिश्रमपि यतो यद्यपि मिश्रगुणस्थानके यथास्थितवस्तुतत्त्वनि
र्णयो नास्ति तथापि न तान्यज्ञानान्येव सम्यग्ज्ञानलेशस्यापि मिश्रत्वादत एव मिश्रत्वादत एव मिश्रगुणस्थानकमभिधीयते
उक्तं च मिथ्यात्वाधिकस्य मिश्रदृष्टेरज्ञानबाहुल्यं सम्यक्त्वाधिकस्य पुनः सम्यग्ज्ञान बहुल्यमिति ज्ञानलेशसद्भावतो
न मिश्रगुणस्थानकमज्ञानत्रिके लभ्यत इत्येके प्रतिपादयंति तन्मतमधिकृत्यास्माभिरपि द्वे इत्युक्तं अन्ये पुनराहुः ॥
अज्ञानत्रिके त्रीणि गुणस्थानानि तद्यथा मिथ्यात्वं सास्वादनं मिश्रदृष्टिश्च यद्यपि मिस्संमीवा मिस्सइति वचनात् ज्ञान
ध्यामिश्राण्यज्ञानानि प्राप्यंते नशुद्धाज्ञानानि तथापि तान्यज्ञानान्येव शुद्धसम्यक्त्वमूलत्वेनात्र ज्ञानस्य प्रसिद्धत्वादन्यथा
हि यद्यशुद्धसम्यक्त्वस्यापि ज्ञानमभ्युपगम्यते तदा सास्वादनस्यापि ज्ञानाभ्युपगमः स्यान्न चैतदस्ति तस्याज्ञानित्वेन
ऽनंतरमेव प्रतिपादितत्वात्तस्मादज्ञानत्रिके प्रथमं गुणस्थानकत्रयमवाप्यते इति तन्मतमाश्रित्यास्माभिरपि त्रिकं
इत्युक्तं तत्त्वं तु केवलिनो विशिष्टश्रुतविदो वा विदंतीति ॥ द्वाद्ये प्रथमानि गुणस्थानकानि अचक्षुर्दर्शनचक्षुर्दर्शने
च भवंति यतो मिथ्यादृष्टिप्रभृतिक्षीणमोहपर्यंतेषु गुणस्थानकेषु चक्षुर्दर्शनचक्षुर्दर्शनसंभवात् यथाख्यातचारित्रे
चरमाण्यंतिमानि चत्वारि उपशांतमोहक्षीणमोहसयोगिकेवल्ययोगिकेवलिलक्षणानि चत्वारि गुणस्थानानि भवं
ति एषु कषायाभावादिति ॥ ब: २० ॥ मणनाणि सग जयाई समईअ छेय चउ दुन्नि परिहारे केवलदुगि दो चरमा जया
इ नवमइसुओहिदुगे २१ व्या० मनोज्ञाने मनःपर्यवज्ञाने सप्त सप्त गुणस्थानानि भवंति कानीत्याह यतादीनि तत्र यम्
उपरमे यमनं यतं सम्यक्सावद्यादुपरमणमित्यर्थः यतं विद्यते यस्य स यतः प्रमत्त यतिः यतआदौ येषां तानि यतादी
नि प्रमत्ता प्रमत्ता पूर्वकरणानिवृत्तिबादरसूक्ष्मसंपराय उपशांतमोहक्षीणमोहलक्षणानीति सामायिके छेदोपस्थापनेच

इत्यर्थं केवला।

त्वारि यतादीनि गुणस्थानानि प्रमत्ताप्रमत्तनिवृत्तिबादराणीत्यर्थः द्वे गुणस्थानके प्रमत्ताप्रमत्तरूपे परिहारविशुद्धिकचारि
त्रे इत्यर्थः नोत्तराणि तस्मिन्चारित्रे वर्त्तमानस्य श्रेण्यारोहणप्रतिषेधात् केवलद्विके केवलज्ञान केवलदर्शनरूपे द्वे गुण
स्थाने भवतः के इत्याह चरमेऽतिमे सयोगिकेवलिगुणस्थानकायोगिकेवलिगुणस्थानके इति अडयाइनवमइसुत्तिद्
ङगिति अयतोऽविरतः स आदौ येषां तान्ययतादीन् अविरतसम्यक्दृष्ट्यादीनि क्षीणमोहपर्यवसानानि नव गुणस्थानानि
भवंति मतौ मतिज्ञाने श्रुते श्रुतज्ञाने अवधिद्विके अवधिज्ञान अवधिदर्शनलक्षणे न शेषाणि तथाहि न मतिज्ञानश्रुतज्ञान
अवधिज्ञानानि मिथ्यादृष्टिसासादनमिश्रेषु भवंति तज्ज्ञावे ज्ञानत्वस्यैवायोगात् यत्तु अवधिदर्शनं कश्चिदभिप्रायाद्विशिष्टश्रु
तविदो मिथ्यादृष्ट्यादीनां नेच्छंति तन्मतमाश्रित्यास्माभिरपि तत्तेषां न लभितं अथ च सूत्रे मिथ्यादृष्ट्यादीनामप्यवधिदर्शनं प्रति
पाद्यते यदाह रत्नसवर्णविनम्रसुरासुरनरकिंनरविद्याधरपरिहृढमाणिक्यमुकुटकोटीविटंकनिघृष्टचरणारविंदयुगलः
श्रीसुधर्मस्वामी पंचमांगे ओहिदंसणअणागारोवउत्ताणं भंते किं नाणी अन्नाणी गोयमा नाणी वि अन्नाणी वि जइ नाणी तो
अत्थेगइया तिनाणी अत्थेगइया चउनाणी जइ तिनाणी ते आभिणिबोहियनाणी सुयनाणी ओहिनाणी जइ चउनाणी ते आ
भिणिबोहियनाणी सुयनाणी ओहिनाणी मणपज्जवनाणी जइ अन्नाणी ते नियमा मइअन्नाणी सुयअन्नाणी विभंगना
णी इति अत्र द्वितीये अज्ञानिनः ते मिथ्यादृष्टय एवेति मिथ्यादृष्ट्यादीनामप्यवधिदर्शनं साक्षात्सूत्रे प्रतिपादितं स एव विभंगज्ञा
नी यदा सासादनतां मिश्रतां वा वावर्त्तते तत्रापि तदानीमवधिदर्शनं प्राप्यत इति प्रस्तुतः सयोगिकेवलिगुणस्थानकद्विकं ९२
च तत्र मतिज्ञानादि न संभवत्येव तद्व्यवच्छेदेनैव केवलज्ञानस्य प्रादुर्भावात् नट्ठंमि उ छाउमत्थिए नाणे इति वचनप्रामाण्या
दिति २१ अडउवसमि चउ वेअगि खइए इक्कार मिच्छतिगि देसे सुहुमे अ सठाणं तेर जोग आहार सुक्काए २२ व्या० का

कादिरिगोलकन्यायाद्दिशा यतादीति पदं सर्वत्र योज्यते ततोऽयतादीन्युपशांतमोहांतान्यष्टौ गुणस्थानान्यौपशमिकसम्य
क्त्वे भवंति अयतादीन्यप्रमत्तांतानि चत्वारि वेदके क्षायोपशमिकापरपर्याये गुणस्थानकानि भवंति क्षायिकसम्यक्त्वे अय
तादीन्ययोगिकेवलिपर्यवसानान्येकादश गुणस्थानकानि भवंति तथा मिथ्यादृष्टिसास्वादनमिश्रलक्षणे देशे देशवि
रते सूक्ष्मे सूक्ष्मसंपराये च शब्दः समुच्चये स्वस्थाने सासादने मार्गणस्थाने सास्वादनं गुणस्थानं मिश्रे मार्गणस्थाने मिश्रं गुण
स्थानं देशसंयममार्गणस्थाने देशविरतं गुणस्थानं सूक्ष्मसंपरायसंयमे सूक्ष्मसंपरायगुणस्थानं तथा योगे मनोवाक्कायल
क्षणे अयोगिकेवलिवर्जितानि शेषाणि त्रयोदश गुणगुणस्थानानि भवंति सर्वेष्वप्येतेषु उक्तोऽलोमप्ररूपाद्वाराणामन्यत
मस्याहारस्यापि यथायोगं संभवात् तथा शुक्लायामिति शुक्ललेश्यायां प्रथमानि त्रयोदश गुणस्थानानि भवंति न त्वयोगिकेवलि
गुणस्थानं तस्य लेश्यातीतत्वादिति २२ अस्संनिसु पढमदुगं पढमतिलेसासु छच्च दुसु सत्त पढमंतिमदुग अजया अणहा
रे मग्गणासु गुणा २३ व्या० असंज्ञिषु संज्ञिव्यतिरिक्तेषु प्रथमं मिथ्यादृष्टिसास्वादनलक्षणगुणस्थानकद्वयं भवति तत्र यंथायं
१००० मिथ्यात्वमविशेषेण सर्वेष्वपि सासादनं तु लब्धि अपर्याप्तकानां करणपर्याप्तावस्थायामिति प्रथमासु तिसृषु लेश्या
सु मिथ्यादृष्ट्यादीनि प्रमत्तांतानि षड्गुणस्थानानि भवंति च समुच्चये कृष्णनीलकापोतलेश्यानां प्रत्येकमसंख्येयलोक
काकाशप्रदेशप्रमाणान्यध्यवसायस्थानानि ततो मंदसंक्लेशेषु तदध्यवसायस्थानेषु तथाविधसम्यक्त्वदेशविरतिसर्वविरतीनाम
पि सद्भावो न विरुध्यते उक्तं च सम्यक्त्वदेशविरतिसर्वविरतीनां प्रतिपत्तिकाले शुभलेश्यात्रयमेव भवति उत्तरकाले तु सर्वा
अपि लेश्याः परावर्त्तंते इति श्रीमदाराध्यपादा अप्याहुः सम्मत्तसुयं सव्वासु लहइ सुद्धासु तीसु य चरित्तं पुव्वपडिवन्नओ पुण
अन्नयरीए उ लेसाए श्रीभगवत्यामप्युक्तं सामाइयसंजए णं भंते कइ लेसासु होज्जा गोयमा छसु लेसासु होज्जा एवं छेओवट्ठाव

DR BHAU DAJI MEMORIAL

णियसंजुणवीत्यादि तथाद्वयोस्तेजोलेश्यापद्मलेश्ययोः सप्तगुणस्थानानि भवंति तत्रैषद्वयोर्वैक्रियिकानेवसप्तमं त्वप्रमत्त
गुणस्थानकं अप्रमत्तसंयताध्यवसायस्थानापेक्षया मिथ्यादृष्ट्यादीनां अप्रमत्तांतानां तेजोलेश्यापद्मलेश्यातारतम्येन जघन्या
त्यंता विशुद्धिके दृष्टव्ये तथा अनाहारकपंचगुणस्थानानि भवंति कानीत्याह प्रथमांतिमद्विकायतानीति द्विकशब्दस्य प्र
त्येकं योगात् प्रथमद्विकं मिथ्यादृष्टिसासादनलक्षणं अंतिमद्विकं सयोगिकेवल्ययोगिकेवलिलक्षणं अयतेति अवि
रतसम्यग्दृष्टिश्चेति तत्र मिथ्यात्वसास्वादनाऽविरतसम्यग्दृष्टिलक्षणंगुणस्थानकत्रयमनाहारके विग्रहगतौ
प्राप्यते सयोगिकेवलिगुणस्थानकं त्वनाहारके समुद्घातावस्थायां तृतीयचतुर्थपंचमसमयेषु दृष्टव्यं यदवादि च
तुर्थतृतीयपंचमेष्वनाहारक इति अयोगिकेवल्यवस्थायां तु योगरहितत्वेनौदारिकादिशरीरपरिपोषकपुद्गलग्र
हणाभावादनाहारकत्वं औदारिकवैक्रियाहारकशरीरपरिपोषकपुद्गलोपादानमाहार इति हि प्रवचनोपनिषद्वेदि
न एवं मार्गणास्थानेषु गत्यादिषु गुणस्थानकान्यभिहितानि अथ कतमा मार्गणास्थानेष्वेव योगानभिधित्सुः प्रथमं
तावद्योगानेव स्वरूपत आह ॥ गा॰ २३ सच्चेअरमीसअसच्च मोसमणवयविउव्वियआहारा उरलंमीसा कंमण इय जो
गा कंमअणाहारे २४ व्या॰ इह योगशब्देन कारणे कार्योपचारात् तत्सहकारित्वेन मनःप्रवृत्त्येव विवक्षितमिति वे
सह्योगस्य सामानाधिकरण्यं तत्र मनोयोगश्चतुर्धा तद्यथा सत्यमनोयोगः १ असत्यमनोयोगः २ सत्यासत्यमनोयो
गः ३ असत्यामृषामनोयोगः ४ तत्र संतो मुनयः पदार्था वा तेषु यथासंख्यं मुक्तिप्रापकत्वेन यथावस्थिततत्त्वचिंतनेन च
हितः सत्यः यथास्ति जीवः सदसद्रूपः कायप्रमाण इत्यादिरूपतया यथावस्थितवस्तुविकल्पनपरः सत्यश्चासौ मनोयो ९२
गश्च सत्यमनोयोगः १ तद्विपरीतोऽसत्यो यथा नास्ति जीव एकांतसद्रूपो विश्वव्यापीत्यादि कुविकल्पचिंतनपरः अस

त्यश्चासौ मनोयोगश्च असत्यमनोयोगः तथा मिश्रः सत्यासत्यमनोयोगः यथा इह धवखदिरपलाशादिमिश्रेषु बहुष्वशोक
वृक्षेषु अशोकवनमेवेदमिति यदा विकल्पयति तदा तत्राशोकवृक्षाणां सद्भावात् सत्योऽन्येषामपि धवखदिरपलाशादीनां तत्र स
द्भावादसत्य इति सत्यासत्यमनोयोग इति व्यवहारनयमतापेक्षयैवेदमुच्यते परमार्थतः पुनरयमसत्य एव यथा विकल्पितार्थ
योगात् ३ न विद्यते सत्यं यत्र सोऽसत्यः न विद्यते मृषा यत्र सोऽमृषः असत्यश्चासावमृषश्चेत्यनत्रादिभिन्नेरतिकर्मधारयः
असत्यामृषाश्चासौ मनोयोगश्च असत्यामृषमनोयोगः इह विप्रतिपत्तौ सत्यां वस्तुप्रतिष्ठाशया सर्वज्ञमतानुसारेण यद्विक
ल्प्यते यथास्ति जीवः सदसद्रूप इत्यादि तत्किल सत्यं परिभाषितं आराधकत्वात् यत्तु विप्रतिपत्तौ सत्यां वस्तुप्रतिष्ठाशया सर्व
ज्ञमतोत्तीर्णं किंचिद्विकल्प्यते यथा नास्ति जीव एकांतनित्यो वेत्ति तदसत्यमिति परिभाषितं विराधकत्वात् यत्पुनर्वस्तुप्रतिष्ठा
शामंतरेण स्वरूपमात्रप्रतिपादनपरं व्यवहारपतितं किंचित् विकल्प्यते यथा हे देवदत्त घटमानय गां देहि मह्यमित्यादि त
देतत्स्वरूपमात्रप्रतिपादनं व्यवहारिकं विकल्पज्ञानं यथोक्तलक्षणं सत्यं नापि मृषेत्यसत्यामृषमनोयोगः इति व्याख्यातश्चतु
र्धा मनोयोगः वाग्योगोऽपि चतुर्धा दृष्टव्यः तद्यथा सत्यवाग्योगः १ असत्यवाग्योगः २ सत्यासत्यवाग्योगः ३ असत्यामृषावाग्
योगः तत्र सतां हिता सत्या सत्या चासौ वाक् च सत्यवाक् तया सहकारिकारणभूतया यो योगो वाग्योगः अथवा वचनमात्रं सत्यत्वं
तत्कार्यत्वाद्योगे पुपचर्यते ततश्च सत्यश्चासौ वाग्योगश्च सत्यवाग्योगः सावार्थः सत्यमनोयोगवद्वाच्यः १ असत्यं सत्य
द्विपरीता सा चासौ वाक् च असत्यवाक् तया योगोऽसत्यवाग्योगः तथा सत्या चासावसत्या चेत्यादिरूपकर्मधारयो बहुव्री
हिर्वा सा चासौ वाक् च सत्यासत्यवाक् तत्प्रत्ययो योगः सत्यासत्यवाग्योगः न विद्यते सत्यं यत्र सोऽसत्यः न विद्यते मृषा यत्र सो
मृषः असत्यश्चासावमृषः स चासौ वाग्योगश्च असत्यामृषवाग्योगः शेषं मनोयोगवत्सर्ववाच्यं अत्र तृतीयचतुर्थेम

नोयोगो वाग्योगो वा व्यवहारनयमतेन द्रष्टव्यो निश्चयनयमतेन तु मनोज्ञानं वचनं वा सर्वमप्युक्तविवक्षापू
र्वकं सत्यं अज्ञानादिदूषितात्मनः सर्वकं त्वसत्यं उभयात्मकस्वरूपं मनस्तेव सत्यासत्यराशिद्वयेऽन्तर्भावादिति परिभाव
नीयं तथा काययोगः वैक्रियकाययोगः आहारककाययोगः उरलत्ति औदारिककाययोगः मीसत्ति मिश्रशब्दस्य
प्रत्येकं त्रितिशरीरत्रिकेण सह संबंधात् वैक्रियमिश्रकाययोगः आहारकमिश्रकाययोगः औदारिकमिश्रकाययोगः
कम्मणत्ति कार्मणकाययोगः इत्यक्षरार्थः भावार्थस्त्वयं विविधा विशिष्टा वा क्रिया विक्रिया तस्यां भवं वैक्रियं तथा हि
तदेकं भूत्वा अनेकं भवति अनेकं भूत्वा एकं अणु भूत्वा महद्भवति महद्भूत्वा अणु तथा खेचरं भूत्वा भूमिचरं भवति भू
मिचरं भूत्वा खेचरं भवति दृश्यं भूत्वा अदृश्यं भवति अदृश्यं भूत्वा दृश्यमित्यादि यद्वा विशिष्टं कुर्वन्ति तदिति वैकुर्विकं पृषो
दरादित्वादिष्टरूपसिद्धिः तच्च द्विधा औपपातिकं लब्धिप्रत्ययं च तत्रौपपातिकं उपपातजन्मनिमित्तं तच्च देवनारकाणां लब्धि
प्रत्ययं तिर्यङ्मनुष्याणां यदुक्तं च श्रीमदनुयोगद्वारलघुवृत्तौ विविहा विसिट्ठगा वा किरिया तीए जं तमिह नियमा
विउव्वियं पुण नारकदेवाण पयईए तदेव काययोगस्तन्मयो वा योगो वैक्रिययोगो वैकुर्विककाययोगो वा १ वैक्रि
यमिश्रं यत्र कार्मणेनौदारिकेण वा स वैक्रियमिश्रः तत्र कार्मणेन मिश्रं देवनारकाणामपर्याप्तावस्थायां प्रथमसमया
नंतरं बादरपर्याप्तकवायोः पंचेंद्रियतिर्यङ्मनुष्याणां च वैक्रियारंभकाले वैक्रियपरित्यागकाले वा औदारिकेण मिश्रं ततो २
वैक्रियमिश्रश्चासौ काययोगश्च वैक्रियमिश्रकायस्तेन योगो वैक्रियमिश्रकाययोगः २ चतुर्दशपूर्वविदा तथाविधका- ९४
र्योत्पत्तौ विशिष्टलब्धिवशादाह्रियते निर्वर्त्यत इत्याहारकं अथवा ह्रियंते गृह्यंते तीर्थकरादिसमीपे सूक्ष्मा जीवादयः
पदार्था अनेनेत्याहारकं [illegible]मिति कर्मणि करणे वा णकः यदाह कज्जंमि समुप्पन्ने सुयकेवलिणा विसिट्ठलद्धीए

जं एत्थ आहरिज्जइ भणंति आहारगं तं तु पाणिदयरिद्धिसंदरिसणत्थमत्थोवगहणहेउं वा संसयवोच्छेयत्थं गमणं जिणपाय
मूलंमि तदेव कायस्तेन योग आहारककाययोगः ३ आहारकमिश्रं यत्र औदारिकेणेति गम्यते स आहारकमिश्रः सिद्धप्रयो
जनस्य चतुर्दशपूर्वविद आहारकं परित्यज्यौदारिकमुपाददानस्य आहारकं प्रारभमाणस्य वा प्राप्यते स एव कायस्तेन योग आ
हारकमिश्रकाययोगः ४ तथा औदारिककाययोगः इह च सिद्धसिद्धांतसंदोहविवरणप्रकरणकरणप्रमाणप्रबंधनावाप्तसु
धांशुधामधवलयशः प्रसरधवलितसकलवसुंधरावलयप्रभुश्री[illegible]सूरिविरचितावृत्तावित्थं लिख्यते तत्रौदारं उरालं
उरलं ओरालं वा तित्थगरगणहरसरीराइं पडुच्च उदारं प्रधानं न ततः उदारतरमन्यमस्तीति काउं उदारं च बृहत् ततः उदारतरमन्यमस्तीति
काउं उदारमन्यप्रधानं उरालं नाम वित्थरालं विसालं ति वा जं ति होइ कहं साइरेगजोयणसहस्समवट्ठियप्पमाणमोरा
लयं अन्नमिद्दहमेत्तं नत्थि वेउव्वियं होज्ज लक्खमहियं अवट्ठियं पंचधणुसयाइं अहे सत्तमाए इत्थं पुण अवट्ठियप्पमाणं अइरेगं
जोयणसहस्सं वनस्पत्यादीनामिति उरलं नाम स्वल्पप्रदेशोपचितत्वाद्बृहत्त्वाच्च भिंडवत् ओरालं नाम मांसास्थिस्नाय्वाद्यवयवबद्धत्वात्
श्री[illegible]पादाः तत्रोदारमुरालं उरलमुरालं वा ओरालियंति पढमं पडुच्च तित्थेसरसरीरं १ भण्णइ होराले वित्थरवंतं
वणस्सतिं पप्प पयईए नत्थि अन्नं इद्दहं मित्तं विसालं ति २ उरलं थोवपएसो वियंपि महल्लगं जहा भिंडं मंसट्ठिण्हारुबद्धं ओरालं
समयपरिभासा सर्वत्र स्वार्थिककप्रत्ययः उदारमेवोरालमेव उरलमेव ओरालमेव औदारिकं पृषोदरादित्वादिष्टरूपनिष्पत्तिः
औदारिकमेव चीयमानत्वात् कायस्तेन सहकारिकारणभूतेन तद्विषयो योगः औदारिककाययोगः तथा औदारिकं मिश्रं यत्र
कार्मणेनेति गम्यते स औदारिकमिश्रः उत्पत्तिदेशोद्देशे पूर्वभवादनंतरमागतो जीवः प्रथमसमये कार्मणेनैव केवलेनाहा
रयति ततः परमौदारिकस्याप्यारब्धत्वादौदारिकेण कार्मणमिश्रेण यावत् शरीरस्य निष्पत्तिः यदाह सकलश्रुतांभोनिधिप्रा

रहस्यानुग्रहकाम्यया निर्मितानेकशास्त्रसंदर्भैः श्रीभद्रबाहुस्वामी जोएण कम्मएणं आहारेई अणंतरं जीवो तेण परं मीसेणं जाव सरीरस्स निप्फत्ती १ केवलिसमुद्घातावस्थायां तु द्वितीयषष्ठसप्तमसमयेषु कार्मणेन मिश्रमौदारिकं प्रतीतमेव मिश्रौदारिकयोक्ता सप्तमषष्ठद्वितीयेषु इतिवचनात् औदारिकमिश्रश्चासौ कायश्च तेन योगः औदारिकमिश्रकाययोगः ६ तथा कर्मणो विकारः कार्मणं विकारे अण्प्रत्ययः यद्वा कर्मैव कार्मणं प्रज्ञादित्वात् अण्प्रत्ययः कर्मपरमाणव एवात्मप्रदेशैः सह क्षीरनीरवदन्योन्यानुगताः सन्तः कार्मणशरीरं उक्तं च कम्मविगारो कम्मण अट्ठविहविचित्तकम्मनिप्फन्नं सव्वेसि सरीराणं कारणभूयं मुणेयव्वं अत्र सव्वेसिं इति सर्वेषामौदारिकादीनां शरीराणां कारणभूतं बीजभूतं कार्मणशरीरं न खल्वामूलमुच्छिन्ने भवप्रपञ्चप्ररोहबीजभूते कार्मणवपुषि शेषशरीरप्रादुर्भावसंभवः इदं च कार्मणशरीरं जन्तोर्गत्यन्तरसंक्रान्तौ साधकतमं करणं तथाहि कार्मणेनैव वपुषा परिकरितो जन्तुर्मरणदेशमपहायोत्पत्तिदेशमुपसर्पति ननु यदि कार्मणेन वपुः परिकरितो गत्यन्तरं संक्रामति तर्हि गच्छन् कस्मान्नोपलक्ष्यते कर्मपुद्गलानामतिसूक्ष्मतया चक्षुरादीन्द्रियागोचरत्वात् आह च प्रज्ञाकरगुप्तोऽपि अन्तराभवदेहोऽपि सूक्ष्मत्वान्नोपलक्ष्यते निष्क्रामन् प्रविशन्वापि नाभावोऽनीक्षणादपि कार्मणमेव कायस्तेन योगः कार्मणकाययोगः इयजोगत्ति इतिपदस्य समासो ततोऽयमर्थः एत एव योगा नान्य इति ननु तैजसमपि शरीरं विद्यते यच्चोक्ताहारपरिणमनहेतुः यद्वशाद्विशिष्टतपोविशेषसमुत्थलब्धिविशेषस्य पुरुषस्य तेजोलेश्याविनिर्गमस्तत्कथमुच्यते एत एव योगा नान्ये नैष दोषः सदा कार्मणेन सहाव्यभिचारितया तैजसस्य तद्ग्रहणेनैव गृहीतत्वादिति निरूपिताः स्वरूपतो योगाः संप्रत्येतानेव मार्गणास्थानेषु निरूपयन्नाह कम्मणमणहारत्ति अवच्छेदफलत्वाद्वाक्यमतोऽवधारणमवधारयितव्यं तद्यथा अनाहारकमित्येवं कार्मणमेवैकमनाहारके न शेषयोगा असंभवादिति न पुनरेवं कार्मणम-

नाहारकेष्वेवेति आहारकेष्वपि उत्पत्तिप्रथमसमये कार्मणयोगसंभवात् जोएण कम्मएणं आहारेई अणंतरं जीवो इति परमगुरुवचनप्रामाण्यात् नापि कार्मणमनाहारकेषु भवतीत्येवमवधारणमाधेयं अयोगिकेवल्यवस्थायामनाहारकस्यापि कार्मणकाययोगाभावात् गयजोगो उ अजोगी इतिवचनात् एवमन्यत्रापि यथासंभवमवधारणविधिरनुसरणीय इति ॥ २४ ॥ नरगइपणिंदितसतणअचक्खुनरनपुकसायसंमदुगे सन्निछलेसाहारगभवमइसुओहिदुगि सव्वे २५ व्याख्या नरगतौ मनुष्यगतौ पंचेन्द्रिये त्रसे त्रसकाये तनुयोगे अचक्षुर्दर्शने नरे नरवेदे पुंवेद इत्यर्थः नपुंसके नपुंसकवेदे कषायेषु क्रोधमानमायालोभेषु सम्यक्त्वद्विके क्षायोपशमिकक्षायिकलक्षणे संज्ञिनि मनोविज्ञानशालिनि षट्स्वपि लेश्यासु आहारके भव्ये मतौ मतिज्ञाने श्रुते श्रुतज्ञाने अवधिद्विके अवधिज्ञानावधिदर्शनरूपे सर्वेऽपि पञ्चदशापि योगा भवंति एतेषु सर्वेष्वपि मार्गणास्थानेषु यथासंभवं सर्वयोगप्राप्तेः यत्तु क्वापि योगा अकंम अणाहारोसु इति पदं दृश्यते तत्सम्यग्न मन्यते यत ऋजुगतौ विग्रहगतौ चोत्पत्तिप्रथमसमये जोएण कम्मएणं आहारेइ अणंतरं जीवो तेण परं मीसेणं जाव सरीरस्स निप्फत्ती १ इति सकलश्रुतधरचक्रवर्तिपरममुनिप्रवचनप्रामाण्यादाहारकस्यापि ततः कार्मणकाययोगोऽस्त्येव अथोच्येत गृह्यमाणं गृहीतमिति निश्चयनयवशात्प्रथमसमये औदारिकपुद्गला गृह्यमाणा गृहीता एव ततो द्वितीयादिसमयेष्विव तदानीमप्यौदारिकमिश्रकाययोग इति तदेतदयुक्तं सम्यग्वस्तुतत्त्वापरिज्ञानात् तथा यद्यपि तदानीमौदारिकादिपुद्गला गृह्यमाणा गृहीता एव तथापि न तेषां गृह्यमाणानां स्वग्रहणक्रियां प्रति करणरूपतायै न तन्निबंधनो योगः परिकल्प्येन किंतु कर्मरूपतयैव निष्पन्नस्य स्वसमनन्तरोत्तरकालं करणत्वदर्शनात् न हि घटः स्वनिष्पादनक्रियां प्रति कर्मरूपतां करणरूपतां च प्रतिपद्यमानो दृश्यते द्वितीयादिसमयेषु पुनस्तेषामपि प्रथमसमयगृहीतानामन्यपुद्गलोपादानं प्रति कारणतावो न विरुध्यते निष्पन्नत्वादतस्तदानीमौदारि

कमिश्रकाययोगा उपपद्यत एव अत एवोक्तं तेण परं मीसेणं ति तस्मादस्याहारकस्याप्युत्पत्तिप्रथमसमये कार्म्मणकाययोगाइ
ति अतोऽजोगा अकर्म्महारगेसु इति पदं चिंत्यमस्तीति ॥ २५ तिरिइत्थिअजयसासण अनाणउवसम अभव्वमिच्छेसु तेराह
रदुगूण तेउरलदुगूण सुरनरए ॥ २६ व्या० तिरित्ति तिर्यग्गतौ स्त्रियां स्त्रीवेदे अयते विरतिहीने सास्वादनसम्यक्त्वे अना
णत्ति अज्ञानत्रिके मत्यज्ञान श्रुताज्ञान विभंगलक्षणे उपशमे उपशमिकसम्यक्त्वे अभव्येषु सिद्धिगमनानुचितेषु मिथ्यात्वे
मिथ्यादृष्टिषु त्रयोदश योगा भवंति केत्याह आहारकद्विकेन आहारकाहारकमिश्रलक्षणेन ऊना हीना आहा
रकद्विकोनाः अयमत्र भावार्थः मनोयोगचतुष्टय वाग्योगचतुष्टय औदारिक औदारिकमिश्र वैक्रियवैक्रियमि
श्र कार्मणलक्षणा योगा भवंति तत्र कार्मणमपांतरालगतावुत्पत्तिप्रथमसमय एव औदारिकमिश्रमपर्याप्तावस्थायां १
पर्याप्तावस्थायामौदारिकं मनोवाग्योगचतुष्टयं च तथा तिरश्चामपि केषांचिद्वैक्रियलब्धियोगतो वैक्रियं च घटत एव
यत्तु आहारकद्विकमाहारकाहारकमिश्रलक्षणं तन्न संभवति तिरश्चां तत्र सर्वविरत्यसंभवात् सर्वविरतस्यैव हि चतु
र्दशपूर्वविदिन आहारकद्विकं संभवति आहारकं चउदसपुव्विणो इत्यादिवचनप्रामाण्यादिति तथा इह स्त्रीवेदो द्रव्यरू
पो द्रष्टव्यो न तु तथारूपाध्यवसायलक्षणो भावरूपस्तथा विवक्षणात् एवमुपयोगमार्गणायामपि द्रष्टव्यं प्राक् च गुण
स्थानकमार्गणायां सर्वोऽपि वेदो भावस्वरूपो गृहीतः तथा विवक्षणादेव अन्यथा तेषु प्रोक्तगुणस्थानकसंख्यायोगात्
सयोगिकेवल्यादावपि द्रव्यवेदस्य भावात् द्रव्यवेदश्च बाह्याकारमात्रं ततः स्त्रीषु त्रयोदश योगा आहारकद्विकोना ९६
भवंति न पुनराहारकद्विकमपि यत आहारकद्विकं चतुर्दशपूर्वविद एव भवति आहारसंजाय इह चउदसपुव्विणो इति वच
नात् न च स्त्रीणां चतुर्दशपूर्वाधिगमोऽस्ति स्त्रीणां आगमे दृष्टिवादाध्ययनप्रतिषेधात् यदाह ताप्पसुधासुधीश्वः उच्छा

गारवबहुला चलिंदिया दुब्बला धिईए य इय अइसेसज्झयणा भूयावाओ य नो थीणं ति १ भूतवादो दृष्टिवादः तथा अ
यते सास्वादने अज्ञानत्रिके च त्रयोदश योगा आहारकद्विकोना भवंति आहारकद्विकं पुनरेतेष्वज्ञानत्वादेव इहापास्तं
तथा औपशमिकसम्यक्त्वे आहारकद्विकेना त्रयोदश योगा आहारकं तत्रापि न घटामियर्त्ति यत औपशमिकसम्यक्त्वं
प्रथमसम्यक्त्वोत्पादकाले उपशमश्रेण्यारोहे वा भवति न च प्रथमसम्यक्त्वोत्पादकाले चतुर्दशपूर्वाधिगमसंभव स्तदभावा
२१ च्च कथमाहारकद्विकभावः प्रादुर्भवपदवीमियर्त्ति उपशमश्रेण्यारूढस्याहारकं नारभत एव तस्याप्रमत्तत्वात् आहार
कारंभकस्य च लब्ध्युपजीवनेनौत्सुक्यभावतः प्रमादबहुलत्वात् उक्तं च आहारगं उपमत्तो न पुण इत्ते अपमत्तुत्ति
आहारकस्थितश्चोपशमश्रेणिं नारभत एव तथास्वभावत्वादिति तथा असत्ये मिथ्यात्वे च चतुर्दशपूर्वाधिगमाभावादेव
आहारकद्विकवर्ज्याः त्रयोदश योगाः तेऽप्येवमर्वोक्ता त्रयोदश योगा औदारिकद्विकेन औदारिक औदारिकमिश्रलक्ष
णेनोना हीना एकादश योगाः सुरगतौ नरके नरकगतौ भवंति तथाहि मनोवाग्योगचतुष्टय वैक्रिय वैक्रियमिश्र
कार्मणलक्षणा एकादश योगाः सुरेषु नारकेषु च घटंत तत्र कार्मणमपांतरालगतावुत्पत्तिप्रथमसमय एव वैक्रियमि
श्रमपर्याप्तावस्थायां पर्याप्तावस्थायां तु वैक्रियं मनोवाग्योगचतुष्टयं च यत्पुनरौदारिकद्विकं तद्भवप्रत्ययादेव देवना
रकाणां न संभवति आहारकद्विकं तु सुरनारकाणां भवस्वभावतया विरतत्वाभावेन सर्वविरतिप्रत्ययचतुर्दशपूर्वाधिग
मासंभवादेवेहापास्तमिति ॥ २६ कंमुरलदुगं थावरि तेसिं विउव्विदुगपंचइगि पवणे छ असंनि चरमवइजुय ते विउ
व्विदुगूण चउ विगले २७ व्या० कार्मणमौदारिकद्विकं औदारिक औदारिकमिश्रलक्षणमिति त्रयो योगाः केत्याह स्थाव
रत्ति स्थावरकाये पृथिव्यप्तेजोवनस्पतिकायरूपे वायुकायिकस्य पृथग्वक्ष्यमाणत्वात् अयमत्र भावः स्थावरचतुष्के

कार्म्मणौदारिकद्विकरूपास्त्रयो योगा भवंति तत्र कार्म्मणमपांतरालगतावुत्पत्तिप्रथमसमये वा औदारिकमिश्रं त्वपर्याप्ताव
स्थायां पर्याप्तावस्थायां पुनरौदारिकमिति ते पूर्वोक्ताः त्रयो योगाः सवैक्रियद्विकाः सह वैक्रियद्विकेन वैक्रियमिश्रलक्षणे
न वर्त्तंत इति सवैक्रियद्विकाः संतः पंच भवंति केषां द्वयोरिति सामान्यत एकेंद्रियेषु पवने वायुकायेषु तत्र कार्म्मणौदारिकद्वि
कलक्षणयोगत्रयभावना प्राग्वत् वैक्रियद्विकभावना त्वेवं इह किल चतुर्विधा वायवो भवंति तद्यथा सूक्ष्मा अपर्याप्ताः
सूक्ष्माः पर्याप्ता बादरा अपर्याप्ताः बादरपर्याप्ताश्च तत्र बादरपर्याप्तानां केषांचिद्वैक्रियलब्धिसंभवोऽस्ति ता नधिकृत्य
वैक्रियमिश्रं लभ्यते न त्वकचमुच्यते केषांचिद्वैक्रियलब्धिसंभवोऽस्ति यावता सर्वेऽपि बादरपर्याप्तवायवः सवैक्रियाश्च
अवैक्रियाश्च अवैक्रियाणां चेष्टाया एवमप्रवृत्तेः उक्तं च केइ भणंति सव्वे वेउव्विया वाया वायंति अवेउव्विआणं चिट्ठा चेव
न पवत्तई इति तदयुक्तं सम्यक्सिद्धांतापरिज्ञानात् अवैक्रियाणामपि तेषां स्वभावत एव चेष्टोपपत्तेः यदाह भगवान्
श्रीहरिभद्रसूरिरनुयोगद्वारटीकायां वाउक्काइया चउव्विहा सुहुमा पज्जत्ता अपज्जत्ता बायरा पज्जत्ता अपज्जत्ता
तत्थ तिन्नि रासी पत्तेयं असंखिज्जलोगप्पमाणप्पएसरासिपमाणमित्ता जे उण बादरा पज्जत्ता ते पयरासंखिज्जइभागमित्ता
तत्थ ताव तिएहरासीणं वेउव्वियलद्धी चेव नत्थि बायरपज्जत्ताणं पि असंखिज्जइभागमित्ताणं अत्थि जेसिं पि लद्धी अत्थि ते
वि पलिओवमासंखिज्जभागसमयमित्ता संपयं पुच्छासमए वेउव्वियवृत्तिणो तम्हा जेण सव्वेसु चेव उ इह लोगाइसु चला वायवो
विज्जंति तम्हा अवेउव्विया वि वाया वायंति त्ति सिद्धं सभावेते सिं वायंति वातात् वायुरिति कृत्वा तिएहं रासीणं ति त्र ९७
याणां राशीनां पर्याप्तापर्याप्तसूक्ष्मापर्याप्तबादरवायुकायिनां तथा ते एव पूर्वोक्ताः पंच कार्मणौदारिकद्विकवैक्रिय
द्विकलक्षणयोगा अचरमा चतुर्थी असत्यामृषरूपा वाक् वचनयोग अचरमवाक् तया युक्ताः षड्योगा भवंति केषां असं

ज्ञि नि संज्ञिव्यतिरिक्ते जीवे तत्र कार्मणमपांतरालगतावुत्पत्तिप्रथमसमये वा औदारिकमिश्रमपर्याप्तावस्थायां पर्याप्ता
वस्थायामौदारिकं बादरपर्याप्तवायुकायिकानां वैक्रियद्विकं चरमभाषा च रवादि द्वींद्रियादीनामिति त एव पूर्वोक्ताः षड्
योगा वैक्रियद्विकेन विक्रियवैक्रियमिश्रलक्षणेन कनादीनाश्चत्वारो भवंति केषां विकलेषु द्वींद्रियत्रींद्रियचतुरिंद्रि
येषु कोऽर्थः तत्र कार्म्मणौदारिकद्विकभावना च प्राग्वत् चरमभाषा च असत्यामृषरूपा शंखादीनां भवंति शेषास्तु भा
षा न भवंत्येव विगलेसु असच्चमोसेव त्ति वचनादिति गाः २७ कम्मुरलमीसविणमणवइसमइयछेयचक्खुमणनाणे
उरलदुगकम्मपढमंतिममणवयकेवलदुगंमि २८ व्याः कार्म्मणमौदारिकमिश्रं विना शेषास्त्रयोदश योगा भवंति
केषां मनोयोगे वाग्योगे सामायिकसंयमे छेदोपस्थापनसंयमे चक्षुर्दर्शने मनःपर्यायज्ञाने भावना सुकरैव यौ
तु कार्म्मणौदारिकमिश्रौ तौ तेषु सर्वथा न संभवत एव तयोरपर्याप्तावस्थायां भावात् मनोयोग वाग्योग सामायिकछेदो १
पस्थापनीय चक्षुर्दर्शनमनःपर्यायज्ञानानां च तस्यामवस्थायामसंभवात् तथा उरलदुगत्ति औदारिकद्विकमौदारिक
कार्म्मकाययोगौ सयोग्यवस्थायामेव समुद्घातगतस्य वेदितव्यौ मिश्रौदारिकयोगस्तु प्रथमषष्ठद्वितीयेषु कार्म्मणशरी
रयोगी चतुर्थके पंचमे तृतीये चेति प्रथमांतिममनोयोगौ तु अविकलसकलविमलकेवलज्ञानकेवलदर्शन कलावलो
कितनिखिललोकालोकस्य भगवतो मनःपर्यायज्ञानिभिरनुत्तरसुरादिभिर्वा मनसा पृष्टस्य सतो मनसैव देशनात् तेहि
भगवत्प्रयुक्तानि मनोद्रव्याणि मनःपर्यायज्ञानेनावधिज्ञानेन वा पश्यंति दृष्ट्वा च ते विवक्षितवस्त्वालोचनाकारान्यथानुप
पत्त्या लोकस्वरूपादिकं बाह्यमर्थं पृष्टं अवगच्छंति प्रथमांतिमवाग्योगौ च अर्द्धदेशनादिषु व्याप्रियमाणस्य तस्यैव भगवतो द्र
ष्टव्याविति गाः २८ मणवइउरला परिहारसुहुमि नव ते उ मीसि सविउव्वा देसे सविउव्विदुगा सकंमुरलमीस अहक्खाए १

१ २७ व्या० परिहारविशुद्धिके सूक्ष्मसंपराये च नव योगाः केते इत्याह मनोयोगचतुष्कं वाग्योगचतुष्कं औदारिकं चे
ति यच्चाहारकद्विकं वैक्रियद्विकं कार्म्मणमौदारिकमिश्रं च तन्न संभवत्येव तथाहि आहारकद्विकं चतुर्द्दशपूर्व्वविदिन एव भ
वति आहारं चउदसपुव्विणो इति वचनात् परिहारविशुद्धिकसंयमप्रतिपत्तिः पुनरुत्कर्षतोपि किंचिन्न्यूनदशपूर्वस्यैव
तथैव सिद्धांते समनुज्ञानात् तत्कथं परिहारविशुद्धिकस्याहारकद्विकसंभवः नापि तस्य वैक्रियद्विकसंभवः तस्यामवस्था
यां तत्करणाननुज्ञानात् जिनकल्पिकस्येव तस्याप्यसंतविशुद्धप्रमादमूलसंयम घोरानुष्ठानपरायणत्वात् वैक्रि
यारंभे च लब्धिउपजीवने नौत्सुक्यभावात् प्रमादसंभवात् अत एव सूक्ष्मसंपरायसंयमेप्याहारकद्विकवैक्रियद्विक
लक्षणानां योगानामसंभवः सूक्ष्मसंपरायसंयमोपेतस्याप्यत्यंतविशुद्धतया निस्तरंगमहोदधिः कल्पत्वेन वैक्रियादि
प्रारंभासंभवात् कार्म्मणमौदारिकमिश्रं चापर्याप्तावस्थायामेवेति संयमद्वयेपि तस्याभावः ते पुनः शेषोक्ता नव योगा
ः सवैक्रियाः सह वैक्रियेण वर्त्तंत इति सवैक्रिया वैक्रियसहिताः संतो दश योगा मिश्रे सम्यक्मिथ्यादृष्टौ भवंति तत्र
वैक्रियं देवनारकापेक्षया यत्तु वैक्रियमिश्रं तन्नैवावाप्यते तस्यापर्याप्ता तस्यापर्याप्तावस्थाभावित्वात् मिश्रभावस्य च
न सम्ममिच्छो कुणइ कालं मि ति वचनप्रामाण्यादपर्याप्तावस्थायामसंभवात् स्यादेतद्वैक्रियलब्धिमतो मनुष्यतिरश्चः स
म्यग्मिथ्यादृष्टेः सतो वैक्रियारंभसंभवेन कथं वैक्रियमिश्रं नावाप्यते इति उच्यते तेषां वैक्रियारंभासंभवात् अन्यतो वा
कुतश्चित्कारणात्पूर्वाचार्यैस्तन्नाभ्युपगम्यते इति न सम्यगवगम्यामः तथाविधसंप्रदायाभावादतोस्माभिरपि तन्नेष्टमि ९८
ति देशविरते तथैव नव पूर्वोक्ताः सकार्म्मणौदारिकमिश्राः सह कार्म्मणौदारिकमिश्राभ्यां वर्त्तंत इति सकार्म्मणौ
दारिकमिश्राः संत एकादश योगा यथाख्यातसंयमे भवंति अयमर्थः मनोयोगचतुष्टयवाग्योगचतुष्टयकार्म्मणौदा

रिकयोगाः सुज्ञाना एव कार्म्मणमौदारिकमिश्रं तु यथाख्यातसंयमश्री कलगृहस्य भगवतः केवलिनः संभवति त
स्यहि समुद्घातगतस्य तृतीयचतुर्थपंचमसमयेषु कार्म्मणं कार्म्मणशरीरयोगी चतुर्थके पंचमे तृतीये चेति वचनात् द्विती
यषष्ठसप्तमसमयेषु औदारिकमिश्रौदारिकयोगः सप्तमषष्ठद्वितीयेष्विति वचनादवाप्यत इति यथाख्यातं संयमद्वये
ऽपि संभवात् अथ विनेयजनानुग्रहाय केवलिसमुद्घातस्वरूपमभिधीयते तत्र सम्यगपुनर्भावेन उत्प्राबल्येन क
र्म्मणो हननं घातः प्रलयो यस्मिन् प्रयत्नविशेषे स समुद्घातः अयं च केवलिसमुद्घातोऽष्टसामायिकस्तत्प्रारंभमा
ः प्रथममेवायोजिकाकरणमांतमौहूर्तिकमुदीरणावलिकायां कर्म्मप्रक्षेपव्यापाररूपमस्येति अथायोजिकाकरण
मिति कः शब्दार्थ उच्यते आङ् मर्यादायां आमर्यादया केवलिदृष्ट्या योजनं शुभानां योगानां व्यापारणमायोजिका
रत्नावेणकाः तस्याः करणमायोजिकाकरणं आह च कइसमइएणं भंते आउज्जीकरणे पन्नत्ते गोयमा असंखिज्ज
समइए अंतोमुहुत्तिए आउज्जीकरणे पन्नत्ते अयं कृतकृत्योपि केवली किमर्थं समुद्घातं करोतीति चेदुच्यते वेद्य
य नाम गोत्राणामायुषा सह समीकरणार्थं यदाह भगवानार्यश्यामस्वामी नाऊण वेयणिज्जं अइबहुयं आउयं
च थोवागं तेण समुग्घायं गच्छइ गोयमा केवलिस्स चत्तारिकम्मंसा अक्खीणा अवेइया अणिज्जिन्ना भवंति तं जहा वे
यणिज्जो आउए नाम गोए सव्वबहुपएसे वेयणिज्जे कम्मे हवइ सव्वथोवे से आउए कम्मे हवइ विसमं सम करेइ बंधणेहिं
ठिईहिं य एवं खलु केवली समुग्घायं गच्छइ बंधणेहिं ति बध्यंते आत्मप्रदेशैः सहलोलीभावेन संश्लिष्टाः क्रियंते यो
गव्यापारेणेते बंधनानि तुल्लिप्रत्ययादिस कर्म्मपादानं इति कर्म्मणपनट्ट कर्म्मपरमाणवः स्थितयो वेदनाकालाः शेषं सुग
मं उक्तं च आयुषि समाप्यमाने शेषाणां कर्म्मणां यदि समाप्तिनस्यात् स्थितिवैषम्याद्भवति सततः समुद्घातं स्थित

BHAU DAJI

चबंधनेन च समीक्रियार्थं हि कर्म्मणां तेषां अंतर्मुहूर्त्तशेषे तदायुषि समुद्घातसितिः अथ सर्वेऽपि केवलिनः समु
द्घातं गच्छंति नवेति चेत् उच्यते यस्य केवलिन आयुषा सह वेदनीयनामगोत्राणि समस्थितिकानि भवंति स हि न के
वलि समुद्घातं करोति शेषस्तु करोति उक्तं च श्रीमदार्यश्यामपादैः सव्वे वि णं भंते केवली समुग्घायं गच्छंति गोय
मा नो इणमट्ठे समट्ठे जस्साउएण तुल्लाइं बंधणेहिं ठिईहि य भवोवग्गाहिकंमाइं समुग्घायं से न गच्छइ अगंतूणं
समुग्घायं अणंता केवली जिणा जरामरणविप्पमुक्का सिद्धिं वरगइं गया समुद्घातं च कुर्वन् केवली प्रथमसमये
बाहल्यतः स्वशरीरप्रमाणमूर्ध्वमधश्च लोकांतपर्यंतमात्मप्रदेशानां संघातं दंडदंडस्थानीयं ज्ञानाभोगतः करोति
द्वितीयसमये तु तमेव दंडं पूर्वापरदिग्द्वयप्रसरणात् पार्श्वतो लोकांतगामिकपाटमिव कपाटं करोति तृतीयसमये त
मेव कपाटं दक्षिणोत्तरदिग्द्वयप्रसरणात् मंथसदृशं मंथानं करोति लोकांतप्रापिणमेव एवं च लोकस्य प्रायो बहुशरिते
मंथांतराण्यपूरितानि भवंति अनुश्रेणिगमनात् चतुर्थे तु समये तान्यपि मंथांतराणि सह लोकनिष्कुटैः पूरयति त
स्मिंश्च सकलो लोकः पूरितो भवतीति तदनंतरमेव पंचमे समये यथोक्तक्रमात् प्रतिलोमं मंथांतराणि संहरति जीवप्र
देशान् सकर्म्मकान् संकोचयति षष्ठे समये मंथानमुपसंहरति घनतरसंकोचनात् अष्टमे समये दंडं संहृत्य शरी
रस्थ एव भवंति भवेत्तत्त्वमनीषिकाविदं तितं यदार्षं उड्ढाहो यय लोगंतगामिणं सो स देहविक्खंभं पढमसम
यंमि मंथं च उक्कए लोगपूरणं कुणइ पडिलोमसंहरणं काउं तो होइ देहत्थो वाचकवरोप्याह दंडं प्रथमे समये कपाटमथ ९९
चोत्तरे तथा समये मंथानमथ तृतीये लोकव्यापी चतुर्थे तु संहरति पंचमे त्वंतराणि मंथानमथ पुनः षष्ठे सप्तमके तु कपाटं
संहरति ततोऽष्टमे दंडं तस्येदानीं समुद्घातस्य योगव्यापारश्चिंत्यते योगाश्च मनोवाक्कायाः अत्रैषां कः कदा व्याप्रियते

तत्रेह मनोवाग्योगयोर्व्यापार एव प्रयोजनाभावात् यदाह धर्म्मसारटीकायां भगवान् श्रीहरिभद्रसूरिः मनोव
सी तदा न व्यापारयति प्रयोजनाभावात् काययोगस्य तु औदारिककाययोगस्यौदारिकमिश्रकार्म्मणकाययोगस्य
च व्यापारो न शेषस्य काययोगस्यासंभवात् तत्र प्रथमाष्टमसमययोरौदारिककायप्राधान्यादौदारिककाययोग एव
+ज्ञारार+ द्वितीयषष्ठसप्तमकेषु पुनः कार्म्मणस्यापि व्याप्रियमाणत्वादौदारिकमिश्रः एवं तृतीयचतुर्थपंचमेषु तु केवलमेव कार्म्मणं शा
रीरं व्यापारभागिति कार्म्मणकाययोगः यदाहुः श्रीमदार्यश्यामपादाः श्रीप्रज्ञापनायां षट्त्रिंशत्तमे समुद्घातपदे पढम
अट्ठमसमएसु ओरालियकायजोगं जुंजइ बिइयछट्ठसत्तमेसु समए ओरालियमीसगसरीरकायजोगं जुंजइ तइयचउत्थ
पंचमेसु समएसु ओरालिअमीसगसरीरकायजोगं जुंजइ तइयचउत्थपंचमेसु समएसु कम्मगसरीरकायजोगं जुंजइ
भाष्यकारोप्याह न किर समुग्घायगओ मणवइजोगप्पओयणं कुणइ ओरालियजोगं पुण जुंजइ पढमट्ठमे समए उभयव
वहाराउ तम्मीसं बीयछट्ठसत्तमए तिचउत्थपंचमे कम्मगं तु तस्सेव विगणओ ततः समुद्घातात् निवृत्तो मनोवाक्काययोग
त्रयमपि व्यापारयति यतः स भगवान् भवधारणीयकर्म्मसु नामगोत्रवेदनीयेषु विषमात्मसमुद्घातवशतः प्रब
लमायुषा सह समीकृतेषु अंतर्मुहूर्त्तस्थितिपरमपदो यदानुत्तरोपपातिकादिना देवेन मनसा पृच्छ्यते तर्हि व्याकरणाय
मनःपुद्गलान् गृहीत्वा मनोयोगं युनक्ति तमपि सत्यमसत्यामृषारूपं वा मनुष्यादिभिः पृष्टः सन् पृष्टो वा कार्यवशात् गृही
त्वा भाषापुद्गलान् वाग्योगं तमपि सत्यमसत्यामृषारूपं वा न शेषान् वाङ्मनोयोगान् क्षीणरागद्वेषत्वात् काययोगं त्व
गमनादिचेष्टासु तदेवमंतर्मुहूर्त्तकालं यथायोगं योगत्रयव्यापारभाक् केवलीत्वं भूत्वा तदनंतरं अत्यंताप्रकंपलेश्यातीतं
परमनिर्ज्जराकारणं ध्यानं प्रतिपित्सुः अवश्यं योगनिरोधायोपक्रमते योगे सति यथोक्तरूपस्य ध्यानस्यासंभवात् यदाह

साधम्मसुधांशो निश्चिः तिति निसमुग्घाउ तिन्नि विजोगं जिणपउंजिज्जा सच्चमसच्चामोसं च सो मेणं तह वईजोगं
१ उरालकायजोगं गमणाईपाडिहारियाणं च पच्चप्पणं करिज्जा जोगनिरोहं तउ कुणई २ किं न सजोगो सिज्झइ
सबंधहेउ त्ति जं सजोगो नसीमई परमसुक्कं स निज्जराकारणं परमं ३ अन्यत्राप्युक्तं सततो योगनिरोधं करोति
लेश्यानिरोधमभिकांक्षन् समयस्थितिं च बंधं योगं निमित्तं स निरुरुत्सुः १ समये समये कर्मादाने सति संतते
र्न मोक्षः स्यात् यद्यपि हि विमुक्तानि स्थितिक्षयतः सर्वकर्माणि २ नामकर्मणो हि वीर्ययोगद्रव्येण भवति जीवा-
स्य तस्यावस्थानेन तु सिद्धः समयस्थितिबंधं ३ योगनिरोधं च कुर्वाणः प्रथमं मनोयोगं निरुणद्धि तत्र पर्याप्तमात्रसं
ज्ञिपंचेन्द्रियस्य प्रथमसमये यावंति मनोद्रव्याणि यावन्मात्रश्च तद्व्यापारस्तस्मादसंख्येयगुणहीने मनोयोगं प्रति
समयं निरुंधानः संख्येयैः समयैः साकल्येन निरुणद्धि यदाह भगवान् श्रीमदार्यश्यामः से णं पुव्वामेव सन्निस्स पं
चेंदियस्स पज्जत्तयस्स जहन्नजोगिस्स हिट्ठा असंखिज्जगुणपरिहीणं पढमं मणजोगं निरुंभइ साप्यकारोप्याह
पज्जत्तमित्तसन्निस्स जत्तियाइं जहन्नजोगिस्स होंति मणोदव्वाइं तव्वावारो य जम्मत्तो १ तदसंखगुणविहीणं समए
समए निरुंभमाणो सो मणसो सव्वनिरोहं कुणइ असंखिज्जसमएहिं २ तओ अणंतरं च णं बेइंदियस्स पज्जत्तगस्स जहन्न
जोगिस्स हिट्ठा असंखिज्जगुणहीणं बिइयं वइजोगं निरुंभइ साप्यकृदप्याह पज्जत्तमित्तबेंदियस्स जहन्नवइजोग
पज्जवा जे उ तदसंखगुणविहीणं समए समए निरुंभंतो १ सव्ववइजोगरोहं संखाईएहिं कुणइ समएहिं तओ अणंत
रं च णं सुहुमस्स पणगजीवस्स पज्जत्तगस्स जहन्नजहन्नजोगिस्स हिट्ठा असंखिज्जगुणपरिहीणं तइयं कायजोगं
निरुंधानः सूक्ष्मक्रियमप्रतिपातिध्यानमधिरोहति तत्सामर्थ्याच्च वदनोदरादिविवरपूरणेन देहत्रिभागवर्त्तिप्र

देशो भवति यदाह साध्यसुधांशुः तत्तो असुहुमपणगस्स पढमसमओववन्नस्स जो किर जहन्नजोगो तदसंखिज्जगुण
हीणमेक्केक्के समए निरुंभमाणो देहतिभागं च मुंचंतो रुंभइ स कायजोगं संखाईएहिं चेव समएहिं तो कयजोगनिरो
हो सीलेसीभावणमेइ सीलं च समाहाणं निच्छयओ सव्वसंवरो सो उ तस्सेसो सीलेसो सीलेसी होइ तदवत्था हस्सक्खरु
च्चारेण उ एककालेण पंचलहु ति अच्छइ सेलेसिगओ तत्तियमेत्तं तओ कालं तणुरोहारंभाओ झायइ सुहुमकिरिया
नियट्टिं सो वुच्छिन्नकिरियमप्पडिवाई सेलेसिकालंमि ४ यच्चाप्यन्यत्राप्युक्तं जोगनिरोहं करित्ता अजोगयं पाउणि
त्ताईसिं जस्सपंचक्खरुच्चारणद्धाए असंखिज्जसमयं अंतमुहुत्तियं सेलेसिं पडिवज्जइ पुव्वरइयसेढीलद्धाए असंखि
ज्जाहिं गुणसेढीहिं ०००० ०००० ०००० ०००० असंखिज्जकम्मखंधे खवयंते वेदणिज्जाउनामगोए इच्चेए चत्तारि
कम्मंसे जुगवं खवित्ता ००० ००० ००० ००० उरालिअतेयाकम्माइं सव्वाहिं विप्पजहणाहिं विप्पजहित्ता उज्जु
०० ०० ०० ००
० ० ० ०
सेढीअफुसमाणगइए एगसमएणं अविग्गहेणं उड्ढं गंता सागारोवउत्ते सिज्झइ साप्यकारोप्याह तदसंखिज्जगुणाए गुण
सेढीइ रइअं पुरा कम्मं समए समए खविउं कमेण सव्वं तत्थ कम्मं सेसं सेढीए पज्जवंतो समय पएसंतरं अफुसमाणो एगसमएण
सिज्झइ सागारोवउत्तो सो अयं च समुद्घातविधि सर्वोप्यावश्यकविधायेण तत्रेयं गाथा दंडकवाडे मंथंतरे य संहरणया
सरीरत्थे भासाजोगनिरोहो सेलेसी सिज्झणा चेव इति अतिरिक्तामार्गणास्थानेषु योगाः सांप्रतमेतेष्वेवोपयोगस्वरू
पनिरूपणार्थमुपयोगानभिधित्सुराह ३ अथ तिअनाण नाण पण चउ दंसण बार जिअलक्खणुवओगा विणु मण
नाण दुकेवल नव सुरतिरिनिरयअजएसु ३० व्याख्या त्रीण्यज्ञानानि मत्यज्ञानश्रुताज्ञानविभंगरूपाणि ज्ञानानि मति
ज्ञानश्रुतज्ञानावधिज्ञानमनःपर्यवज्ञानकेवलज्ञानलक्षणानि पंच स्वोपज्ञकर्मविपाकटीकायां विस्तरेणाभिहि

तुरिनाणसागा
रोवउगे

स्वरूपाणि चत्वारि दर्शनानि चक्षुर्दर्शनाचक्षुर्दर्शनावधिदर्शनकेवलदर्शनरूपाणि इत्येवं द्वादशोपयोगाः प्राग्
निरूपितस्वरूपा भवंति किंविशिष्टा इत्याह जियलक्खणत्ति प्राकृतत्वाल्लिंगलोपः जीवस्यात्मनो लक्षणं
लक्ष्यते ज्ञायते तदन्यव्यवच्छेदेनेति लक्षणमसाधारणं स्वरूपं अत एवोक्तमन्यत्रोपयोगलक्षणो जीव इति
ते च द्विधा साकारा अनाकाराश्च तत्र पंच ज्ञानानि त्रीण्यज्ञानानीत्यष्टावुपयोगाः साकाराश्चत्वारि दर्शनान्यनाका
राउपयोगाः यदाह प्रवचनार्थसार्थसरससरसीरुहसमूहप्रकाशनसहस्रांशुर्भगवान् श्रीमदार्यश्यामः प्रज्ञाप
नाया मुपयोगपदे ऽष्टमे कतिविहेणं भंते उवओगे पन्नत्ते गोयमा दुविहे उवओगे पन्नत्ते तंजहा सागारोवओगे य अ
णागारोवओगे य सागारोवओगेणं भंते कतिविहे पन्नत्ते गोयमा अट्ठविहे पन्नत्ते तंजहा आभिणिबोहियनाण
सागारोवओगे सुयनाणसागारोवओगे मणपज्जवनाणसागारोवओगे केवलनाणसागारोवओगे मइअन्नाणसागा १
रोवओगे सुयअन्नाणसागारोवओगे विभंगनाणसागारोवओगे अणागारोवओगेणं भंते कइविहे पन्नत्ते गोयमा
चउव्विहे पन्नत्ते तंजहा चक्खुदंसणअणागारोवओगे अचक्खुदंसणअणागारोवओगे ओहिदंसणअणागारोव
ओगे केवलदंसणअणागारोवओगे य सांप्रतं मार्गणास्थानभेदानभिधानावसरे सप्रपंचमभिधित्सुरिति
विणमणनाणाइ विना मनःपर्यायज्ञानं केवलद्विकं च केवलज्ञानकेवलदर्शनलक्षणं शेषा नवोपयोगा भ
वंति सुरे सुरगतौ तिरिति तिर्यग्गतौ नरके नरकगतौ अयते विरतिहीने एते पुनः सर्वेऽपि हि सर्वविरतस्य संभवेन म २०१
नःपर्यायज्ञानकेवलद्विकासंभवादिति गा ३० तसजोअवेयसुक्काहारनरपणिंदिसंनिभवि सव्वे नयणेअर
पणलेसा कसाइ दसकेवलदुगूणा ३१ व्या० त्रसेषु योगेषु मनोवाक्कायरूपेषु वेदेषु इत्थं वेदरूपस्त्रीपुंनपुंसकल

क्षणेषु शुक्ललेश्यायां आहारकेषु नरगतौ पंचेंद्रियेषु संज्ञिषु भवित्ति भव्येषु च सर्वे द्वादशोपयोगाः संभवंति एतेषु
सर्वेष्वपि सम्यक्त्वदेशविरतिसर्वविरत्यादीनां संभवात् नयणेति चक्षुर्दर्शनमितरत्ति अचक्षुर्दर्शनं पंचसु लेश्या
सु कृष्णनीलकापोततेजःपद्मलेश्यासु कषायेषु क्रोधमानमायालोभेषु दशोपयोगा भवंति के इत्याह केवलद्वि
केनकनादीनाज्ञानचतुष्टयाज्ञानत्रिकरूपा न तु केवलद्विकं चक्षुर्दर्शनादिषु ज्ञानादेरनुत्पादात्तस्य गा ३१ चउरिंदि
अअसंनि दुअनाणदंसण इगबितिथावरअचक्खु तिअन्नाणदंसणदुगं अनाणतिगअभवमिच्छदुगे ३२ व्याख्या चउरिंदि
येऽसंज्ञिनि च चत्वार उपयोगा भवंति के ते इत्याह द्यज्ञानदर्शने द्वे अज्ञाने मत्यज्ञानश्रुताज्ञानरूपे द्वे दर्शने चक्षु
र्दर्शनाचक्षुर्दर्शनलक्षणे इत्यर्थः तथा त एवश्चत्वारश्चत्वार उपयोगा अचक्खुत्ति अचक्षुषश्चक्षुर्दर्शनरहिताः संभव
यो भवंति के इत्याह इगत्ति सामान्यत एकेंद्रियेषु द्वींद्रियेषु त्रींद्रियेषु स्थावरेषु पृथिव्यप्तेजोवायुवनस्पतिषु को
ऽर्थः एकद्वित्रींद्रियस्थावरेषु मत्यज्ञानश्रुताज्ञानाचक्षुर्दर्शनरूपास्त्रय उपयोगा भवंतीत्यर्थः न शेषा यतः सम्यक्त्वा
भावान्मतिश्रुतज्ञानासंभवः सर्वविरत्यभावाच्च मनःपर्यायज्ञानकेवलज्ञानकेवलदर्शनासंभवः यत्पुनरवधिद्विकं
विभंगज्ञानं च तद्भवप्रत्ययं गुणप्रत्ययं वा अनयोर्नाद्यतरोऽपि प्रत्ययः संभवति चक्षुर्दर्शनोपयोगाभावस्तु च
क्षुरिंद्रियाभावादेव सिद्धः तथा त्रयाणामज्ञानं अज्ञानत्रयं मत्यज्ञानश्रुताज्ञानविभंगरूपं दर्शनद्विकं चक्षुर्दर्शना
चक्षुर्दर्शनलक्षणमित्येते पंचैवोपयोगा भवति क्वेत्याह अज्ञानत्रिके मत्यज्ञानश्रुताज्ञानविभंगरूपे यच्चाज्ञा
नत्रिकेऽवधिदर्शनं पूर्वाचार्यैः कुतश्चित्कारणान्नेष्यते तत्र सम्यगवगच्छामस्तथाविधसंप्रदायाभावात् अथवा सिद्धां
तेऽपि प्रतिपाद्यंते तथाप्यत्र इह मितरते पूर्वं दर्शितमेव तदतिप्रायाद्धस्मात्तिरपिनोक्तमिति अभव्येऽभव्ये मिथ्यात्वद्विके मि

थ्यात्वे सास्वादने पंचोपयोगा अज्ञानत्रिकदर्शनद्विकरूपा न शेषाः अवदातसम्यक्त्वविरतत्वाभावादिति ॥ गा: ३२ ॥
केवलदुगे नियदुगं नव तिअनाणविणु खइयअहखाए। दंसणनाणतिगं देसि मीसि अन्नाणमीसं तं ॥ ३३ ॥ व्या
ख्या केवलद्विके केवलज्ञानकेवलदर्शनलक्षणे निजद्विकं केवलज्ञानकेवलदर्शनरूपमुपयोगद्विकं भवति न शेषा
दश ज्ञानदर्शनव्यवच्छेदेनैव केवलयुगलस्य सद्भावात् नट्ठंमि उ छाउमत्थिए नाणे इति वचनात् तथा क्षायिके सम्यक्त्वे
यथाख्याते च संयमे नवोपयोगा भवंति केत इत्याह अज्ञानत्रिकं मतिश्रुताज्ञानविभंगलक्षणं विना यतः क्षायिक
यथाख्यातयोरज्ञानत्रिकं न लभ्यत एव तस्य मिथ्यात्वनिबंधनत्वात् निर्मूलितो मिथ्यात्वक्षयेणोपशमेन च क्षायिकसम्य
क्त्वयथाख्यातौ स्यातां तदात् अत एव तयोर्नवैवोपयोगा भवंतीति तथा देशे देशविरते षडुपयोगा भवंति कथमित्याह
दर्शनज्ञानत्रिकं त्रिकशब्दस्य प्रत्येकं संबंधात् दर्शनत्रिकं चक्षुर्दर्शनाचक्षुर्दर्शनावधिदर्शनरूपं ज्ञानत्रिकं मतिश्रु
तावधिज्ञानरूपमिति न शेषाः मिथ्यात्वसर्वविरत्यभावात् मिश्रे तदेव दर्शनज्ञानत्रिकं अज्ञानमिश्रं द्रष्टव्यं मति
ज्ञानं मत्यज्ञानमिश्रं श्रुतज्ञानं श्रुताज्ञानमिश्रं दर्शनत्रिकं चेति मिश्रेऽपि षडुपयोगाः सिद्धा भवंति इह चावधि
दर्शनमागमाभिप्रायेणोक्तं अन्यथा एतेष्वेव मार्गणास्थानकेषु गुणस्थानकमार्गणायां अजयाइ नवमइसुओहि
दुगे इत्युक्तमिति ॥ गा: ३३ ॥ मणनाणचक्खुवज्जा अणहारे तिन्नि दंसण चउनाणा। चउनाणसंयमोवसमवेअगे ओहिदंसे अ
॥ ३४ ॥ व्या॰ मनःपर्यायज्ञानचक्षुर्दर्शनवर्जाः शेषा दशोपयोगा अनाहारके भवंति यत्तु मनःपर्यायज्ञानं च १०२
क्षुर्दर्शनं तच्चानाहारके न संभवति यतोऽनाहारके विग्रहगतौ केवलिसमुद्घातावस्थायां च न भवत इदानीं मनःपर्या
यज्ञानं चक्षुर्दर्शनं संभवतीति तथा त्रीणि दर्शनानि चक्षुर्दर्शनाचक्षुर्दर्शनावधिदर्शनरूपाणि चत्वारि ज्ञानानि मतिश्रु

तावधिमनःपर्यवलक्षणानीत्येवं सप्तोपयोगा भवंति केष्वित्याह चतुःशब्दस्य प्रत्येकं संबंधात् चतुर्षु ज्ञानेषु मतिज्ञानश्रुतज्ञा
नावधिज्ञानमनःपर्यायज्ञानेषु तथा चतुर्षु संयमेषु सामायिकच्छेदोपस्थापनपरिहारविशुद्धिकसूक्ष्मसंपरायेषु औपशमिके
सम्यक्त्वे वेदके क्षायोपशमिकापरपर्याये अवधिद्विके अवधिज्ञानावधिज्ञानावधिदर्शनरूपे चः समुच्चये न शेषास्तज्ञानेम
त्यज्ञानादीनामसंभवात् इह चावधिदर्शनमत्यज्ञानादीनामसंभवात् इहाप्यवधिदर्शनमत्यज्ञानाद्युपयोगप्रतिषेधो व
क्तश्रुताचार्याभिप्रायापेक्षया द्रष्टव्यो ऽन्यथा हि मत्यज्ञानादिमपि सूत्रे साक्षादवधिदर्शनं प्रतिपादितमेवं प्रज्ञप्तिसूत्रं च प्रागेवो
क्तमिति उक्ता मार्गणास्थानेषूपयोगाः अथ योगेषु जीवस्थानकगुणस्थानकयोगोपयोगानभिधित्सुर्मतांतरमाह ॥ गा: ३४ ॥ दो
तेरतेरबारस मणे कमा अट्ठ दु चउ चउ वयणे। चउ दुपण तिन्नि काए जिअगुणजोगोवओगन्ने ॥ ३५ ॥ व्या॰ अन्ये तु आचा
र्या भणंति मनोयोगे द्वे जीवस्थानके त्रयोदश गुणस्थानकानि त्रयोदश योगाः द्वादशोपयोगा इतीच्छंति क्रमाक्रमेण यथा
संख्यमित्यर्थः अत्रायमभिप्रायः वाग्योगांतरसहितोऽसहितो वा स्वरूपमात्रेणैव काययोगादिर्विवक्षितस्तेन तत्र यथो
क्तगुणस्थानकादिवक्तव्यता सर्वाप्युपपद्यते इह तु काययोगादियोगांतरविरहित एव विवक्ष्यते यथा मनोयोगवाग्
योगविरहितः काययोगः मनोयोगविरहितो वाग्योगः ततो मनोयोगे द्वे इति द्वे जीवस्थानके अयोगिकेवलिवर्जि
तानि त्रयोदश गुणस्थानानि कार्मणौदारिकमिश्रवर्जिताः त्रयोदश योगाः कार्मणौदारिकमिश्रौ हि काययोगावप
र्याप्तावस्थायां वा न च तदानीं मनोयोगोऽपर्याप्तावस्थायां मनस एवासंभवात् केवलिसमुद्घातावस्थायां तु प्रयोजनाभाव
त् उक्तं च मनो वचसी तु तदा सर्वथा न व्यापारयति प्रयोजनाभावात् तथा वचने मनोयोगविरहिते वाग्योगे क्रमात् अ
ष्टौ जीवस्थानानि पर्याप्तापर्याप्तद्वीन्द्रियत्रीन्द्रियचतुरिंद्रियासंज्ञिपंचेंद्रियरूपाणि द्वे गुणस्थाने मिथ्यात्वसास्वादनलक्षणे

चत्वारो योगाः कार्मणौदारिकमिश्रौदारिकासत्यामृषावाग्योगरूपाः चत्वार उपयोगा मत्यज्ञानश्रुताज्ञानचक्षुर्दर्शना-
चक्षुर्दर्शनलक्षणाः वाग्योगादिमनोयोगविरहित स्पर्शनेंद्रियादिद्वीन्द्रियादिसंज्ञिपंचेंद्रियपर्यंतेषु संभवंति नान्येषु
तातायथोक्तान्येव जीवस्थानकादीनि तत्र संभवंति नो नाधिकानि तथा केवलकाययोगे चत्वारि पर्याप्तापर्याप्तसूक्ष्म
बादरैकेंद्रियलक्षणानि जीवस्थानकानि द्वे आद्ये गुणस्थानके मिथ्यादृष्टिसासादनलक्षणे पंच योगा वैक्रियद्विक
औदारिकद्विककार्मणरूपाः त्रय उपयोगा मत्यज्ञानश्रुताज्ञानाचक्षुर्दर्शनस्वरूपाः केवलकाययोगो हि एकेंद्रि-
येष्वेवावाप्यते तत्र जीवस्थानकादीनि यथोक्तान्येव घटंत इति अत्र विहितं योगेष्वेकाययमतं सांप्रतं सांप्रतं मार्गणास्था- १
नेषु लेश्या अभिधित्सुराह ॥ ३५ छसु लेसासु सठाणं एगिंदिअसंनिभूदगवणेसु पढमा चउरो तिन्नि उ नारयवि-
गलग्गिपवणेसु ॥ ३६ व्या० षट्सु लेश्यासु स्वस्थानं स्वास्वा लेश्या भवंति यथा कृष्णलेश्यादृष्याः सामान्यत एकेंद्रिये-
षु असंज्ञिषु दगवनेषु पृथिव्यंबुवनस्पतिषु प्रथमाः कृष्णनीलकापोततेजोलेश्याश्चतस्रो भवंति भवनपतिव्यंतरज्यो-
तिष्कसौधर्मेशानदेवादिस्वस्वस्वभावता एतेषु मध्ये समुत्पद्यंते तेन तेजोलेश्यावंतो जीवश्च्यवंते यल्लेश्य एव म्रियते अग्रे-
पि तल्लेश्य एवोपपद्यते जल्लेसे मरइ तल्लेसे उववज्जइ इति वचनात् तत एतेषामपर्याप्तावस्थायां कियत्कालं तेजोलेश्या
भवति नारकेषु विकलेषु द्वींद्रियत्रींद्रियचतुरिंद्रियेषु अग्निर्तेजस्कायेषु पवनेषु वायुकायेषु प्रथमास्तिस्रः कृ-
ष्णनीलकापोतलेश्या भवंति नान्याः प्रायोऽमीषामप्रशस्ताध्यवसायस्थानोपेतत्वात् ॥ ३६ अहक्खायसुहुमकेव- १०२
लदुगि सुक्का छावि सेसठाणेसु नरनिरयदेवतिरिआ थोवा दु असंखणंतगुणा ॥ ३७ व्या० यथाख्यातसंयमे सूक्ष्मसंप-
रायसंयमे च केवलद्विके केवलज्ञानकेवलदर्शनरूपे न चैकलेश्या यथाख्यातसंयमादावेकांतविशुद्धपरिणामत्वा- १

॥

त् तस्य च शुक्ललेश्याविनाभूतत्वात् शेषस्थानेषु सुरगतौ तिर्यग्गतौ मनुष्यगतौ पंचेंद्रियत्रसकाययोगत्रयवेदत्रय
कषायचतुष्टयमतिज्ञानश्रुतज्ञानावधिज्ञानमनःपर्यायज्ञानमत्यज्ञानश्रुताज्ञानसामायिकछेदोपस्थापनीयपरिहा-
रविशुद्धिकदेशविरतिचक्षुर्दर्शनाचक्षुर्दर्शनावधिदर्शनभव्याभव्यक्षायिकक्षायोपशमिकऔपशमिकसास्वादनमिश्र-
मिथ्यात्वसंज्ञिआहारकानाहारकलक्षणैकचत्वारिंशत्सु शेषमार्गणास्थानेषु षडपि लेश्याः उक्ता मार्गणास्थानेषु ले-
श्याः इदानीं मार्गणास्थानेषु स्वस्थानापेक्षयाल्पबहुत्वं निरूपयिषुराह इत्यादि इह यथासंख्येन योजना कर्तव्या सा
चैवं नरा निरयदेवतिर्यग्योनिकेभ्यः सकाशात् स्तोकाः यत इह द्विविधा नरा वातपित्तादिजन्मसंमूर्छजाः स्त्रीगर्भेपित्रा-
गर्भजाश्च तत्राद्याः कदाचिन्न भवंत्येव जघन्यतः समयस्योत्कृष्टतस्तु चतुर्विंशतिमुहूर्तानां तदनंतरकालस्य प्रतिपादक-
त्वादाह संदेहसंदोहशैलशृंगसंगतो लिंगवान् जिनस्य गणि क्षमाश्रमणः बारसमुहुत्तगब्भे उक्कोसं मुच्छिमेसु चउवीसं उ-
क्कोस विरहकालो दोसु वि य जहन्नउ समउ १ उत्पन्नानां जघन्यतस्तु उत्कृष्टतश्चांतर्मुहूर्तस्थितिकत्वेन पश्चात् सर्वेषां निर्लेपत्वसं-
भवाद्यदा उत्पद्यंते तदा जघन्यत एको द्वौ त्रयो वा उत्कृष्टतस्तु असंख्याताः इतरे तु सर्वदैव संख्येया भवंति नासंख्येयास्तत्र संख्ये-
यकस्य संख्यातभेदत्वान्न ज्ञायते कियदपि संख्येयकमतो विशेषत इदं प्ररूप्यते इह षष्टवर्गः पंचमवर्गेण यदा गुणितो भव-
ति तदा गर्भजमनुष्यसंख्या भवति अथ कोयं षष्ठ अंथायं १५०० वर्गः कश्च पंचम इत्येतदुच्यते विवक्षितः कश्चिद्राशिस्तेनैव
राशिना यदा गुण्यते स तावद्वर्गः तत्रैकस्य वर्गोपि एक एव भवतीति द्विरादित्वाद्देयवर्गोप्येवं गण्यते द्वयोः स वर्गश्चत्वारो तत्त्वं
तेषां प्रथमो वर्गः [४] चतुर्णां वर्गः षोडशेति द्वितीयो वर्गः [१६] षोडशानां वर्गो द्वे शते षट्पंचाशदधिके तृतीयो वर्गः [२५६] अ-
स्य राशेर्वर्गः पंचषष्टिः सहस्राणि पंचशतानि षट्त्रिंशदधिकानि चतुर्थो वर्गः [६५५३६] अस्य राशेर्वर्गः सार्धगाथायाः ...

च्चते चत्तारियकोडिसया अउणत्तीसंचकोडिकोडीओ अउणावन्नं लक्खा सत्तट्ठिं चेव य सहस्सा १ दोयसया बत्तीसा पं
चमवग्गो इमो विणिद्दिट्ठो अंकस्थापना ४२९४९६७२९६ अस्याभिलापोऽपि गाथायेण प्रतिपाद्यते लक्खं कोडाकोडी चउ
रासीइं भवे सहस्साइं चत्तारिय सत्तट्ठा हुंति सया कोडिकोडीणं १ चोयालं लक्खाइं कोडीणं सत्त चेव य सहस्सा तिन्निय सया
य सयरा कोडीणं हुंति नायव्वा २ पंचाणउई लक्खा एगावन्नं सहस्साइं छसोलसुत्तरसया एसो छट्ठो हवइ वग्गो ३ अंकस्था
पना ७९२२८१६२५१४२६४३३७५९३५४३९५०३३६ तद्वयं षष्ठो वर्गः पूर्वोक्तेन पंचमवर्गेण गुण्यते तथा च सति या संख्या भवति तत्प
माणा जघन्यपदिनो गर्भजमनुष्या वर्त्तंते सा चेयं। ७९२२८१६२५१४२६४३३७५९३५४३९५०३३६ अयं च राशिः कोटी
कोट्यादिप्रकारेण केनाप्यभिलपितुं न शक्यते ऽतः पर्यंता द्दारभ्यांकस्थानसंग्रहार्थं गाथाद्वयं छ तिन्नि तिन्नि सुन्नं पंचे
व य नव य तिन्नि चत्तारि पंचेव तिन्नि नव पंच सत्त तिन्नेव तिन्नेव १ चउ छ दो चउ एक्को पण दो छक्किक्कगो य अट्ठेव दो दो नव स
त्तेव य अंकट्ठाणपराहुत्ता २ तदेवमेतेष्वेकोनत्रिंशदंकस्थानेषु जघन्यपदिनो गर्भजमनुष्या वर्त्तंते उक्तं चानुयोगद्वारेषु उक्को
सपए असंखिज्जा उक्कोडाकोडीउ तदेवं जघन्यपदिनो मनुष्या उत्कृष्टपदिनस्त्वसंख्याताः उक्तं चानुयोगद्वारसूत्रे उक्कोसपए असं
खिज्जा असंखिज्जाहिं उस्सप्पिणीउस्सप्पिणीहिं अवहीरंति कालउ खित्तउ उक्कोसपए रूवपक्खित्तेहिं मणूसेहिं सेढी अवहीरइ अ
संखिज्जाहिं उस्सप्पिणीओसप्पिणीहिं कालउ खित्तउ अंगुलपढमवग्गमूलं तइयवग्गमूलपडुप्पन्नं अस्यायमक्षरगमनिका
उत्कृष्टपदे मनुष्या असंख्येयोत्सर्पिण्यवसर्पिणीसमयराशितुल्याः क्षेत्रतस्त्वेकस्मिन् मनुष्यरूपे प्रक्षिप्ते मनुष्यरूपैरेका
नभःप्रदेशश्रेणिरपह्रियते कियता कालेनेत्याह असंख्येयोत्सर्पिण्यवसर्पिणीभिः कियता क्षेत्रखंडापहारेणेत्याह
अंगुलपढमवग्गमूलं तइयवग्गमूलपडुप्पन्नंति अंगुलप्रमाणे क्षेत्रे यः प्रदेशराशिस्तस्य यत्प्रथमं वर्गमूलं प्रदेशराशिस्त १०४

+ नांगुलमिते गुणिते च यः प्रदेशराशि+

स्य यत्प्रथमं वर्गमूलं तत्तृतीयवर्गमूलप्रदेशराशिर्भवति तत्प्रमाणं क्षेत्रखंडमेकैकं रूपमपहरति अयमर्थः इह किलांगुल
प्रमाणे क्षेत्रे नभःप्रदेशराशिः सद्भावतोऽसंख्येयप्रदेशपरिमाणोऽप्यसत्कल्पनया षट्पंचाशदधिकशतद्वयपरिमाणः कल्प्यते
२५६ अत्र प्रथमं वर्गमूलं चत्वारि ४ तृतीयं वर्गमूलं द्वे २ तत्र प्रथमं वर्गमूलं षोडश २५६ लक्षणं तृतीयवर्गमूलेन गुणितं जाता
द्वात्रिंशत् एवमेतेन नभःप्रदेशाः सद्भावतोऽसंख्येया अप्यसत्कल्पनया द्वात्रिंशत् ६ ४ २ तत्संख्याः परिग्राह्याः ततः श्रेणेर्मध्या
त् यावत्क्षेत्रप्रमाणं द्वात्रिंशत्प्रदेशप्रमाणमित्यर्थः क्षेत्रखंडं यद्येकैकं मनुष्यरूपं क्रमेणापहरति समयमपहरति तदा असं
ख्येयोत्सर्पिण्यवसर्पिणीभिः सर्वापि श्रेणिरपह्रियते यद्येकं मनुष्यरूपं तस्यां श्रेणौ नास्ति सर्वोत्कृष्टानामपि समुदितानां तत्संमू
र्च्छजमनुष्याणामेतावत्तामेवसद्भावात् इदमुक्तं भवति उत्कृष्टपदवर्त्तिभिरपि सर्वतः सप्तरज्जुप्रमाणस्य घनीकृतस्य लोक
स्यैकैकप्रदेशपंक्तिरूपं श्रेणिमात्रमपि अंगुलमात्रप्रदेशराशिसंबंधितृतीयवर्गमूलप्रदेशप्रमाणैरसत्कल्पनया षट्पं
चाशदधिकशतद्वयप्रमाणांगुलमात्रक्षेत्रप्रदेशराशिसंबंधिद्विकलक्षणतृतीयवर्गमूलगुणितषोडशलक्षणप्रथम
वर्गमूललब्धद्वात्रिंशत्प्रदेशप्रमाणैराकाशखंडैर्मनुष्यरूपस्थानीयैरपह्रियमाणमपि नापह्रियते एकरूपहीनत्वात्
यदि पुनरेकं रूपमन्यत्स्यात्ततः सकलापि श्रेणिरपह्रियते कालतश्च प्रतिसमयमेतावत्प्रमाणैरप्याकाशखंडैरपह्रि
यमाणा असंख्याताभिरुत्सर्पिण्यवसर्पिणीभिर्निःशेषतोऽपह्रियते कालतः सकाशात् क्षेत्रस्याल्पं तत्सूक्ष्मत्वात् उक्तं
च उक्कोसपए जे मणुस्सा हवंति तेसु इक्कंमि मणुयरूवे पक्खित्ते समाणे तेहिं मणुस्सेहिं सेढी अवहीरइ तीसे असेढीए क
ालखित्तेहिं अवहारो मग्गिज्जइ कालउ ताव असंखिज्जाहिं उस्सप्पिणीओसप्पिणीहिं खित्तउ अंगुलपढमवग्गमूलं त
इयवग्गमूलपडुप्पन्नं किं भणियं होइ तीसे सेढीए अंगुलायए आगासखंडे जो पएसरासी तस्स जं पढमवग्गमूलं

+ क्षेत्र+

पसरासिमाणं तेसिं तइयवग्गमूलपडुप्पन्नं २० समाणे ज्जो पएसरासी हवइ एवइयाहिं खंडेहिं अविहीरमाणी
अवहीरमाणी जाव निट्ठाइ ताव मणुस्सा वि अवहीरमाणा निट्ठंति आह कह मेगा सेढी इद्दहमित्तेहिं खंडेहिं।
अवहीरमाणी २ असंखिज्जाहिं उस्सप्पिणिओसप्पिणीहिं अवहीरइ आयरिय आह खित्तस्स सुहुमत्तणओ सुत्ते वि
भणियं सुहुमो य होइ कालो तत्तो सुहुमयरयं हवइ खित्तं अंगुलसेढीमित्ते उस्सप्पिणीउ असंखिज्जत्ति अतो
निरयादिभ्यः सकाशात् स्तोका नराः तेभ्यो नारका असंख्येयगुणाः यत एवमनुयोगद्वारेषु नारकपरिमाणमुपद
र्शितं नेरइयाणं भंते केवइया वेउव्वियसरीरा पन्नत्ता गोयमा दुविहा पन्नत्ता तंजहा बद्धिल्लया मुक्किल्लया य तत्थ
णं जे ते बद्धिल्लया ते णं असंखिज्जाहिं असंखिज्जाहिं उस्सप्पिणिओसप्पिणीहिं अवहीरंति कालओ खित्तओ असं
खिज्जाओ सेढीओ पयरस्स असंखिज्जइभागो तासि णं सेढीणं विक्खंभसूई अंगुलपढमवग्गमूलं बीयवग्गमूलप
डुप्पण्णं अहवणं अंगुलबिइयवग्गमूलघणप्पमाणमित्ताउ सेढीउ असेयमत्र गमनिका नारकाणां बद्धानि वैक्रि
यशरीराणि संख्येयानि प्रतिनारकमेकैकवैक्रियसद्भावान्नारकाणां चासंख्येयत्वात्तानि च कालतोऽसंख्येयोत्स
र्पिण्यवसर्पिणीसमयराशितुल्यानि क्षेत्रतस्तु प्रतरासंख्येयभागवर्त्यसंख्येयश्रेणीनां ये प्रदेशास्तत्संख्यानि
भवंति ननु प्रतरासंख्येयभागेऽसंख्येया योजनकोटयोऽपि भवंति तत्किमेतावत्यपि क्षेत्रे यावन्त्यः श्रेणयो भवंति
ता इह गृह्यंते नेत्याह तासि णं सेढीणं विक्खंभसूई इत्यादि तासां श्रेणीनां विष्कंभसूचिर्विस्तरश्रेणिरिति शेषः १०५
कियतीत्याह अंगुलेत्यादि अंगुलप्रमाणे प्रतरक्षेत्रे यः श्रेणिराशिस्तत्र किलासंख्येयानि वर्गमूलान्युत्तिष्ठंति
तः प्रथमवर्गमूलं द्वितीयवर्गमूलेन प्रत्युत्पन्नं गुणितं तथा च यावत्योऽत्र श्रेणयो लभ्यंते तावत्प्रमाणश्रेणीनां वि-

ष्कंभसूचिर्भवति एतावत्यपि श्रेणयोऽत्र गृह्यंते तात्पर्यार्थः इदमुक्तं भवति अंगुलप्रमाणे प्रतरक्षेत्रे किलासत्कल्पन
या षट्पंचाशदधिके द्वे शते श्रेणीनां भवतस्तद्यथा २५६ अत्र प्रथमं वर्गमूलं १६ द्वितीयं ४ चतुर्भिश्च षोडश गुणिता ज
ताः चतुःषष्टिः ६४ एषा चतुःषष्टिरपि सद्भावतोऽसंख्येयाः श्रेणयो मंतव्याः एतावत्संख्या श्रेणीनां विस्तरसूचिरि
या सा अहवा णमितिवाक्यालंकारे अयं द्वितीयः प्रकारः प्रस्तुतार्थविषये तथाहि अंगुलबिइयवग्गमूलघणेत्यादि
अंगुलप्रमाणप्रतरक्षेत्रवर्तिश्रेणिराशेर्यत् द्वितीयवर्गमूलमनंतरं चतुष्टयरूपं दर्शितं तस्य यो घनश्चतुःषष्टिलक्ष
णस्तत्प्रमाणाः श्रेणयोऽत्र गृह्यंते इति प्ररूपणैव भिद्यते अर्थस्तु स एव इदमत्र तात्पर्यार्थं सप्तरज्जुप्रमाणस्य घनीकृत
स्य लोकस्य याऊर्ध्वाध आयता एकप्रादेशिकाः श्रेणयोऽङ्गुलमात्रक्षेत्रप्रदेशराशिगतद्वितीयवर्गमूलघनप्रदे
शराशिप्रमाणास्तासां यावंतः प्रदेशराशयस्तावत्प्रमाणा नारका अतस्ते नरेभ्योऽसंख्यातगुणा एव एतेभ्योऽपि देवा
असंख्यातगुणाः कथमिति चेदुच्यते देवा हि भवनपत्यादिभेदेन चतुर्धा भवनपतयोऽसुरादिभेदेन दशविधाः तत्रा
सुरकुमारा अपि तावद् घनीकृतस्य लोकस्य याऊर्ध्वाध आयता एकप्रादेशिकाः श्रेणयोऽङ्गुलमात्रक्षेत्रगतप्रदेश
राशिसंबंधि प्रथमवर्गमूलासंख्येयभागमूलप्रदेशराशिप्रमाणास्तासां संबंधी यावान् प्रदेशराशिस्तावत्संख्या
काः एवं नागकुमारादयोऽपि द्रष्टव्याः तथा संख्येययोजनप्रमाणाकाशप्रदेशसूचिरूपैः खंडैर्यावद्भिर्घनीकृतस्य
लोकस्य मंडककारः प्रतरोऽपह्रियते तावत्प्रमाणा व्यंतराः उक्तं च संखिज्जजोयणाणं सूइपएसेहिं भाइयं पयरं वंतर
सुरेहिं हीरइ एवं एक्किक्केणं अस्याक्षरगमनिका संख्येययोजनप्रमाणप्रविरेकप्रादेशिकीपंक्तिस्तस्याः प्रदेशाः संख्ये
ययोजनप्रमाणैकप्रादेशिकपंक्तिप्रदेशैरिति यावत् सकलप्रतरं व्यंतरसुरैरपह्रियते तावद्भागलब्धराशिप्रमाणा व्यंतरा

सुरा इत्यर्थः इयमत्र भावना संख्येययोजनप्रमाणे सूचिप्रदेशाः किलासत्कल्पनया दश प्रतरप्रदेशाश्च लक्षं ततो
दशभिस्तैर्गुणितैर्लक्षाः सहस्राद्दशगुणा भवंतीत्यर्थः एवमुक्तेन प्रकारेण व्यंतरनिकाये व्यंतराणां भावना कार्या तथैवं सर्व
समुदायपरिमाणनियमव्याघातप्रसंगः सूचिप्रमाणहेतुयोजनसंख्येयत्वस्य वैचित्र्यादिति तथा षट्पंचाशदधिकश
तद्वयांगुलप्रमाणैकाकाशप्रदेशसूचिरूपैः खंडैर्यावद्भिर्यथोक्तस्वरूपं प्रतरमपह्रियते तावत्प्रमाणा ज्योतिष्कदे
वाः उक्तं च छप्पन्नदोसयंगुल सूईपएसेहिं भाइयं पयरं जोइसिएहिं हीरइ इति अत एवोक्तं वाणमंतरेहिंतो संखिज्जगु
णा जोइसिया इति तथा वैमानिकदेवा घनीकृतस्य लोकस्य याऽऽर्ध्वाधआयता एकप्रादेशिकी श्रेणी यो ऽंगुलमात्रक्षेत्रप्रदे
शराशिस्तावत्प्रमाणाः अतः सकलवनस्पत्यादिसमुदायापेक्षया २५६ विद्यमाना देवा नारकेभ्यो ऽसंख्यातगु
णा एव ३ तेभ्यो ऽपि च देवेभ्यस्तिर्यंचो ऽनंतगुणाः तत्रानंतसंख्योपेतस्य १६ ४ वनस्पतिकायस्य सद्भावात् उक्तं च ए
एसि णं भंते नेरइयाणं तिरिक्खजोणियाणं मणुस्साणं देवाणं सिद्धाण य २ कयरे हिंतो अप्पा वा बहुया वा तु
ल्ला वा विसेसाहिया वा गोयमा सव्वत्थोवा मणुस्सा नेरइया असंखेज्जगुणा देवा असंखेज्जगुणा सिद्धा अणंतगु
णा तिरिक्खजोणिआ अणंतगुणा तथा थोवा नरा अ नेरइय असंखगुणिया हवंति नेरइया तत्तो सुरा सुरेहिं सि
द्धाणंता तउ तिरिया इत्युक्तं गतिद्वारे अल्पबहुत्वं सांप्रतमिंद्रियद्वारे कायद्वारे तदभिधित्सुराह ब ३ए पण चउ तिदुएगिं
दी थोवा तिन्नि अहिआ अणंतगुणा तस थोव असंखग्गी भूजलनिल अहिय वणणंता ३० व्या० पंचेंद्रियाश्च
तुरिंद्रियादिभ्यः स्तोकाः तेभ्यश्चतुरिंद्रिया अधिका विशेषाधिकाः तेभ्यस्त्रींद्रिया विशेषाधिकाः तेभ्यो द्वींद्रिया वि
शेषाधिकाः तत्र यद्यपि घनीकृतस्य लोकस्योर्ध्वाधआयता एकप्रादेशिक्यः श्रेणयो योजनकोटाकोटीप्रमाण १०६

काशप्रदेशराशिप्रमाणास्तासां यावत्प्रदेशराशिस्तावत्प्रमाणा द्वींद्रियत्रींद्रियचतुरिंद्रियतिर्यग्योनिपंचेंद्रियाश्च
विशेषेण सूत्रे निर्दिष्टास्तथा चोक्तं तत्र यथोक्तरूपद्वींद्रियपरिमाणाभिधानानंतरं जहन्नेवेंदियाणं तहा तेइंदियाणं चउरिं
दियाण वि नायव्वं पंचेंदिअतिरिक्खजोणियाण वि त्ति तथापि सूचिपरिमाणहेतुयोजनगतासंख्यातरूपसंख्याया
बहुभेदत्वान्न यथोक्तविशेषाधिकत्वाभिधानव्याघातः अत एव हेतोस्तिर्यग्योनिपंचेंद्रियेषु द्वींद्रियादितुल्यतया
सूत्रेऽभिहितेष्वपि तथापि नरनिरयदेवप्रक्षेपेऽपि पंचेंद्रियाश्चतुरिंद्रियादिभ्यः स्तोका एव द्रष्टव्याः यदस्मधायि पंचेंदिया
य थोवा विवज्जएण वियला विसेसहिया द्वींद्रियेभ्यो ऽप्येकेंद्रिया अनंतगुणाः वनस्पतिकायजीवराशेरनंतानंत
त्वात् यदुक्तमार्षे एएसि णं भंते एगिंदियबेंदियतेइंदियचउरिंदियपंचेंदियाण कयरे कयरेहिंतो अप्पा वा बहुआ
या गोयमा सव्वत्थोवा पंचेंदिया चउरिंदिया विसेसाहिआ तेइंदिया विसेसाहिया बेइंदिया विसेसाहिया एगिंदिया अ
णंतगुणा तस थोव इत्यादि त्रसा द्वींद्रियादयः सर्वेभ्यो ऽपि संख्येयास्तेजस्कायिकादिभ्यः स्तोकाः तेभ्यस्त्रसेभ्यो ऽसंख्यात
गुणा अग्गि त्ति अग्निकायिकास्तेषां सूक्ष्मबादरभेदभिन्नानामसंख्येयलोकाकाशप्रदेशराशिप्रमाणत्वात् तेभ्यो भूत्ति
पृथिवीकायिका विशेषाधिकाः तेभ्यो जलत्ति अप्कायिका विशेषाधिकाः तेभ्यो निलत्ति वायुकायिका विशेषाधि
काः यद्यपि च एतेषामपि पृथिवीकायिकादीनामसंख्येयलोकाकाशप्रदेशराशिप्रमाणतया सूत्रे अविशेषेण निर्देशः
कृतः तथा चोक्तं केवइया पुढविकाइयाणं एवं आउकाइयाणं पीत्यादि तथापि लोकानामसंख्यातत्वस्यानेकभेदभि
न्नत्वादिति हेवं विशेषाधिकत्वाभिधानेऽपि न कश्चिद्दोषः उक्तं च श्रीप्रज्ञापनायां एएसि णं भंते तसकाइयाणं पुढविका
इयाणं आउकाइयाणं तेउकाइयाणं वाउकाइयाणं अकाइयाण य कयरे हिंतो अप्पा वा बहुया वा तुल्ला व २

विसेसाहिआ वा गोयमा सव्वत्थोवा तसकाइया तेउकाइया असंखिज्जगुणा पुढविकाइया विसेसाहिया आउका
इया विसेसाहिया वाउकाइया विसेसाहिया अकाइया अनंतगुणा वणस्सइकाइया अणंतगुणा अन्यत्राप्युक्तं पो
वायतसा तत्तो तेऊ असंखा तउ विसेस हियकममसो लहइ वाऊ अकाय हरिआ अणंतगुणा अएक कायिका सिद्धा
: तेभ्यो वा कायिके स्पो वणणंतत्र वनस्पतिकायिका अनंतगुणाः अनंतलोकाकाशप्रदेशप्रमाणत्वात् वनस्पतिका
यिकानामिति संप्रति योगेषु वेदेषु अल्पबहुत्वं प्रचिकटयिषुराह ब: ३० मणवयणकायजोगी थोवा असंखगुण
अणंतगुणा पुरिसा थोवा इत्थी संखगुणा णंतगुण कीवा ३१ व्या० मनोयोगिनः स्तोकाः संज्ञिपंचेंद्रियाणामेव म
नोयोगित्वात् तेभ्यो वाग्योगिनोऽसंख्यातगुणा द्वींद्रियत्रींद्रियचउरिंद्रियासंज्ञिपंचेंद्रियाणां वाग्योगिनां मनोयोगि
भ्योऽसंख्यातगुणानां तत्र प्रक्षेपात् वाग्योगिभ्योऽपि काययोगिनो अनंतगुणाः वनस्पतिकायिकानामप्यनंतानां
तत्र प्रक्षेपादिति आह च एएसिणं भंते जीवाणं सजोगीणं मणजोगीणं वइजोगीणं कायजोगीणं अजोगीण य कयरे २
हिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा गोयमा सव्वत्थोवा मणजोगी वयजोगी असंखिज्जगुणा अजोगी
अणंतगुणा कायजोगी अणंतगुणा सजोगी विसेसाहिया तथा सर्वस्तोकाः पुरुषाः स्तोकाः तेभ्यः स्त्रियः संख्यातगु
णाः उक्तं च तिगुणा तिरूवअहिया तिरियाणं इत्थिया मुणेयव्वा सत्तावीसगुणा पुण मणुयाणं तदहिया चेव १ बत्तीसगु
णा बत्तीसरूवअहियाउ तहयदेवाणं देवीउ पन्नत्ता जिणेहिं जियरागदोसेहिं २ स्त्रीभ्यश्च क्लीवा नपुंसका अनंतगुणाः अ १०७
नंतगुणता च वनस्पत्यपेक्षया द्रष्टव्या उक्तं च एएसिणं भंते जीवाणं सवेयगाणं इत्थीवेयगाणं पुरिसवेयगाणं नपुंसकवे
यगाणं अवेयगाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिआ वा गोयमा सव्वत्थोवा जीवा पुरि

* इत्थिवेदगा संखेज्जगुणा। अवेदगा अनंतगुणा। नपुंसगवेयगा अणंतगुणा ३।

सवेयगा अणंतगुणा सवेयगा विसेसाहिआ ७: ३१ माणी कोही माई लोही अहिअ मणनाणिणो थोवा उहिअसंख १
मइसुअ अहिअसम असंखविभंगा ४० व्या० कषायद्वारे सर्वस्तोका मानिनः मानपरिणामकालस्य क्रोधादिपरि
णामकालस्य मानपरिमाणकालापेक्षया सर्वस्तोकत्वात् तेभ्यः क्रोधिनो विशेषाधिकाः क्रोधपरिणामकालस्य मा
नपरिणामकालापेक्षया विशेषाधिकत्वात् तेभ्यो मायिनो विशेषाधिकाः तद्व्यस्थे नडंरनाश्वस्त तकालं च माया
बहुलत्वात् ततो पि लोभिनो विशेषाधिकाः सर्वेषामपि प्रायः संसारिजीवानां सदा परिग्रहाद्याकांक्षासद्भावात् उक्तं
च एएसिणं भंते जीवाणं सकसाईणं कोहकसाईणं लोभकसाईणं अकसाईण य कयरे कयरेहिंतो अप्पा वा बहु
या वा तुल्ला वा विसेसाहिया गोयमा सव्वत्थोवा जीवा अकसाई माणकसाई अणंतगुणा कोहकसाई विसेसाहि
आ मायाकसाई विसेसाहिया लोभकसाई विसेसाहिया सकसाई विसेसाहिया ज्ञानद्वारे मनोज्ञानिनो मनःप
र्यायज्ञानिनः स्तोकाः तद्धि गर्भजमनुष्याणां तत्रापि संयतानामप्रमत्तानां विविधामर्षौषध्यादिल
ब्धियुक्तानामुपजायते उक्तं च तं संजयस्स सव्वप्पमायरहियस्स विविहरिद्धिमउ इत्यादि तेभ्यः स्तोका एव संख्या तत्वात्
तेभ्योऽसंख्यातगुणा अवधिज्ञानिनः सम्यग्दृष्टिदेवादीनामप्यवधिज्ञानसद्भावात् तेभ्योऽसंख्यातगुणत्वात् ततोऽवधिज्ञा
निभ्यो मतिज्ञानश्रुतज्ञानिनो विशेषाधिकाः अवधिज्ञानरहितसम्यग्दृष्टिनरतिर्यक्प्रक्षेपात् एतौ च मतिज्ञानिश्रुत
ज्ञानिनौ स्वस्थाने चिंत्यमानौ द्वावपि समौ उक्तो मतिज्ञानश्रुतज्ञानयोः परस्परं नांतरीयकत्वात् दो वि एयाइं अन्नुन्नमणु
गयाइं ति तेभ्यश्च मतिज्ञानश्रुतज्ञानिभ्यो विभंगज्ञानिनोऽसंख्यातगुणाः मिथ्यादृष्टिसुरादीनां विभंगज्ञानवतां भ्योऽसंख्या
तगुणत्वादिति ब: ४० केवलिणोणंतगुणा मइसुअ अन्नाणिणंतगुणउल्ला सुहुमा थोवा परिहार संख अहखाय

संखगुणा ४१ व्या० तेभ्यश्च विभंगज्ञानिभ्यः केवलिनोऽनंतगुणाः सिद्धानां तेभ्योऽनंतगुणत्वात् तेषां च केवलज्ञान
युक्तत्वात् तेभ्योऽपि च केवलज्ञानिभ्यो मत्यज्ञानिश्रुताज्ञानिनोऽनंतगुणाः सिद्धेभ्योऽपि वनस्पतिकायिकानामनंतगुण
त्वात् तेषां च मिथ्यादृष्टितया मत्यज्ञानश्रुताज्ञानयुक्तत्वात् एते चोभयेऽपि मत्यज्ञानश्रुताज्ञानिनः स्वस्थाने चिंत्यमा
नास्तुल्याः मत्यज्ञानश्रुताज्ञानयोः परस्परमविनाभावित्वात् उक्तं च एएसिणं भंते जीवाणं आभिणिबोहियनाणीणं
सुयनाणीणं ओहीनाणीणं मणपज्जवनाणीणं केवलनाणीणं मइअन्नाणीणं सुयअन्नाणीणं विभंगनाणीण य कयरे
कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा गोयमा सव्वत्थोवा जीवा मणपज्जवनाणी ओहिनाणी असंखि
ज्जगुणा आभिणिबोहियनाणी सुयनाणी दो वि तुल्ला विसेसाहिया विभंगनाणी असंखिज्जगुणा केवलनाणी अ
णंतगुणा मइअन्नाणी सुयअन्नाणी य दो वि तुल्ला अणंतगुणा संयमद्वारे सर्वस्तोकाः सूक्ष्मसंपरायसंयमिनः शतपृथ
क्त्वमात्रसंभवात् तेभ्यः परिहारविशुद्धिकाः संख्यातगुणाः कोटीपृथक्त्वेन सहस्रपृथक्त्वमात्रसंभवात् तेभ्यः यथाख्यातचा
रित्रधराः संख्यातगुणाः कोटीपृथक्त्वेन प्राप्यमाणत्वादिति द्वा० ४१ छेअसामाई असंखा देस असंखगुणणंतगुणा अजु
या थोव असंखदुअणंता ओहिनयणकेवलअचक्खू ४२ व्या० तेभ्यो यथाख्यातचारित्रिभ्यः छेदोपस्थापनचारित्रिणः सं
ख्येयगुणाः कोटीशतपृथक्त्वेन लभ्यमानत्वात् तेभ्योऽपि सामायिकसंयमिनः संख्येयगुणाः कोटीसहस्रपृथक्त्वेन प्राप्यमा
णत्वात् तेभ्योऽपि देशविरता असंख्यातगुणाः असंख्यातानां तिरश्चां देशविरतिसंभवात् तेभ्योऽनंतगुणाः अयताः संय १०८
महीना आद्यगुणस्थानकचतुष्टयवर्तिन इत्यर्थः मिथ्यादृशामनंतानंतत्वात् दर्शनद्वारे यथाक्रममेवं पदघटना स्तोका अ
वधिदर्शिनिनः सुरनारकाणां नरतिरश्चां च केषांचिदवधिदर्शनसंभवात् तेभ्यश्चक्षुर्दर्शनिनोऽसंख्यातगुणाः चउरिंदि-

यादीनामपि चक्षुर्दर्शनिनां तत्र प्रक्षेपात् तेषां च केवलदर्शनियुक्तत्वात् तेभ्योऽप्यनंतगुणाः अचक्षुर्दर्शनिनः सर्वसंसा
रिजीवानां सिद्धेभ्योऽनंतगुणत्वात् तेषां च नियमाच्चक्षुर्दर्शनोपेतत्वात् यदाहुः परममुनयः एएसिणं भंते जीवाणं च
क्खुदंसणीणं अचक्खुदंसणीणं ओहिदंसणीणं केवलदंसणीण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसे
साहिया वा गोयमा सव्वत्थोवा जीवा ओहिदंसणी चक्खुदंसणी असंखिज्जगुणा केवलदंसणी अणंतगुणा अचक्खुदंसणी
अणंतगुणा द्वा० ४२ पच्छाणुपुव्वि लेसा थोवा दो संख णंतगुणा दो अहिया अस विअर थोव णंता सासणथोवोवसमसंखा
४३ व्या० लेश्याद्वारे पश्चानुपूर्व्या लेश्या वाच्याः तद्यथा शुक्ललेश्या पद्मलेश्या तेजोलेश्या कापोतलेश्या नीललेश्या कृष्णले
श्या तत्र स्तोकाः शुक्ललेश्यावंतः वैमानिकेष्वेव देवेषु लांतकादिष्वनुत्तरपर्यवसानेषु केषुचिद् विदेहकर्मभूमिजेषु मनुष्येषु १
पुंसु च केषुचित् संख्यातवर्षायुष्केषु शुक्ललेश्यासंभवात् ततः संख्यातगुणाः पद्मलेश्यावंतः सनत्कुमारमाहेंद्रब्रह्मलो
कदेवेषु कर्मभूमिजमनुष्यतिर्यक्षु पद्मलेश्यासद्भावात् सनत्कुमारादिदेवानां च लांतकादिदेवेभ्यः संख्येयगुणत्वात् तेभ्यो
ऽपि तेजोलेश्यावंतः संख्येयगुणाः सौधर्मेशानादिदेवेषु केषुचित् तिर्यङ्मनुष्येषु तेजोलेश्यासद्भावात् तेषां च सकलपद्म
लेश्यावत्तिर्यगादिभ्यो गणनापेक्षया संख्येयगुणत्वात् ततः कापोतलेश्यावंतोऽनंतकायिकेष्वपि कापोतलेश्यासद्भा
वात् ततोऽपि विशेषाधिका नीललेश्यावंतो नारकादीनां तल्लेश्यावतां तत्र प्रक्षेपात् ततः कृष्णलेश्यावंतो विशेषाधिका
स्तेषां तल्लेश्यासद्भावात् यदभ्यधायि परमगुरुणा एएसिणं भंते जीवाणं सलेसाणं किण्हलेसाणं नीललेसाणं
काउलेसाणं पम्हलेसाणं तेउलेसाणं सुक्कलेसाणं अलेस्साण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा
विसेसाहिया वा गोयमा सव्वत्थोवा सुक्कलेस्सा पम्हलेस्सा संखिज्जगुणा तेउलेस्सा संखिज्जगुणा अलेसा अणं

तगुणा काउलेसा अणंतगुणा नीललेसा विसेसाहिया किण्हलेसा विसेसाहिया सलेस्सा विसेसाहिया सम्यग्द्वारेऽ
लेश्याः स्तोकास्तेषां वक्ष्यमाणस्वरूपद्वयघनयुक्तानंतकउत्पत्तात् तेभ्यो भिन्नाः सिद्धिगमनार्हा अणंतगुणाः आहत्वतग
वानार्हा रूपाणः ९९ सिहांसंतेडीवाणं भवसिद्धियाणं अभवसिद्धियाणं नोभवसिद्धियाणं नोअभवसिद्धियाणय कयरेक
यरेहिंतो अप्पावा बहुयावा तुल्लावा विसेसाहियावा गोयमा सव्वथोवा अभवसिद्धिया नोभवसिद्धिया नोअभवसिद्धि
या अणंतगुणा भवसिद्धिया अणंतगुणा सम्यक्त्वद्वारे सास्वादनसम्यग्दृष्टयः स्तोकाऽउपशमिकसम्यक्त्वा केषांचिदेवपम्य
वमानानां सास्वादनत्वात् तेसउवसमत्ति अपशमिकसम्यग्दृष्टयः संख्यातगुणाः वः ४५ मीसासंखावेअगा असंखगुण
खइअमिच्छ अणंता संनिअरथोवणंता ए हारथोवेअरअसंखा ४४ व्या० तेभ्यः चौपशमिकसम्यग्दृष्टिभ्यो मिश्राः
संख्यातगुणाः तेभ्योवेदयगव्यति क्षायोपशमिकसम्यग्दृष्टयोऽसंख्येयगुणा एतेभ्यः क्षायिकसम्यग्दृष्टयोऽनंतगुणाः क्षा
यिकसम्यक्त्ववतां सिद्धानामानंत्यात् तेभ्योऽपि मिथ्यादृष्टयोऽनंतगुणाः सिद्धेभ्योऽपि वनस्पतिजीवानामनंतगुणत्वात् ते
षांच मिथ्यादृष्टित्वादिति संज्ञिद्वारे संज्ञिनोजीवास्तोकाः देवनारकसमनस्कपंचेंद्रियतिर्यङ्नराणामेव संज्ञित्वात् ते
भ्यो तरेऽसंज्ञिनोऽनंतगुणा वनस्पतिजीवानामनंतत्वात् यदागमेऽप्यगादि ९९ सिएणंसंतेडीवाणं संनीणं असंनीणं नो
संनीणं नोअसंनीणय कयरेकयरेहिंतो अप्पावा बहुयावा तुल्लावा विसेसाहियावा गोयमा सव्वथोवा जीवा संनी
नोसंनी नोअसंनी अणंतगुणा असंनी अणंतगुणा तथा आहारकद्वारे अनाहारकाः स्तोका विग्रहगत्यापन्नसमुद् १०७
घातकेवलिभवस्थायोगिकेवलिसिद्धानामेवानाहारकत्वात् यदाहसाप्यसुधंतोपिः विग्गहगइमावन्ना केवलि
णोसमुहया अजोगीय सिद्धाय अणाहारा सेसा हारगा जीवा १ तेभ्यस्तरेआहारका जीवा असंख्यातगुणाः यद्वा

विवाचंयमप्रवरैः श्रीमदार्यश्यामपादैः ९९ सिएणंसंतेडीवाणं आहारगाणं अणाहारगाणय कयरेकयरेहिंतो अप्पा
वा बहुयावा तुल्लावा विसेसाहियावा गोयमा सव्वथोवा जीवा अणाहारगा आहारगा असंखिज्जगुणाः ननु सिद्धेभ्यो
अनंतगुणाः संसारिजीवास्तेषां अयं आहारकास्तत्कथमसंख्यातगुणा अनाहारकस्य आहारकाऽइति नैष दोषः य
तः प्रतिसमयमेकैकस्य निगोदस्याऽसंख्येयभागप्रमाणा विग्रहगत्यापन्ना जीवा लभ्यंते तेचाऽनाहारकास्ततआहार
+जीवा+ कजीवानामनाहारकापेक्षयाऽसंख्यातगुणत्वमेवेति चिंतितं गत्यादिमार्गणास्थानकेषु स्वस्थानापेक्षयाऽल्पबहुत्वमि
मिदानीं गुणस्थानकेषु जीवस्थानानि चिंतयन्नाह वः ४४ सव्वजिअठाणमिच्छे सगसासणिपण अपज्ज संनिदुगं संमे
संनीदुविहो सेसेसु संनिपज्जत्तो ४५ व्या० सर्वाणि जीवस्थानकानि चतुर्दशापि मिथ्यादृष्टिगुणस्थानके संभवंति मिथ्या
त्वस्य सर्वेषु जीवस्थानकेषु संभवात् तथा सगत्ति सप्तजीवस्थानानि सास्वादने संभवंति तद्यथा पंचापर्याप्ताः बादरैकेंद्रिये २
ऽपर्याप्तः १ द्वींद्रियोऽपर्याप्तः २ त्रींद्रियोऽपर्याप्तः ३ चतुरिंद्रियोऽपर्याप्तः ४ असंज्ञिपंचेंद्रियोऽपर्याप्तः ५ संज्ञिद्विकं ६ संज्ञि
अपर्याप्तः पर्याप्तः ७ अपर्याप्तकाश्चात्र करणापर्याप्तका द्रष्टव्याः न तु लब्ध्यपर्याप्तकास्तेषु मध्ये सास्वादनसम्यक्त्वसहि
तस्योत्पादाभावात् संमे संनीदुविहोत्ति अविरतसम्यग्दृष्टिगुणस्थानके संज्ञी द्विविधोऽपर्याप्तपर्याप्तरूपो द्रष्टव्यः इह
ऽपर्याप्तकः करणापेक्षया ज्ञेयो न तु लब्ध्यपेक्षया ज्ञेयो न तु लब्ध्यपेक्षया लब्ध्यपर्याप्तमध्येऽविरतसम्यग्दृष्टेरभावात्
शेषेषु मिश्रदेशविरत्यादिगुणस्थानकेषु संज्ञिपर्याप्तलक्षणमेकं जीवस्थानकं न शेषाणि तेषां मिश्रत्वादेशविरतिप्र
तिपत्यभावात् नच प्रतिपन्नमिश्रत्वादीनां अन्येषु जीवस्थानकेषु संक्रमनं घटते न सम्ममिच्छो कुणइ कालमिति व
चनात् तदेवं गुणस्थानकेषु मार्गणा जीवस्थानकानि संप्रति गुणस्थानकेष्वेव योगान् व्याख्यानयन्नाह वः

४५ मिछदुगि अजयजोगा हारदुगूणा अपुव्वपणगेउ मणवयउरलं सविउव्वि मीसि सविउव्विदुग देसे ॥४६॥ व्याख्या
मिथ्यादृष्टिद्विकं मिथ्यादृष्टिसास्वादनलक्षणं तत्र अयते अविरतसम्यग्दृष्टौ चेत्येवं गुणस्थानकत्रये संज्ञीपंचेंद्रियोऽपि
लभ्यते तस्य च यथोक्ता आहारकद्विकेन आहारककाययोग आहारकमिश्रकाययोगलक्षणेनोनारहिताः त्रयो १
दशयोगाः संभवंति यत्पुनराहारकद्विके तच्चतुर्दशपूर्विण एव यदस्य धारि आहारदुगं जायइ चउदसपुव्विस्सेति
न च मिथ्यादृष्टिसास्वादनायतानां चतुर्दशपूर्वाधिगमसंभवेति तथा अपूर्वपंचके अपूर्वकरणनिवृत्तिबादरसूक्ष्मसंपरा
योपशांतमोहक्षीणमोहलक्षणे नव योगा भवंति तद्यथा चतुर्विधो मनोयोगः चतुर्विधो वाग्योगः औदारिककाययो
गेति न शेषास्तत्र विशुद्धतया तेषां वैक्रियाहारकद्विकारंभासंभवात् तत्र स्थितानां च सर्वदा वत एव श्रेण्यारोहत्वा
वात् औदारिकमिश्रमपर्याप्तावस्थायां कार्मणं त्वपांतरालगतो यदा तु ते अपि केवलिसमुद्घातावस्थायां ततस्ते
अपूर्वगुणस्थानकपंचके न संभवंतेति तथा तएव पूर्वोक्ता नव योगाः सवैक्रियाः संतो दशयोगा मिश्रे सम्यग्मि
थ्यादृष्टिगुणस्थानके भवंति तथाहि चतुर्विधमनोयोग चतुर्विधवाग्योग ४ औदारिकवैक्रियलक्षणा दशयोगाः
मिश्रे भवंति न शेषाः तद्यथा आहारकद्विकस्यासंभवः पूर्वाधिगमासंभवादेवं कार्मणशरीरं त्वपांतरालगतो संभ
वति अस्य च मरणासंभवेनापांतरालगत्यसंभवः ततस्तस्याप्यसंभवः अतएवौदारिकमिश्रवैक्रियमिश्रे अपि न संभ
वतस्तयोरपर्याप्तावस्थाभावित्वात् ननु सम्यग्देवनारकसंबंधि वैक्रियमिश्रं यत्पुनर्मनुष्यतिरश्चां सम्यग्मिथ्यादृशां ११०
वैक्रियलब्धिमतां वैक्रियकरणसंभवेन तदारंभकाले वैक्रियकरणसंभवेन तदारंभकाले वैक्रियमिश्रं भवति तत्कस्मा
न्नाभ्युपगम्यते उच्यते तेषां वैक्रियकरणाऽसंभवादन्यतो वा यतः कुतश्चित्कारणात्पूर्वाचार्यैर्नाभ्युपगम्यते तन्न सम्यग्

अवगच्छामः तथाविधसंप्रदायाभावादेतच्च प्रागेवोक्तमिति तथा तएव पूर्वोक्ता नव योगाः सवैक्रियद्विका वैक्रियवै
क्रियमिश्रसहिताः संतएकादश देशे देशविरते भवंति अंबडस्येव वैक्रियलब्धिमतो देशविरतस्यापि वैक्रियारंभसंभवादिति
॥४६॥ साहारदुग पमत्ते ते विउव्वाहारमीस विणु इयरे कंमुरलदुगं ताइम मणवयण सजोगि न अजोगी ॥४७॥ व्या०
पूर्वोक्ता एवैकादश योगाः चतुर्विधमनोयोग चतुर्विधवाग्योग औदारिकवैक्रियद्विकलक्षणाः साहारकद्विका आहारक
आहारकमिश्रसहिताः संतः त्रयोदश योगाः प्रमत्ते भवंति औदारिकमिश्रकार्मणकाययोगाभावस्तु पूर्वोक्तयुक्ते
रवसेय इति तएव पूर्वोक्ताः त्रयोदश योगा वैक्रियमिश्राहारकमिश्रं विना एकादश इतरस्मिन्नप्रमत्तगुणस्थानके भवंति
तथाहि चतुर्विधमनोयोगं चतुर्विधवाग्योगः औदारिकवैक्रियाहारकलक्षणा एकादश योगा अप्रमत्ते यत्तु वैक्रि
यमिश्रमाहारकमिश्रं च तन्न संभवति तद्धि वैक्रियस्याहारकस्य वा प्रारंभादिकाले भवति तदानीं च लब्ध्युपजीवनादिनो
त्सुकत्वात् ततः प्रमादसंभवः संभवतीति तथौदारिकमिश्रमपर्याप्तावस्थायां कार्मणं त्वपांतरालगतौ यदा त्वेते अपि
केवलिसमुद्घातावस्थायां ततस्ते अप्रमत्तगुणस्थानके न संभवत इति तथा कार्मणमौदारिकद्विकमौदारिकौदारिक
मिश्रलक्षणं अंत्यादिमनसी सत्यासत्यामृषारूपो मनोयोगो अंत्यादिमवचने सत्यासत्यामृषलक्षणौ वाग्योगौ चेति सप्त यो
गाः सयोगिकेवलिनो भवंति कार्मणौदारिकमिश्रे तु समुद्घातावस्थायामिति न नैव पंचदशयोगमध्यादेकेनापि यो
गेन युक्तोऽयोगी अयोगिकेवली भवति योगाभावनिबंधनत्वादयोगित्वावस्थाया उक्ता गुणस्थानकेषु योगाः अथ के
ष्वेवोपयोगाननिधातुकाम आह ॥४७॥ तिअनाणदुदंसाइमदुगे अजयदेसि नाणदंसतिगं ते मीसि मीसि समण
णा जयाइ केवलदुगंतदुगे ॥४८॥ व्या० आदिमद्विके मिथ्यादृष्टिसास्वादनलक्षणे प्रथमद्वितीयगुणस्थानकद्वये इत्य

र्थः तिअन्नाणदुदंसत्ति त्रयाणामज्ञानानां समाहारस्त्र्यज्ञानं मत्यज्ञानश्रुताज्ञानविभंगज्ञानरूपं द्वयोर्दर्शनयोः स
माहारो द्विदर्शं चक्षुर्दर्शनाचक्षुर्दर्शनरूपमित्येते पंचोपयोगा मिथ्यादृष्टिसास्वादनयोर्भवंति नशेषाः सम्यक्त्व
विरत्यभावात् तथा अयते अविरतसम्यग्दृष्टौ देशे देशविरते षडुपयोगा भवंति तथाहि नाणदंसतिगंति त्रिकश
ब्दस्य प्रत्येकमभिसंबंधात् ज्ञानत्रिकं मतिज्ञानश्रुतज्ञानावधिज्ञानरूपं दर्शनत्रिकं चक्षुर्दर्शनाचक्षुर्दर्शनाव
धिदर्शनलक्षणमिति नशेषाः सर्वविरत्यभावात् तेषु षडेव ज्ञानत्रिकदर्शनत्रिकरूपाः षडुपयोगाः मिश्रे सम्य
ग्मिथ्यादृष्टिगुणस्थानके मिश्रा अज्ञानसहिता द्रष्टव्याः तस्योभयदृष्टिपातित्वात् केवलं कदाचित्सम्यक्त्वबाहु
ल्यतो ज्ञानबाहुल्यं कदाचिच्च मिथ्यात्वबाहुल्यतोऽज्ञानबाहुल्यं समकक्षतायां त्वसयांश समतेति अस्मिंश्च गु
णस्थानके यदवधिदर्शनमुक्तं तत्सैद्धांतिकमतापेक्षया द्रष्टव्यमित्युक्तं प्राक् समणेत्याद इति यमेनोपरमे यतनं
यतं सर्वसावद्यविरतं तत् विद्यते यस्यासौ यतः अत्रादित्वादिति प्रत्ययः प्रमत्तगुणस्थानकवर्ती साधुः यतआदि
र्येषां गुणस्थानकानां तानि यतादीनि प्रमत्ताप्रमत्तापूर्वकरणनिवृत्तिबादरसूक्ष्मसंपरायोपशांतमोहक्षीण
मोहलक्षणानि सप्तगुणस्थानकानि तेषु ज्ञानत्रिकदर्शनत्रिकाः षडुपयोगाः समणेत्ति मनःपर्यायज्ञा स्थाः
नसहिताः सप्त भवंतीति नशेषा मिथ्यात्वघातिकर्मक्षयाभावात् केवलद्विकं केवलज्ञानकेवलदर्शनलक्षणो
पयोगद्वयरूपं अंतद्विके सयोगिकेवल्ययोगिकेवलिलक्षणे चरमगुणस्थानकद्वये भवति नशेषा दशज्ञानदर्शन १११
लक्षणास्तदुच्छेदेनैव केवलज्ञानदर्शनोत्पत्तेः नट्ठंमिय छाउमत्थिए नाणे इति वचनात् तदेवमभिहिता गुणस्थानकेषू
पयोगाः सांप्रतं यदिह प्रकरणे सूत्राभिमतमपि कार्मग्रंथिकाभिप्रायानुसरणेनाभिहितं तद्दर्शयन्नाह ॥ ४८ सा॥

सणभावे नाणं विउव्वाहारगेउरलमिस्सं नेगिंदिसु सासाणो नेहाहिगयं सुअमयंपि ४९ व्याख्या सासादनभावे सास्वा
दनसम्यग्दृष्टिभावे सति ज्ञानं भवति नाज्ञानमिति श्रुतमतमपि सिद्धांतसंमतमपि तथाहि बेइंदियाणं भंते किं नाणी अ
न्नाणी गोयमा नाणी वि अन्नाणी वि जे नाणी ते नियमा दुन्नाणी आभिणिबोहियनाणी सुयनाणी जे अन्नाणी ते वि नि
यमा दुअन्नाणी तंजहा मइअन्नाणी सुयअन्नाणी इत्यादि सूत्रे द्वींद्रियादीनां ज्ञानित्वमभिहितं तच्च सास्वादनापेक्षयैव न
ते षसम्यक्त्वापेक्षया असंभवात् उक्तंच प्रज्ञापनाटीकायां बेइंदियस्स दो नाणा कहं लब्भंति भण्णइ सासायणं पडुच्च तस्स
ऽपज्जत्तयस्स दो नाणा लब्भंति त्ति ततः सासादनभावेऽपि कोनं सूत्रसंमतमेव तच्चेदं सूत्रसंमतमपि नेह प्रकरणे धिकृतं
किंत्वज्ञानमेव कर्मग्रंथाभिप्रायस्यानुसरणात् तदभिप्रायश्चायं सास्वादनस्य मिथ्यात्वाभिमुखतया तत्सम्यक्त्वस्य म
लीमसत्वेन तन्निबंधनस्य ज्ञानस्यापि मलीमसत्वादज्ञानस्यापि मलीमसत्वादज्ञानरूपतेति ४ तथा सूत्रे वैक्रियआहा
रके चारसमाणे तेन प्पारस्थमाणेन सद्दोद्दकस्यापि मिश्रीवचनादौदारिकमिश्रमुक्तमिति तथाचाह प्रज्ञापनाटीका
कारः यदा पुनरौदारिकशरीरी वैक्रियलब्धिसंपन्नो मनुष्यः पंचेंद्रियतिर्यग्योनिको वा पर्याप्तबादरवायुकायिको वा
वैक्रियं करोति तदौदारिकशरीरयोग एव वर्तमानः प्रदेशान् विक्षिप्य वैक्रियशरीरयोग्यान् पुद्गलानादाय यावद्वै
क्रियशरीरपर्याप्त्या पर्याप्तिं न गच्छति तावद्वैक्रियेण मिश्रता व्यपदेशश्च औदारिकस्य प्रधानत्वात् एवमाहारकेणापि सह
मिश्रता द्रष्टव्या आहारयति चैतेनैवेति तस्यैव व्यपदेश इति परित्यागकाले वैक्रियस्याहारकस्य च यथाक्रमं वैक्रिय
मिश्रमाहारकमिश्रं च उक्तंच श्रीप्रज्ञापनाटीकायां आहारकशरीरी भूत्वा कृतकार्यः पुनरप्यौदारिकं [illegible]प्रदात
तदाहारकस्य प्रधानत्वादौदारिकप्रवेशं प्रतिव्यापाराभावाच्च परित्यजति यावत्सर्वथैवाहारकं तावदौदा[illegible]णमिश्र

कैणेति आहारकमिश्रशरीरकायप्रयोग इति तथैवं वैक्रियाहारकारंभकाले औदारिकमिश्रः सूत्रे सिद्धिमपि ने
च्छन् करणेऽधिकृते कार्मग्रंथिकैर्गुणविशेषप्रत्ययसमुद्भूतलब्धिविशेषकारणतया प्रारंभकाले परित्यागकाले च वैक्रिय
स्याहारकस्य च प्राधान्यविवक्षणेन वैक्रियमिश्रस्याहारकमिश्रस्य चैवाभिधानात् तदभिप्रायस्य चेहानुसरणात् तथा नै
केंद्रियेषु सासाणेत्तित्ताव अप्रधानोऽयं निर्दिष्टः सासादनभावः सूत्रमतः अन्यथा द्वीन्द्रियादीनामिवैकेंद्रियाणामपि क
रणत्वमुच्यते न चोच्यते किंतु विशेषतः प्रतिषिध्यते तथाहि एगिंदियाणं भंते किं नाणी अन्नाणी गोयमा नो नाणी नि
यमा अन्नाणी इति सर्वेषु सासादनभावः प्रतिषेधः सूत्रमतोऽपि केनचित्कारणेन कार्मग्रंथिकैर्नाभ्युपगम्यते इतीहा
पि प्रकरणे नाधिक्रियते तदभिप्रायस्यैवेह प्रायोऽनुसरणादिति नेहादिगाथं सुयमयं पीसेतद्धिरक्तिपरिणामेन प्रा
तपदसंबंधनीयं तथैव च संबंधितमिति अथ कस्मिन् गुणस्थानके कियत्यो लेश्या भवंतीत्याह ॥ छसु सव्वा तेउति
गं इगि छसु सुक्का अजोगि अल्लेसा । बंधस्स मिच्छअविरइकसायजोगत्ति चउहेऊ ॥ ५० ॥ व्या० षट्सु मिथ्यादृष्टिसा
स्वादनमिश्राविरतदेशविरतप्रमत्तलक्षणेषु गुणस्थानकेषु सर्वाः षडपि कृष्णनीलकापोततेजःपद्मशुक्ललेश्या भ
वंति तेउतिगं इगित्ति एकस्मिन्नप्रमत्तगुणस्थानके तेजःत्रिकं तेजःपद्मशुक्ललेश्यात्रयं भवति न पुनराद्यलेश्यात्रय
मित्यर्थः छसुत्ति षट्स्वपूर्वकरणनिवृत्तिबादरसूक्ष्मसंपरायोपशांतमोहक्षीणमोहसयोगिकेवलिलक्षणेषु गुण
स्थानकेषु शुक्ललेश्या भवति न शेषाः पंच अयोगिनोऽयोगिकेवलिनो लेश्या अपगतलेश्याः इह लेश्यानां प्रत्ये
कमसंख्येया बिलोकाकाशप्रदेशप्रमाणान्यध्यवसायस्थानानि ततो मंदाध्यवसायस्थानापेक्षया शुक्ललेश्या
दीनामपि मिथ्यादृष्ट्यादौ कृष्णलेश्यादीनामपि प्रमत्तगुणस्थानके अपि न संभवो विरुध्यते इति तदेवमुक्ता गुणस्थ ।

नकेषु लेश्याः संप्रति बंधहेतवो वक्तुमवसरप्राप्ताः ते च मूलभेदाश्चत्वार उत्तरभेदतश्च सप्तपंचाशत् तानुसरयन् यथा
पि प्रविकटयिषुराह ॥ बंधस्स मिच्छेत्यादि बंधस्य ज्ञानावरणादिकर्मबंधस्य मूलहेतवश्चत्वारः हेतुमुनाप्रकारे
ण भवंति केन प्रकारेणेत्याह मिथ्यात्वाविरतिकषाययोगाः तत्र मिथ्यात्वं विपरीतावबोधस्वभावं अविरतिः साव
द्ययोगेभ्यो निवृत्त्यभावः कषाययोगाः प्राग्निरूपितशब्दार्थाः न त्वन्यत्र प्रमादोऽपि बंधहेतुरभिधीयते यदवादि
मिथ्यात्वाविरतिप्रमादकषाययोगा बंधहेतव इति स कथमिह नोक्तः उच्यते मद्यविषयरूपस्य तस्य विरतावेवांतर्भा १
वविवक्षितः कषायाश्च प्रथममेवोक्ताः वैक्रियारंभादिसंभवी उ योगग्रहणेनैव गृहीत इत्यदोषः इत्युक्ताश्चत्वारो मूल
हेतवः इदानीमुत्तरभेदान् प्रविकटयिषुः प्रथमं मिथ्यात्वस्याविरतेश्चोत्तरभेदानाह ॥ अभिगहिअमण
भिगहिआभिनिवेसिअसंसइअमणाभोगं । पण मिच्छ बार अविरइ मणकरणानियमु छजियवहो ॥ ५१ ॥ व्या० अभि
गृह्यते इदमेव दर्शनं शोभनं नान्यदित्येवंरूपेण कुदर्शनविषयेण येन तदाभिग्राहिकं यद्वशात् बोटिकादिकुद
र्शनानामन्यतमं गृह्णाति तद्विपरीतमनाभिग्राहिकं यद्वशात् सर्वाण्यपि दर्शनानीत्येवमीषन्माध्यस्थ्यमुपजाय
ते आभिनिवेशिकं यदभिनिवेशेन निर्वृत्तं यथा गोष्ठामाहिलादीनां सांशयिकं यत्संशयेन निर्वृत्तं यद्वशाद्भ
गवदर्हदुपदिष्टेष्वपि जीवाजीवादितत्त्वेषु संशय उपजायते यथा न ज्ञाने किमिदं भगवदुक्तं धर्मास्तिकायादि स
त्यमुतान्यथेति अनाभोगं यदनाभोगेन निर्वृत्तं तच्चैकेंद्रियादीनामिति पणमिच्छत्ति पंचप्रकारं मिथ्यात्वं भवतीति
द्वादशप्रकाराऽविरतिः कथमित्याह मनः स्वांतं करणानींद्रियाणि पंच तेषां स्वस्वविषये प्रवर्त्तमानानामनिय
मो अनियंत्रणं तथा षण्णां पृथिव्यप्तेजोवायुवनस्पतित्रसरूपाणां जीवानां वधो हिंसेति अभिहिता मिथ्यात्वा

विरत्यन्तरबंधहेतवः संप्रति कषाययोगोत्तरबंधहेतूनाह ॥ गा० ५१ नवसोलसकसायपनरजोगा इय उत्तरा उ
सगवन्ना इगचउपणतिगुणेसु चउतिदुइगपच्चओ बंधो ॥ ५२ ॥ व्या० स्त्रीवेदपुरुषवेदनपुंसकवेदहास्यरत्यरतिशो-
कभयजुगुप्सारूपा नवनोकषायाः एते च कषायसहचरितत्वात् उपचारेण कषाया इत्युक्ताः षोडश कषाया अ-
नंतानुबंधिक्रोधादयः नोकषायकषायस्वरूपं च सविस्तरं स्वोपज्ञकर्मविपाकटीकायां निरूपितमिति तत ए-
वावधारणीयं पंचदश योगा अत्रैव व्याख्याततत्स्वरूपा इत्यमुना दर्शितप्रकारेण पंचविंशतिः पंचविंशति पंचदश
लक्षणेन सप्तपंचाशत्पुनरुत्तरभेदा बंधस्य भवंतीति प्रदेशतः प्रदर्शिता बंधस्य मूलहेतवश्चत्वारः उत्तरे सप्तपंचा-
शत्संख्याः अधुना बंधस्य मूलहेतून् गुणस्थानकेषु चिंतयन्नाह इगचउपणतिगुणेसु इत्यादि इह दैवंपदघटनादि
एकस्मिन् मिथ्यादृष्टिलक्षणे गुणस्थानके चत्वारि मिथ्यात्वाविरतिकषाययोगलक्षणाः प्रत्यया हेतवो यस्य स चतुः
प्रत्ययो बंधो भवति अयमर्थः मिथ्यात्वादिभिश्चतुर्भिः प्रत्ययैर्मिथ्यादृष्टिगुणस्थानकवर्ती जंतुर्ज्ञानावरणादिक-
र्म बध्नाति तथा चतुर्षु गुणस्थानकेषु सास्वादनमिश्राविरतदेशविरतलक्षणेषु त्रयो मिथ्यात्ववर्जिता अविरति-
कषाययोगलक्षणाः प्रत्यया यस्य स त्रिप्रत्ययो बंधो भवतीत्ययमर्थः सास्वादनादयश्चत्वारो मिथ्यात्वोदयाभावात्
तद्वर्जैस्त्रिभिः प्रत्ययैः कर्म बध्नंति देशविरतिगुणस्थानके यद्यपि देशतः स्थूलप्राणातिपातविषया विरतिरस्ति त-
थापि साल्पत्वान्नेह विवक्षिता विरतिशब्देनेह सर्वविरतेरेव विवक्षिता विरतिशब्देनेह सर्वविरतेरेव विवक्षितत्वादिति १२
तथा पंचसु गुणस्थानकेषु प्रमत्ताप्रमत्तापूर्वकरणनिवृत्तिबादरसूक्ष्मसंपराय लक्षणेषु द्वौ प्रत्ययौ कषाययोगाख्यौ
यस्य स द्विप्रत्ययो बंधो भवति इदमुक्तं भवति मिथ्यात्वाविरतिप्रत्ययस्य तेषु भावात् शेषेण कषाययोगप्रत्यय-

द्वयेनामी प्रमत्तादयः कर्म बध्नंतीति तथा त्रिषु उपशांतमोहक्षीणमोहसयोगिकेवलिलक्षणेषु गुणस्थानकेषु एक एव
मिथ्यात्वाविरतिकषायाभावाद्योगलक्षणः प्रत्ययो यस्य स एकप्रत्ययो भवति अयोगिकेवली भगवान् सर्वथापि
बंधक इति भाविता मूलबंधहेतवो गुणस्थानकेषु प्रत्येकं तानेव मूलबंधहेतून् विनेयवर्गानुग्रहार्थमुत्तरप्रकृतीष्व-
पि चिंतयन्नाह ॥ गा० ५२ चउमिच्छमिच्छअविरइपच्चइया सायसोलपणतीसा जोगविण तिपच्चइया हारग-
जिणवज्जसेसा उ ॥ ५३ ॥ व्या० प्रत्ययशब्दस्य प्रत्येकं संबंधाच्चतुःप्रत्ययिका सातलक्षणा प्रकृतिः मिथ्यात्वप्रत्ययिकाः
षोडश प्रकृतयः मिथ्यात्वाविरतिप्रत्ययिकाः पंचत्रिंशत्प्रकृतयः योगं विना त्रिप्रत्ययिका मिथ्यात्वाविरतिकषायप्र-
त्ययिका आहारकद्विकजिनवर्जाः शेषाः प्रकृतय इति गाथाक्षरार्थः भावार्थः पुनरयं सातलक्षणा प्रकृतिश्चत्वारः
प्रत्यया मिथ्यात्वाविरतिकषाययोगाः यस्याः सा चतुःप्रत्ययिका अतोनेकस्वरादितीकः प्रत्ययः मिथ्यात्वादिभिश्च-
तुर्भिरपि प्रत्ययैः सातं बध्यते इत्यर्थः तथाहि सातं मिथ्यादृष्टौ बध्यते इति मिथ्यात्वप्रत्ययं शेषा अप्यविरत्यादयः त्रयः प्र-
त्ययाः संति केवलं मिथ्यात्वस्यैवेह प्राधान्येन विवक्षितत्वात् तेन तदंतर्गतत्वेनैव विवक्षिता एवमुत्तरत्रापि तदेव मिथ्यात्वा-
भावेप्यविरतिमत्सु सास्वादनादिषु बध्यते इति अविरतिप्रत्ययं तदेव कषाययोगवत्सु प्रमत्तादिषु सूक्ष्मसंपरायावसा-
नेषु बध्यत इति कषायप्रत्ययं योगप्रत्ययं तु पूर्ववत्तदंतर्गतो विवक्ष्यते तदेवोपशांतादिषु केवलयोगवत्सु मिथ्यात्वा-
विरतिकषायाभावेपि बध्यत इति योगप्रत्ययमित्येवं सातलक्षणा प्रकृतिश्चतुःप्रत्ययिका तथा मिथ्यात्वप्रत्ययिकाः षो-
डश कर्मप्रकृतयः इह यासां कर्मस्तवे नरयतिग जाइ थावरचउ हुंडायवछिवट्ठ नपु मिच्छं सोलसंतो त्ति गा-
थावयवेन नारकत्रिकादि षोडशप्रकृतीनां मिथ्यादृष्टावंत उक्तस्ता मिथ्यात्वप्रत्यया भवंतीत्यर्थः तद्भावे बध्यंते तद-

तावेव तत्र सास्वादनादिषु न बध्यंत इत्यन्वयव्यतिरेकाभ्यां। मिथ्यात्वमेवासां प्रधानं कारणं शेषप्रत्ययत्रयं
तु गौणमिति तथा मिथ्यात्वाविरतिप्रत्ययिकाः पंचत्रिंशत्प्रकृतयः तथाहि सासणि तिरिथीणदुहगतिगं अ
णमज्झागिइ संघयण ४ चउ नि ३ उज्जोय कुखगा इत्थि त्ति स्त्रीवेदवर्जन तिर्यग्त्रिकप्रभृतिपंचविंशति
प्रकृतीनां सास्वादने बंधव्यवच्छेद उक्तः तथा वइर १ नरतिय ३ बियकसाय ४ उरलदुगंतो २ इति स्त्रीवेदवर्जेन
वज्रर्षभनाराचादीनां दशानां प्रकृतीनां देशविरते बंधव्यवच्छेद उक्तः एवं च पंचविंशतेर्दशानां च मीलने पंचत्रिंश
त्प्रकृतयो मिथ्यात्वाविरतिप्रत्ययिकाः एताः शेषप्रत्ययद्वयं तु गौणं तदभावे ऽप्युत्तरत्र तद्बंधाभावादिति सावः स्थि
तशेषा आहारकद्विकतीर्थकरसातवर्जाः सर्वा अपि प्रकृतयो योगवर्जत्रिप्रत्ययिका भवंति मिथ्यादृष्ट्यविरतेषु सक
षायेषु च सर्वेषु सूक्ष्मसंपरायावसानेषु यथासंभवं बध्यंत इति मिथ्यात्वाविरतिकषायलक्षणप्रत्ययत्रयनिबंधनाभ
वंतीत्यर्थः उपशांतमोहादिषु केवलयोगवत्सु योगसद्भावेप्येतासां बंधो नास्तीति योगप्रत्ययवर्जनं अन्वयव्यति
रेकसमधिगम्यत्वात् कार्यकारणभावस्येति हृदयं आहारकशरीर १ आहारकोपांगलक्षणाहारकद्विकतीर्थकरनाम्नो ।
स्तु प्रत्ययः सम्यक्त्वगुणनिमित्तं तित्थयरं संजमेण आहारमिति वचनात्संयमः सम्यक्त्वं चाभिहितमिति हृतदर्शनमित्यु
क्तं प्रासंगिकमिदानीमुत्तरबंधहेतून् गुणस्थानकेषु चिंतयन्नाह । मूलं ५३ पणपन्न पन्न तिअ छहिअ चत्त गुणचत्त
कर्मग्रं छचउदुगवीसा सोलस दस नव नव सत्त हेऊणो न उ अजोगंमि ५४ व्या० मिथ्यादृष्टौ पंचपंचाशद्बंधहेतवः १ सास्वादने पंचा ११४
शद्बंधहेतवः २ चत्तशब्दस्य प्रत्येकं संबंधात् अधिकचत्वारिंशदित्यर्थो बंधहेतवो मिश्रगुणस्थानके ३ षडधिकचत्वारिं
शद्बंधहेतवो ऽविरतगुणस्थानके ४ एकोनचत्वारिंशद्बंधहेतवो देशविरतिगुणस्थानके ५ विंशतिशब्दस्य प्रत्येकं सं

बंधात् षड्विंशतिबंधहेतवः प्रमत्ते गुणस्थाने ६ चतुर्विंशतिबंधहेतवो ऽप्रमत्तगुणस्थानके ७ द्वाविंशतिबंधहेतवो
ऽपूर्वकरणे ८ षोडश बंधहेतवो ऽनिवृत्तिनादरे ९ दश बंधहेतवः सूक्ष्मसंपराये १० नव बंधहेतवः क्षीणमोहे उपशां
तमोहे ११ नव बंधहेतवः क्षीणमोहे १२ सप्त बंधहेतवः सयोगिकेवलिगुणस्थाने १३ न तु नैवायोगिन्येकोपि बंधहेतुरस्ति
बंधाभावादेवेति अथामूनेव बंधहेतून् भावयन्नाह । मूलं ५४ पणपन्न मिच्छि हारगदुगूण सासणि पन्न मिच्छ विणा
मीस दुगकंमअणविणु तिचत्त मीसे अह छचत्ता ५५ व्या० मिथ्यादृष्टौ आहारकाहारकमिश्रलक्षणद्विकोनाः पं
चपंचाशद्बंधहेतवो भवंति आहारकद्विकवर्जनं तु संयमवतां तदुदयो नान्यस्येति वचनात् सास्वादने मिथ्यात्वपंचके
न विना पंचाशद्बंधहेतवो भवंति पूर्वोक्तायाः पंचपंचाशतो मिथ्यात्वपंचके ऽपनीते पंचाशद्बंधहेतवो भवंति सास्वादने
इत्यर्थः मिश्रे त्रिचत्वारिंशद्बंधहेतवो भवंति कथमित्याह मिश्रद्विकमौदारिकमिश्रवैक्रियमिश्रलक्षणं कम्मत्ति का
र्मणशरीरं अणत्ति अनंतानुबंधिनस्तैर्विना इयमत्र भावना न सम्मिमीसो कुणइ कालमिति वचनात् सम्यग्मिथ्यादृष्टेः परलोक
गमनाभावात् औदारिकमिश्रद्विकं कार्मणं च न संभवत्यनंतानुबंध्युदयस्य चास्यनिषिद्धत्वादनंतानुबंधिचतुष्टयं वि
नास्यत एतेषु सप्तसु पूर्वोक्तायाः पंचाशतो ऽपनीतेषु शेषाः त्रिचत्वारिंशद्बंधहेतवो मिश्रे भवंति अथानंतरं षट्चत्वारिं
शद्बंधहेतवो मिश्रे सम्यक्त्वे भवंति । मूलं ५५ सदुमीसकंमअजए अविरइकंमुरलमीसबिकसाए मुत्तुगुणचत्त देसे छवीस
साहारदुपमत्ते ५६ व्या० केत्याह अयते ऽविरते कथमित्याह सदुमीसकंमत्ति द्वयोर्मिश्रयोः समाहारो द्विमिश्रं द्विमिश्रं च
कार्मणं च द्विमिश्रकार्मणे सह द्विमिश्रकार्मणैर्वर्त्ततीतया त्रिचत्वारिंशत् इयमत्र भावना अविरतसम्यग्दृष्टेः परलोक
गमनसंभवात् पूर्वापनीतमौदारिकमिश्रवैक्रियमिश्रलक्षणद्विकं कार्मणं च पूर्वोक्तायां त्रिचत्वारिंशति पुनः प्रक्षिप्यते

ततोऽविरते षट्चत्वारिंशद्बंधहेतवो भवंति तथा देशो देशविरते एकोनचत्वारिंशद्बंधहेतवो भवंति कथमित्याह
अविरतिस्त्रसासंयमरूपा कार्मणमौदारिकमिश्रं द्वितीयकषाया अप्रत्याख्यानावरणाश्चतुष्का एतेषु एकोनचत्वा
रिंशदिति अत्रायमाशयः विग्रहगतावपर्याप्तकावस्थायां च देशविरतेरभावात् कार्मणौदारिकमिश्रद्वयं
न संभवति त्रसासंयमाद्विरतत्वाच्च सा विरतिर्न संजाघटीति ननु त्रसासंयमात्संकल्पजाद्देवासौ विरतो न त्वारंभ
जादपि तत्कथमसौ त्रसाविरतिः सर्वोप्यपनीयते सत्यं किंतु गृहीणामशक्यपरिहारत्वेन सत्यप्यारंभजे त्रसा
विरतिर्न विवक्षितेत्यदोषः एतच्च बृहच्छतकबृहच्चूर्णिमनुसृत्य लिखितमिति न स्वमनीषिका परिभावनीया तथाऽ
प्रत्याख्यानावरणोदयस्यास्य निषिद्धत्वादप्रत्याख्यानावरणचतुष्टयं न घटां प्राञ्चति तत एते सप्त पूर्वोक्तायाः षट्च
त्वारिंशतोऽपनीयंते ततएकोनचत्वारिंशद्बंधहेतवः शेषा देशविरते भवंति तथा षट्विंशतिर्बंधहेतवः प्रमत्ते भवंति सा
हारदुगत्ति सहाहारकद्विकेनाहारकाहारकमिश्रलक्षणेन वर्तत इति साहारकद्विका ५६ ॥ अविरइक्कार
तिकसाय वज्ज अपमत्ति मीसदुगरहिया चउवीस अपुव्वे पुण दुवीस अविउव्वियाहारा ५७ व्या० त्रसाविरते
र्देशविरतेऽपनयनाच्छेषा एकादशाविरतय इह गृह्यंते तृतीयाः कषायास्त्रिकषायाः प्रत्याख्यानावरणलक्षणा
स्तद्विरहिता साहारकद्विकाच्चैवैकोनचत्वारिंशतः षट्विंशतिर्भवति इदमत्र हृदयं प्रमत्तगुणस्थाने एकादशाधा अ
विरतिः प्रत्याख्यानावरणचतुष्टयं च न संभवति आहारकद्विकं च संभवति ततः पूर्वोक्ताया एकोनचत्वारिंशतः पंचद ११५
शकेऽपनीते द्विके च तत्र प्रक्षिप्ते षट्विंशतिर्बंधहेतवः प्रमत्ते भवंतीति तथा अप्रमत्तस्य लब्ध्युपजीवनेनाहारकमिश्र
वैक्रियमिश्रद्वयं मिश्रद्विकरहिता षट्विंशतिश्चतुर्विंशतिर्बंधहेतवोऽप्रमत्ते भवंतीति अपूर्वे अपूर्वकरणे पुनः

सैव चतुर्विंशतिर्वैक्रियाहारकरहिता द्वाविंशतिर्बंधहेतवो भवंतीति ५७ ॥ अछहास सोल बायरि सुहुमे दस
वेअसंजलणति विणा खीण वसंति अलोभा सजोगि पुव्वुत्त सग जोगा ५८ व्या० एते च पूर्वोक्ता द्वाविंशतिर्बंधहेत
वो अहास्या हास्यारतिशोकभयजुगुप्सालक्षणहास्यषट्करहिताः षोडश बंधहेतवो बायरत्ति अनिवृत्तिबादरसंपरा
यगुणस्थानके भवंति हास्यादिषट्कस्यापूर्वकरणगुणस्थानक एव व्यवच्छिन्नत्वादिति भावः तथा त एव षोडश त्रिकश
ब्दस्य प्रत्येकं संबंधाद्वेदत्रिकं स्त्रीपुंनपुंसकलक्षणं संज्वलनत्रिकं संज्वलनक्रोधमानमायारूपं तेन विना दश बंधहेतवः
सूक्ष्मसंपराये भवंति वेदत्रयस्य संज्वलनक्रोधमानमायात्रिकस्य चानिवृत्तिबादरसंपरायगुणस्थानक एव व्यवच्छिन्न
त्वात् त एव दश अलोभा लोभरहिताः संतो नव बंधहेतवः क्षीणमोहे भवंति मनोयोगचतुष्कवाग्योगचतुष्कौदारिक
काययोगलक्षणा नव बंधहेतव उपशांतमोहे च ज्ञाप्याः न तु लोभस्तस्य सूक्ष्मसंपराय एव व्यवच्छिन्नत्वात् सयोगिकेव
लि निपूर्वोक्ताः सप्त योगास्तथाहि औदारिकमौदारिकमिश्रं कार्मणं प्रथमांतिमौ मनोयोगौ प्रथमांतिमौ वाग्योगौ चेति तत्रौ
दारिकं सयोगावस्थायां औदारिकमिश्रकार्मणकाययोगौ सयोगावस्थामेव वेदितव्यौ मिश्रौदारिकयोगः सप्तमषष्ठ
द्वितीयेषु कार्मणस्तु समयेषु योगी चतुर्थके पंचमे तृतीये चेति प्रथमांतिममनोयोगौ भगवतोऽनुत्तरसुरादिभिर्मनसा पृष्टस्य म
नसैव देशना प्रथमांतिमवाग्योगौ तु देशनादिकाले अयोगिकेवलिनि न कश्चिद्बंधहेतुर्योगस्यापि व्यवच्छिन्नत्वात् उ
क्ता गुणस्थानकेषु बंधहेतवः संप्रति गुणस्थानकेष्वेव बंधं निरूपयन्नाह ५८ ॥ अपमत्तंता सत्तट्ठ मीसअपुव्वबाय
रा सत्त बंधंति छस्सुहुमो एगमुवरिमो बंधगो जोगी ५९ व्या० मिथ्यादृष्टिप्रभृतयोऽप्रमत्तांता सप्ताष्टौ वा कर्माणि
बध्नंति आयुर्बंधकालेऽष्टौ शेषकाले तु सप्त अपुव्वबायरा इति मिश्रापूर्वकरणानिवृत्तिबादराः सप्तैव बध्नंति ते

षामायुर्बंधाभावात् तत्र मिश्रस्य तथास्वाभाव्यात् इतरयोः पुनरतिविशुद्धत्वादायुर्बंधस्य घोलनापरिणामनिबंधनत्वा १
त् बंधसुहुमसुत्ति सूक्ष्मसंपराये मोहनीयायुर्वर्जानि षट्कर्माणि बध्नाति मोहनीयबंधस्य बादरकषायोदयनि
मित्तत्वात् तस्य च तदभावात् आयुर्बंधाभावात् अतिविशुद्धत्वादेवसेयः एगमुवरिमत्ति एकं सातवेदनीयकर्म उपरित
नात् सूक्ष्मसंपरायादुपरिष्टाद्वर्तिन उपशांतमोहक्षीणमोहसयोगिकेवलिनो बध्नंति न शेषकर्माणि तद्बंधहेत्वभा
वात् अबंधकः सर्वकर्मप्रपंचबंधरहितो अयोगिचरमगुणस्थानकवर्ती सर्वबंधहेत्वभावादिति उक्ता गुणस्थानके
षु बंधस्थानयोजना सांप्रतं गुणस्थानकेषु वेदयसत्तास्थानयोजनां निरूपयन्नाह ५५ ॥ आसुहुमं संतुदए अट्ठवि
मोह विणसत्त खीणंमि चउ चरिमदुगे अट्ठ उ संते उवसंति सत्तुदए ६० व्या० सूक्ष्मसंपरायगुणस्थानकमभिव्याप्य
सत्तायामुदये चाष्टावपि कर्मप्रकृतयो भवंति अयमर्थः मिथ्यादृष्टिगुणस्थानकमारभ्य सूक्ष्मसंपरायं यावत् सत्ता
यामुदये चाष्टावपि कर्माणि प्राप्यंते मोहं विना मोहनीयवर्जा इति भावः सप्तकर्मप्रकृतयो भवंति क्षीणे क्षीणमोहगु
णस्थानके सत्तायामुदये च मोहनीयस्य क्षीणत्वात् चउ चरिमदुगेत्ति चरमद्विके सयोगप्ययोगिकेवलिगुण
स्थानद्वये सत्तायामुदये च चतस्रो घातिकर्मप्रकृतयो भवंति तत्र घातिकर्मचतुष्टयस्य क्षीणत्वात् अट्ठ उसं
ते उवसंति सत्तुदएत्ति उत्तरार्द्धस्य पदयोजना इति संबंधः उपशांतमोहगुणस्थानके पुनरष्टावपि कर्मप्रकृतयः सत्तायां प्रा
प्यंते सप्तोदये मोहनीयोदयाभावादिति भावः उक्ता सत्तोदयस्थानयोजना सांप्रतमुदीरणास्थानानि गुणस्था ११६
नकेषु निरूपयिषुराह ६० ॥ उइरंति पमत्तंता सगट्ठ मीसट्ठ वेअआउविणा छग अपमत्ताइ तउ छपंच सु
हुमो पणुवसंते ६१ व्या० मिथ्यादृष्टिप्रभृतयः प्रमत्तांता यावद्बध्यमानस्यायुरावलिकावशेषं न भव

ति तावत्सर्वेऽप्यमी निरंतरमष्टावपि कर्माण्युदीरयंति आवलिकावशेषे पुनरनुभूयमाने भवायुषि सप्तैव आव
लिकावशेषस्य कर्मण उदीरणाया अभावात् तथास्वाभाव्यात् मीसट्ठत्ति सम्यग्मिथ्यादृष्टिः पुनरष्टावेव क
र्माण्युदीरयति न तु कदाचनापि सप्त सम्यग्मिथ्यादृष्टिगुणस्थानके वर्तमानस्य सत आयुष आवलिकावशेष
त्वाभावात् स हि अंतर्मुहूर्तावशेषायुष्क एव तद्भावं परित्यज्य सम्यक्त्वं मिथ्यात्वं वा नियमात् प्रतिपद्यते इति अप्रमत्ताद
यः अयोऽप्रमत्तापूर्वकरणानिवृत्तिबादरलक्षणा वेद्यायुर्विना वेदनीयायुषी अंतरेण षट्कर्माण्युदीरयंति
तेषामतिविशुद्धतया वेदनीयायुषोरुदीरणायोग्याध्यवसायस्थानाभावात् तत्र षट् अनंतरोक्तानि तानि ताव
दुदीरयति यावन्मोहनीयमावलिकावशेषं न भवति आवलिकावशेषे च मोहनीये तस्याप्युदीरणाया अभावात्
शेषाणि पंचकर्माण्युदीरयति पण उवसंतेत्ति उपशांतमोहः पंच कर्माण्युदीरयति न वेदनीयायुर्मोहनीयकर्माणि
तत्र वेदनीयायुषोः कारणं प्रागेवोक्तं मोहनीयं तूदयाभावान्नोदीर्यते वेद्यमानमेवोदीर्यत इति वचनादिति ६१ ॥
: पण दो खीण दु जोगी णुदीरगु अजोगि थोव उवसंता संखगुण खीण सुहुमा नियट्टि अपुव्व सम अहिया ६२
व्याख्या क्षीणमोहे अनंतरोक्तानि पंच कर्माण्युदीरयति यावत् ज्ञानावरण दर्शनावरणांतरायाण्यावलिकाप्रविष्टा
नि भवंति आवलिकाप्रविष्टेषु तेषामप्युदीरणाया अभावात् द्वे एव नामगोत्रलक्षणे कर्मणी उदीरयति दु जो
गित्ति द्वे कर्मणी नामगोत्राख्ये योगा नाम मनोवाक्कायरूपा विद्यंते यस्य स योगी सयोगिकेवली उदीरयति न शेषा १
णि घातिकर्मचतुष्टयं समूलतः क्षीणमिति न तस्योदीरणासंभवः वेदनीयायुषोरुदीरणा पूर्वोक्तकारणादेव न
भवति अणुदीरगु अजोगित्ति अयोगिकेवली न कस्यापि कर्मण उदीरको योगसव्यपेक्षत्वादुदीरणायाः तस्य च

योगाभावादिति उक्ता गुणस्थानकेषूदीरणास्थानयोजना संप्रति गुणस्थानकेषु वर्त्तमानानां जंतूनामल्पब
हुत्वमाह थोवा उवसंत त्ति स्तोका उपशांता उपशांतमोहगुणस्थानवर्त्तिनो जीवाः यतस्ते प्रतिपद्यमानका उ
त्कर्षतोपि चतुःपंचाशत्प्रमाणा एव प्राप्यंत इति तेभ्यः सकाशात् क्षीणमोहाः संख्येयगुणा यतस्ते प्रतिपद्यमा
नका एकस्मिन् समयेऽष्टोत्तरशतप्रमाणाः क्वापि लभ्यंते एतच्चोत्कृष्टपदापेक्षयोक्तमन्यथा कदाचिद्विपर्ययोपि दृ
ष्टव्यः स्तोकाः क्षीणमोहाः बहवस्तु ते उपशांतमोहा इति तेभ्यः क्षीणमोहेभ्यः सकाशात् सूक्ष्मसंपराया अनि
वृत्तिबादरापूर्वकरणा विशेषाधिकाः स्वस्थाने पुनरेते चिंत्यमानाः त्रयोपि समास्तुल्या इति ६२ अथ जोगिअप
मत्तइअरे संखगुणा देससासणमीसा अविरयअजोगिमिच्छा असंखचउरो दुवेणंता ६३ व्या० तेभ्यः सूक्ष्म
रादिभ्यः सयोगिकेवलिनः संख्यातगुणाः तेषां कोटीपृथक्त्वेन लभ्यमानत्वात् तेभ्योऽप्रमत्ताः संख्येयगुणाः कोटीस
हस्रपृथक्त्वेन प्राप्यमानत्वात् तेभ्य इयरत्ति अप्रमत्तप्रतियोगिनः प्रमत्ताः संख्येयगुणाः प्रमादभावो हि बहुना ब
हुकालं लभ्यते विपर्ययेण त्वप्रमाद इति न यथोक्तसंख्याव्याघातः देसेत्यादि देशविरति सास्वादनमिश्राऽवि
रतलक्षणाश्चत्वारो यथोत्तरमसंख्येयगुणाः अयोगिमिथ्यादृष्टिलक्षणौ च द्वौ यथोत्तरमनंतगुणौ तत्र प्रमत्तेभ्यो देश
विरता असंख्येयगुणाः तिरश्चामप्यसंख्यातानां देशविरतिभावात् सास्वादनास्तु कदाचित्सर्वथैव न भवंति
यदा भवंति तदा जघन्येनैको द्वौ वा उत्कर्षतस्तु देशविरतेभ्योप्यसंख्येयगुणाः तेभ्योऽपि मिश्रा असंख्येयगुणाः सा ११७
स्वादनाद्धाया उत्कर्षतोऽपि षडावलिकास्तु देशविरतेभ्योप्यसंख्येयगुणाः तेभ्योऽपि मिश्रा असंख्येयगुणाः सास्वा
दनाद्धाया उत्कर्षतोऽपि षडावलिकामात्रतया स्तोकत्वात् मिश्राद्धायाः पुनरंतर्मुहूर्त्तप्रमाणतया बहुत्वात्

तेभ्योप्यसंख्यगुणा अविरतसम्यग्दृष्टयः तेषां गति चतुष्टयेपि प्रभूततया सर्वकालं संभवात् तेभ्योऽप्ययोगिके
वलिनो भवस्था अभवस्थाश्च ते द्विभिन्ना अनंतगुणाः सिद्धानामनंतत्वात् तेभ्योप्यनंतगुणा मिथ्यादृष्टयः साध
रणवनस्पतीनां सिद्धेभ्योप्यनंतगुणत्वात् तेषां च मिथ्यादृष्टित्वादिति तदेवमभिहितं गुणस्थानवर्त्तिनां जीवानामल्
पबहुत्वमिदानीं नमिय जिणं जियमग्गण इत्यादि द्वारगाथासूचितं भावद्वारं व्याचिख्यासुराह ६२ उव
समखयमीसोदय परिणामा दुनवट्ठारइगवीसा तिअभेअ संनिवाइअ संमं चरणं पढमभावे ६४ व्या० इह
किल षड्भावा भवंति विशिष्टहेतुभिः स्वतो जीवानां तत्तद्रूपतया भवनानि भवंत्येभिरुपशमादिभिः पर्यायैरिति
वा भावाः किंनामानः पुनस्ते इत्याह उवसमखयमीसोदयेत्यादि अत्र सूचकत्वात्सूत्रस्यैवं प्रयोगः उवसमित्ति औ
पशमिको भावः खय क्षायिको भावः मीसत्ति क्षायोपशमिको भावः उदयत्ति औदयिको भावः परिणामत्ति पारिणामि
को भावः तत्रोपशमनमुपशमो विपाकप्रदेशरूपतया द्विविधस्याप्युदयस्य विष्कंभणं स एव तेन वा निर्वृत्तः औपशमिकः
क्षयः कर्मणोऽत्यंतोच्छेदः स एव तेन वा निर्वृत्तः क्षायिकः क्षयश्च समुदीर्णस्य भावः उपशमश्चानुदीर्णस्य विष्कंभितोद
यत्वं ताभ्यां निर्वृत्तः क्षायोपशमिकः उदयः शुभाशुभप्रकृतीनां विपाकतोऽनुभवनं स एव तेन वा निर्वृत्त औदयि
कः परि समंतान्नमनं जीवानामजीवानां च जीवत्वादिस्वरूपानुभवनं प्रति प्रह्वीभवनं परिणामः स एव तेन वा निर्वृत्तः पारि
णामिकः एतेषामेव यथासंख्यं भेदानाह दुनवट्ठारइगवीसा तियभेय भेयत्ति द्वौ भेदावौपशमिकस्य १ नव भेदाः क्षा
यिकस्य २ अष्टादश भेदाः क्षायोपशमिकस्य ३ एकविंशतिर्भेदा औदयिकस्य ४ त्रयो भेदाः पारिणामिकस्य ५ संनिवा
इयत्ति समिति संहतरूपतया नीति नियतं पतनं गमनमेकत्र वर्त्तनं संनिपातः कोर्थः एषामेव द्व्यादिसंयोगप्रकारस्तेन

निर्वृत्तः सांनिपातिकोऽयं च षष्ठो भावः ६ अथ यथोद्देशं निर्देश इति न्यायादौपशमिकादिभावानां द्व्यादीन् भेदान् प्रवि
कटयिषुराह सम्मं चरणं पढमे भावे त्ति इह यथासंख्यं दर्शनमोहनीयचारित्रमोहनीयकर्मोपशमसंभूतं सम्यक्त्वं चरणं च प्र
थमे भावे औपशमिकलक्षणे भवतीति शेषः इति निरूपितौ द्वौ भेदावौपशमिकभावस्य ६४ ततः बीए केवलजुअ
लं सम्मं दाणाइलद्धिपण चरणं तइए सेसुवओगा पण लद्धी सम्म विरइ दुगं ६५ व्या० द्वितीये क्षायिके भावे नव भेदा भवंति
तद्यथा केवलयुगलं केवलज्ञानं केवलदर्शनं दर्शनमोहनीयक्षयसमुत्थं क्षायिकं सम्यक्त्वं दानादिलब्धयः पंच दान
लाभभोगोपभोगवीर्यलक्षणा दानादिरूपपंचप्रकारांतरायक्षयोद्भूताः क्षायिकं चारित्रमोहनीयक्षयसंभूतं तथा
था शेषोपयोगाः केवलज्ञानकेवलदर्शनव्यतिरिक्ता मतिज्ञानश्रुतज्ञानावधिज्ञानमनःपर्यवज्ञानरूपज्ञानचतुष्टयम
त्यज्ञानश्रुताज्ञानविभंगज्ञानरूपाज्ञानत्रिकचक्षुर्दर्शनाचक्षुर्दर्शनावधिदर्शनलक्षणदर्शनत्रिकस्वरूपा दशोपयो
गाः पण लद्धि त्ति पंचेकदेशोपदसमुदायोपचाराद्दानलाभभोगोपभोगवीर्यलक्षणा लब्धयः पंच सम्मत्ति सम्यक्त्वं विरति
द्विकं देशविरति सर्वविरतिलक्षणमित्येते अष्टादश भेदाः क्षायोपशमिके भवंति तत्र चत्वारि ज्ञानानि त्रीण्यज्ञानानि
ज्ञानावरणीयकर्मक्षयोपशमसंभूतत्वेन त्रीणि दर्शनानि दर्शनावरणक्षयोपशमोद्भूतत्वेन दानादिपंचलब्धयः
पंचविधांतरायकर्मक्षयोपशमजन्यत्वेन क्षायोपशमिकभावांतर्वर्तिन्य इति ननु दानादिलब्धयः पूर्वं क्षायिकभावव
र्तिन्य उक्ता इह तु क्षायोपशमिक्य इति कथं न विरोधः नैतदेवमभिप्रायापरिज्ञानात् दानादिलब्धयो द्विविधा भवत्यंत ११८
रायकर्मणः क्षयसंभविन्यः क्षयोपशमसंभविन्यश्च तत्र याः क्षायिक्यः पूर्वमुक्तास्ताः क्षयसंभूतत्वेन केवलिन एव
याः पुनरिह क्षायोपशमिकांतर्गता उच्यंते ताः क्षायोपशमसंभूताः छद्मस्थानामेव सम्यक्त्वसर्वविरती अपि क्षायोप

शमिके अत्राद्ये त्वेवं यथासंख्यं दर्शनमोहनीयचारित्रमोहनीयक्षयोपशमोद्भवत्वेन प्रस्तुतभावप्रवर्तिनी इति
भावः देशविरतिरप्रत्याख्यानावरणक्षायोपशमजत्वेन क्षायोपशमिकभाववर्तिन्येवेति ६५ ततः अन्नाणमसिद्ध
त्ता संयम लेसा कसाय गइ वेआ मिच्छं तुरिए भव्वा भवत्त जिअत्त परिणामे ६६ व्या० अज्ञानं १ असिद्धत्वं २ असंय
मः ३ लेश्याः कृष्णनीलकापोततेजःपद्मशुक्ललेश्याभेदात् षट् ९ कषायाः क्रोधमानमायालोभाख्याश्चत्वार
: १३ गतिर्नरकतिर्यङ्मनुष्यसुरगतिभेदाच्चतुर्धा १७ वेदाः स्त्रीपुंनपुंसकाख्याः त्रयः २० मिथ्यात्वमित्येते एकविंश
तिभेदाः तुर्ये चतुर्थे औदयिके भावे भवंत्यक्षरार्थः भावार्थः पुनरयं इहासदध्यवसायात्मकं सत्तज्ञानमप्यज्ञानं त
च्च मिथ्यात्वोदयजमेव यदुक्तं प्राक् जह दुव्वयणमवयणं कुच्छियसीलं असीलमसईए भन्नइ तह नाणंपि हु मिच्छ
द्दिट्ठिस्स अन्नाणं असिद्धत्वमपि सिद्धत्वाभावरूपमष्टप्रकारकर्मोदयजमेव असंयमोऽविरतत्वं तदप्यप्रत्याख्या
नावरणोदयात् जायते लेश्यास्तु येषां मते कषायनिष्यंदो लेश्याः तन्मतेन कषायमोहनीयोदयजत्वादौदयि
क्यः यन्मते तु योगपरिणामो लेश्याः तदभिप्रायेण योगत्रयजनककर्मोदयप्रभवाः येषां त्वष्टकर्मपरिणामो
लेश्यास्तन्मतेन संसारित्वासिद्धत्ववदष्टप्रकारकर्मोदयजा इति कषायाः क्रोधमानमायालोभरूपा मोहनीयक
र्मोदयादेव नारकत्वतिर्यक्त्वमनुजत्वदेवत्वलक्षणपर्याया जायंते इति वेदास्त्रीपुंनपुंसकाख्या नोकषायमोह
नीयोदयादेव जायमानाः स्पष्टमौदयिका एवेति मिथ्यात्वमप्यतत्त्वश्रद्धानरूपं मिथ्यात्वमोहनीयोदयजमेवेत्यौ ८
दयिकं प्रतीतमिति ननु निद्रापंचकसातादिवेदनीयहास्यरत्यरतिप्रभृतयः प्रभूततरभावा अन्येऽपि कर्मोदय
जन्याः संति तत्किमित्येतावंत एवेति निर्दिष्टाः सत्यं उपलक्षणत्वादन्येऽपि द्रष्टव्याः केवलं पूर्वशास्त्रेषु भावप्रस्तावे एतावंत ए

व निर्दिष्टा दृश्यंते इत्यत्राप्येतावंत एवास्माभिः प्रदर्शिताः तथा भव्यत्वमभव्यत्वं जीवत्वमित्येते त्रयो भेदाः पारिणा
मिके भावे भवंति तदेवं द्विभेद औपशमिको भावः नवभेदः क्षायिकः अष्टादशभेदः क्षायोपशमिकः एकविंशति
भेद औदयिकः त्रिभेदः पारिणामिकः सर्वेऽपि भावपंचकभेदास्त्रिपंचाशदिति प्ररूपितं सप्रभेदं भावपंचकमधु
ना सांनिपातिकाख्यषष्ठभावभेदप्ररूपणायोपक्रम्यते तत्र च यद्यपि औपशमिकादिभावानां पंचानामपि द्विका
दिसंयोगभंगाः षड्विंशतिर्भवंति तद्यथा औप १ क्षायि २ क्षायो ३ उद ४ पारि ५ इति भावपंचकं पट्टकादावालिख्यते
ततो दश द्विकसंयोगा अक्षसंचारणया लभ्यंते दशैव त्रिकसंयोगाः पंच चतुष्कसंयोगाः एकः पंचकसंयोग इ
ति तथापि षडेव संयोगा जीवेष्वविरुद्धाः संभवंति शेषास्तु विंशतिसंयोगभंगाः प्ररूपणामात्रभावित्वेनासंभ
विन एवातः संभविषड्भेदद्वारेण गत्याद्याश्रिता यावंतः सांनिपातकभावभेदाः संभवंति यावंतश्च न संभवंति
तदेतत्प्रकटयन्नाह ६६ व्या० चउचउगईसु मीसग परिणामुदएहिं चउसखइएहिं उवसमजुएहिं वा चउ केव
लिपरिणामुदयखइए ६७ व्या० चत्वारो भंगाश्चतसृषु गतिषु चिंत्यमानासु भवंति कैः कृत्वेत्याह मिश्रकपारि
णामिकौदयिकैर्भावैर्व्यावर्णितस्वभावैः इयमत्र भावना गतिचतुष्टयद्वारे चिंत्यमानः क्षायोपशमिकपारिणा
मिकौदयिकौदयिकलक्षण एकोऽप्ययं त्रिकसंयोगरूपः सांनिपातको भावश्चतुर्धा भवति तथाहि क्षायोपशमि
कानींद्रियाणि पारिणामिकं जीवत्वादि औदयिकी नरकगतिः इत्येको नरकगत्याश्रितस्त्रिकसंयोगः एवं ति ११९
र्यङ्मनुष्यदेवगत्यभिलापेन त्रयो भंगका अन्येऽपि वाच्याः इत्येवं चतुर्विधं गतिष्वतीत्य त्रिकसंयोगेन चत्वारो
भेदा निरूपिताः संप्रति चतुःसंयोगेन चतुरो भेदानाह चउसखइएहिं चत्वारो भेदा भवंति कैरित्याह सद

क्षायिके एव वर्त्तंते ये क्षायोपशमिकपारिणामिकौदयिकलक्षणा भावास्तैः सक्षायिकास्तैः सक्षायिकैः अयम पारणामिक
र्थः गतिचतुष्टयद्वारेण चिंत्यमानः क्षायोपशमिकौदयिकक्षायिकलक्षण एकोऽप्ययं चतुष्कसंयोगरूपः सां
निपातिको भावश्चतुर्द्धा भवति तद्यथा क्षायोपशमिकानींद्रियाणि पारिणामिकं जीवत्वादिकं औदयिकी नर
कगतिः क्षायिकं सम्यक्त्वमित्येको नरकगत्याश्रितश्चतुष्कसंयोगः एवं तिर्यङ्मनुष्यदेवगत्यभिलापेन त्रयो भंग
का अन्येऽपि वाच्याः इत्येवं चतुर्विधं गतिष्वतीत्यैकप्रकारेण चतुष्कसंयोगेन चत्वारो भेदा निरूपिताः अधुना प्रका
रांतरेण चतुष्कसंयोगं एव चतुरो भेदानाह उवसमजुएहिं वा चउत्ति वाशब्दोऽथवाशब्दार्थः अथवा क्षायिकभ १
वाभावे औपशमिकेन प्रदर्शितस्वरूपेण भावेन युक्तैः कलितैः पूर्वोक्तैः क्षायोपशमिकपारिणामिकौदयिके
र्विनिष्पन्नस्य सांनिपातिकभावस्य गतिचतुष्कं प्रतीत्य चत्वारश्चतुःसंख्या भेदा भवंतीति शेषः तद्यथा क्षायो
पशमिकानींद्रियाणि पारिणामिकं जीवत्वं औदयिकी नरकगतिः औपशमिकं सम्यक्त्वमित्येको नरकगत्याश्रित
चतुष्कसंयोगः एवं तिर्यङ्मनुष्यदेवगत्यभिलापेन त्रयो भंगका अन्येऽपि वाच्याः तदेवमभिलापा गतिचतुष्टयमा
श्रित्यैकेन त्रिकसंयोगेन द्वाभ्यां चतुष्कसंयोगाभ्यां द्वादश विकल्पाः संप्रति शेषसंयोगत्रयस्वरूपं शेषभेदत्रयं
निरूपयिषुराह केवलिपरिणामुदयखइएहिं केवलज्ञानी पारिणामिकौदयिकक्षायिके सांनिपातिक
भेदे त्रिकसंयोगरूपे वर्त्तते यतस्तस्य पारिणामिकं जीवत्वादि औदयिकी मनुजगतिः क्षायिकाणि ज्ञानदर्शन
चारित्रादीनि तदेवमेकस्त्रिकसंयोगः केवलिषु संभवतीति ६७ व्या० खयपरिणामे सिद्धा नराण पण जोगुवसम
सेढीए ॥ इअ पनरस संनिवाइअ भेआ वीसं असंभविणो ६८ व्या० सिद्धा निर्दग्धसकलकर्मेंधनाः क्षायिकपारि

णामिके सांनिपातिकभेदे द्विकसंयोगरूपे वर्त्तते तथाहि सिद्धानां क्षायिकं ज्ञानदर्शनादि पारिणामिकं जीव
त्वमिति द्विकसंयोगो भवति नराणां मनुष्याणां पंचकसंयोगः सांनिपातिकभेदः उपशमश्रेण्यामेव प्राप्यते यतो य
: क्षायिकसम्यग्दृष्टिर्मनुष्य उपशमश्रेणीं प्रतिपद्यते तस्य औपशमिकं चारित्रं क्षायिकं सम्यक्त्वं क्षायोपशमिकानी
न्द्रियाणि औदयिकी मनुष्यगतिः पारिणामिकं जीवत्वं भव्यत्वं चेति इत्यमुना पूर्वप्रदर्शितप्रकारेण गत्यादिषु संयो १
गषट्कं चिंतनलक्षणेन परस्परविरोधनभावेन संभविनः पंचदश सांनिपातिकभेदाः षट्संभवविकल्पाः अरूपि
ताः इति शेषः वीसं असंभविणो त्ति विंशतिसंख्याः संयोगाः असंभविनः प्ररूपणामात्रभावित्वेन न जीवेषु तेषां
संभवोऽस्तीति ननु षड्विंशतिः भेदाः प्राक् प्रदर्शिता इह तु पंचदशानां विंशतेश्च मीलने पंचत्रिंशत्संख्या भेदाः
प्राप्नुवंतीति कथं न विरोधः अत्रोच्यते नत्र विस्मरणशीलो देवानांप्रियो यतो नंतरमेवोदितं गत्यादिद्वारेण चिंति
त्यमानाः पंचदश भवंति मौलाद्यादिसंयोगास्तु षडेव तत्र प्राक् एको द्विकसंयोगो द्वौ त्रिकचतुष्कसंयोगौ ए
कः पंचकसंयोग इति षण्णां विंशत्या मीलने षड्विंशतिसंख्यैवोपजायते इति नात्र कश्चन विरोध इत्यभिहिताः
सप्रभेदाः जीवानामौपशमिकादयो भावाः सांप्रतमेतानेव कर्मविषये चिंतयन्नाह ६५ ॥ मोहेव समो
मीसो चउघाइसु अट्ठकंमसु अ सेसा [illegible] धम्माइ पारिणामिअ भावे खंधा उदइएवि ६९
व्याख्या मोहे एव षष्ठीसप्तम्योरर्थं प्रत्यभेदात् यथाह केशात्स्वाह रूपस्यास्तवा मोहनीयस्यैव कर्मणः शमउ ११२०
पशमोऽनुदयावस्थासमाछन्नाग्निरिवानुसमस्तानां कर्मणां मीसो चउघाइसु त्ति मिश्रः क्षयोपशमस्तत्र क्ष
य उदयावस्थस्यात्यंताभावस्तेन सहोपशमोऽनुदयावस्थाद्व विध्यातवह्निवत् क्षयोपशमः चतुर्षु च उ:

संख्येषु घातिषु ज्ञानादिगुणघातकेषु कर्मस्वित्युत्तरो क्रमत्रापि संबंधनीयं ततो ज्ञानावरणदर्शना
वरणमोहनीयांतरायलक्षणानां घातिकर्मणामेव क्षायोपशमो भवति न त्वघातिकर्मणामिति अष्टक
र्मसु ज्ञानावरणाद्यंतरायावसानेषु चः पुनरर्थे अष्टसु कर्मसु पुनः शेषा औदयिकक्षायिकपारिणामिकभाव १
भवंति तत्रोदयो विपाकानुभवनं क्षयोत्यंताभावः परिणामस्तेन तेन रूपेण परिणमनमित्यक्षरार्थः भावार्थ
स्त्वयं मोहनीयकर्मणः पंचापि भावाः प्राप्यंते मोहनीयवर्जितज्ञानावरणदर्शनावरणांतरायलक्षणा
नां त्रयाणां घातिकर्मणामुदयक्षयक्षयोपशमपरिणामस्वभावाश्चत्वार एव भावा भवंति न तु न उपशमः शे
षाणां वेदनीयायुर्नामगोत्रस्वरूपाणां चतुर्णामघातिकर्मणामुदयक्षयपरिणामलक्षणास्त्रय एव भावा
भवंति न तु क्षयोपशमोपशमाविति प्रतिपादिता जीवेषु तदाश्रितकर्मसु च पंचापि भावा अधुनाजीवेषु
विभणिषुराह धम्माइ त्यादि इह पदैकदेशे पदसमुदायोपचाराद्धर्मास्तिकायः अधर्मास्तिकायः आकाशा
स्तिकायः पुद्गलास्तिकायः कालद्रव्यं चेति परिग्रहः तत्र धारयति गतिपरिणतजीवपुद्गलानां स्तत्स्वभाव
तया मर्यादापयतीति धर्मः अस्तयश्चेह प्रदेशाः तेषां चीयतीति कायः संघातो अस्तिकायः ततो धर्मा
श्चासावस्तिकायश्च धर्मास्तिकायः तथा न धारयति गतिपरिणतानपि जीवपुद्गलास्तत्स्वभावतयानाव
स्थापयति स्थित्युपष्टंभकत्वात्तस्येत्यधर्मः शेषं प्राग्वत् आसमंतात्काशतेऽवगाहदानतया प्रतिभासत इ
त्याकाशः शेषं प्राग्वत् पूरणगलनधर्माणः पुद्गलाः पृषोदरादित्वादिष्टरूपसिद्धिः शेषं पूर्ववत् तथा कलनं
संख्यानं कलनं कालः कल्यते वा परिच्छिद्यते वा वस्त्वनेनेति कालः कलानां वा समयादिरूपाणां समूहः

कालः आद्यसमूहिके प्रत्यये नपुंसकलिंगेन न वक्तव्यं यथा कापोतं मायूरं चेति यदाहुः श्रीहेमचंद्रसूरिपा
दाः उच्यते रूढित्वादाद्यलिंगस्य न नियमः यदाह पाणिनिः लिंगमशिष्यं लोकाश्रयत्वात् तस्येति ततः काल एव तत्र
रूपकरणात् द्रव्यं कालद्रव्यं तत्र च कालस्य वस्तुतः समयरूपस्य निर्विभागत्वान्न देशप्रदेशसंभवः अत एवा
स्तिकायत्वाभावो वेदितव्यः न त्वतीतानागतवर्त्तमानभेदेन कालस्यापि त्रैविध्यमस्तीति किमिति नोक्तं सत्यं
अतीतानागतयोर्विनष्टानुत्पन्नत्वेनाविद्यमानत्वाद्वर्त्तमानिक एव समयरूपः सद्रूपः यद्येवं तर्हि सर्वसमयनि
रोधेनैवोत्तरसमयसद्भावेऽसंख्यातानां समयानां समुदयसमित्या संजातावलिकादयः शास्त्रोक्तप्रतिपादिता १
: कालविशेषाः कथं संगच्छंते सत्यं तत्त्वतो न संगच्छंत एव केवलं व्यवहारार्थमेव कल्पिता इति अथ केऽमी आवलिका
दयः कालविशेषा इति विनेयजनशुश्रूषायां तदवबोधाय समयादारभ्य कालविशेषाः प्रतिपाद्यंते तत्र समयस्वरू
पमेवमनुयोगद्वारे प्रतिपाद्यते तद्यथा से किं तं समए समयस्स णं परूवणं करिस्सामि से जहा नामए तुन्नागदा १
रए सिया तरुणे बलवं जुगवं जुवाणे अप्पायंके थिरग्गहत्थे दढपाणिपायपासपिट्ठंतरोरुपरिणए तलजमलजु
गलपरिघनिभबाहू चम्मेट्ठगदुहणमुट्ठियसमाहयनिचियगायकाए लंघणपवणजइणवायामसमत्थे उरस्स
बलसमन्नागए छेए दक्खे पत्तट्ठे कुसले मेहावी निउणे निउणसिप्पोवगए एगं महतिं पडसाडियं वा पट्टसाडियं वा ग
हाय सयराहं हत्थमित्तं ओसारिज्जा तत्थ चोयए पन्नवगं एवं वयासि जेणं कालेणं तेणं तुन्नागदारएणं तीसे पडि १२१
साडियाए वा पट्टसाडियाए वा सयराहं हत्थमित्ते ओसारिए से समए भवइ नो इणमट्ठे समट्ठे कम्हा जम्हा संखिज्जाणं
तंतूणं समुदयसमिइसमागमेणं पडसाडिया निप्फज्जइ उवरिल्लंमि तंतुंमि अच्छिन्ने हिट्ठिल्ले तंतू न छिज्जइ अन्नं

मि काले उवरिल्ले तंतू छिज्जइ अन्नंमि काले हिट्ठिल्ले तंतू छिज्जइ तम्हा से समए न भवइ एवं वयंतं पन्नव
गं चोयए एवं वयासी जेणं कालेणं तेणं तुन्नागदारएणं तीसे पडसाडियाए वा पट्टसाडियाए वा उवरिल्ले
तंतू छिन्ने से समए न भवइ कम्हा जम्हा संखिज्जाणं पम्हाणं समुदयसमिइसमागमेणं एगे तंतू निप्फज्जइ
उवरिल्ले पम्हंमि अच्छिन्ने हिट्ठिल्ले पम्हे न छिज्जइ अन्नंमि काले उवरिल्ले पम्हे छिज्जइ अन्नंमि काले हि
ट्ठिल्ले पम्हे छिज्जइ तम्हा से समए न भवइ एवं वयंतं पन्नवगं चोयए एवं वयासि जेणं कालेणं तेणं तुन्नाग
दारएणं तस्स तंतुस्स उवरिल्ले पम्हे छिन्ने से समए न भवइ कम्हा जम्हा अणंताणं संघायाणं समुदयसमिइ
समागमेणं एगे पम्हे निप्फज्जइ उवरिल्ले संघाए अविसंघाइए हिट्ठिल्ले संघाए न विसंघाइज्जइ तम्हा से समए
न भवइ इत्तो वि णं सुहुमतराए समए पन्नत्ते समणाउसो १ असंखिज्जाणं समयाणं समुदयसमिइसमागमेणं
सा एगा आवलियत्ति पवुच्चइ २ संख्येया आवलिका आनः एक उच्छ्वास इत्यर्थः ३ ता एव संख्येया निःश्वासः
४ द्वयोरपि कालः प्राणः ५ सप्तभिः प्राणैः स्तोकः ६ सप्तभिः स्तोकैः लवः ७ सप्तसप्तत्या लवानां मुहूर्त्तः
८ त्रिंशता मुहूर्त्तैरहोरात्रः ९ तैः पंचदशभिः पक्षः १० ताभ्यां द्वाभ्यां मासः ११ मासद्वयेन ऋतुः १२ ऋतुत्रयमा
नमयनं १३ अयनद्वयेन संवत्सरः १४ पंचभिस्तैर्युगं १५ विंशत्या युगैर्वर्षशतं १६ तैर्दशभिर्वर्षसहस्रं १७ तैः
शतेन वर्षलक्षं १८ चतुरशीत्या च वर्षलक्षैः पूर्वांगं भवति १९ पूर्वांगं चतुरशीतिवर्षलक्षैर्गुणितं पूर्वं भवति
२० तच्च सप्ततिः कोटिलक्षाणि षट्पंचाशच्च कोटिसहस्राणि वर्षाणां उक्तं च पुव्वस्स उ परिमाणं सयरिं खलु
होंति कोडिलक्खाउ छप्पन्नं च सहस्सा बोधव्वा वासकोडीणं स्थापना ७०५६०००००००००० इत्थमपि चउर

BHAU DAJI

शीत्या लक्षैर्गुणितं त्रुटितांगं भवति २१ एतदपि चतुरशीत्या लक्षैर्गुणितं त्रुटितं २२ एतदपि चतुरशीतिलक्षैर्गुणितं
मटटांगं २३ एतदपि चतुरशीत्या लक्षैर्गुणितमटटं २४ एवं सर्वत्र पूर्वः पूर्वो राशिश्चतुरशीतिलक्षस्वरूपेण गुण
कारेण गुणित उत्तरोत्तरराशिरूपतां प्रतिपद्यत इति प्रतिपत्तव्यं ।। तत्र अववांगं २५ अववं २६ हूहूकांगं
२७ हूहूकं २८ उत्पलांगं २९ उत्पलं ३० पद्मांगं ३१ पद्मं ३२ नलिनांगं ३३ नलिनं ३४ अर्थनिपूरांगं ३५ अर्थ
निपूरं ३६ अयुतांगं ३७ अयुतं ३८ नयुतांगं ३९ नयुतं ४० प्रयुतांगं ४१ प्रयुतं ४२ चूलिकांगं ४३ चूलिका
४४ शीर्षप्रहेलिकांगं ४५ एवमेते राशयश्चतुरशीतिलक्षस्वरूपेण गुणकारेण यथोत्तरं वर्द्धमानास्तावद्या
वदिदमेव शीर्षप्रहेलिकांगं चतुरशीतिलक्षैर्गुणितं शीर्षप्रहेलिका भवति ४६ अस्याः स्वरूपमंकतोऽपि दर्श्य
ते ७५८२६३२५३०७३०१०२४११५७९७३५६९९७५६९६४०६२१८९६६८४८०८०१८३२९६ अग्रे च
त्वारिंशं शून्यशतं तदेवं शीर्षप्रहेलिकायां सर्वाण्यपि चतुर्नवत्यधिकशतसंख्यान्यंकस्थानानि भवंति एतस्माच्च
परतोऽपि संख्येयः कालोऽस्ति स त्वनतिशायिनामसंव्यवहार्यस्त्वात्सर्वोपमयाऽत्रैव वक्ष्यते पल्योपमसागरोपम
उत्सर्पिण्यवसर्पिण्यादिकालस्वरूपं पुनः स्वोपज्ञशतकटीकायां सविस्तरमभिहितं तत एवावधारणीयं ततो धर्मा
स्तिकाय १ अधर्मास्तिकाय २ आकाशास्तिकाय ३ पुद्गलास्तिकाय ४ कालद्रव्याणि पारिणामिके तेन तेन रू
पेण परिणमनस्वभावे भावे पर्यायविशेषे वर्त्तंत इति शेषः तथाहि धर्माधर्माकाशास्तिकायानामनादिकालादार १२२
भ्य जीवानां पुद्गलानां गतिस्थित्युपष्टंभावकाशदानपरिणामेन परिणतत्वादनादिपारिणामिकभाववर्त्तित्वं का
लस्य तु समयस्यापरापरसमयोत्पत्तितया आवलिकादिपरिणामपरिणतत्वादनादिपारिणामिकभाववर्त्तित्वमे

व द्व्यणुकादिस्कंधानां सादिकालत्वेन तेन तेन स्वभावेन परिणमनात्सादिपारिणामिकत्वं मेर्वादिस्कंधानां त्वनादि
कालीनेन तेन तेन रूपेण परिणमनादनादिपारिणामिकभाववर्त्तित्वं चेति किंच सर्वेऽपि जीवाः पारिणामिके एव भावे वर्त्तंत आ
दौ श्चिके चिदन्यस्मिन्नपीत्याह खंध उदइए वित्ति स्कंधा अनंतपरमाण्वात्मका न तु केवला अणवस्ते पुनर्जीवेनाग्रहण
दौदयिकेऽप्यौदयिकभावेऽपि न केवलं पारिणामिक इत्यपिशब्दार्थः तथाहि शरीरादिनामोदयजनितमौदारिका
दिशरीरतया औदारिकादीनां स्कंधानामेवोदय इति भावः उदय एवौदयिक इति व्युत्पत्तिपक्षे तु कर्मस्कंधलक्षणेषु
जीवेष्वौदयिकभावो भवतीति भावः तथाहि क्रोधाद्युदये जीवस्य कर्मस्कंधानामुदयस्तेषामेवौदयिकत्वमिति न त्वेवं
कर्मस्कंधाश्रिता औपशमिकादयोऽपि भावा अजीवानां संभवंत्यतस्तेषामपि ग्रहणं प्राप्नोति सत्यं तेषामविवक्षितत्वा
त् अत एव केश्चिदजीवानां पारिणामिक एव भावोऽभ्युपगमत इति व्याख्याता अजीवाश्रिता अपि भावाः संप्रति जीवगु
णस्थानेषु गुणस्थानकेषु भावान्निरूपयिषुराह ६९ ः संमाइचउसु तिग चउ भावा चउ पणुवसामगुवसंते चउ
खीणपुव्वे तिन्नि सेसगुणठाणगेगजिए ७० व्या० सम्मा इति सम्यग्दृष्ट्यादिषु अविरतसम्यग्दृष्टिप्रभृतिषु चतुः संख्ये
षु अविरतसम्यग्दृष्टिदेशविरतप्रमत्ताप्रमत्तलक्षणेषु गुणस्थानकेषु इति वक्ष्यमाणपदस्यात्रापि संबंधः कार्यः तिग च
उ भाव त्ति त्रयश्चत्वारो वा भावाः प्राप्यंत इति भावः तत्र क्षायोपशमिकसम्यग्दृष्टेश्चतुर्थ्यापि गुणस्थानके इमे त्रयोऽपि
भावा लभ्यंते तद्यथा यथासंभवमौदयिकी गतिः क्षायोपशमिकमिंद्रियसम्यक्त्वादि पारिणामिकं जीवत्वमिति क्षा
यिकसम्यग्दृष्टेरौपशमिकसम्यग्दृष्टेश्चत्वारो भावा लभ्यंते त्रयस्तावत्पूर्वोक्ता एव चतुर्थस्तु क्षायिकसम्यग्दृष्टेः क्षा
यिकसम्यक्त्वलक्षणः औपशमिकसम्यक्त्वस्य भाव इति चउ पणुवसामगुवसंते त्ति चत्वारः पंच वा भावाः द्वयोरपु

शमकोपशांतयोर्भवंति किमुक्तं भवति अनिवृत्तिबादरसूक्ष्मसंपरायलक्षणगुणस्थानकद्वयवर्त्तीऽत्रउपशमको
च्यते तस्य चत्वारः पंच वा भावा भवंति कथमिति चेदुच्यते त्रयस्तावत्पूर्ववदेव चतुर्थस्तु क्षीणदर्शनत्रिकस्य श्रेणिमारोह
तः क्षायिकसम्यक्त्वलक्षणोऽन्यस्य पुनरौपशमिकस्तस्य भावः इति अमीषामेव चतुर्णां मध्ये अनिवृत्तिबादरसूक्ष्मसंप
रायगुणस्थानकद्वयवर्त्तिनोप्यौपशमिकचारित्रस्य शास्त्रांतरेषु प्रतिपादनादौपशमिकचारित्रप्रक्षेपे पंचमेति उपशां १
तमोहगुणस्थानकवर्त्ती तस्यापि चत्वारः पंच वा भावाः प्राप्यंते ते चानंतरोपशमपदप्रदर्शिता एव च क्षीणपूर्वेति च
त्वारो भावाः क्षीणपूर्वयोः क्षीणमोहगुणस्थानकेऽपूर्वकरणगुणस्थानके चेत्यर्थः तत्र क्षीणमोहे त्रयः पूर्ववत् चतुर्थ
: क्षायिकसम्यक्त्वचारित्रलक्षणः अपूर्वकरणे त्रयः पूर्ववत् चतुर्थः पुनः क्षायिकसम्यक्त्वभाव औपशमिकसम्य
क्त्वभावो वेति तिन्निसेसगुणठाणगेगजिए त्रय इति संख्या भावा भवंति विवक्षितोपाद्येषु गुणस्थानकेषु मिथ्यादृष्टि
सास्वादन सम्यग्मिथ्यादृष्टिसयोगिकेवल्ययोगिकेवलिलक्षणेषु तत्र मिथ्यादृष्ट्यादीनां त्रयाणामौदयिकी
गतिः क्षायोपशमिकानींद्रियाणि पारिणामिकं जीवत्वमित्येते त्रयो भावाः प्रतीता एव सयोगिकेवल्ययोगि
केवलिनोः पुनरौदयिकी मनुजगतिः क्षायिकं केवलज्ञानादि पारिणामिकं जीवत्वमित्येवंरूपास्त्रय इति आ
ह किममी त्रिप्रकारास्तयो भावा गुणस्थानकेषु चिंत्यमानाः सर्वजीवाश्रयतया चिंत्यंते आहोश्विदेकजीवापेक्षया
उ संभविनः सर्वेपि भावा भवंतीति अथ नैते षड्गुणस्थानकेषु प्रत्येकं यस्य भावस्य संबंधिनो यावंत उत्तरभेदा य १२३
स्मिन्गुणस्थानके प्राप्यंते इत्येतत्सोपयोगित्वादस्माभिरभिधीयते तद्यथा क्षायोपशमिकभावभेदा मिथ्याह
ष्टिसास्वादनयोरंतरायकर्मक्षयोपशमजदानादिलब्धिपंचकं अज्ञानत्रयं चक्षुरचक्षुर्दर्शनलक्षणं द

दर्शनत्रय

शा भवंति सम्यग्मिथ्यादृष्टौ दानादिलब्धिपंचकं ज्ञानत्रयं २ मिश्ररूपं सम्यक्त्वलक्षणा द्वादश भेदा भवंति अविरत
सम्यक्त्वे गृहदृष्टौ मिश्रत्यागेन सम्यक्त्वप्रक्षेपे त एव द्वादश देशविरतौ च द्वादशसु मध्ये देशविरतिप्रक्षेपे त्रयोदश प्रमत्ता
प्रमत्तयोश्च देशविरतिविरहितेषु पूर्वप्रदर्शितेषु द्वादशस्वेव सर्वविरतिमनःपर्यायज्ञानप्रक्षेपे चतुर्दश अपूर्वकर
॥क्षायोपशमिक सम्यक्त्वापदेशः ४८॥ णानिवृत्तिबादरसूक्ष्मसंपरायेषु चतुर्दशा स्युः सम्यक्त्वापसारणे प्रत्येकं त्रयोदश स्युश्चारित्रापसारणे द्वादश क्षायो ॥क्षायोपशमिक चारित्र ४८
पशमिकभावभेदाः प्राप्यंते ८: अथ नौदयिकभावभेदा भाव्यंते मिथ्यादृष्टावज्ञानासिद्धत्वोदय एकविंशतिरपि भेदा
भवंति सास्वादने एकविंशते मिथ्यात्वापसारणे विंशतिः मिश्राविरतयोर्विंशतेरज्ञानापगमे एकोनविंशतिः देशविरते
च देवनारकगत्यभावे सप्तदश प्रमत्ते च तिर्यग्गत्यभावे सप्तदश प्रमत्ते च तिर्यग्गत्यसंयमाभावे पंचदश अप्रमत्ते च पंच
दश स आद्यलेश्या त्रिकाभावे त्रिकाभावे द्वादश अपूर्वकरणे अनिवृत्तिबादरे च द्वादश तेजःपद्मलेश्ययोरभावे द
श सूक्ष्मसंपराये संज्वलनलोभमनुजगतिशुक्ललेश्याऽसिद्धत्वलक्षणाश्चत्वार औदयिका भावाः उपशांतक्षीण
मोहसयोगिकेवलिषु चत्वारः संज्वलनलोभाभावे त्रयः अयोगिकेवलिनस्तु मनुजगति असिद्धत्वरूपमौदयिकभ १
८: वभेदद्वयं प्राप्यते ८: औपशमिकभावभेदाश्चांत अविरतादारभ्योपशांतं यावदौपशमिकं सम्यक्त्वमौपशमिक
भावभेदः प्राप्यते औपशमिकचारित्रलक्षणस्तु निवृत्तेरारभ्योपशांतं यावत्प्राप्यते क्षायिकभावभेदश्च क्षायिकसम्य
क्त्वरूपोऽविरतादारभ्योपशांतं यावत्प्राप्यते क्षीणमोहे च क्षायिकं सम्यक्त्वं चारित्रं च प्राप्यते सयोगिकेवल्ययोगिके
वलिनोस्तु नवापि क्षायिकभावाः प्राप्यंते ८ पारिणामिकभावभेदा मिथ्यादृष्टौ त्रयोऽपि सास्वादनादारभ्य क्षीणमो
हं यावद्भव्यत्वजीवत्वे द्वौ भवतः सयोगिकेवल्ययोगिकेवलिनोस्तु जीवत्वमेवेति भव्यत्वस्य च प्रत्यासन्नसिद्धाव

स्वायाम त्ता बाद धक्नापि तदपगतप्रायत्वादिवा केनचित्कारणेन शास्त्रांतरेषु नोक्तमिति नास्माभिरप्यत्रोच्यते यस्य
भावस्य भेदाय स्मिन् गुणस्थानके यावंत उक्तास्तेषां संभविभावभेदानामेकत्र मीलने सति भावभेदनिष्पन्नः षष्ठः सा
निपातिकभावभेदः तस्मिन् गुणस्थानके भवति यथा मिथ्यादृष्टावौदयिकभावभेदाः एकविंशतिः क्षायोपशमि
कभावभेदा दश पारिणामिकभावभेदाः त्रयः सर्वे भावभेदाश्चतुस्त्रिंशत् एवं सास्वादनादिष्वपि संभविभावभेदमीलनेन भाव
भेदनिष्पन्नः षष्ठः सांनिपातिकभावभेदो वाच्यः एतदर्थसंग्रहिण्यश्चेता गाथा यथा पण अंतराय अन्नाण तिन्नि अच
क्खुचक्खुदंसणाइं मिच्छे सासणे य हुंति मीसे अंतरायपण १ नाणतिग दंसणतिगं मीसगसंमं च बारस हवंति एवं
च अविरयंमि वि नवरि तहिं दंसणं छट्ठं २ देसे अ देसविरइ तेरस मा नइ पमत्त अपमत्ते मणपज्जव परकेवा चउदस अ
पुव्वकरणे उ ३ वेयगसंमेण विणा तेरस सुक्कडमसंपराउ त्ति ते विअ उवसमखीणे चरित्त विरहेण बारस उ ४ खाउव
समिगभावाण केत्तिय गुणपयपढ्ढवकया उदइयभावे इणिंह तेचेव पढुव दंसेमि ५ चउगइ य्याइ इगवीस मिच्छि सास
णे य हुंति वीसं च मिच्छेण विणा मीसे इगुणीसमनाणविरहेण ६ एमेव अविरयंमी सुरनारयगइ विउत्त देसे सत्तरह
ति ५ ते च्चिय तिरिगइ असंजमाभावा ७ पन्नरस पमत्तंमी अपमत्ते आइलेसतिगविरहे तेविअ बारस सुकेगलेस उद
स अपुव्वंमि ८ एवं अनियट्टिंमि वि सुहुमे संजलणलोभ मणुगइय अंतिमलेस असिद्ध भावा उ नाणं चउनाव ए
संजलणलोभविरहा उवसंत खीणमोहेसु तिन्नि लेसा भावा नाणेसु अजोगिणो भाव उगमेव १० अविरयसमाउव १२४
संउ जीव उवसमगखाइगा संमा अनियट्टी उवसंत जाव उवसामि अवरणं ११ खीणंमि खइयसंमं चरणं च उगं पि
नाणसमकाले नवनवखाइगाभावा नाणसजोगे अजोगेय १२ जीवत्तमभव्वत्तं भवत्तं पि जहाउणेसु मिच्छंमि साणाई

खीणंते दो मिच्छे अभव्वभव्वत्त उ १३ सजोगि अजोगिंमिय जीवत्तं चेव मिच्छमाईणं सम्भावमीलणेणं भावगुण
संनिवाय उ १४ व्याख्यातप्रायाप्येताः नवरमेकादशगाथायां उवसमगखाइगासंम त्ति अनेनोपशमिकक्षायि
कसम्यक्त्वरूपं औपशमिकक्षायिकभावभेदद्वयं युगपद्भावाभिधानिरूपितं ततश्चाविरतादारभ्योपशांतमोहं यावत्
कस्यचिदौपशमिकसम्यक्त्वरूप औपशमिकभावो लभ्यः प्राप्यते कस्यचित्पुनः क्षायिकसम्यक्त्वरूपः क्षायिकभाव
भेदश्चेति व्याख्यातमष्टमद्वारगाथायां भावद्वारं संप्रति संख्येयकादिद्वारं प्रविकटयिषुराह ७० ब संखिज्जे
गमसंखं परित्तजुत्तनियपयजुअं तिविहं एवमणंतं पि तिहा जहन्नमज्झुक्कसा सव्वे ७१ व्या० एतावंत एवेति
संख्यानं संख्येयं यच्चात इति यत्प्रत्ययः तच्चैकमेकमेव भवति नापरे संख्येयादेरिव परीत्तादयो मूलभेदस्वरू
पभेदा अस्य विद्यंते इति भावः न संख्यामर्हतीत्यसंख्यं दंडादिभ्यो य इति यप्रत्ययः असंख्येयकं तत्पुनः परीत्तंयु
क्तं च निजपदं स्वकीयपदं असंख्येयकलक्षणं तच्च परीत्तयुक्तनिजपदानि तैर्युक्तं च निजपदं स्वकीयपदं असंख्ये
यकलक्षणं तच्च परीत्तयुक्तनिजपदानि तैर्युक्तं समन्वितं सत्किमित्याह त्रिविधं त्रिप्रकारं भवति यथा परीत्तासंख्ये
यकं युक्तासंख्येयकं असंख्यातासंख्येयकमित्युक्तं त्रिविधमसंख्येयकमधुना त्रिविधमनंतकमाह एवमणंतं
पि त्रिधा एवमनेनानंतरप्रदर्शितप्रकारेण परीत्तयुक्तनिजपदयुक्तलक्षणेनानंतमप्यनंतकमपि न केवलमसं
ख्येयकमित्यपि शब्दार्थः त्रिधा त्रिप्रकारं वदितव्यं तद्यथा परीत्तानंतकं युक्तानंतकं अनंतानंतकमित्येवमेतानि स
मुदितानि सप्तापि पदानि पुनरेकैकं त्रिरूपाणि भवंतीति दर्शयितुमाह जहन्नमज्झुक्कसा सव्वे त्ति प्राकृतत्वाल्लिंगव्य
त्ययात् जघन्यमध्यमोत्कृष्टभेदभिन्नानि सर्वाणि समस्तानि एकैकशः सप्तापि पदानि वेदितव्यानीत्यर्थः तथाहि

जघन्यसंख्येयकं मध्यमसंख्येयकं उत्कृष्टसंख्येयकं तथा जघन्यपरीत्तासंख्येयकं मध्यमपरीत्तासंख्येयकं उ
त्कृष्टपरीत्तासंख्येयकं जघन्ययुक्तासंख्येयकं मध्यमयुक्तासंख्येयकं उत्कृष्टयुक्तासंख्येयकं जघन्यासंख्या
तासंख्येयकं मध्यमासंख्यातासंख्येयकं उत्कृष्टासंख्यातासंख्येयकं तथा जघन्यपरीत्तानंतकं मध्यमपरी
त्तानंतकं उत्कृष्टपरीत्तानंतकं जघन्ययुक्तानंतकं मध्यमयुक्तानंतकं उत्कृष्टयुक्तानंतकं जघन्यानंतानंतकं म
ध्यमानंतानंतकं उत्कृष्टानंतानंतकं तदेवं संख्यातकं त्रिधा असंख्यातमनंतकं च नवधा भवतीति तदेवं संख्ये
यकादिभेदस्वरूपं नाममात्रेण कृत्वा विस्तरतः तत्स्वरूपं निरूपयिषुः संख्यातमेकं त्रिधात्वेनोद्दिष्टं तद्विशेषमेव यन्नाह
७१ व जहन्नसंखिज्जं केवइअं अउपरं मज्झिमं उक्कोसं जंबुद्दीवपमाणय चउपल्लपरूवणा इमं ७२ व्या० इहैक
केन गणनसंख्यां न लभते यत एकस्मिन् घटादौ दृष्टे घटादिवस्त्विदं तिष्ठत्येवमेव प्रायः प्रतीतिरुत्पद्यते नैकसंख्याविष
यत्वेन अथवा आदानसमर्पणादिव्यवहारकाले एकं वस्तु प्रायोयोगेन कश्चिद्गणयति अतो असंव्यवहार्यत्वादल्प
त्वाच्चानेकैको गणनसंख्यां लभते तस्माद् द्विप्रभृतेरेव गणनसंख्या अत एवाह संखेयं संख्यातकं लहुकजघन्यं कत्थवि
यत्र क्ष्वस्यावधारणार्थत्वात् यदाहुः श्रीहेमचंद्रसूरिपादाः प्राकृतलक्षणे अणेयत्थेयवियवं अवधारणे द्वावेवनैकः
पूर्वोदितयुक्तेरतः परमेतस्माद्द्विकत्तज्जघन्यं संख्यातकं पुनस्त्रिचतुरादिकमनेकप्रकारं भवति कियद्दूरं यावन्म
ध्यमं भवतीत्याह जाव गुरुयंति यावदित्यवधौ गुरुकमुत्कृष्टं सर्वोपरिवर्त्तिसंख्यातकं न प्राप्नोतीति शेषः अथेदमेव गुरु १२५
कं संख्यातकं कथं विज्ञेयमित्याह इदमधस्तनेच वक्ष्यमाणस्वरूपं गुरुकं संख्यातकं ज्ञेयमिति शेषः कथं जंबूद्वीपप्रम २
णकचतुःपल्यप्ररूपणया जंबूद्वीपप्रमाणकास्ते च ते चत्वारश्च चतुःसंख्याः पल्याश्च धान्यपल्यावद् जंबूद्वीपप्रमाणकच

तुःपल्याः तेषां प्ररूपणा प्ररूपणा व्यावर्णना तया एतदुक्तं भवति यथा जंबूद्वीपो लक्षयोजनप्रमाण एवमेतेप्र १
यामविष्कंभाभ्यां प्रत्येकं लक्षयोजनप्रमाणा वृत्ताकारत्वाच्च परिधिना परिहीति लक्खं सोलससहस्सा दोयसयसत्तावी
सहीया कोसतिसय अट्ठावीसं धणुसया तेरसंगुलद्धहियमिति गाथोक्तिस्तप्रमाणोपेता उक्तं च श्रीअनुयोगद्वारसूत्रे
जहन्नयं संखिज्जयं कित्तियं होइ दोरूवाइं तेणपरं अजहन्नमणुक्कोसयाइं ठाणाइं जाव उक्कोसयं संखिज्जयं
न पावइ उक्कोसयं संखिज्जयं कित्तियं होइ उक्कोसयस्स संखिज्जयस्स परूवणं करिस्सामि से जहा नामए पल्ले सिया
एगं जोयणसयसहस्सं आयामविक्खंभेणं तिन्नि जोयणसयसहस्साइं सोलसहस्साइं दोन्नियसत्तावीसे जोयणसए ति
न्नियकोसे अट्ठावीसं च धणुसयं तेरस अंगुलाइं अद्धंगुलं च किंचि विसेसाहियं परिक्खेवेणं ततो जंबूद्वीपप्रमाणकच
तुःपल्यप्ररूपणयेदमुत्कृष्टं संख्यातकं प्ररूपयिष्यते इति भावः अथैते च चत्वारोऽपि पल्याः किंनामान इत्येतदाह ७२ वः
पल्लाणवट्ठिअसलागपडिसलागामहासलागक्खा जोअणसहस्सोगाढा सवेइअंता ससिहभरिआ ७३ व्या० धान्यप
ल्यादिवत्पल्याः कल्प्यंते ते च जंबूद्वीपप्रमाणाः किंनामान इत्याह अणवट्ठिएत्यादि यथोत्तरं वर्द्धमानस्वरूपत्वात्तयाऽवस्थि
तस्वरूपत्वाच्चानवस्थित एवोच्यते तथेह शलाकाः एकैकसर्षपप्रक्षेपलक्षणास्ताभिः शलाकाभिर्भ्रियमाणत्वात् पल्यो
ऽपि शलाका तथा प्रतिशलाकाभिर्निष्पन्नत्वात्प्रतिशलाका महाशलाकाभिर्निर्वृत्तत्वान्महाशलाका ततएषां द्वंद्वेऽन
वस्थितशलाकाप्रतिशलाकामहाशलाकास्ता इत्थंभूताः आख्याः संज्ञा येषां तेऽनवस्थितशलाकाप्रतिशलाकामहाशला २
काख्याः तत्र विशिष्यंते योजनसहस्रं अवगाढा इदमुक्तं भवति रत्नप्रभायाः पृथिव्याः प्रथमं योजनसहस्रप्रमाणं रत्नकांडं
भित्त्वा द्वितीये वज्रकांडे प्रतिष्ठिता इति पुनस्त एव विशिष्यंते सवेइयंत त्ति वज्रमय्या अष्टयोजनोच्छ्रायाया श्चत्वारि

ष्टोद्वादशयोजनात्सुपरिमध्यभागे विस्तृतायां जंबूद्वीपनगरप्राकारकल्पायां जगत्यां द्विगव्यूतोच्छ्रितेन पंचधनुःशतवि-
स्तृतेन नानारत्नमयेन जालकटकेन परिक्षिप्तायां उपरिक्षिप्तायां उपरि वेदिकेति पद्मवरवेदिकेत्यर्थः द्विगव्यूतोच्छ्रिता
पंचधनुःशतविस्तीर्णा गवाक्षहेमकिंकिणीजालघंटायुक्ता देवानामासनशयनमोहनविविधक्रीडास्थानमुत्तयंती
वनखंडवती तस्या अंतः पर्यवसानमग्रभाग इति वेदिकांतस्तत्र च सह वेदिकांतेन वर्त्तत इति सवेदिकांतेन वर्त्तत इ-
ति सशिखाः ततः सशिखं यथा भवति तथा सर्षपैर्भृताः पूरिताः सशिखभृतास्ते कर्त्तव्या इति शेषः अयमत्राशयः एतेषां २
व्यावर्णितस्वरूपाणां चतुर्णामपि पल्यानां मध्याद्यो यथावर्णितस्वरूपाणां चतुर्णामपि पल्यानां मध्याद्यो यथावसरं स-
र्षपैः भ्रियंते तयोजनसहस्रावगाढ ऊर्ध्वं समधिकाष्टयोजनोच्छ्रितवेदिकांतं प्ररयित्वा तदुपरि तावच्छिखा वर्द्धनीया याव-
देकोऽपि सर्षपो नावतिष्ठते इति अत्र सर्वे सवेदिकांताः सशिखभृतास्तत्र कर्त्तव्या इति सामान्योक्तावपि प्रथममनवस्थितपल्य
एवासौ ततः करणीयः शेषास्तु यथावसरमेवेति मंतव्यमिति अथ तेनानवस्थितपल्यस्य जंबूद्वीपप्रमाणस्य सर्षपैर्भृ-
तस्य यद्विधेयं तदाह ७३ मूः तो दीवुदहिसु इक्किक्क सरिसवं खिविअ निट्ठिए पढमे पढमंव तदंतं चिअ पुण भ-
रिए तंमि तह खीणे ७४ व्या० ततः सर्षपभरणादनंतरमसत्कल्पनया तया केनचिद्देवेन दानवेन वा वामकरत-
ले धृत्वा द्वीपोदधिषु द्वीपसमुद्रेषु एकैकं सर्षपं सिद्धार्थं क्षिप्त्वा तिष्ठेतं तर्ह्येतत्पर्वत्वा निष्ठापिते रिक्तीकृते प्रथमेऽनव-
स्थितपल्ये कोऽर्थः एकैकसर्षपं द्वीपे प्रक्षिप्यति एकं समुद्रे पुनरप्येकं द्वीपे एकं समुद्रे एवं प्रतिद्वीपं प्रतिसमुद्रं चैकैकं स- १२६
र्षपं प्रक्षिपन्नसौ देवो दानवो वा तावद्गतो यावदनवस्थितपल्यो निष्ठितो भवति ततः किं विधेयमित्याह पढ-
मं व्वेत्यादि द्वीपे समुद्रे वा यत्रासावनवस्थितपल्यो निष्ठितो भवति तदंतं चियत्ति स एवानवस्थितपल्यस्य निष्ठा-

४७

कारी द्वीपः समुद्रो वांऽतः पर्यवसानं प्रमाणतया यस्य द्वितीयानवस्थितपल्यस्य स तदंतस्तं द्वितीयानवस्थितपल्यं प्रमाणा-
धिकायिकं विशेषमिदं तत्तस्तदंतमेव चियशब्दस्यावधारणार्थत्वाद्विस्तीर्णतया तावत्प्रमाणमेवेत्यर्थः प्रथममिवाद्यपल्यमिवेत्युप-
मानेन द्वितीयानद्वितीयानवस्थितपल्यमपि सहस्रयोजनावगाढमष्टयोजनोच्छ्रितजगत्युपरि वेदिकोपशोभितं सशिखं सर्षपैर्भृ-
तं कुर्यादिति स्वयति ततः प्रथमानवस्थितपल्यमिव तदंतमिव पुनर्भूयोऽपि भृते सर्षपैः पूरिते तस्मिन् द्वितीयानवस्थित-
पल्ये तथा तेन प्रकारेण निक्षिप्तचरमसर्षपद्वीपादेरग्रत एकः सर्षपो द्वीपे एकः समुद्र इत्यादिना क्षीणे निष्ठिते सति द्वितीयान-
वस्थितपल्ये ततः किं विधेयमित्याह ७४ मूः खिप्पइ सलागपल्लेगु सरिसवो इअ सलागखवणेण पुन्नो बीओ अ तओ पुव्वंपि
व तंमि उद्धरिए ७५ व्या० खिप्यते निधीयते शलाकापल्ये द्वितीये शलाकासंज्ञक एकसंख्य एव सर्षपः संवेनाऽनवस्थितप-
ल्पसत्कः किं त्वन्य एवेत्यवसीयते पुण्णे भरिए तंमि तह खीणे इति सूत्रावयवस्य सामस्त्यरिक्तीकरणप्रतिपादनपरत्वा-
त् अन्ये त्वनवस्थितपल्यसत्क एव क्षिप्यत इत्याचक्षते तत्त्वं तु केवलिनो विदंतीति आह किमिति द्वितीयपल्य एव निक्षेपे स-
त्येकस्य सर्षपस्य शलाकापल्ये प्रक्षेपणमनिर्दिष्टं यावता प्रथमपल्येऽपि निष्ठिते तत्रैकस्य सर्षपस्य प्रक्षेपो युज्यत इति तद-
युक्तमभिप्रायापरिज्ञानात् यतोऽनवस्थितपल्यशलाकोत्पत्तिरेवासौ प्रतिपादनीयः प्रथमश्च लक्षयोजनविस्तृतत्वेनावस्थित-
परिमाणतया नवस्थित एव न भवतीत्यतो द्वितीयाद्यनवस्थितपल्यशलाका एव तत्र प्रक्षेपमर्हंतीति न चैतत्स्वमनीषिका-
विजृंभितं यदुक्तमनुयोगद्वारेषु सेणं पल्ले सिद्धत्थयाणं भरिए तओणं तेहिं सिद्धत्थएहिं दीवसमुद्दाणं उद्धारे घिप्पइ एगे दीवे
एगे समुद्दे २ एवं खिप्पमाणेहिं २ जावइया णं दीवसमुद्दा तेहिं सिद्धत्थएहिं अप्फुन्ना एसणं एवइए खित्ते पल्ले आइट्ठे से णं पल्ले सि-
द्धत्थयाणं भरिए तओणं तेहिं सिद्धत्थएहिं दीवसमुद्दाणं उद्धारे घिप्पइ एगे समुद्दे २ एवं खिप्पमाणेहिं जावइया णं दीवसमुद्दाणं

तेहिं सिद्धत्थयदिं अपुन्ना पमाणं एवं पूरियित्ते पल्ले पढमा सलागा इति यश्चायं पल्लः क्वचिदुत्पादितो गाथायां प्रथमस्यानवस्थित
अपदेशो सो योग्यतामात्रेण शलाकादिक्रमारम्भशलाकाव्यपदेशवत् द्रष्टव्यः इयं सलागरूवेणेण उक्तो बीयत्ति इत्यस्यार्थं
प्रदर्शितः प्रकारेण द्वितीयश्च शलाकापल्यः संक्षेपतो भवति ससिंखअ इति यावत् इयमत्र भावना ततो यस्मिन् द्वीपे समु
द्रे वा स एष द्वितीयपल्यो निष्ठांगतस्तदंतावधौ ततः सर्वेऽपि ये द्वीपसमुद्राः तावत्प्रमाणः पुनरन्यः पल्यः परिकल्प्यते सर्वोऽपि स
र्षपैः पूर्यते ततस्तं तावत्प्रमाणं पल्यमुत्पाद्य ततो निष्ठित स्थानात् द्वीपसमुद्रेष्वेकैकं सर्षपं प्रक्षिपेत् यावदसौ निष्ठि
तो भवति ततो द्वितीया शलाका सर्षपरूपा शलाकापल्ये प्रक्षिप्यते ततोऽपि यस्मिन् द्वीपे समुद्रे वा स एषः तृतीयोऽनवस्थि
तपल्यो निष्ठितं तदंतावधौ ततः सर्वेऽपि ये द्वीपसमुद्रास्तावत्प्रमाणो पुनरन्यः पल्यो परिकल्प्यते सर्वोऽपि सर्षपैरापूर्यते तत
स्तं तावत्प्रमाणं पल्यमुत्पाद्य ततो निष्ठितं स्थानात्परतो द्वीपसमुद्रेष्वेकैकं सर्षपं प्रक्षिपेत् यावदसौ निष्ठितो भवति ततः
तृतीया सर्षपरूपा शलाका शलाकापल्ये प्रक्षिप्यते एवमनेन क्रमेण पुनः पुनरनवस्थितपल्यस्य सर्षपभरणरिक्तीक
रणलब्धैकैकसर्षपरूपाभिः शिलाकाभिः शलाकापल्यो यथोक्तप्रमाणः सशिखाकस्तावत्पूरयितव्यो यावत्तत्रैको
प्यन्यः सर्षपो न मातीति बीअयत्ति इत्यत्र वकाराक्षात्पूर्वपरिपाट्यागतोऽनवस्थितपल्यः सर्षपैरापूरणीयस्ततः किंविधे
यमित्याह तत्थ पुव्वंपि व तंमि उद्धरिए इति ततः शलाकापल्य पूर्वपरिपाट्यागतानवस्थितपल्यापूरणानंतरं पूर्ववत्तस्मि
न् शिलाकापल्ये उद्धृते सति ७५ खः खीणे सलागतइए एवं पढमेहिं बीअयं तरस्सु तेहिं तइअं तेहि अ उरिअं जा १२७
किर फुडा चउरो ७६ व्या० खीणे च निर्लेपे स्थिति सर्षपरूपा शलाका तृतीये प्रतिशलाकापल्ये प्रक्षिप्यते इति
मक्षरगमनिका भावार्थस्त्वयं ततः शलाकापल्यपूरणानंतरं शलाकापल्यं वामकरतले कृत्वा पूर्वानवस्थितपल्यचर

मसर्षपाक्रांतात् द्वीपात्समुद्राद्वा परतः प्रतिद्वीपं प्रतिसमुद्रं चैकैकं सर्षपं प्रतिक्षिपेद्यावदसौ निष्ठितो भवति ततः प्र
तिशिलाकापल्ये सर्षपरूपा प्रथमा प्रतिशलाका प्रक्षिप्यते ततोऽनंतरोक्तोऽनवस्थितपल्य उत्पाद्यते ततः शलाकापल्यच
रमसर्षपाक्रांतात् द्वीपात्समुद्राद्वा परतः पूर्वक्रमेण द्वीपसमुद्रेष्वेकैकं सर्षपं प्रक्षिपेत् यावदसौ निःशेषतो रिक्तो भवति
ततः शलाकापल्ये पुनरपि सर्षपरूपा एका शलाका प्रक्षिप्यते ततोऽनंतरोक्तानवस्थितपल्यचरमसर्षपाक्रांतो द्वीपः समु
द्रो वा यस्तदंतमनवस्थितपल्यं सर्षपैर्भृत्वा ततः परतः पुनरप्येकैकं सर्षपं प्रतिद्वीपं प्रतिसमुद्रं च प्रक्षिपेत् यावदसौ नि
ष्ठितो भवति ततो द्वितीया शलाका शलाकापल्ये प्रक्षिप्यते एवमपरापरानवस्थितपल्यपूरणरिक्तीकरणलब्धैकैकस
र्षपैर्यदा शलाकापल्यः आशिरतो भवति पूर्वपरिपाट्या चानवस्थितपल्यस्तदा शलाकापल्यमुत्पाट्य प्राक्तनानवस्थितप
ल्यचरमसर्षपाक्रांतात् द्वीपात्समुद्राद्वा परतः प्रतिद्वीपं प्रतिसमुद्रं चैकैकं सर्षपं प्रक्षिपेत् यावदसौ निर्लेपो भवति ततः प्रतिशलाक २ पल्यो द्वितीया शलाका x
प्रक्षिप्यते ततोऽनवस्थितपल्यमुत्पाट्यानंतररिक्तीकृतशलाकापल्यचरमसर्षपाक्रांतात् द्वीपात्समुद्राद्वा परतः पूर्वक्रमेण
द्वीपसमुद्रेष्वेकैकं सर्षपं प्रक्षिपेत् यावदसौ निष्ठितो भवति ततः शलाकापल्ये सर्षपरूपा शलाका प्रक्षिप्यते यत्र चासौ द्वी x पुनरपि x
पे समुद्रे वा निष्ठितस्तावत्प्रमाणविस्तरात्मकमनवस्थितपल्यं सर्षपैरापूर्यते ततः परतः पूर्वक्रमेण द्वीपसमुद्रेष्वेकैकं सर्ष
पं प्रक्षिपेत् यावदसौ निष्ठितो भवति ततः शलाकापल्ये द्वितीया शलाका सर्षपरूपा प्रक्षिप्यते एवमनेन क्रमेण तावद्वक्त
व्यं यावत्त्रयोऽपि प्रतिशलाकापल्यः शलाकापल्योऽनवस्थितपल्यः परिपूर्णाः आशिरस्ता भवंति ततः प्रतिशलाकापल्यमु
त्पाट्य निष्ठितस्थानात्परतः प्रतिद्वीपं प्रतिसमुद्रमेकैकं सर्षपं प्रक्षिपेत् यावदसौ निष्ठितो भवति ततो महाशलाकाप
ल्ये एका सर्षपरूपा शलाका प्रक्षिप्यते ततः शलाकापल्यं गत्वा चरमसर्षपाक्रांतात् द्वीपात्समुद्राद्वा परतः प्रतिद्वी

x उत्पाट्य प्रतिशलाका पु

×॰मा पूरणीयः एवं मापूर्णासाटन् पल्योपपरपरयातावद्गन्तव्यं यावन्महाशलाकापल्य

पं प्रति समुद्रमेकैकं सर्षपं प्रक्षिपेत् यावदसौ निष्ठितो भवति ततः प्रतिशलाकापल्ये प्रथमा शलाका प्रक्षिप्यते ततो
नवस्थितपल्यमुत्पाटयेत् ततोऽत्र शलाकापल्यगतचरमसर्षपाक्रान्तात् द्वीपात् समुद्राद्वा परतो द्वीपसमुद्रेष्वेकैकं
सर्षपं प्रक्षिपन् तावद्गच्छेद्यावदसौ निःशेषतो रिक्तो भवति ततः शलाकापल्ये प्रथमा शलाका प्रक्षिप्यते ततोऽनन्तरोक्तान
वस्थितपल्यगतचरमसर्षपाक्रान्तो द्वीपः समुद्रो वा यस्तत्पर्यन्तविस्तरात्मकोऽनवस्थितपल्यः कल्पयित्वा सर्षपैरा
पूर्यते ततस्तमुत्पाट्य ततो निष्ठितस्थानात्परतो द्वीपसमुद्रेष्वेकैकं सर्षपं प्रक्षिपेत् यावदसौ निर्लेपो भवति ततो द्वितीया
शलाका शलाकापल्ये प्रक्षिप्यते एवं शलाकापल्यप्रतिशलाकापल्य[illegible]शलाकापल्यानवस्थितपल्याः सर्वेऽपि परिपूर्णाः
शिखायुक्ताः समाश्रिता भवन्ति एतदेव निगमयन्नाह एवं पढमेहिं इत्यादि एवमनेन प्रदर्शितक्रमेण प्रथमैरनवस्थितपल्ये
द्वितीयमेव द्वितीयकं शलाकापल्यं भरस्व पूरयतैश्च द्वितीयस्थानवर्तिभिः शलाकापल्यं तावद्भरस्व यावत्किलेत्यागम
मवादसंसूचकः स्फुटाव्याप्ताः सशिखा भृता इति यावत्खल्वास्यश्चतुःसंख्या अनवस्थितशलाकाप्रतिशलाकामहाश
लाकाख्याः पल्या भवन्तीति ततश्चतुर्णां पल्यानां पूर्णत्वेयत् संपद्यते तदाह उद्धारः पढमतिपल्लुद्धरिया दीवुदही प
ल्लचउसरिसवा य सव्वो वि एसरासी रूवूणो परमसंखिज्जं ७७ व्या० प्रथममाद्यं यत्त्रिपल्यं पल्यत्रयमनवस्थितशलाका
प्रतिशलाकाख्यं तेनोद्धृताः एकैकसर्षपप्रक्षेपेण व्याप्ताः प्रथमत्रिपल्योद्धृताः क एते इत्याह द्वीपोदधयो न केवलं द्वीपोद १२८
धयः पल्यचतुष्कसर्षपाश्च किं भवतीत्याह सर्वोऽपि समस्तोऽप्येषोऽनन्तरोक्तः सर्षपव्याप्तद्वीपसमुद्रपल्यचतुष्कगत
सर्षपलक्षणो राशिः संघातो रूपोनः एकेन सर्षपरूपेण रहितः सन् परमसंख्येयमुत्कृष्टसंख्यातकं भवतीति तदेवता
वदिदमुत्कृष्टसंख्येयकं जघन्यमध्यमोत्कृष्टयोश्चान्तरालेयानि संख्यास्थानानि तानि सर्वाणि मध्यमसंख्ये

यकमिति सामर्थ्याद्युक्तं भवति सिद्धान्ते च यत्र क्वचित् संख्यातग्रहणं करोति तत्र सर्वत्रापि मध्यमसंख्येयकं द्रष्टव्यं यदु
क्तमनुयोगद्वारचूर्णौ सिद्धान्तेयं जत्थ आगमे गणणं तत्थ तत्थ अजहन्नमणुक्कोसं दट्ठव्वंति इदं चोत्कृष्टं संख्येयकमित्थमे
वप्ररूपयितुं शक्यते द्विकादिदशशतसहस्रलक्षकोट्यादिशीर्षप्रहेलिकाराशिर्योऽतिक्रान्तासमतिक्रान्तः तच्चेत्थं प्रका
रान्तरेणाख्यातमशक्यत्वाद्यदाहुः श्रीमिद्धसिद्धान्तसंदोह विवरणप्रकरणकरणप्रमाणप्रथनावासमुधांशुधाममधवल
यशः प्रसरधवलितसकलवसुंधरावलयाः श्रीहरिभद्रसूरिपादा अनुयोगद्वारटीकायां जंबुद्दीवपमाणमित्ताव
नारिपल्लापढमो अणवट्ठियपल्लो बियओ सलागपल्लो तइओ पडिसलागपल्लो चउत्थओ महासलागपल्लो एएचउरो
वि रयणप्पहपुढवीए पढमं रयणकंडं जोयणसहस्सावगाढं भित्तूण विइए वयरकंडे पइट्ठिया इमा ठवणा ००००
एए ठविया एगो गणणं न उवेइ दुप्पभिइ संखंति काउं तत्थ पढमे अणवट्ठियपल्ले दो सरिसवा पक्खित्ता एयं जहन्नगं संखि
ज्जगं ततो एगुत्तरवुड्ढीए तिन्नि चउरो पंच जाव सो पुन्नो अन्नं सरिसवं न पडिच्छइत्ति ताहे असब्भावठवणं पडुच्च वुच्चति
तं को वि देवो दाणवो उक्खित्तुं वामकरयले काउं ते सरिसवे जंबुद्दीवाइए गादीवे एगं समुद्दे पक्खिवेज्जा जाव निट्ठिआ
ताहे सलागापल्ले एगो सरिसवो छूढो जस्सं निट्ठिउं तेण सह आदिल्ला दीवसमुद्देहिं पुणो अणो पल्लो आइज्जइ सो
वि सरिसवाणं भरितो तओ परतो एक्केक्कं दीवसमुद्दे पक्खिवंतेणं निट्ठविओ तओ सलागापल्ले बिइया सलागा पक्खित्ता
एवं एएणं अणवट्ठियपल्लकरणक्कमेण सलागयगहणं करंति तेण सलागापल्लो सलागाणं भरिओ कमागतो अणवट्ठि
यउ वि तओ सलागापल्लो सलागं न पडिच्छइत्ति काउं सो चेव निट्ठिय जाणे उपरओ पुव्वक्कमेण पक्खित्तो निट्ठिओ य त
ओ पडिसलागापल्ले पढमा सलागा छूढा तओ अणवट्ठिओ उक्खित्तो निट्ठियगाणे तु परओ पुव्वक्कमेण पक्खित्तो निट्ठि

उय तत्तसलागापल्लेसलागापरिकिन्ना एवं अणेणं २ अणवट्ठिए आरिक्कनिरकिरंतेणं जावे पुणोसलागापल्लोत्तरि
भेअणवट्ठिउय तादेपुणोसलागापल्लो उरिक्किन्नो परिकिन्नो निट्ठिउय पुव्वक्कमेण ताहे पडिसलागापल्लेबिइया पडिसल
गाछूढा एवं आइरणनिक्किरणेणं जादे तिन्नविपडिसलागा सलागा अणवट्ठियपल्लोय सरिसंताहेपडिसलागापल्लो
उरिक्किन्नो परिकिप्पमाणो निट्ठिउ अताहे महासलागापल्लेपढमा सलागा छूढा ताहे सलागापल्लो उरिक्किन्नो परिकिप्प
माणो णिट्ठिउय ताहे पडिसलागापरिकिन्ना ताहेअणवट्ठिउ उरिक्किन्नो परिकिन्नोय ताहे सलागापल्लेसलागापरिकिन्ना ए
वं आइरणनिक्किरणकमेण ताव काइव्वं जाव परंपरेणं महासलागापडिसलागसलागअणवट्ठिउ उरिक्किन्ने पल्लोयचत्त
रोवितेरीया ताहे उक्कोसमइक्कंतियं इक्कजावइया अणवट्ठियपल्लसलागपल्लपडिसलागापल्लेणदीवसमुद्दा उद्धरीया
डेय चउपल्लट्ठियासरिसवासमत्तो वि एतप्पमाणो रासी एगरूवूणो उक्कोसयं संखिज्जयं हवइ जहण्णुक्कोसट्ठाणम
ज्झे जंगणे तेसप्पमाणो रासी एगरूवूणो उक्कोसयं संखिज्जयं हवइ जहण्णुक्कोसट्ठाणमज्झे जंगणे तेसव्वेपत्तेयं अज
हन्नमणुक्कोसया संखिज्जया नणियव्वा सिद्धंतेयजत्थ जत्थ संखिज्जयगहणं कयं तत्थ तत्थ सव्वंअजहन्नमणुक्को
सयं दट्ठव्वं एवं संखिज्जगे परूविए सीसो पुच्छइ भगवं किमेएणं अणवट्ठियपल्लेसलागापडिसलागाईहिं दीवसमुद्द
हारगहणेणय उक्कोससंखिज्जं परूवणा कया गुरू भणइ नत्थि अन्नो संखिज्जगस्स परूवणोवाउत्ति इत्युक्तं त्रिविधम
पि संख्येयकमिदानीं नवविधमसंख्येयकं नवविधमेवचानंतकं निरूपयिषुर्गाथाद्वयमाह ७७ व्या० रूवजुअं उपरि १२७
त्ता संखज्जअसंखरासिअब्भासे जुत्तासंखिज्जलहु आवलिआसमयपरिमाणं ७८ व्या० पूर्वोक्तमेवोत्कृष्टसंख्ये
यकं रूपयुतं उरूपेणैकेनसर्षपरूपेण युक्तं सज्जघन्यपरीत्तासंख्यपरीत्तासंख्येयकं भवति इदमत्र हृदयं इह

येनैकेन सर्षपरूपेणरहितो नंतरोक्तो राशिरुत्कृष्टसंख्यातकमुक्तं तत्र राशौ तस्यैव रूपस्य निक्षेपो यदा क्रियते त
दा तदेवोत्कृष्टसंख्यातकं जघन्यपरीत्तासंख्यातकं भवतीति इह च जघन्यपरीत्तासंख्येयके ऽतिक्रांते यद्यपि तस्यैव म
ध्यमोत्कृष्टभेदस्वरूपं नावसरस्तथापि परीत्तयुक्तनिजपदत्रिभेदानामप्यसंख्येयकानां मध्यमोत्कृष्टभेदौ पश्चाद्वक्ष्य
वक्तव्यत्वात्प्ररूपयिष्येते अतो अधुना जघन्ययुक्तासंख्यातकं तावदाह असंखरासिअब्भासे इत्यादि असंखरासेर्जघ
न्यपरीत्तासंख्येयकगतराशेरभ्यासे परस्परगुणने सति लघु जघन्यं युक्तासंख्येयकं भवति तच्चावलिकासमयप
रिमाणं आवलिका असंखिज्जाणं समयाणं समुदयसमिइसमागमेणं इत्यादि सिद्धांतप्रसिद्धाः तस्याः समया निर्वि
भागाः कालविभागास्तत्परिमाणमावलिकासमयपरिमाणं जघन्ययुक्तासंख्येयकतुल्यसमयराशिप्रमाणा आवलिका
इत्यर्थः एतदुक्तं भवति जघन्यपरीत्तासंख्येयकसंबंधीनि यावंति सर्षपलक्षणानि रूपाणि तान्येकैकशः पृथक्पृ
थक् संस्थाप्यंते तत एकैकस्मिन्रूपे जघन्यपरीत्तासंख्यातकप्रमाणो राशिर्व्यवस्थाप्यते तेषां च राशीनां परस्परमभ्यासो
विधीयते इहैवं भावना असत्कल्पनया किल जघन्यपरीत्तासंख्येयकराशिस्थाने पंचरूपाणि कल्प्यंते तानि विविच्यंते
जाताः पंचैकका ११११ एककानामधः प्रत्येकं पंचवाराः पंचपंचकव्यवस्थाप्यंते तद्यथा अत्र पंचभिः पंचगुणिता जाता १:
पंचविंशतिः सापि पंचभिराहता जाते पंचविंशत्यधिकं शतं इत्यादिक्रमेण सर्वेषां राशीनां परस्पराभ्यासे जातानि पंचविंशत्यधिका

१	१	१	१	१
५	५	५	५	५

न्येकत्रिंशच्छतानि ३१२५ एषकल्पनया तावदेतावन्मात्रो राशिर्भवति सद्भावतस्त्वसंख्येयरूपो जघन्ययु
क्तासंख्यातकतया मंतव्य इति निरूपितं जघन्ययुक्तासंख्येयकं संप्रति शेषजघन्यासंख्यातासंख्यातक
स्य जघन्यपरीत्तानंतकादित्रयरूपाणां त्रयाणां जघन्यानंतकभेदानां च स्वरूपमतिदिशति पिपादयिषुराह व्या:

७८ बितिचउपंचमगुणणे कमा सगासंखपढमचउसत्त णंता ते रूवजुआ मज्झा रूवूण गुरु पच्छा ७९ इह संखिज्जे
गमसंखमित्याद्गाथोक्तं पन्यस्त उत्कृष्टं । ॥ उत्कृष्टसंख्यातकम् ॥ १ ॥ संख्यातकादिमो ज्ञसमपदापेक्षया संख्यातकाद्यते
द्विकल्तानि यानि परीत्तासंख्या तकादीनि षट्पदानि तानि परीत्तासं
ख्यातकानंतानंतक भेदद्वयवर्जि ख्यातानि द्विविचउः पंचमगुणणे द्वितीयट
तीयचतुर्थपंचमपदवाच्यराशेरन्यो न्याभ्यासे सति क्रमात् क्रमेण सगासंख
त्रि घाककृतत्वात्रं स्थापनापेक्षया ज घन्यासंख्यातसंख्यातकं पढमचउसत्ताणंत
त्रि प्राकृतत्वात्प्रथमचतुर्थसप्तमा न्यनंतकानि तत्र प्रथमानंतकं जघन्यपरीत्तानं
तकं चतुर्थानंतकं जघन्ययुक्तानं तकं सप्तमानंतकं जघन्यानंतानंतकं भवती
ति इह जघन्यमध्यमोत्कृष्टभेदतोऽसं ख्येयानंतकयोः प्रत्येकं नवविधत्वात्प्रदर्शित
भेदानां सप्तमप्रथमादिसंख्यानं सं गच्छत एव इदमवेदं पर्यादितीये युक्तासंख्यात
कपदवाच्ये जघन्ययुक्तासंख्यात कलक्षणे राशौ विहिते सति यावंति रूपाणि
तावत्संख्यानां जघन्यपरीत्तानंत कराशीनामनंतकपदवाच्यराशीनां परस्परमा

॥ उत्कृष्टसंख्यातकम् ॥ १ ॥		
परीत्ताऽसंख्या २	युक्तासंख्या ३	असंख्याऽसं ४
परीत्ताऽनंत ५ ॥	युक्तानंतक ६	अनंताऽनंत ७ ॥

जघन्यसं १	मध्यमसं २	उत्कृष्टसं ३
परीत्तासंजघ १	परीत्तासंम २	परीत्ताऽसंउत्कृ ३
युक्ताऽसंजघ ४	युक्ताऽसंम ५	युक्ताऽसंउत्कृ ६
ऽसंऽसंज ७	ऽसंऽसंम ८	ऽसंऽसंख्यउ ९
परीत्ताऽनंज १	परीत्ताऽनंम २	परीत्ताऽनंउत्कृ ३
युक्ताऽनंजघ ४	युक्ताऽनंमध्य ५	युक्ताऽनंउत्कृ ६
ऽनंऽनंतज ७	ऽनंऽनंतम ८	ऽनंतानंतउ ९

भ्यासे यावद्राशिर्भवति तच्चतुर्थमनंतकं जघन्ययुक्तानंतकं भवति पंचमेव युक्तानंतकपदवाच्ये जघन्ययुक्तानंतकरूपे १३०
राशौ यावंति रूपाणि तत्प्रमाणानामेव जघन्ययुक्तानंतकराशीनां परस्परगुणने यावान् राशिः संपद्यते तत्सप्तमानंतकं जघ
न्यानंतानंतकं भवति स्था० परीत्तासंख्यातकं १ युक्तासंख्यातकं २ असंख्यातासंख्यातकं ३ परीत्तानंतकं ४ युक्तानंत

क ५ अनंतानंतक ६ लक्षणाः षडपि राशयो जघन्याः स्थापितास्त्रिविधा मध्यमोत्कृष्टाश्चेते कथं मंतव्या इत्याह तेरूवजुआइ
त्यादि ते अनंतरोद्दिष्टा जघन्याः षडपि राशयो रूपेणैकैकलक्षणेन युताः समन्विता रूपयुताः सन्तः किं भवंतीत्याह मज्झम
ध्यमा अजघन्योत्कृष्टा इति यावत् तत्र यः प्राग्निर्दिष्टो जघन्यपरीत्तासंख्यातकराशिः स एकस्मिन् रूपे प्रक्षिप्ते मध्यमो भव
त जघन्यलक्षणं चैतत् एकरूपप्रक्षेपे एव मध्यमत्वेन किं त्वेकैकरूपनिक्षेपे यावन्मध्यमो मंतव्यो यावदुत्कृष्टः परीत्तासंख्येयकरा १
शिर्न भवति एवमनया दिशा जघन्ययुक्तासंख्यातकादयोऽपि राशयः एकैकस्मिन् रूपे निक्षिप्ते मध्यमाः संपद्यंते तदनु चैकै
करूपवृद्ध्या तावन्मध्यमा अवसेया यावत् स्वं स्वमुत्कृष्टपदं नासादयंतीति तत्रोत्कृष्टमपि किं स्वरूपा संत उत्कृष्टा भवंतीत्याह रू
वूण गुरु पच्छत्ति रूपेणैकैकलक्षणेनोना न्यूना रूपोनाः संतस्त एव प्रागभिहिता जघन्या राशयः ते इहाद्यत्वेऽपि संबंधा
नीयः किं भवंतीत्याह गुरुवोत्कृष्टाः पाश्चात्याः पश्चिमराशय इत्यर्थः इदमत्र भावना जघन्ययुक्तासंख्यातकराशिरेकेन रूपे
णन्यूनः सन् पाश्चात्य उत्कृष्टपरीत्तासंख्येयकस्वरूपो भवति जघन्यासंख्यातासंख्यातकराशिरेकरूपेण न्यूनः सन् पाश्चात्य उत्कृ
ष्टो युक्तासंख्यातकस्वरूपो भवति जघन्यपरीत्तानंतकराशिः पुनरेकेण रूपेण न्यूनः पाश्चात्य उत्कृष्टासंख्यातासंख्यातकस्व
रूपो भवति जघन्यानंतानंतकराशिरेकरूपरहितः पाश्चात्योत्कृष्टयुक्तानंतकस्वरूपो भवतीति इदं चासंख्येयकानंतकभेदान २
भिधानं पूर्वाभ्यामाभिप्रायतः उक्तं केचिदन्यथापि चोच्यते अत एवाह ॥ ८० ॥ इह सुत्ते भणियं वग्गिय मिक्कसि चउत्थयमसं
खं होइ असंखासंखं लहु रूवजुअं तु तं मज्झं ८० व्या० इति श्वेतांबरप्रकारेण यदसंख्यातकानंतकस्वरूपं प्रतिपादितं त
त्सूत्रे अनुयोगद्वारलक्षणे सिद्धांते उक्तं निगदितं तथा चोक्तं श्री अनुयोगद्वारेषु उक्कोसयं संखिज्जयं रूवं पक्खित्तं जहन्नयं परित्ता
संखिज्जयं होइ तेण परं अजहन्नमणुक्कोसयाइं ठाणाइं जाव उक्कोसयं परित्तासंखिज्जयं न पावइ उक्कोसयं परित्तासंखिज्जयमि

त्ताणं रासीणं अन्नमन्नब्भासो रूवूणो उक्कोसयं परित्तासंखिज्जयं होइ अहवा जहन्नयं जुत्तासंखिज्जयं रूवूणं उक्कोसयं परि
त्तासंखिज्जयं होइ जहन्नयं जुत्तासंखिज्जयं कित्तियं होइ जहन्नयपरित्तासंखिज्जयमित्ताणं रासीणं अन्नमन्नब्भासो पडिपुन्नो ज
हन्नयं जुत्तासंखिज्जयं होइ अहवा उक्कोसए परित्तासंखिज्जयं होइ आवलिया वि तत्तिया चेव तेण परं अजहन्नमणुक्कोसय १
इं ठाणाइं जाव उक्कोसयं जुत्तासंखिज्जयं न पावइ उक्कोसयं जुत्तासंखिज्जएणं आवलिया गुणिया अन्नमन्नब्भासो रूवोणो उक्कोसयं
जुत्तासंखिज्जयं होइ अहवा जहन्नयं असंखिज्जासंखिज्जयं रूवूणं उक्कोसयं जुत्तासंखिज्जयं होइ जहन्नयं असंखिज्जासं
खिज्जयं कित्तियं होइ जहन्नएणं जुत्तासंखिज्जएणं आवलिया गुणिया अन्नमन्नब्भासो पडिपुन्नो जहन्नयं असंखिज्जयासंखि
ज्जयं होइ अहवा उक्कोसए जुत्तासंखिज्जए रूवं पक्खित्तं जहन्नयं असंखिज्जासंखिज्जयं होइ तेण परं अजहन्नमणुक्कोस
याइं ठाणाइं जाव उक्कोसयं असंखिज्जासंखिज्जयं न पावइ उक्कोसयं असंखिज्जासंखिज्जयं कित्तियं होइ जहन्नयं असंखि
ज्जासंखिज्जयमित्ताणं रासीणं अन्नमन्नब्भासो रूवूणो उक्कोसयं असंखिज्जासंखिज्जयं होइ अहवा जहन्नयं परित्ताणंतयं रू
वोणं उक्कोसयं असंखिज्जासंखिज्जयं होइ जहन्नयं परित्ताणंतयं कित्तियं होइ जहन्नयं असंखिज्जासंखिज्जयं जहन्नयअ
संखिज्जासंखिज्जयमित्ताणं रासीणं अन्नमन्नब्भासो पडिपुन्नो जहन्नयं परित्ताणंतयं होइ अहवा उक्कोसए असंखिज्जासंखिज्जए
रूवं पक्खित्तं जहन्नयं परित्ताणंतयं होइ तेण परं अजहन्नमणुक्कोसयाइं ठाणाइं जाव उक्कोसयं परित्ताणंतयं न पावइ उक्कोसयं
परित्ताणंतयं कित्तियं होइ जहन्नयं परित्ताणंतयं होइ जहन्नयं परित्ताणंतयं जहन्नयपरित्ताणंतयमित्ताणं रासीणं अन्नमन्नब्भा १३१
सो रूवूणो उक्कोसयं परित्ताणंतयं होइ अहवा जहन्नयं जुत्ताणंतयं रूवोणं उक्कोसयं परित्ताणंतयं होइ जहन्नयं जुत्ताणंत
यं कित्तियं होइ जहन्नयं परित्ताणंतयमित्ताणं रासीणं अन्नमन्नब्भासो पडिपुन्नो जहन्नयं जुत्ताणंतयं अजन्नयंजुत्त १ +हवा+
+होइ+

णंतयं रूवोणं उक्कोसयं परित्ताणंतयं न पावइ उक्कोसयं परित्ताणंतयं कित्तियं होइ जहन्नयं परित्ताणंतयं जहन्नयप
रित्ताणंतरासीणं अन्नमन्नब्भासो पडिपुन्नो जहन्नयं जुत्ताणंतयं होइ अहवा उक्कोसए परित्ताणंतए रूवं पक्खित्तं जहन्नयं जुत्त १
णंतयं होइ अभवसिद्धिया वि तत्तिया चेव तेण परं अजहन्नमणुक्कोसयाइं ठाणाइं जाव उक्कोसयं जुत्ताणंतयं न पावइ उक्को
सयं जुत्ताणंतयं कित्तियं होइ जहन्नएणं जुत्ताणंतएणं अभवसिद्धिया गुणिया अन्नमन्नब्भासो रूवूणो उक्कोसयं जुत्ताणंतयं
होइ अहवा जहन्नयं अणंताणंतयं रूवूणं उक्कोसयं जुत्ताणंतयं होइ जहन्नयं अणंताणंतयं कित्तियं होइ जहन्नएणं जुत्ताणं
तएणं अभवसिद्धिया गुणिया अन्नमन्नब्भासो पडिपुन्नो जहन्नयं अणंताणंतयं होइ अहवा उक्कोसए जुत्ताणंतए रूवं पक्खित्तं
जहन्नयं अणंताणंतयं होइ तेण परं अजहन्नमणुक्कोसयाइं ठाणाइं एवं उक्कोसयं अणंताणंतयं नत्थि इत्युक्तः सूत्राभिप्रायः
सांप्रतं मतांतरगतमसंख्यातानंतकस्वरूपमाह अन्ने वग्गिअ इत्यादि अन्ये आचार्या एके त्वेवमाहुः यथा उत्कर्षकमसंख्ये
जघन्ययुक्तासंख्यातकरूपं वर्गितं तावतैव राशिना गुणितं सत् एकमिति एकवारं भवति जायते संपद्यते संख्यासंख्यं ज
घन्यं जघन्यासंख्यातासंख्यातकं भवतीत्यर्थः अत्रापि मते असंख्यातकमुद्दिश्य मध्यमोत्कृष्टभेदप्ररूपणा स्वबुद्ध्यैव निदर्शनीया
न्नाह रूवजुयं तु तं मज्झमित्ति रूपेण सर्षपरूपेण युतं रूपयुतं उत्कर्षधारणे व्यवस्थितं संबंधस्तदिति तदेवानंतरासिद्धितं जघ
न्यासंख्येयासंख्येयादिकं किं भवतीत्याह मध्यं मध्यमासंख्येयासंख्येयादिकं भवति ७० छः रूवूणमाइमं गुरुं तिवग्गिउं तं इ
मे दस क्खेवे लोगागासपएसा धम्माधम्मेगजिअदेसा ७१ व्या० तदेव जघन्यासंख्येयासंख्येयादिकं रूपोनमेकेन रूपेण रहितं
सदादिमं तदपेक्षया आद्यराशेः संबंधि गुरु उत्कृष्टं भवतीत्ययमत्र भावः जघन्यासंख्येयासंख्येयकं रूपोनं सद्युक्तासंख्यात
कं उत्कृष्टं भवति जघन्यपरीत्तानंतं रूपोनमसंख्येयासंख्येयकमुत्कृष्टं भवति जघन्ययुक्तानंतं रूपोनमुत्कृष्टं परीत्तानंतं भवति ।
जघन्यानंतकं तु रूपोनमुत्कृष्टं युक्तानंतं भवतीति अधुना जघन्यपरीत्तानंतकं मतांतरेण प्ररूपयन्नाह तिवग्गिउं तं इत्यादि

DR. BHAU DAJI MEMORIAL

तदिति प्रागभिहिते जघन्यासंख्येयासंख्येयकं त्रिवर्गयित्वा सकृद्वर्गितराशिपरस्परं त्रीन्वारान् संगुण्येत्यर्थः अयमत्राशयः ज
घन्यासंख्येयासंख्येयकराशेः सकृद्वर्गितराशिगुणनलक्षणो वर्गो विधीयते तस्य वर्गराशेः पुनः वर्गः क्रियते तस्यापि वर्गराशेः
पुनरपि वर्गो निष्पादितः ततः किमित्याह इमान् वक्ष्यमाणान् स्वरूपान् दशासंख्यान् क्षिप्यं तद्भुति कर्मणि प्रतिक्षेपप्रक्षे
पणीयराशयस्तान् क्षिपस्व निवेदीसुत्तरगाथायां संबंधः तथाहि लोकाकाशप्रदेशाः १ धर्मस्य अधर्मस्य एकजीवस्य धर्माधर्मैक
जीवानां तेषां देशप्रदेशाः अयमत्रार्थः धर्मास्तिकायप्रदेशाः २ अधर्मास्तिकायप्रदेशाः ३ एकजीवप्रदेशाः ४ तथा ठिईबं
धज्झवसाया अणुभागा जोगच्छेयपलिभागा दुण्हयसमाणसमया पत्तेयनिगोअए खिवसु ८२ व्या० स्थितिबंधस्य का
रणभूतान्यध्यवसायस्थानानि कषायोदयरूपाण्यध्यवसायशब्देनोच्यते तान्यसंख्येयान्येव तथाहि ज्ञानावरणजघन्यांतर्मुहू
र्त्तप्रमाणः स्थितिबंधः उत्कृष्टस्तु त्रिंशत्सागरोपमकोटाकोटीप्रमाणः मध्यमपदे त्वेकद्वित्रिचतुरादिसमयाधिकांतर्मुहूर्त्ता
दिकोऽसंख्येयभेदः एषां च स्थितिबंधानां निर्वर्तिकान्यध्यवसायस्थानानि प्रत्येकं असंख्येयलोकाकाशप्रदेशप्रमाणानि भि
न्नान्येव एवं च सत्येकस्मिन्नपि ज्ञानावरणेऽसंख्येयानि स्थितिबंधाध्यवसायस्थानानि लभ्यंते एवं दर्शनावरणादिष्वपि वाच्यं
अणुभाग त्ति अनुभागा ज्ञानावरणादिकर्मणां जघन्यमध्यमादिभेदभिन्ना रसविशेषाः एतेषां चानुभागविशेषाणां निर्वर्त्तिका
न्यसंख्येयलोकाकाशप्रदेशप्रमाणान्यध्यवसायस्थानानि भवंति ततोऽनुभागविशेषा अप्येतावंतः एव द्रष्टव्याः कारणभेदाश्रि
तत्वात् कार्यभेदानां जोगच्छेयपलिभागत्ति योगो मनोवाक्कायविषयं वीर्यं तस्य केवलिप्रज्ञाच्छेदेन प्रतिविशिष्टा निर्विभा
गा भागा योगच्छेदप्रतिभागास्ते च निगोदादीनां संज्ञिपंचेंद्रियपर्यंतानां जीवानामाश्रिता जघन्यादिभेदभिन्ना असंख्येय १ १३२
मंतव्याः दुण्हयसमाणसमयत्ति द्वयोश्च समयोरुत्सर्पिण्यवसर्पिणीकालस्वरूपयोः समया असंख्येयस्वरूपाः प
त्तेयनिगोअएत्ति अनंतकायिकान् वर्जयित्वा शेषाः पृथिव्यप्तेजोवायुवनस्पतित्रसाः प्रत्येकशरीरिणः सर्वेऽपि जीवा इत्यर्थः

ते चासंख्येया भवंति निगोदाः सूक्ष्माणां बादराणां चानंतकवनस्पतिजीवानां शरीराणीत्यर्थः स्वेचासंख्याता एवमेते प्रत्येकमसं
ख्येयस्वरूपा दशक्षेपास्तान् क्षिपस्व अवशिष्टदशकप्रक्षेपानंतरं तस्य वराशेर्यस्मिन्निवर्तिते यद्भवति तदाह ८२ गा: पुण तंमि तिवग्गि
अए परित्तणंतलहु तस्स रासीण अन्भासे लहुजुत्ताणंतं असव्वजिअमाणं ८३ व्या० पुनरपि तं मिलितं तस्मिन्ननंतरोदिते प्रक्षिप्तषट्क्षेपद
शके त्रिवर्गिते त्रीन् वारान् वर्गितस्य सति परीत्तानंतजघन्यकं जघन्यं भवति जघन्यासंख्येयासंख्येयकस्वरूपे वारत्रयं वर्गितराशौ दशैते
क्षेपाः क्षिप्यंते ततस्त्वं प्रक्षिप्ते यो राशिः संपद्यते पुनरपि वारत्रयं वर्गात् ततो जघन्यं परीत्तानंतकं भवतीति इदानीं जघन्ययुक्तानंतकनिरूप
णायाह तस्सरासीणेत्यादि तस्य जघन्यपरीत्तानंतकस्य संबंधिनां राशीनामन्योन्यमभ्यासे सति लघुजघन्ययुक्तानंतकमभव्यजीवमानं
भवति इयमत्र भावना जघन्यपरीत्तानंतके ये राशयः सर्षपरूपाः ते पृथक् व्यवस्थाप्यंते तेषां तथा व्यवस्थापितानां जघन्यपरीत्तानंतक
मानानां राशीनामन्योन्याभ्यासे सति युक्तानंतं जघन्यं भवति तथा जघन्ययुक्तानंतके यावंति रूपाणि वर्त्तंते अभवसिद्धिका अपि जीवाः
केवलिना तावंत एव दृष्टा इति जघन्यानंतानंतकरूपणायाह ८३ गा: तव्वग्गे पुण जायइ णंताणंत लहु तं च तिक्खुत्तो वग्गसु तह वि न तं
होइ णंतखेवे खिवसु छ इमे ८४ व्या० तस्य जघन्ययुक्तानंतकराशेर्वर्गे सकृदभ्यासे तद्वर्गे कृते सति पुनर्जायते ऽपि जायते संपद्यते लघु जघन्य
मनंतानंतकं भवतीत्यर्थः उत्कृष्टानंतानंतकप्ररूपणायाह तं च तिक्खुत्तो इत्यादि तच्च तत्पुनर्जघन्यमनंतानंतं त्रिः कृत्वस्त्रीन्वारान् वर्गयस्व
तावतैव राशिना गुणय अयमत्रार्थः जघन्यानंतानंतकराशेस्तावतैव राशिना गुणनस्वरूपो वर्गः क्रियते ततस्तस्य वर्गितराशेः पुनर्व
र्गः तस्यापि वर्गितराशेः भवतीति विग्रह इति तथाप्येवमपि वारत्रयं वर्गे कृतेऽपि तदुत्कृष्टमनंतानंतकं न भवति न जायते ततः किं कार्यमि
त्याह अनंतक्षेपानिमान् वक्ष्यमाणस्वरूपान् षट् षट्संख्यान् क्षिपस्व निवेदीति तानेव षडनंतक्षेपानाह ८४ गा: सिद्धा निगोअजीवा
वणस्सइ काल पुग्गला चेव सव्वमलोगनहं पुण तिवग्गिउं केवलदुगंमि ८५ व्या० सर्वे एव सिद्धा निष्ठितनिःशेषकर्माणः १ निगोदजी १
वाः समस्ता अपि सूक्ष्मबादरभेदभिन्ना अनंतकायिकसत्वाः २ वनस्पतयः प्रत्येकानंताः सर्वेऽपि वनस्पतिजीवाः ३ कालत्ति सर्वोऽप्य
तीतानागतवर्त्तमानकालसमयराशिः ४ पुद्गलाः समस्तमलोकनभोऽलोकाकाशमिश्रपलक्षणत्वात्सर्वोऽपि लोकाकाशप्रदेशराशिः ६

इत्येतद्राशिषट्कं वर्गरूपानंतरं यस्मिन् क्षिप्ते यद्भवति तदाह पुनः पुनरपि वर्गयित्वा त्रीन् वारान् तावतैव राशिना गुणयित्वा केवलद्वि
के केवलज्ञानकेवलदर्शनयुगले क्षिप्ते सति किमित्याह ८५ वः खित्ते णंताणंतं हवेइ जिट्ठं तु ववहरइ मज्झं इय सुहुमत्थवियारो लि
हिओ देविंदसूरीहिं ८६ इति षडशीतिकसूत्रं वः ४ व्या० क्षिप्तेन सत्यनंतानंतकं भवति जायते उत्कृष्टं पुनरर्थं व्यवहारेऽसंबं
धत्वात् व्यवहरति व्यवहारकारि मध्यमं पुनः इयमत्र भावना इह केवलज्ञानकेवलदर्शनशब्देन तत्पर्याया गृह्यंते ततः केवल
ज्ञानकेवलदर्शनयोः पर्यायेष्वनंतेषु क्षिप्तेषु सत्स्विति द्रष्टव्यं न वरं ज्ञेयपर्यायाणामानंत्यात् ज्ञानपर्यायाणामप्यानंत्यं वेदितव्यं
एवमनंतानंतकमुत्कृष्टं भवति सर्वस्यैव वस्तुजातस्यात्र संगृहीतत्वादतः परं वस्तुसत्त्वस्यैव संख्याविषयस्याभावादिति प्रायः सूत्रा
भिप्रायतस्त्वित्थमप्यनंतानंतकमुत्कृष्टं न प्राप्यते अनंतकस्याष्टविधस्यैव तत्र प्रतिपादितत्वात्तथा चोक्तमनुयोगद्वारेषु एवमुक्कोसयं
अणंताणंतयं नत्थि तदत्र तत्त्वं केवलिनो विदंति सर्वत्र यत्र क्वचिदनंतानंतकं गृह्यते तत्र सर्वत्राजघन्योत्कृष्टशब्दवाच्यमनंतानंत
कं द्रष्टव्यं तदेवं व्याख्यातं सप्रपंचं संख्यातकासंख्यातानंतकादिस्वरूपं तन्निरूपणे च व्याख्याता नमिय जिणं जियमग्गणेत्यादि मूलद्वारगा १
था संप्रति षडशीतिसंख्यागाथाप्रमाणत्वेन यथार्थं षडशीतिकशास्त्रं समर्थयन्नाह इय सुहुमत्थवियारो इत्यादि इति पूर्वोक्तप्रकारेण सूक्ष्मोऽमंद
मतिस्निग्धो योऽर्थः शब्दाभिधेयं तस्य विचारो विवरणं लिखितोऽक्षरविन्यासीकृतः पंचसंग्रहादिशास्त्रेभ्य इति शेषः कैरित्याह देवेंद्रसूरिभिः
करालकलिकालपातालतलावमग्नधिमग्नधर्मधुरोद्धरणधुरीणश्रीमज्जगच्चंद्रसूरिक्रमकमलचंचरीकैरिति वः ८६ इति श्रीदेवेंद्रसूरि
विरचिताः स्वोपज्ञषडशीतिकटीका समाप्ता वः विघ्नाः क्षयं यस्य वितेनुः पदत्रयी व्यानशे जगन्निखिलं स श्रीपार्श्वसार्वदेशी स श्रीवीरो जिनो जयतु १
कुंदेंदुलकीर्त्तिरैभुरसिकृतसकलविष्टपाभोगः शतमखशतविनतपदः श्रीगौतमगणधरः पातु २ तदनु सुधर्मस्वामी जंबूप्रभवादयो मुनिवरिष्ठाः श्रुत
जलनिधिपारीणाः स्युः सः श्रेयसे संतु ३ ततः क्रमात्तपाचार्येत्यभिख्याभृतां नायकाः समभूवन् कुले चांद्रे श्रीजगच्चंद्रसूरयः ४ जगज्जनितबोधानां तेषां शुद्ध १३३
चारित्रिणां विनेयाः समजायंत श्रीमद्देवेंद्रसूरयः ५ स्वान्ययोरुपकाराय श्रीमद्देवेंद्रसूरिणा षडशीतिकटीकेयं सुखबोधा विनिर्ममे ६ विबुधवरधर्मकीर्त्तिश्री १
विद्यानंदसूरिमुख्यबुधैः स्वपरसमयैककुशलैस्तदैव संशोधिता चेयं ७ यदिह किमप्यल्पमतिना सिद्धांतविरुद्धमिह किमपि शास्त्रे विहितं तत्त्वज्ञैः प्रसाद्यमाधाय
तच्छोध्यं ८ षडशीतिकशास्त्रमिदं विवृण्वता यन्मयार्जितं सुकृतं तेनास्तु भव्यलोकः सूक्ष्मार्थविचारणचतुरः ९ ग्रंथाग्रं २८०० लिखितं पंसिद्धिगैः

॥र्द०॥ ॐ नमो प्रवचनाय यो विश्वविश्वभविनां भवबीजभूतं कर्मप्रपंचमवलोक्य कृपापरीतः तत्स्फेटनाय निजगाद सुदर्शना
दि रत्नत्रयं स जयताज्जिनवर्द्धमानः १ अग्रायणीयपूर्वाद्धि उद्धृत्य परोपकारसारधिया येनास्यधायि शतकः स जयतु शिवशर्मसूरि
वरः २ अनुयोगधरान् सर्वान् धर्माचार्यान् मुनींस्तथा नत्वा स्वोपज्ञशतकसूत्रं विवृणोमि यथाश्रुतं किंचित् ३ तत्रादावेवाभीष्ट
देवतास्तुत्यादिप्रतिपादिकामिमां गाथामाह वः नमिअ जिणं धुवबंधो १ दय २ संता ३ घाइ ४ पुन्न ५ परियत्ता ६ सेयर ११ चउ
हविवागा १६ बुच्छं बंधविह २० सामी य २४ ॥ १ ॥ व्या० जिनं नत्वा ध्रुवबंधिन्यादि वक्ष्ये इति संबंधः तत्र नत्वा नमस्कृत्य कमित्याह
जिनं रागद्वेषमोहाद्यांतरवैरिवारजेतारं वीतरागं परमार्हंत्यमहिमालंकृतं तीर्थंकरमित्यर्थः अनेन परमाभीष्टदेवतानमस्का
रेण ऐकांतिकमात्यंतिकं भावमंगलमाह अनेन च शास्त्रपरिसमाप्तेर्निर्विघ्नसूचकत्वाद्भवतीति क्त्वाप्रत्ययस्य चोत्तरक्रियासापेक्ष
त्वादुत्तरक्रियामाह ध्रुवबंध्युदयादि वक्ष्ये तत्र मिथ्यात्वादिभिर्बंधहेतुभिरंजनचूर्णपूर्णसमुद्गकवन्निरंतरं पुद्गलनिचिते
लोके कर्मयोग्यवर्गणापुद्गलैरात्मनः क्षीरनीरवद्वह्न्ययःपिंडवद्वाऽन्योन्यानुगमाभेदात्मकः संबंधो बंधः १ तेषामेव कर्मपु
द्गलानामपवर्त्तनादिकरणकृते स्वाभाविके वा स्थितिक्षये सत्युदयसमयप्राप्तानां विपाकवेदनमुदयः २ तेषामेव कर्मपु
द्गलानां बंधसंक्रमाभ्यां लब्धात्मलाभानां निर्जरणसंक्रमकृतस्वरूपप्रच्युत्यभावे सति सद्भावः सत्ता बंधश्च उदयश्च
सत्ता च बंधोदयसत्तानि ततो ध्रुवशब्दस्य प्रत्येकं संबंधात् ध्रुवाणि बंधोदयसत्तानि यासां ता ध्रुवबंधोदयसत्ताः घाइत्ति घाति
न्यो देशसर्वघातिन्यः सर्वघातिन्यो देशघातिन्यश्चेत्यर्थः पुन्नत्ति पुण्यप्रकृतयः परियत्तत्ति परिवृत्ताः परावर्त्तमानाः सेयर
त्ति सेतराः सप्रतिपक्षा विपक्षयुक्ता इत्यक्षरार्थः भावार्थस्त्वयं ध्रुवबंधिन्यः १ अध्रुवबंधिन्यः २ ध्रुवोदयाः ३ अध्रुवोदयाः ४
ध्रुवसत्ताकाः ५ अध्रुवसत्ताकाः ६ सर्वदेशघातिन्यः ७ अघातिन्यः ८ पुण्यप्रकृतयः ९ पापप्रकृतयः १० परावर्त्तमानाः

११ अपरावर्त्तमानाश्चेति १२ द्वादश द्वाराणि वक्ष्ये तत्र निजहेतुसद्भावे यासां प्रकृतीनां ध्रुवो ऽवश्यंभावी बंधो भवति ता
ध्रुवबंधिन्यः यासां च निजहेतुसद्भावेपि नावश्यंभावी बंधस्ता अध्रुवबंधिन्यः यदुक्तं नियहेउसंभवेवि भयणि-
ज्जो जाण जो पयडीण बंधो ता अधुवाउ धुवा अभयणिज्जबंधाउ १ निजहेतवश्चेह मिथ्यात्वादयो मंतव्याः यासामव्य-
वच्छिन्नो ऽनुसंततः स्वोदयव्यवच्छेदकालं यावदुदयस्ता ध्रुवोदयाः यासां तु व्यवच्छिन्नोप्युदयो भिवइ भवति तथावि-
ध द्रव्यक्षेत्रकालभवभावस्वरूपं पंचविधं हेतुसंबंधं प्राप्य ता अध्रुवोदयाः यदुक्तं अव्वुच्छिन्नो उदओ जाणं पयडीण ता ध्रु-
वोदया वुच्छिन्नो विउ संभवइ जाण अधुवोदया ताउ १ याः सर्वसंसारिणामप्राप्तसम्यक्त्वाद्युत्तरगुणानां सातत्येन भवंति
ता ध्रुवसत्ताकाः यास्तु कदाचिद्भवंति कदाचिन्न ता अध्रुवसत्ताकाः सर्वेतरघातित्वं च प्रकृतीनां स्वविषयघातनभेदतो भवति
तत्र सर्वस्वविषयघातिन्यः सर्वघातिन्यः स्वविषयदेशघातिन्यो देशघातिन्यः स्वविषयं चासामुत्तरत्र व्याख्यास्यामः ततः
सर्वस्मिन्स्वदेशं च किंचिन्न स्वावीर्यगुणं घ्नंतीत्येवंशीलाः सर्वदेशघातिन्यः न ज्ञानदर्शनादिगुणानामघातेन किंचिद्गुणं घ्नंतीत्येवंशी-
ला अघातिन्यः केवलं यथा स्वयमतस्करस्वभावोपि तस्करैः सह वर्त्तमानस्तस्कर इव दृश्यते एवमेता अपि घातिनीभिः सह वे-
द्यमानास्तद्दोषाद्भवंति यदाहुः श्रीशिवशर्मसूरिप्रवराः अवसेसा पयडीउ अघाइया घाइयाहिं पडिभागो पडिभा-
गइ तस्सा द्रूपं घातित्वं च प्रकृतीनां रसविशेषाद्विज्ञेयं ८ शुभप्रकृतयो ऽनुपक्षीयाल्हादनजनकाः शुभा उच्यंते ९ पापप्रकृतय-
: कटुकरसाः ऽशुभा उच्यंते १० याः प्रकृतयो ऽन्यस्याः प्रकृतेर्बंधमुदयमुभयं वा विनिवार्य स्वकीयं बंधमुदयमुभयं वा द- १३४
परा+ र्शयंति ता परावर्त्तमानाः ११ यास्त्वन्यस्याः प्रकृतेर्बंधमुदयमुभयं वा निवार्य स्वकीयं बंधमुदयमुभयं वा दर्शयंति ता अप-
रावर्त्तते इत्थंभूता ऽपरावर्त्तमाना उच्यंते यत्प्रत्यपादि विविवारियडाणाइ उबंधउदयेव अन्नपयडीए साउ परियत्तमाणी १

अणिवारंती अपरियत्ता चउह विवागत्ति चतुर्धा क्षेत्रजीवभवपुद्गलाश्रितत्वेन चतुःप्रकारो विपाको विपचनं स्वरा-
शिप्रदर्शनं यासां ताश्चतुर्विपाकाः क्षेत्रविपाकाः १ जीवविपाकाः २ भवविपाकाः ३ पुद्गलविपाकाः ४ प्रकृतीव-
क्ष्ये तथा बंधविहत्ति विधा नानाविधा भेदाः बंधस्य विधा बंधविधाः प्रकृतिबंध स्थितिबंधं प्रदेशबंधलक्षणास्ता। उक्तो। रसबंध
अत्र च मोदकदृष्टांते एवंस्तर्यो व्या वर्णयंति यथा वातापहारिद्रव्यनिष्पन्नो मोदकः प्रकृत्या वातमपहरति पि-
त्तापहद्रव्यनिर्वृत्तः पित्तं श्लेष्मापहद्रव्यसंजनितः श्लेष्माणमित्यादि स्थित्या तु स एव कश्चिद्दिनमेकमवतिष्ठते अपरस्तु
दिनद्वयं अन्यस्तु दिवसत्रयं यावन्मासादिकमपि कालं कश्चिदवतिष्ठते ततः परं विनश्यति स एवानुभावेन रसपर्याये-
ण स्निग्धमधुरत्वादिलक्षणेन कश्चिदेकगुणानुभावो ऽपरस्तु द्विगुणानुभावो ऽन्यस्तु त्रिगुणानुभाव इत्यादि प्रदेशाः
कणिकादिद्रव्यप्रमाणरूपास्तैः प्रदेशैः स एव कश्चिदेकप्रसृतिप्रमाणो ऽपरस्तु प्रसृतिद्वयमानो ऽन्यः पुनः प्रसृतित्रयप्र-
माणेत्यादि एवं कर्म्मापि ज्ञानावरणादि प्रकाले निर्वृत्तं प्रकृत्या किंचित्ज्ञानमावृणोति किंचिद्दर्शनं किंचित्सुखदुःखे
जनयतीत्यादि स्थित्या तु तदेव त्रिंशत्सागरोपमकोटीकोट्यादिकालावस्थायि भवति अनुभावतस्तु तदेव एकस्थानि-
कद्विस्थानिकतीव्रमंदादिकं रसयुक्तं प्रदेशतस्तु तदेवाल्पबहुप्रदेशनिष्पन्नं स्यादिति एष च प्रकृत्यादिभेदश्च-
तुर्विधोपि कार्म्मण उपादानकाल एव बध्यते इति बंधश्चतुर्विधः स्थितो भवति तथा ममरुकमणिन्यायेन बंधं प्रतिद्वापि योज्यते ततो
बंधस्वामिनोव क्ष्येकः कस्याः प्रकृतेः स्थितेर्वा कः कस्य रसस्य तीव्रमंदादिरूपस्य कश्च कस्य प्रदेशाग्रस्य जघन्यत्वादिलक्षणस्य
बंधकेत्यादि स्वामित्वेन वक्ष्ये च शब्दादुपशमश्रेणिक्षपकश्रेण्यादिकं वक्ष्ये इत्यनेनाभिधेयमाह संबंधप्रयोजने तु सामर्थ्यगम्ये
तत्र संबंधः साध्यसाधनलक्षण उपायोपेयलक्षणो गुरुपर्वक्रमलक्षणो वा वेदितव्यः प्रयोजनं तु प्रकरणकर्तुः श्रोतुश्चानंतरपरंपरभे

देनद्वेधा तत्र प्रकरणकर्तुरनंतरं सत्त्वानुग्रहः प्रयोजनं श्रोतॄणामनंतरं प्रयोजनं प्रकरणार्थपरिज्ञानं परंपराप्रयोजनं तु द्वयोर
पि परमपदप्राप्तिरिति तथा चोक्तं सम्यक्शास्त्रपरिज्ञानाद्विरक्ता भवतो जनाः लब्धादर्शनसंशुद्धिं ते यांति परमां गतिं तदा तेन
मंगलाद्यभिधानेन सकलशास्त्रकृतां प्रवृत्तिः सुस्थता भवति तथा चोक्तैः प्रणिजगदे प्रेक्षावतां प्रवृत्त्यर्थमभिधेयप्रयोजने मंगलं ते
शास्त्रादौ वाच्यमिष्टार्थसिद्धये इति अथ यथोद्देशं निर्देश इति न्यायात्तत्प्रथमतो ध्रुवबंधिनीर्गाथिरव्यासुराह ॥ १ वन्नचउ
तेयकम्मा गुरुलहु निमिणो वघाय भयकुच्छा मिच्छकसायावरणा १४ वि॰ग्घं धुवबंधिसगचत्ता १ व्या॰ प्राक्तंतल्ल १
छिंगाववनमत्त्ययेन ध्रुवबंधिन्यः प्रकृतयः सप्तचत्वारिंशत्संख्या भवंति तथाहि वर्णेनोपलक्षितं चतुष्कं वर्णच
तुष्कं वर्णगंधरसस्पर्शलक्षणं ततो वर्णचतुष्कं च तैजसं च कार्मणं चागुरुलघु चेत्यादि द्वंद्वः वर्णचतुष्क तैजस कार्मणागु
रुलघु निर्माणोपघात भयकुत्साः कुत्सा जुगुप्सा तथा मिथ्यात्वं च कषायाश्चावरणानि च मिथ्यात्वकषायावरणानि तत्र
वर्णचतुष्क तैजस कार्मणागुरुलघु निर्माणोपघातानि इत्येता नव नामप्रकृतयः भयं कुत्सा मिथ्यात्वं कषायाः षोडश
इत्येताः एकोनविंशतिर्मोहनीयप्रकृतयः आवरणानि ज्ञानावरणपंचक दर्शनावरणनवकस्वरूपाणि चतुर्दश वि॰ घ्नम
तरायं दानलाभभोगोपभोगवीर्यांतरायभेदात्पंचविधमित्येवं सप्तचत्वारिंशदप्येता ध्रुवबंधिन्यो निजहेतुसद्भावात् तदुक्तं
ध्रुवबंधिन्यः प्रकृतयः सांप्रतमध्रुवबंधिनीः प्रकृतीरभिधित्सुराह ॥ १ तणुवंगागिइसंघयण ६ जाइ पगइखगइ
पुव्वि ४ जिणुस्सासं उज्जोयायवपरघाततसवीसा गोय २ वेयणीयं २ हासाइजुयलजुग २ वेय ३ आउ ४ १३५
तेवन्ना अधुवबंधा ३ भंगा अणाइसाई अणंतसंतुत्तरा चउरो ४ व्या॰ तनवः शरीराणि औदारिकवैक्रियाहारक
लक्षणानि तिस्रः तैजसकार्मणयोर्ध्रुवबंधिषु नाभिहितत्वात् उपांगानि औदारिकांगोपांगवैक्रियांगोपांगाहारकां

ऋषभनाराच

गोपांगरूपाणि त्रीणि प्रकृतयः संस्थानानि समचतुरस्रन्यग्रोधपरिमंडलसादिकुब्जवामनहुंडाख्याः षट् संस्थानानि अस्थि
निचयात्मकानि वज्रऋषभनाराचं नाराचं अर्धनाराचं कीलिकासेवार्तलक्षणानि षट् जातयः एकेंद्रियद्वींद्रियत्रींद्रियचतुरिं
द्रियपंचेंद्रियरूपाः पंच गतयो देवमनुष्यतिर्यग्नारकगतिलक्षणाश्चतस्रः खगतिर्विहायोगतिः प्रशस्ताप्रशस्तभेदाद्द्विधा पूर्वीत्ति
पदैकदेशे पदसमुदायोपचारात् आनुपूर्व्यो देवानुपूर्वी मनुष्यानुपूर्वी तिर्यगानुपूर्वी नरकानुपूर्वीरूपाश्चतस्रः जिननाम तीर्थंक
रनाम श्वासनाम उच्छ्वासनामेत्यर्थः उद्योतनाम आतपनाम पराघातनाम त्रसवीसेति त्रसेनोपलक्षिता विंशतिस्त्रसविंशतिस्त्रसद
शकं स्थावरदशकमित्यर्थः गोत्रमुच्चैर्गोत्रनीचैर्गोत्रभेदेन द्विधा वेदनीयं सातवेदनीयमसातवेदनीयमिति द्विधा हास्यादियुगलद्विकं
हास्यरतिअरतिशोकाख्यं वेदास्त्रीपुंनपुंसकरूपाः त्रय आयूंषि देवायुर्मनुष्यायुस्तिर्यगायुर्नरकायुरिति चत्वारि इत्येताः त्रिस
प्ततिप्रकृतयोऽध्रुवबंधा अध्रुवबंधिन्यो भवंतीति शेषः एतासां निजहेतुसद्भावेऽप्यवश्यं बंधाभावात् अध्रुवबंधित्वं तथाहि प
राघातोच्छ्वासनाम्नोः पर्याप्तनाम्नैव सह बंधो नापर्याप्तनाम्ना अतो ध्रुवबंधत्वं आतपं तु नरेकेंद्रियप्रायोग्यप्रकृतिसहचरितमे
व नान्यदा उद्योतं तु तिर्यग्गतिप्रायोग्यबंधेनैव सह बध्यते आहारकद्विकजिननाम्नी अपि यथाक्रमं संयमसम्यक्त्वप्रत्यये
नैव बध्यते नान्यथेत्यध्रुवबंधित्वं शेषशरीरोपांगत्रिकादीनां षट्षष्टिप्रकृतीनां सविपक्षत्वान्निजहेतुसद्भावेऽपि नावश्यं बंधस्ततोऽध्रु
वबंधित्वमुप्रतीतमेवमुक्ता अध्रुवबंधिन्यः प्रकृतयः सांप्रतं ध्रुवबंधिन्यध्रुवबंधिनीनां भंगकानुपदर्शयन् लाघवार्थं च वक्ष्यमाणध्रुवो
दयप्रकृतीनां च भंगकानुबंधमाश्रित्योदयमाश्रित्य च चिंतयन्नाह ॥ भंगा अणाइसाई इत्यादि भंगा भंगकाश्चत्वारो भवंति
कथमित्याह अनादिसादयो अनंतसांतोत्तरा इदमुक्तं भवति अनादिसादिशब्दौ आदिर्येषां ते अनादिसादयः प्राकृतत्वाद्दादि
शब्दस्य लोपः अनंतसांतशब्दावुत्तरे उत्तरपदे येषां ते अनंतसांतोत्तरास्ते च गाघेति सूत्रेण पदशब्दस्य लोपः यद्वा भंगा अणादि

साद्योऽनंतः सांतोऽन्यतरश्च त्वारो भवंतीति तद्यथा अनाद्यनंतः १ अनादिसांतः २ साद्यनंतः ३ सादिसांतश्चेति ४ उक्ता भंगाः अ-
थ यत्रोदये बंधो वा ये भंगा का घटंते ते तानाह ॥ भ° ३ । ४ ॥ पढमबीया धुवउदइसु धुवबंधिसु तइयवज्जभंगतिगं मिच्छंमि तिन्नि भंगा दुहा
वि अधुवा तुरियभंगा ५ व्या° प्रथमद्वितीयावनाद्यनंत १ अनादिसांतलक्षणौ ध्रुवोदयासु प्रकृतिषु भंगकौ भवतः तथाहि ध्रु-
वोदयेऽत्र द्वितीयस्यानादिकालात्संतानभावेन सततप्रवृत्तेः सोऽनादिरनादित्वात्सावनंतश्च कदाचिदपि तदुदयाभावादनाद्यनं-
तः अयं च भंगको निर्माणस्थिरास्थिरागुरुलघुशुभाशुभतैजसकार्मणवर्णचतुष्कज्ञानपंचकांतरायपंचकदर्शनचतुष्कल-
क्षणानां सप्तविंशतिप्रकृतीनां ध्रुवोदयानामभव्यानाश्रित्य वेदितव्यः यतोऽभव्यानां ध्रुवोदयप्रकृतीनामुदयो न कदाचिदपि व्यपैतीति
तथा अनादिश्चासौ सांतश्चानादिसांतः तत्र ज्ञानपंचकांतरायपंचकदर्शनचतुष्करूपाणां चतुर्दशप्रकृतीनामनादिकालात्सं-
तानभावेनानादिः सन् यदा क्षीणमोहचरमसमये तदुदयो व्यवच्छिद्यते तदा अयमनादिसांतभंगकः निर्माणस्थिरास्थि-
रागुरुलघुशुभाशुभतैजसकार्मणवर्णचतुष्कलक्षणानां द्वादशानामपि नामध्रुवोदयप्रकृतीनां सततोदयेनानादिरुदये १
भूत्वा सयोगिकेवलिचरमसमये यदोदयव्यवच्छेदमनुभवति तदानादिसांतभंगकः इति ध्रुवबंधिनीषु पूर्वोक्तस्वरूपासु सम्भव-
त्सु त्रिसंख्यासु तृतीयवर्ज्जं भंगत्रिकं भवति तथाहि यो बंधोऽनादिकालादारभ्य संतानभावेन सततं प्रवृत्तो न कदाचन व्यव-
च्छेदमापन्नो न वोत्तरकाले कदाचिद्व्यवच्छेदमाप्स्यतेति सोऽनाद्यनंतोऽभव्यानामेव भवति यस्त्वनादिकालात् सततप्रवृत्तो- १३६
ऽपि पुनर्बंधव्यवच्छेदं प्राप्स्यति असावनादिसांतो भव्यानां साद्यनंतलक्षणस्तु तृतीयभंगकः शून्य एव न हि यो बंधः सादि-
र्भवति स कदाचिदनंतः संभवतीति तृतीयभंगवर्ज्जनं यः पुनः पूर्वं व्यवच्छिन्नः पुनर्बंधनेन सादित्वमा साद्यकालां-
तरे भूयोऽपि व्यवच्छेदं प्राप्स्यति सोयं सादिसांत इत्येवं स्वरूपं साद्यनंतलक्षणतृतीयशून्यभंगकवर्ज्जितं भंगकत्रयं ध्रुवबंधि-

नीषु भवति सूत्रे च पुंस्त्वं प्राकृतत्वात् प्राकृते हि लिंगं व्यभिचार्यपि यदाह पाणिनिः स्वप्राकृतलक्षणे लिंगं व्यभिचार्यपीति
तत्र प्रथमभंगकः तासां सर्वासामभव्यानाश्रित्य सुप्रतीत एव ध्रुवबंधिनीः प्रकृतीः तद्बंधस्यानाद्यनंतत्वादिति द्वितीयभंगक-
स्तु ज्ञानावरणपंचकदर्शनावरणचतुष्कांतरायपंचकलक्षणानां चतुर्दशप्रकृतीनामनादिकालात् संतानभावेनानादिः स-
न् सूक्ष्मसंपरायचरमसमये यदा बंधो व्यवच्छिद्यते तदा भवति आसामेव चतुर्दशप्रकृतीनामुपशांतमोहे यदा अबं-
धकत्वमासाद्यायुःक्षयेण अद्धाक्षयेण वा प्रतिपतितः सन् पुनर्बंधेन सादिं बंधं विधाय भूयोऽपि सूक्ष्मसंपरायचरमसमये बंधविच्छे-
दं विधत्ते तदा सादिसांतलक्षणः चतुर्दशानामप्रकृतीनां तृतीयो भंगको लभ्यतेति संज्वलनकषायचतुष्कस्य पुंवेदस्य वा प्राप्ता-
नादिबंधभावो यदा तत्प्रथमतया निवृत्तिबादरादिबंधव्यवच्छेदं विधत्ते तदानादिसांतभावः तस्य द्वितीयभंगः यदा पु-
नः ततः प्रतिपतितः पुनर्बंधेन संज्वलनबंधं सादिं कृत्वा पुनरपि कालांतरेऽनिवृत्तिबादरादित्वं प्राप्तः सन् तान् त्यजति तदा
सादिसांत स्वरूपः संज्वलनचतुष्कस्य चतुर्थ इति निद्राप्रचलातैजसकार्मणवर्णचतुष्कागुरुलघूपघातनिर्माणभय-
जुगुप्सास्वरूपाणां त्रयोदशप्रकृतीनामनादिकालादनादिबंधं विधाय यदा अपूर्वकरणाद्धायां यथास्थानं बंधोपरमं करो-
ति तदा द्वितीयो भंगकः यदा तु ततः प्रतिपतितः पुनर्बंधविधानेन सादित्वमासाद्य भूयोऽपि कालांतरेऽपूर्वकरणमारूढस्य बंधा-
भाव तदा चतुर्थ इति चतुर्थं इति प्रत्याख्यानावरणानां बंधो देशविरतिगुणस्थानकं यावदनादिस्ततः प्रमत्तादौ बंधोपरमात्सांत इति
द्वितीयभंगः ततः प्रतिपतितो भूयोऽपि बंधनेन सादित्वमासाद्य यदा पुनः प्रमत्तादावबंधको भवति तदा चतुर्थो भंगकः अप्र-
त्याख्यानावरणानां त्वविरतसम्यग्दृष्टिं यावदनादिबंधं कृत्वा यदा देशविरतादावबंधको भवति तदा द्वितीयः ततः प्रतिप-
तितो भूयोऽपि तानेव बध्नन् पुनस्तेषां यदा देशविरतेषु बंधको भवति तदा चतुर्थ इति मिथ्यात्वस्त्यानर्द्धित्रिकानंतानुबंधिनां उभय- १

DR. BHAU DAJI

दृष्टिरनादिबंधको यदा सम्यक्त्वावाप्तौ बंधोपरमं करोति तदा द्वितीयः पुनर्मिथ्यात्वगमने न तान् बध्नाति यदा त्वयोपि सम्यक्त्वला-
भे सति बंधं न विधत्ते तदा चतुर्थः इत्येवं ध्रुवबंधिनीनां भंगकत्रयं निरूपितमिति तथा मिथ्यात्वस्य ध्रुवोदयस्य भंगा अनाद्यनंत १
अनादिसांत २ सादिसांत ३ स्वभावास्त्रयो भवंति तत्रानाद्यनंतोऽभव्यानां यतस्तेषां न कदाचिन्मिथ्यात्वोदयविच्छेदः समपादि
संपत्स्यते चेति अनादिसांतस्त्वनादिमिथ्यादृष्टेस्तत्प्रथमतया सम्यक्त्वलाभे मिथ्यात्वस्याभावात् सादिसांतः पुनः प्रतिपति-
तस्य सम्यक्त्वस्य सादके मिथ्यात्वोदये संपन्ने पुनरपि सम्यक्त्वलाभात् मिथ्यात्वोदयाभावे संभवतीति इहापि अध्रुवा चतुर्थो भं-
गस्त्रिधापि भेदा अपि बंधमाश्रित्योदयमाश्रित्य ध्रुवा अध्रुवबंधिनोऽध्रुवोदयाश्चेत्यर्थस्तुरीयश्चतुर्थो भंगकः सादिसां-
तलक्षणो यासां तास्तुरीयभंगा भवति तत्राध्रुवबंधिनीनां त्र्यशीतिसप्ततिसंख्यप्रकृतीनामध्रुवबंधित्वादेव सांतलक्षण
एक एव भंगको भवति तथा अध्रुवोदयानामुदयः सदाद्विनोदयविच्छेदे सति तत्प्रथमतयोदयभवनस्वभावेन वर्त्तत इति
सादिः स चासौ सांतश्च पुनरुदयव्यवच्छेदात्सपर्यवसानश्च सादिसांतस्ततश्चाध्रुवोदयानामयमेवैको भंगको भवति नान्यो
ऽध्रुवत्वादेवेति भावः उक्ताः सभेदा ध्रुवबंधिन्योऽध्रुवबंधिन्यश्च प्रकृतयः प्रसंगतो ध्रुवाध्रुवोदयानां प्रकृतीनां भंगकाश्च
संप्रति ध्रुवाध्रुवोदयप्रकृतिद्वारं निरूपयन्नाह व्याः ५ निमिण १ थिर १ अथिर १ अगुरुय १ सुह १ असुहं १ तेय १ कंम १ चउवन्ना ४
नाण ५ तराय ५ दंसण ४ मिच्छं धुवउदय सगवीसा २७ ६ व्या० निमिणंति प्राकृतत्वान्निर्माणं स्थिरास्थिरं अगुरुयत्ति अ-
गुरुलघु शुभाशुभे तैजसं कार्मणं चतुर्वर्णगंधरसस्पर्शलक्षणमित्येता द्वादश नाम्नो ध्रुवोदया ज्ञानावरणपंचकं अंतरा- १३७
यपंचकं दर्शनचतुष्कं मिथ्यात्वमिति सप्तविंशतिप्रकृतयो ध्रुवोदया नित्योदया सर्वासामपि स्वोदयव्यवच्छेदकालं यावदव्य-
वच्छिन्नोदयत्वादिति अभिहिता ध्रुवोदयाः प्रकृतयः इदानीमध्रुवोदयाः प्रकृतीराह व्याः ६ थिर सुभियर विणु अधुव

बंधी मिच्छ विणु मोह धुवबंधी ७ निद्दोवघाय मीसं सम्मं पणनवइ अधुवुदया ७ व्या० इतरथाष्टस्पर्शप्रत्येकं सं-
बंधात् स्थिरेतरशुभेतरप्रकृतिचतुष्कं विना स्थिरास्थिरं शुभमशुभं विना शेषा एकोनसप्ततिसंख्या अध्रुवबंधिन्यः प्रकृत-
यः तथाहि तैजसकार्मणवर्जं शरीरत्रिकं अंगोपांगत्रयं संस्थानषट्कं संहननषट्कं जातिपंचकं गतिचतुष्कं विहायोगतिद्वि-
कं आनुपूर्वीचतुष्कं जिननाम उच्छ्वासनाम उद्योतमातपं पराघातं त्रसबादरपर्याप्तकप्रत्येकं सुभगसुस्वरादेययशःक- १
ीर्त्ति स्थावरसूक्ष्मापर्याप्तकसाधारणदुर्भगदुःस्वरानादेयायशः उच्चैर्गोत्रं नीचैर्गोत्रं सातासातवेदनीयं हास्यरती अरतिशो- २
कौ स्त्रीपुंनपुंसकरूपं वेदत्रयं आयुश्चतुष्कमिति तथा मिथ्यात्वं विना मोहे ध्रुवबंधिनोऽष्टादश तद्यथा षोडश कषायाः भ-
यजुगुप्सा निद्राः पंच उपघातनाम मिश्रं सम्यक्त्वमिति पंचनवतिरध्रुवोदया व्यवच्छिन्नस्यापि उदयस्य पुनरुदयसद्भावात् इति
यद्येवं मिथ्यात्वस्याध्रुवोदयत्वमेव युज्यते सम्यक्त्वप्राप्तौ व्यवच्छिन्नस्यापि तदुदयस्य मिथ्यात्वगमने पुनरपि अत्रोच्यते यासां प्र-
कृतीनां येषु गुणस्थानकेषु गुणप्रत्ययतोऽप्युदयव्यवच्छेदो न विद्यते अथ च तत्र कालाद्यपेक्षया तेष्वेव गुणस्थानकेषु क-
दाचिदसौ भवति कदाचिन्नेति ता एवाध्रुवोदया यथा निद्राया मिथ्यादृष्टेरारभ्य क्षीणमोहं यावदुदयोऽव्यवच्छिन्नो वर्त्तते अ-
थ च न सततमसौ भवतीति मिथ्यात्वस्य तु नेदं लक्षणं यतस्तस्य प्रथमगुणस्थानके नाद्याप्युदयव्यवच्छेदस्तत्र सततोदय
एव न कदाचिदिति ध्रुवोदय एव तस्येति उक्तमध्रुवोदयप्रकृतिद्वारं संप्रति ध्रुवसत्ताकाऽध्रुवसत्ताकप्रकृतिद्वारद्वयं निरू-
पयन्नाह व्याः ७ तस २० वन्नवीस २० सगतेयकम्म ७ धुवबंधि सेसि ४१ वेयतिगं ३ आगइतिग ३ वेयणीयं २ दुजुयल ४
सगउरल ७ सासचउ ४ ८ खगइ २ तिरिदुग २ नीयं १ धुवसंता १०३ सम्म १ मीस १ मणुयदुगं २ विउविक्कार ११ जिण १ आउ
४ हारसगु ७ च्चा १ अधुवसत्ता २८ ८ व्या० इह विंशतिरष्टस्पर्शप्रत्येकं योगात्त्रसविंशतिर्वर्णविंशतिश्च तत्र त्रसेनोपल-

त्तिंशतिस्त्रयो विंशति स्तथाहि त्रसबादरपर्याप्तकप्रत्येकस्थिरशुभसुभगसुस्वरादेययशःकीर्तिनामेति त्रस
दशकं स्थावर सूक्ष्म अपर्याप्तक साधारण अस्थिर अशुभ दुर्भग दुःस्वर अनादेय अयशःकीर्तिनामेति स्थावरदश
कं तस्यमीलनेन सविंशतिरियमुच्यते वर्णविंशतिरियं कृष्णनीललोहितहारिद्रसितवर्णभेदात्पंचवर्णाः सुरभिगं
धासुरभिगंधभेदेन द्वौ गंधौ तिक्तकटुककषायाम्लमधुरभेदात्पंचरसाः गुरुलघुमृदुखरशीतोष्णस्निग्धरूक्षस्पर्श
भेदादष्टौ स्पर्शाः सर्वमीलनेन वर्णविंशतिरियमुच्यते वर्णेनोपलक्षिता विंशतिर्वर्णविंशतिरिति कृत्वा सप्ततेयकमन्निते
जसकार्मणसप्तकं तैजसशरीर १ कार्मणशरीर २ तैजसतैजसबंधन ३ तैजसकार्मणबंधन ४ कार्मणकार्मणबंधन ५ तै
जससंघातन ६ कार्मणसंघातनलक्षणं ७ ध्रुवबंधसेसत्ति वर्णचतुष्कतैजसकार्मणस्योक्तत्वाच्छेषा एकचत्वारिंश
त् ध्रुवबंधिन्यः तथाहि अगुरुलघु निर्माणोपघातभयजुगुप्सामिथ्यात्वकषायषोडशकज्ञानावरणपंचकदर्शना
वरणनवकांतरायपंचकमिति वेदत्रिकं स्त्रीपुंनपुंसकलक्षणं आगइत्ति गति तणुवंगागइसंघयणजाइगइखगइ
इत्यादि संज्ञागाथोक्तमाकृतित्रिकंगृह्यते ततः आकृतयः संस्थानानि षट् संहननानि षट् जातयः पंचेत्येवमाकृतित्रि
कशब्देन सप्तदशभेदा गृह्यंते वेदनीयं साता सात भेदाद्द्विधा द्वयोर्युगलयोः समाहारो द्वियुगलं हास्यरतिअरतिशो
करूपं सगउरलत्ति औदारिकसप्तकं औदारिकशरीर १ औदारिकांगोपांग २ औदारिकसंघातन ३ औदारिकौदारिकबंध
न ४ औदारिकतैजसबंधन ५ औदारिककार्मणबंधन ६ औदारिकतैजसकार्मणबंधनरूपं सासचउत्ति उच्छ्वासचतुष्कं १३८
उच्छ्वास उद्योत आतप पराघाताख्यं खगईतिरिदुगाति द्विकशब्दस्य प्रत्येकं संबंधात् खगतिद्विकं प्रशस्तविहायो
गत्यप्रशस्तविहायोगतिलक्षणं तिर्यग्द्विकं तिर्यग्गतितिर्यगानुपूर्वीरूपं नीयंति नीचैर्गोत्रमित्येता त्रिंशदुत्तरश

+ क +

तसंख्याः प्रकृतयो ध्रुवसत्ताकाऽभिधीयंते ध्रुवसत्ताकत्वं चासां सम्यक्त्वात्ताद्र्वाक् सर्वजीवेषु सद्भावात् अ
थानंतानुबंधिनां कषायाणामुद्वलनसंभवाद्ध्रुवसत्ताकत्वमयुक्तं अ ;तः कथं ध्रुवसत्ताकप्रकृतीनां त्रिंशदधिकश
तसंख्यासंगच्छते नैवं वाच्यः यतोऽवाप्तसम्यक्त्वाद्युत्तरगुणानामेव जीवानामेतद्वियोगेन सर्वजीवानां अध्रुवसत्ताकता
चानवाप्तोत्तरगुणजीवापेक्षयैव चिंत्यते ऽनंतानुबंधिनां ध्रुवसत्ताकत्वे च यदि चोत्तरगुणप्राप्त्यपेक्षयाऽध्रुवसत्ताकताक
ङ्गीक्रियते तदा सर्वासामपि प्रकृतीनां स्यान्नाऽनंतानुबंधिनामेव यतः सर्वाऽपि प्रकृतायायथा स्थानमुत्तरगुणेषु सत्सुसत्त १
व्यवच्छेदमनुभवंत्येवेति तथा संमत्ति सम्यक्त्वं मिश्रं मणुदुद्विकं मणुजगति मणुजानुपूर्वीरूपं विउविक्कारत्ति वैक्रियैका १
दशकं देवगति १ देवानुपूर्वी २ नरकगति ३ नरकानुपूर्वी ४ वैक्रियशरीर ५ वैक्रियांगोपांग ६ वैक्रियसंघातन ७ वैक्रिय
वैक्रियबंधन ८ वैक्रियतैजसबंधन ९ वैक्रियकार्मणबंधन १० वैक्रियतैजसकार्मणबंधनलक्षणं ११ जिननाम आयुच
तुष्कं हारसगत्ति प्राकृतत्वादाकारलोपे आहारसप्तकं आहारकशरीर १ आहारकांगोपांग २ आहारकसंघातन ३ आ
हारकाहारकबंधन ४ आहारकतैजसबंधन ५ आहारककार्मणबंधन ६ आहारकतैजसकार्मणबंधनाख्यं ७ उच्चैर्गो
त्रमित्येता अष्टाविंशतिसंख्याः प्रकृतयोऽध्रुवसत्ताका उच्यंते अयमिह भावार्थः सम्यक्त्वं मिश्रं वाऽभव्यानां प्रभूततरभव्या
नां च सत्तायां नास्ति केषांचिदस्तीति तथा मनुष्यद्विकं वैक्रियैकादशकमित्येताः त्रयोदशप्रकृतयस्तेजोवायुकायिक + य +
जीवमध्यगतस्योद्वर्तमानावप्रयोगेण सत्तायां न लभ्यंते इतरस्य तु लभ्यंति तथा वैक्रियैकादशकमसंप्राप्तत्रसत्वस्य बंधा
भावाद्विहितैः तद्बंधस्य स्थावरभावं गतस्य स्थितिक्षयेण वा सत्तायां न लभ्यते तदस्येन्यस्य संभवत्यपि तथा सम्यक्त्वे सत्य
पि जिननाम कस्यचिद्भवति कस्यचिन्नेति तथा देवनारकायुषी स्थावराणां तिर्यगायुष्कं लवसप्तमदेवानां

तुरायुर्बंधः पुनस्तेजोवायुसप्तमपृथिवीनारकाणां सर्वेषामपि तद्बंधाभावात्सत्तायां न लभ्यते अन्येषां तु संभवत्यपि तथा संय
२ मे सत्यपि आहारसप्तकं कस्यचिद्बंधसंभावे सत्तायां स्यात्तदभावे कस्यचिन्नेति तथोच्चैर्गोत्रमसंप्राप्तत्रसत्वस्य बंधाभावादि
ह्निते: तद्बंधस्य स्थावरत्वावगतस्य स्थितिक्षयेण वा सत्तायां न लभ्यते तेजोवायुकायिकजीवमध्यगतस्योद्वर्तनप्रयोगे
सत्ता ण वा सत्तायां न लभ्यते इतरस्य तु लभ्यते इत्यासामध्रुवंकता उक्तं ध्रुवसत्ताकाध्रुवसत्ताकप्रकृतिद्वारद्वयं संप्रति गुण
स्थानकेषु कासांचित्प्रकृतीनां ध्रुवाध्रुवसत्तां गाथात्रयेण निरूपयन्नाह ॥ ८ ॥ पढमतिगुणेसु मिच्छं नियमा अजयाइअ
ट्ठगे लज्जं सासाणे खलु सम्मं संतं मिच्छाइदसगे वा ॥ ९ ॥ व्या० प्रथमा आद्यास्त्रयस्त्रिसंख्या गुणा गुणस्थानकानि प्रथमत्रिगुणा:
तेषु प्रथमत्रिगुणेषु मिथ्यादृष्टिसास्वादनसम्यग्मिथ्यादृष्टिलक्षणेषु मिथ्यात्वं मिथ्यात्वलक्षणप्रकृति नियमात् निश्चयेन स
द्यमानं सत्तायां प्राप्यते इत्यर्थ: अयताद्यष्टके अविरतसम्यग्दृष्टिदेशविरतप्रमत्ताप्रमत्तसंयतापूर्वकरणानिवृत्तिबादरसूक्ष्म
संपरायोपशममोहलक्षणेष्वष्टसु गुणस्थानेषु लाज्यं विकल्पनीयं कदाचिन्मिथ्यात्वं सत्तामस्ति कदाचिन्नास्ति तथाहि अ
विरतसम्यग्दृष्ट्यादिना क्षपिते नास्ति उपशमिते त्वस्ति सास्वादने खलु नियमेन सम्मं सम्यक्त्वं सम्यग्दर्शनमोहनीयलक्षणप्र
कृति: सद्विद्यमानं सर्वदैव लभ्यते इत्यर्थ: यतौपशमिकसम्यक्त्वाद्धायां जघन्यत: समयावशेषायामुत्कृष्टत: षडावलिकावशिष्टा
यां सास्वादनो लभ्यते तत्र च नियमादष्टाविंशतिसत्कर्मैवासौ भवतीति भाव: मिथ्यात्वादिदशके मिथ्यादृष्ट्यादिषु सास्वादनवर्जितोपशा
न्तमोहपर्यवसानगुणस्थानकेषु दशसंख्येषु वा विकल्पेन भजनया सम्यक्त्वं सत्तायां स्याल्लभ्यते स्यान्नेति तथाहि मिथ्यादृष्टेरु १३९
वेऽनादिषड्विंशतिसत्कर्मण उद्वलितसम्यक्त्वपुंजे वा मिश्रे पुद्गलितसम्यग्दर्शने अविरतादौ चोपशान्तमोहान्ते क्षीणसप्तके सम्यग्दर्श
नमोहनीयं सत्तायां न प्राप्यते अन्यत्र सर्वत्र लभ्यते इति ॥ ९ ॥ सासणमीसेसु धुवं मीसं मिच्छाइनवसु भयणाए आइदुगे अण नियया

मा भइया मीसाइनवगंमि ॥ १० ॥ व्या० सास्वादनं च मिश्रं च सास्वादनमिश्रे तयो: सास्वादनमिश्रयोर्बहुत्वं च प्राकृतवशात्
यदाहु: प्रभुश्रीहेमचंद्रसूरिपादा: द्विवचनस्य बहुवचनं तथा हत्था पाया इत्यादौ सास्वादनगुणस्थाने सम्यग्मिथ्यादृ
ष्टिगुणस्थाने चेत्यर्थ: ध्रुवमवश्यंभावेन मिश्रं सम्यग्मिथ्यादर्शनमोहनीयं सदिति शेष: उक्तगाथातो डमरुकमणिन्याया
त् इहापि संबध्यते इदमत्र हृदयं सास्वादनो नियमादष्टाविंशतिसत्कर्मैव भवति मिश्रस्त्वष्टाविंशतिसत्कर्मा विसंयो
जितसम्यक्त्वसप्तविंशतिसत्कर्मा उद्वलितानंतानुबंधिचतुष्क: चतुर्विंशतिसत्कर्मा वा तत एतेषु सत्तास्थानकेषु मिश्रसद्भाव
रूपं लभ्यते षड्विंशतिसत्कर्मा तु मिश्रो न संभवत्येव मिश्रपुंजस्य सत्तोदयाभ्यां व्यतिरेकेण मिश्रगुणस्थानकाप्राप्तेरिति मि
थ्यात्वादिनवसु सास्वादनसम्यग्मिथ्यात्वरहितेषु मिथ्यादृष्ट्याद्युपशान्तमोहपर्यवसानेषु नवगुणस्थानेष्वित्यर्थ: भजनया विक
ल्पेन मिश्रं स्यात्सत्तायामस्ति स्यान्नेति किमुक्तं भवति यो मिथ्यादृष्टि: षड्विंशतिसत्कर्मा यो वाऽविरतसम्यग्दृष्ट्याद्युपशा
न्तमोहान्ता: क्षायिकसम्यग्दृष्टयस्तेषु मिश्रं सत्तायां नावाप्यते अन्यत्र प्राप्यते इति तथा आद्यद्विके प्रथमगुणस्थानकयुगले मि
थ्यादृष्टिसास्वादनगुणस्थानकद्वये इत्यर्थ: अण इति अनंतानुबंधिन: प्रथमकषाया: क्रोधमानमायालोभाख्या नियता अवश्यंभा
वेन सत्तायामवाप्यन्ते यतो मिथ्यादृष्टिसास्वादनसम्यग्दृष्टी नियमेनानंतानुबंधिनो बध्नीत इति भाव: तथा भाज्या भक्तव्या विक
ल्पनीया मिश्रादिनवके सम्यग्मिथ्यादृष्टिप्रभृत्युपशान्तमोहपर्यवसाननवगुणस्थानकेष्वनंतानुबंधिन: सत्तामाश्रित्य भक्तव्या
इत्यर्थ: इयमत्र भावना विसंयोजितानंतानुबंधिन: चतुर्विंशतिसत्कर्मण: सम्यग्मिथ्यादृष्टे: क्षीणसप्तकस्यैकविंशतिसत्कर्म
णोऽनंतानुबंधिरहितचतुर्विंशतिसत्कर्मणो वाऽविरतसम्यग्दृष्ट्यादेरनंतानुबंधिन: सत्तायां न संति तदितरस्य तु संतीति एतच्च
शेषकर्मग्रंथाभिप्रायेणोक्तं कर्मप्रकृतौ पुन: श्रीशिवशर्मसूरिपादा एवमाहु: बीयतइएसु मीसं नियमा ठाणनवगंमि भइयं

यद्वं संजोयणाउ नियमा ऽडसुपंचसु कंति लद्धव्वा सत्वार्द्धसु गम्भे वोत्तरार्द्धस्येयमक्षरगमनिका संयोजयंत्यात्मनोऽनंतकाल
मिति रूपादिस्य: कर्त्तरीत्यनाट्यत्यये संयोजना अनंतानुबंधिकषाया: ऽ:ऽ उनरर्थे नियमान्नियमतद्वयो मिथ्यादृष्टि सास्व १
दनयो: सत्वमाश्रित्य स्तवंति यतस्तावद्वरूपं अनंतानुबंधिनो बध्नातीति पंचसु पुनर्गुणस्थानकेषु सम्यग्मिथ्यादृष्टिप्रम
तिष्व प्रमत्तसंयतपर्यंतेषु सत्तां प्रतीत्य स्तक्रव्या यदि उद्वलिता स्तत: न संति इतरथा तु संति इत्यर्थ: तदुपरितनेषु पुनरपूर्वकर
णादिषु सर्वेष्वेव तत्सत्ता नास्ति यत: तदतिप्रायेण विसंयोजितानंतानुबंधिकषाय एवोपशमश्रेणिं प्रतिपद्यत इति ११
व्या० आहारसत्तगं वा सव्वगुणे बितिगुणे तिझे नोत्सयसंते मिछो अंतमुहुत्तं तत्त्वेति झे १२ व्या० आहारकशरीरतदंगोपांग
२ आहारकसंघातन ३ आहारक आहारक बंधन ४ आहारकतैजसबंधन ५ आहारककार्मणबंधन ६ आहार
कतैजसकार्मणबंधनलक्षणं ७ वा विकल्पेन सप्तकनया सर्वगुणे सर्वगुणस्थानकेषु मिथ्यादृष्टिप्रभृत्ययोगिकेवलि
पर्यवसानेषु सत्वे चैकवचनं प्राकृतत्वात् ततश्च सर्वगुणस्थानकेषु विकल्पनया सत्तां प्रतीत्याहारकसप्तकं प्राप्यते इदम
त्र हृदयोऽप्रमत्तसंयतादि संयमप्रत्ययादाहारकसप्तकं बध्वा विशुद्धिवशादुपरितनगुणस्थानकेषु समारोह
ति यश्च कश्चिद विशुद्धाध्यवसायवशादुपरितनगुणस्थानकेभ्योऽधस्तनगुणस्थानकेषु प्रतिपतति तस्याहारकसप्तकं
सर्वगुणस्थानकेषु सत्तायां प्राप्यते य: पुनराहारकसप्तकं न च बध्नात्येव तद्बंधं विनैवोपरितनगुणस्थानकेषु ध्यारोहति
तस्यडं तोस्तनेषु सत्तायां नावाप्यतेति तथा बितिगुणे विणा तिझेति कोलिकन्यायेन सर्वगुणेष्वेव तत्रापि संबंध १४०
नीयं सर्वगुणस्थानकेषु द्वितीयतृतीयगुणस्थानके विना सास्वादनमिश्रगुणस्थानकरहितेषु द्वादशस्वित्यर्थ: वावि
लाषया सप्तनया तीर्थकरनामसत्तायां प्राप्यते इति इदमत्र तात्पर्यं यदा कश्चिदविरतसम्यग्दृष्ट्यादिरपूर्वकरणतात्

पट्के यावत्सम्यक्त्वप्रत्यया तीर्थकरनामकर्म बध्वोपरितनगुणस्थानकान्यधिरोहंति कश्चित्तु बद्धतीर्थकरनामकर्माऽ
विशुद्धिवशान्मिथ्यात्वमपि गच्छति तदा सास्वादनमिश्ररहितेषु द्वादशगुणस्थानकेषु तीर्थकरनामसत्ताया मवाप्यते ती
र्थकरनामसत्ताको हि मिश्रसास्वादनत्वेन प्रतिपद्यते स्वभावादेवेति तद्वर्जनं यदुक्तं बृहत्कर्मस्तववृत्तौ तित्थकर
णविहीणं सीयालं संतयं अ संत एहोइ सासायणंमि उगुणे संमामीसे य पयडीय: ऽ उनविशुद्धसम्यक्त्वेपि सति तन्न बध्नाति त
स्य सर्वगुणस्थानकेषु तत्सत्तानलभ्यात यतोऽनयो: संयमसम्यक्त्वलक्षणस्व प्रत्ययसद्भावेपि बंधाभावात्तावद्रूपं सत्तासं
भवो यदुक्तं कर्मप्रकृतिसंग्रहण्यां आहारगतित्थकराण्णत्ति आहारकसप्तकतीर्थकरनाम्नो सत्तां प्रति भाज्यत इति त १
व: एवमाहारके तीर्थकरनामनि च प्रत्येकं सत्तारूपेणावतिष्ठमाने मिथ्यादृष्टिरपि उभयसत्तायाम
सौ भवति न वेति विनेयाशंकायामाह नोभयसंते मिछोत्ति न नैवोभयस्याहारकसप्तकतीर्थकरलक्षणद्विकस्य स
त्तासद्भावे सति मिथ्यादृष्टिर्भवेत् कोऽर्थ: उभयसत्तायां मिथ्यात्वं न गच्छतीति भाव: तर्हि केवले तीर्थकरनामकर्मस
त्तायां कियंतं कालं मिथ्यादृष्टिर्भवतीत्याह अंतमुहुत्तं भवे तित्थेत्ति अंतर्मुहूर्त्तमंतर्मुहूर्त्तमात्रं कालं भवेद्भवेत् मिछो
त्ति इत्यस्यात्रापि संबंधात् मिथ्यादृष्टि: क सतीत्याह तित्थेत्ति तीर्थकरनामकर्मणि सत्तायां वर्त्तमाने तिगम्यते इदमुक्तं भवति
यो नरकेबद्धायुष्को वेदकसम्यक्त्वदृष्टिर्बद्धतीर्थकरनामकर्मा मृत्वोऽपि पत्सुरवरपं सम्यक्त्वं परित्यज्य तत्रोत्पद्यते उत्पत्ति
समनंतरमंतर्मुहूर्त्तादूर्ध्वमवश्यं सम्यक्त्वं प्रतिपद्यते तस्यायमुक्तप्रमाण: कालो लभ्यत इति उक्तं सप्रतिपक्षं ध्रुवसत्ताकप्रकृ
तिदशकं नाम प्रतिपक्षं सर्वदेशघातिः प्रकृतिप्रतिपादयन्नाह १३ व्या: केवलजुयलावरणा ५ पणनिद्दा ५ बारसाइमकसायमिछं
ति सव्वघाई २० चउनाणतियदंसणावरणा ७ १२ संजलणनोकसाया ९ विग्घं पंच य देसघाइ य २५ अघाई ७५ १

नेयतणछाउपकुछ त सवीसा २० गोयदुगाध वन्नाध ७५ १४ व्याप केवलयुगलं केवलज्ञानकेवलदर्शनरूपं तस्यावरणे
ज्ञानदर्शनावरणे केवलयुगलावरणे केवलज्ञानावरणं केवलदर्शनावरणं चेत्यर्थः पंचनिद्राः निद्रा १ निद्रानिद्रा २ प्रचला १
३ प्रचलाप्रचला ४ स्त्यानर्द्धिरूपाः द्वादशेतिसंख्या आदिमकषायाः संज्वलनापेक्षया प्रथमकषायाः क्रोधमानमायालोभा अना
मेकैकशोऽनंतानुबंधि १ अप्रत्याख्यानावरण २ प्रत्याख्यानावरण लक्षणनामत्रयेण द्वादशधात्वं मिथ्यात्वमित्यनेन प्रदर्शि
तप्रकारेण सर्वमपि स्वावार्यगुणं घातयंतीत्येवंशीलाः सर्वघातिन्यो विंशतिसंख्या भवंतीत्यक्षरार्थो भावार्थः पुनरयं इह केव
लज्ञानावरणस्य स्वावार्यः केवलो ज्ञानलक्षणो गुणः स च यद्यपि सर्वात्मना व्रियते तथापि सर्वजीवानां केवलज्ञान
स्यानंततमो भागोऽनावृत एवावतिष्ठते तदावरणेन तस्य सामर्थ्याभावात् यदाहुः श्रीदेवर्द्धिवाचकवराः सव्वजीवाणं पियणं अ
क्खरस्स अणंतभागो निच्चुग्घाडिओ चिट्ठइ त्ति कथं तर्हि सर्वघातित्वमिति चेदभिधीयते यथातिबहले जलदपटले समुन्नते बहु
तराच्छादितत्वात् सर्वथापि सूर्याचंद्रमसोः प्रभा नैनाहतेति वचनस्य न प्रवर्त्तते अथवा द्यापि काचित्प्रभा प्रसरति सुट्ठु वि मेहस
मुदए होइ पहा चंदसूराणमिति वचनाद्भवत्येव सिद्धत्वात् तथात्रापि प्रबलकेवलज्ञानावरणाहतस्यापि केवलज्ञानस्यानंततमो भा
गोऽनावृत एवास्ते यदि पुनस्तमप्यावृणुयात्तदा जीवोऽजीवत्वमेव प्राप्नुयात् तदुक्तं नंद्यध्ययने जइ पुण सो वि आवरिज्जा तो
णं जीवो अजीवत्तणं पाविज्जा सो पि चावशिष्टो अनंतभागोऽपि जलधरावृतदिनकरकरप्रसर इव कटकुड्यादिभिर्मतिश्रुताव १४१
धिमनःपर्यायावरणैर्व्रियते तथापि काचिन्निगोदावस्थायामपि ज्ञानमात्राऽवतिष्ठते ऽन्यथाऽजीवत्वप्रसंगात् मतिज्ञाना
दिविषयस्तां च्छादयति यं न जानीते स केवलज्ञानावरणोदयो न भवति किंतर्हि मतिज्ञानावरणाद्युदय एवेति केवलदर्श
नावरणस्य समस्तवस्तुस्तोमसामान्यावबोधरूपा वार्यस्तं सर्वं हंतीति सर्वघात्यभिधीयते तदनंतभागं विहाय पि सामर्थ्या

वा न्नावृणोतीति सोपि चावृतोऽनंतभागश्चक्षुरचक्षुरवधिदर्शनावरणैर्व्रियते अत्रापि जलधरदृष्टांतादि वक्तव्यं त्वेवं यश्चक्षुर्दर्श
नादिविषयान्नर्थान्न पश्यति स केवलदर्शनावरणोदयो न भवति किंतर्हि चक्षुर्दर्शनावरणाद्युदय एवेति यद्येवं तर्हि केवलज्ञानाव
रणकेवलदर्शनावरणक्षये सत्यपि मतिज्ञानादिविषयाणामर्थानामवबोधं न प्राप्नोतीति भिन्नज्ञानविषयत्वादिति चेदुच्यते केवला
लोकलाभे स्फोटबोधलाभांतर्भावात् आमलाने क्षेत्रलाभांतर्भाववदिति निद्रापंचकमपि सर्वं वस्त्ववबोधमावृणोतीति सर्वघाति
यत्पुनः स्वापावस्थायामपि किंचिच्चेततित्र धाराधरनिदर्शनं वाच्यं तथाऽनंतानुबंधिनोऽप्रत्याख्यानावरणाः प्रत्याख्यानावर
णाश्च प्रत्येकं चत्वारो यथाक्रमं सम्यक्त्वं देशविरतिचारित्रं सर्वविरतिचारित्रं च सर्वामवघ्नंतीति सर्वघातिनो द्वादशापि कषायाः यत्पु
नस्तेषां प्रबलोदयेऽप्ययोग्याहारादिविरमणमुपलभ्यते तत्र वारिवाहदृष्टांतो वाच्यः तथा मिथ्यात्वं तु जिनप्रणीततत्त्वश्रद्धानस्वरूपस
म्यक्त्वं सर्वमपि हंतीति सर्वघाती यत्तु तस्य प्रबलोदयेऽपि मनुष्यपश्वादिवस्तुश्रद्धानं तदपि जलधरोदाहरणाद्भावनीयमिति भाविता सर्व
घातिन्यः संप्रति देशघातिन्यो भाव्यंते चउनाणतिदंसणावरणत्ति आवरणस्य प्रत्येकं संबंधान्ज्ञानावरणचतुष्कं मतिज्ञा
नावरण श्रुतज्ञानावरणावधिज्ञानावरणमनःपर्यायज्ञानावरणलक्षणं दर्शनावरणत्रिकं चक्षुर्दर्शनावरणाचक्षुर्दर्शनाव
रणावधिदर्शनावरणरूपमिति संज्वलनाश्चत्वारः क्रोधमानमायालोभा नोकषाया हास्यरत्यरतिशोकभयजुगुप्सास्त्रीवेदपुरु
षवेदनपुंसकवेदस्वरूपा नव विघ्नमंतरायं दानलाभभोगोपभोगवीर्यांतरायलक्षणमित्यमुना दर्शितप्रकारेण देशघातिन्यः पंचवि
शतिसंख्या प्रकृतयो भवंतीति अक्षरार्थो भावार्थस्त्वयमिति ज्ञानावरणादिचतुष्कं केवलज्ञानावरणानाहतं ज्ञानदेशं हंतीति दे
शघातीत्युच्यते मत्यादिज्ञानचतुष्टयविषयस्तावदर्थानर्थान् यत्र नवबुध्यते स हि मत्याद्यावरणाद्युदय एव तद्विषयस्तांस्त्वनंत
गुणान् यन्न जानीते सा केवलज्ञानावरणस्यैवोदय इति चक्षुरचक्षुरवधिदर्शनावरणान्यपि केवलदर्शनावरणानावृतकेव

BHAU DAJI

लदर्शनिकदेशमावृण्वंतीति देशघातीनि तथाहि चक्षुरचक्षुरवधिदर्शनविषयभूतानेवार्थांस्तत्वार्थान तद्द्रव्यान्नपर्यायानित
द्विषयभूतास्त्वनंतगुणानू केवलदर्शनावरणोदयादेव न समीक्षते तथा संज्वलनानवनोकषायाश्च जंत्रस्य चारित्रस्य देशमे
वघ्नंतीति देशघातिन स्तेषांमूलोत्तरगुणानामतीचारजनकत्वात् यद्वादि श्रीमदाराध्यपादैः सव्वेविअइयारा संजलणाणंउ
उदयंमि होंति मूलछिज्जं पुण होइ बारसण्हं कसायाणमिति दानांतरायादीनि पंचांतरायाण्यपि देशघातीन्येव तथाहि दानल १
लाभलाभोपभोगानां तावत् ग्रहणधारणयोग्यान्येव द्रव्याणि विषयस्तानि च समस्तपुद्गलास्तिकायस्यानंतभागरूपे देशे एव वर्त्तं
ते अतो यद्द्रव्याणि पुद्गलास्तिकायदेशवर्त्तीनि द्रव्याणि यद्यपि कुत्तोकुटुपेन कुंचनशक्नोति तानि दानलाभभोगोपभोगां
तरायाणि तावद्देशघातीन्येव यत्तु सर्वलोकवर्त्तीनि द्रव्याणि न ददाति न लभते न भुंक्ते तन्न दानांतरायादकर्मोदयात् किंतु
तेषामेव ग्रहणधारणविषयत्वेनाशक्यानुष्ठानत्वादिति मंतव्यं वीर्यांतरायमपि देशघात्येव सर्ववीर्यं न घातयतीति सूक्ष्म
निगोदस्य वीर्यांतरायकर्मणो सुदयेवर्त्तमानस्याप्याहारपरिणमनकर्मदलिकग्रहणगत्यंतरगमनादिविषयं तावान्वीर्यांत
रायकर्मक्षयोपशमो विद्यते तत्क्षयोपशमविशेषतश्च निगोदजीवानादीक्षत्वायावान्क्षीणमोहस्तावद्वीर्यमल्पं बहुबहु
तरं बहुतमं च तारतम्याद्भवतीति केवलिनश्च तत्कर्मक्षयसंभूतं सर्ववीर्यं भवतीति देशघातीदं यदि पुनः सर्वघाति स्यात्तदा
यथैव मिथ्यात्वस्य कषायद्वादशकस्य च उदये तदा दार्यं सम्यक्त्वगुणं देशसर्वसंयमगुणं च जघन्यमपि न लभते तथैव तदुद
येपि तदा वार्य जघन्यमपि वीर्यगुणं न लभेत् न चैवमस्ति तस्मादिदमपि देशघातीति स्थितं मिसुक्ताः सर्वदेशघातिन्यः संप्रति १४२
तत्प्रतिपक्षभूता अघातिनीर्व्याचिख्यासुराह इत्यादि अघातिन्यः एताः पंचसप्ततिसंख्याः प्रकृतयोऽभिधीयंते तत्र याः पंच
यन्ति प्रत्येकप्रकृतयः पराघातोच्छ्वासातपोद्योतागुरुलघुतीर्थकरनिर्माणोपघातरूपा अष्टौ तत्र हंति तत्रवाश दोनोप

लक्षितमष्टकं तण्णवंगागिइसंघयणजाइगइखगइपुव्विजिन्नणंतन्वष्टकं तत्र नवः औदारिकवैक्रियाहारकते
जसकार्मणलक्षणाः पंचउपांगानित्रीणि आकृतयः संस्थानिषट् संहननानिषट् जातयः पंच गतयश्चतस्रः खगतीद्वे पू
र्व्यानुपूर्व्यश्चतस्रः एवं तन्वष्टके प्रकृतयः पंचत्रिंशत् आयूंषिचत्वारि त्रसविंशतिस्त्रसदशकं स्थावरदशकमीलनात् गो
यदुगत्ति गोत्रशब्देनोपलक्षितं द्विकं गोयवेयणीयमिति गाथांशेन प्रतिपादितं गोत्रं उच्चैर्गोत्रं नीचैर्गोत्रमिति सातासातभेदा
द्वेदनीयं द्विधा तदेवं गोत्रद्विकशब्देन प्रकृतिचतुष्टयमभिधीयते वन्नत्ति वर्णगंधरसस्पर्शाख्याश्चतस्रः प्रकृतयो गृह्यंते एता
:प्रकृतयोऽघातिन्यो न कंचन ज्ञानादिगुणं घातयंतीति कृत्वा केवलं सर्वदेशघातिनीभिः सह वेद्यमानास्तत्सदृशरूपोऽनुभव्यं तत्र
यमर्थः सर्वघातिनीभिः सह वेद्यमाना एता अघातिन्योपि सर्वघातिरसविपाकं दर्शयंति देशघातिनीभिः सह पुनर्वेद्यमाना देश
घातिरसं यथा स्वयमचौरोपि चौरैः सह वर्त्तमानश्चौर इवावभासते यदुक्तं जाणयन विसव्वघाइत्तणंमि ताणंपि सव्वघाइस
रसोजायइ घाइसगासेण चोरयावेहचोराणं उक्तं सप्रतिपक्षं सर्वदेशघातित्वद्वारं संप्रति पुण्यपापप्रकृतीर्विवरीषुराह १४ः
सुरनरतिगुच्चसायं १ तसदस १० तणुवंगवइरचउरंसं १ परघासग ७ तिरियाउ १ वंनचउपणिंदि १ सुभखगई ४५
व्या० त्रिकशब्दस्य प्रत्येकं संबंधात् सुरत्रिकं देवगति देवानुपूर्वी देवायुर्लक्षणं नरत्रिकं नरगति नरानुपूर्वी नरायुर्लक्ष
णं उच्चैर्गोत्रं सातं त्रसदशकं त्रसबादरपर्याप्तप्रत्येकस्थिरशुभसुभगसुस्वरादेययशःकीर्त्तिलक्षणं तनवऔदारि
कवैक्रियाहारकतैजसकार्मणरूपाः पंच उपांगानि औदारिकांगोपांग वैक्रियांगोपांग आहारकांगोपांगलक्षणानित्री
णि वइरत्ति वज्रऋषभनाराचसंहननं चउरसं समचतुरस्रं परघासगत्ति पराघातसप्तकं पराघात १ उच्छ्वास २ आतप ३
उद्योत ४ अगुरुलघु ५ तीर्थकरनाम ६ निर्माणरूपं ७ तिर्यगायुः वर्णचतुष्कं वर्णगंधरसस्पर्शाख्यं पंचेंद्रियजातिः शुभखाति

पशस्तविहायोगतिरिति १५ व्या॰ बायालपुन्नपगई अपढमसंठाणखगइसंघयण तिरिदुगअसायनीओ-
वघाय इगविगलनिरयतिगं १६ थावरदस वन्नचउक्क घाइपणयालसहिय बासीई पावपयडित्ति दोसुवि वं-
नाइगहा सुहा असुहा १७ व्या॰ सुरत्रिकप्रकृतयः सुखखगतिपर्यंता एता द्विचत्वारिंशत्संख्याः पुण्याः शुभाः प्रकृतयः
उच्यंते उक्ताः पुण्यप्रकृतयः इदानीं पापप्रकृतीराह अपढमसंठाणेत्यादि संस्थानानि च खगतिश्च संहननानि च संस्थानख-
गतिसंहननानि अप्रथमानि च प्रथमवर्जानि तानि संस्थानखगतिसंहननानि च अप्रथमसंस्थानखगतिसंहननानि तत्राप्र-
थमसंस्थानानि न्यग्रोधपरिमंडलसादिकुब्जवामनहुंडाख्यानि पंच अप्रथमखगतिरप्रशस्तविहायोगतिः अप्रथमसंहननानि ऋ-
षभनाराचनाराचार्धनाराचकीलिकाछेदवर्तरूपाणि पंच तिर्यग्द्विकं तिर्यग्गति तिर्यगानुपूर्वीरूपं नीचैर्गोत्रं उपघातं इ-
गत्ति एकेंद्रियजातिः विगलत्ति द्वीन्द्रियत्रीन्द्रियचतुरिंद्रियजातयः नरकत्रिकं नरकगति नरकानुपूर्वी नरकायुर्लक्षणं
स्थावरदशकं स्थावरसूक्ष्म अपर्याप्तक साधारण अस्थिर अशुभ दुर्भग दुःस्वर अनादेय अयशःकीर्तिरूपं वर्णचतुष्कं
वर्णगंधरसस्पर्शाख्यं घाइपणयालत्ति सर्वघातिन्यो विंशतिः देशघातिन्यः पंचविंशतिः उभया अपि मिलिताः सामान्येन घा-
तिन्यः पंचचत्वारिंशद्भवंति ताभिः सहिता युक्ताः पूर्वोक्ता अप्रथमसंस्थानादिका वर्णचतुष्कपर्यवसानाः सप्तत्रिंशत्संख्या द्व्यशी-
तयः पापप्रकृतयो भवंति इति शेषः परिसमाप्तौ द्व्यशीतिरेव पापप्रकृतयो नो नाधिका इत्यर्थः नन्वद्विचत्वारिंशत् पुण्यप्रकृत-
यो मिलिताश्चतुर्विंशत्युत्तरं प्रकृतिशतं जातं बंधे तु विंशत्युत्तरमेव शतमधिक्रियते बंधे विंशत्युत्तरसयमिति वचनात् तत्कथं १४२
न विरोध इत्याह दोसुवि वन्नाइगहा इति द्वयोरपि पुण्यपापप्रकृतिराश्योर्वर्णादिग्रहणात् वर्णगंधरसस्पर्शग्रहणान्न कश्चनापि विरो-
धः अयमभिप्रायो वर्णादिचतुष्टयस्य शुभाः पापरूपाश्च वर्त्तंते ततः पुण्यवर्णचतुष्टयं पुण्यप्रकृतिमध्ये गृह्यते पापवर्णचतु-

ष्कं तु पापप्रकृतिषु ततः पुण्यपापप्रकृतिराश्योर्वर्णादिचतुष्कं यत्तदेव सत्प्रशस्ताप्रशस्तभेदतो लभ्यते अपि विवक्ष्यते इत्यदोषः
तथा एता एव पुण्यप्रकृतयः शुभकारणजन्यत्वात् शुभा उच्यंते पापप्रकृतयस्त्वशुभकारणजन्यत्वादशुभा अभिधीयंते इ-
त्युक्तं पुण्यप्रकृतिपापप्रकृतिद्वारद्वयं संप्रति परावर्तमानाऽपरावर्तमानप्रकृतिद्वारद्वयं व्याचिख्यासुर्द्विगाथायां परावर्तमा-
नप्रकृतीनां पूर्वं निर्देशे प्राप्तेऽप्यल्पसंख्याकत्वेन प्रथमम् अपरावर्तमानाः प्रकृतीराह १८ १९ व्या॰ नामधुवबंधिनवगं दंसण पण-
नाण विग्घ परघायं भय कुच्छ मिच्छ सासं जिण गुणतीसा अपरियत्ता १९ व्या॰ नामध्रुवबंधिनवकं नामध्रुव-
बंधिनवकं वर्णचतुष्कतैजसकार्मणागुरुलघुनिर्माणोपघातलक्षणं दर्शनचतुष्कं चक्षुरचक्षुरवधिकेवलदर्शनरूपं पंच ज्ञा-
नानि मतिश्रुतावधिमनःपर्यायकेवलज्ञानाभिधानानि काकाक्षिगोलकन्यायाद्दर्शनपि पंचशब्दस्य संबंधात् पंच विघ्नान्यंतरा-
याणि दानलाभभोगोपभोगवीर्यांतरायाख्यानि पराघातं भयकुच्छा जुगुप्सा मिथ्यात्वं सासं जिननाम इत्येता एकोन-
त्रिंशत्प्रकृतयो परिवर्त्ता अपरावर्तमाना भवंति अयमत्र भावः या नामध्रुवबंधिनवकप्रभृतयः एकोनत्रिंशत्प्रकृतयस्ताः
स्व स्वबंधोदयौ तयकालेऽन्यस्याः प्रकृतेर्बंधमुदयमुभयं वा निरुध्य प्रवर्तंत इत्यपरावर्तमाना इति १८ व्या॰ उक्ता अपराव-
र्तमानाः प्रकृतयः सांप्रतं परावर्तमानप्रकृतीराह व्या॰ तणुअट्ठवेयदुजुयलकसायउज्जोयगोयदुगनिद्दा
पतसवीसाउ परित्ता खित्तविवागाणुपुव्वीओ २० व्या॰ तनुरष्टेनोपलक्षितमष्टकं तणु वंगा गिइ संघयण जाइ गइ
खगइपुव्वी ति गाथावयवेन प्रतिपादितं तनुरष्टकं तत्र तन्वष्टके तैजसकार्मणयोरपरावर्तमानासु प्रतिपादितत्वात् शेषा औद- १
रिकवैक्रियाहारकरूपास्तिस्रः उपांगानि त्रीणि आकृतयः षट् संहननानि षट् जातयः पंच चतस्रो गतयः खगतिद्व-
यं आनुपूर्वीचतुष्कमिति तन्वष्टकशब्देन त्रयःत्रिंशत्प्रकृतयो गृह्यंते वेदाः स्त्रीपुंनपुंसकरूपास्त्रयः द्वियुगलं हास्य

त्परतिशोकरूपं कषायाः षोडश उच्चैर्गोयजसंगति द्विकशब्दस्य प्रत्येकं संबंधात् उद्योतद्विकं उद्योतायवेति वचनात् उद्यो
तातपाख्यं गोत्रद्विकं गोयवेयणीयमिति वचनात् गोत्रवेदनीयस्वरूपं तत्र गोत्रमुच्चैर्गोत्र नीचैर्गोत्रभेदात् द्विधा साता साताभेदा
द्वेदनीयमपि द्विधा इत्येताश्चतस्रः प्रकृतयो गोत्रद्विकशब्देन गृह्यंते निद्रापंचकं त्रसविंशतिः त्रसदशकस्थावरदशकरूपाः
आयूंषि चत्वारि इत्येता एकनवतिप्रकृतयः परित्यक्ताः कुतस्त्याः परिहृताः परावर्तमाना भवंतीति शेषः तत्र षोडश कषायाः
निद्रापंचकं च यद्यप्येता एकविंशतिप्रकृतयो ध्रुवबंधित्वाद् बंधं प्रति परोधं न कुर्वंति तथापि स्वोदये स्वजातीयप्रकृत्युदय
निरोधात् परावर्तमाना भवंति स्थिरशुभास्थिराशुभप्रकृतयश्चतस्रश्च यद्यप्युदयं प्रति न विरुद्धाः तथापि बंधं प्रति परावर्तमा
नाः शेषाश्च गतिचतुष्कजातिपंचकशरीरत्रिकअंगोपांगत्रिकसंस्थानषट्क संहननषट्क आनुपूर्वीचतुष्क आतपोद्योतवि
हायोगतिद्विकत्रसादिषोडशक वेदत्रिक हास्यरत्यरतिशोकयुगलद्वय सातासातउच्चनीचआयुःचतुष्टयलक्षणाः षट्ष
ष्टिः प्रकृतयो बंधोदयाभ्यां सेपि परस्परं विरुद्धाः अतः परावर्तमानप्रकृतयस्तल्लक्षणेनेव समर्थितं परावर्तमानापरावर्तमानप्रकृ
तिद्वारद्वयं तदेवं समर्थितं ध्रुवबंधोदयसत्ताघाइपुन्नपरियत्ता सेयर इति मूलद्वारगाथोपन्यस्तद्वारदशकं संप्रति य उक्तं
च हविविवागा वुच्छमिति तद्विवरिषुः प्रथमं क्षेत्रविपाकाः प्रकृतीराह खित्तविवागाणुपुव्वी उत्ति क्षेत्रमाकाशं तत्रैव विपाक उ
दयो यासां ताः क्षेत्रविपाकाः आनुपूर्व्यश्चतस्रो नरकतिर्यग्नरामरानुपूर्वीलक्षणा यतः तासां स्वलक्षणमपि विग्रहगतावेवोद
यो भवतीति उक्तं च बृहत्कर्मविपाके नरयाउयस्स उदए नरए वक्केण गच्छमाणस्स नरयाणुपुव्वीए तहिं उदओ अन्नहिं १४४
नत्थित्ति एवं तिरिमणुदेवे तेसु विवक्केण गच्छमाणस्स तेसिं मणुपुव्वियाणं तहिं उदओ अन्नहिं नत्थि २ ननु विग्रहगताभावे
प्यानुपूर्वीणामुदयः संक्रमकरणेन विद्यते अतः कथं क्षेत्रविपाकित्वमासामनुगतिवज्जीवविपाकित्व इत्याशंक्याह विद्यमानेपि

संक्रमे यथासां क्षेत्रप्राधान्येन स्वकीयो विपाकोदयो न तथान्यासामतः क्षेत्रविपाकित्वमेवेत्युक्ताः क्षेत्रविपाक १ः
प्रकृतयः सांप्रतं जीवविपाकाः प्रकृतीराह १९ ध: घणघाइ दुगोय जिणा तसियरतिगसुभगदुभगचउ
सास जाइतिग १९ जियविवागा ७८ आउचउरो भवविवागा ४ २० व्या० घनघातिन्यः प्रकृतयः सप्तचत्वारिंशत् तद्य
था ज्ञानावरणं पंचधा दर्शनावरणं नवधा मोहनीयमष्टाविंशतिधा अंतरायं पंचधेति दुगोयत्ति गोयवेयणीयमिति वचना १
अहे० त्गोत्रद्विकं गोत्रवेदनीयरूपं तत्र गोत्रं नीचैर्गोत्रभेदाद्द्विधा वेदनीयं सातासातभेदाद्द्विभेदमिति दुगोयशब्देन प्रकृतिचतुष्टयं
गृह्यते जिणनामतसियरतिगत्ति द्विकत्रि त्रिकशब्दस्य प्रत्येकं संबंधात् त्रसत्रिकं त्रसबादरपर्याप्तकरूपं इतरत्रिकं स्थाव
रत्रिकं स्थावरसूक्ष्मापर्याप्तकलक्षणं सुभगदुभगचउत्ति चतुःशब्दस्य प्रत्येकं संबंधात् सुभगचतुष्कं सुभगसुस्वरआदेय
यशःकीर्तिरूपं दुर्भगचतुष्कं दुर्भगदुःस्वरअनादेयायशःकीर्तिलक्षणं सासं निउच्छ्वासजाइतिगत्ति जातिशब्देनोपल
क्षितं त्रिकं जाइगइखगइत्ति गाथावयवनोक्तं जातित्रिकं तत्र जातय एकेंद्रियद्वींद्रियत्रींद्रियचतुरिंद्रियपंचेंद्रियाख्याः
पंच गतयः सुरनरतिर्यग्नरकरूपाश्चतस्रः खगतिः प्रशस्ताप्रशस्तविहायोगतिभेदेन द्विधाः इत्येवं त्रिकशब्देन एकाद
शप्रकृतयो गृह्यंते इत्येता अष्टासप्ततिप्रकृतयो जीव एव विपाकः स्वशक्तिदर्शनलक्षणो विद्यते यासां ता जीवविपाका ज्ञात
व्याः तथाहि पंचविधज्ञानावरणोदयाज्जीव एवाज्ञानी स्यान्न पुनः शरीरपुद्गलादिषु तत्कृतः कश्चिदुपघातोनुग्रहो वास्ती
ति एवं नवविधदर्शनावरणोदयाज्जीव एवादर्शनी भवति सातासातोदयाज्जीव एव सुखी दुःखी वा संपद्यते अष्टाविंशतिवि
धमोहनीयोदयाज्जीव एवादर्शनचारित्री जायते पंचविधांतरायोदयाज्जीव एव न दानादिकं कर्तुं पारयति उच्चैर्गोत्रनीचैर्गोत्रा
तिचतुष्कजातिपंचकविहायोगतिद्विकजिननामत्रसबादरपर्याप्तकस्थावरसूक्ष्मापर्याप्तकसुभगचतुष्कउच्छ्वासनामोदया

जीव एव तं तं भावमनुभवति न शरीरपुद्गला इत्येताः सर्वा अपि जीवविपाकिन्य इति यद्यपि क्षेत्रविपाका उक्ता आयुश्च भव-
विपाकाः पुद्गलविपाकाश्च वक्ष्यंते तास्वपि परमार्थतो जीवविपाका एव यतो जीवस्यैव पारंपर्येणानुग्रहमुपघातं च
कुर्वंति केवलं मुख्यतया क्षेत्रभवपुद्गलेषु तत्तद्विपाकस्य विवक्षितत्वात्तत्तद्विपाका उच्यंते इति आयूंषि चत्वारि नारकायुष्का-
दीनि पुंस्त्वं च प्राकृतत्वात् प्राकृते हि लिंगमतंत्रमेव यदवादि पूर्वादिसर्वदर्शसोपहैः श्रीहेमचंद्रसूरिपादैः स्वप्राकृ-
तलक्षणे लिंगमतंत्रमिति भवंति कर्मवशवर्त्तिभिः प्राणिभिरस्मिन्निति भवो नारकादिपर्यायः स च पूर्वायुर्विच्छेदाद्विग्रह-
गतेरप्यारभ्य वेदितव्यो यदाह भगवान् श्रीसुधर्मस्वामी भगवत्यां नेरइए णं भंते नेरइएसु उववज्जइ त्ति तस्मिन् भवे नारकतिर्यग्नरामररू-
प एव विपाक उदयो विद्यते येषां तानि भवविपाकानि तथाहि यथासंभवं पूर्वभवे बद्धान्यागामिनि भवे विपच्यंत इति भावः न तु
यथायुषां देवादिभवे ऽवश्यं विपाको भवत्येवं गतीनामप्यतस्ता अपि भवविपाकिन्यः प्राप्नुवंति अत्रोच्यते आयुर्यस्य भवस्य यो-
ग्यं निबद्धं तत्तस्मिन्नेव भवे वेद्यते इत्यायुषो भवविपाकता न त्वेवं विपाकित्वं गतयस्तु विभिन्नभवयोग्या निबद्धा अप्येकस्मिन्न-
पि भवे सर्वाः संक्रमेण संवेद्यंते तथाहि मोक्षगामिनोऽशेषा गतयो मनुष्यभवे क्षयं यांति अतो भवं प्रति गतीनां नैयत्याभावान्न भ-
वविपाकिन्यः किं तु जीवविपाकिन्य एवेत्युक्ता जीवविपाका भवविपाकाश्च प्रकृतय इदानीं पुद्गलविपाकिनीः प्रकृतीः प्रति-
कटयिषुराह २० व्या० नामधुवोदय १२ चउतणु १८ उवघाय १ साहारणि १ अर १ जोयतिगं पुग्गलविवागि बंधो पयइठिई-
रसपएसत्ति ॥ २१ व्या० नाम्नो नामकर्मणो ध्रुवोदया नित्योदया नामध्रुवोदया द्वादश यानामध्रुवोदया द्वादश प्रकृतयः १४५
तद्यथा निर्माणस्थिरास्थिरअगुरुलघुशुभाशुभतैजसकार्मणवर्णचतुष्कमिति चउतणुत्ति तनुशब्देनोपलक्षितं तनुचतु-
ष्कं तणुवंगागिइसंघयणं इति गाथावयवेन प्रतिपादितं तनुचतुष्कं तत्र तैजसकार्मणयोर्ध्रुवोदयमध्ये पठितत्वादिह त-

नव औदारिकवैक्रियाहारकलक्षणाः तिस्रः परिगृह्यंते उपांगानि त्रीणि आकृतयः संस्थानानि षट् संहननानि षट् तदेवं त-
नुचतुष्कशब्देनैता अष्टादश प्रकृतयो गृह्यंते उपघातं साधारणेतरं चेत्यत्र इतरशब्दः प्रत्येकं योज्यते तिगंति उद्योतातपपराघ-
इति उच्चनाम्ना उद्योतातपपराघातलक्षणमित्येताः षट्त्रिंशत्प्रकृतयः पुग्गलविवागित्ति पुद्गलेषु शरीरपुद्गलेष्वेवात्मीयां शक्तिं
दर्शयंतीत्यर्थः तथाहि निर्माणस्थिराद्युदयाच्छरीरतया परिणतानां पुद्गलानामंगप्रत्यंगादिनियमनं दंतास्थ्यादीनां स्थिरत्वं जिह्वा-
दीनामस्थिरत्वं शिरःप्रभृतीनां शुभत्वं पादादीनामशुभत्वमित्यादि तनूदयाच्छरीरतया पुद्गला एव परिणमंति अंगोपांगोदयाच्च
तेषां शिरोग्रीवाद्यवयवविभागो जायते आकृतिनामोदयात्तेष्वेवाकारविशेषः संपनीपद्यते संहननोदयात्तेष्वेव वज्रऋषभना-
राचादितया विशिष्टा परिणतिर्भवति उपघातसाधारणप्रत्येकउद्योतातपादीनामपि सर्वेषां शरीरपुद्गलेष्वेव स्वविपाकस्य
दर्शनात्सुप्रतीतमेवासां पुद्गलविपाकित्वमिति उक्ताश्चतुर्विधविपाकाः प्रकृतयः संप्रति यदुक्तं वुच्छं बंधविहसामी यत्ति
तत्र विवरणार्थं बंधविधिं व्याचिख्यासुराह बंधो पयइठिइरसपएसत्ति बंधशब्दः प्रत्येकमभिसंबध्यते प्रकृतिबंधः स्थितिबंध
: रसबंधः प्रदेशबंध इत्यमुना प्रकारेण बंधश्चतुर्धा भवति तत्र स्थित्यनुभागप्रदेशबंधानां यः समुदायः स प्रकृतिबंधः अध्यव-
सायविशेषगृहीतस्य कर्मदलिकस्य यत् स्थितिकालनियमनं स स्थितिबंधः कर्मपुद्गलानामेव शुभोऽशुभो वा घात्यघाती वा
यो रसः सोऽनुभागबंधो रसबंध इत्यर्थः कर्मपुद्गलानामेव यद्ग्रहणं स्थितिरसनिरपेक्षं दलिकसंख्याप्राधान्येनैव करोति स प्रदेश-
बंधः उक्तं च ठिइबंधदलस्स ठिई पएसबंधो पएसगहणं जं ताण रसो अणुभागो तस्समुदायो पगइबंधो अन्यत्राप्युक्तं प्र-
कृतिः समुदायः स्यात् स्थितिः कालावधारणं अनुभागो रसः प्रोक्तः प्रदेशो दलसंचयः उक्तां सामान्यतो बंधभेदा मूलप्रकृ-
तिबंधस्थानानि तेषु च भूयस्काराल्पतरावस्थितावक्तव्यलक्षणान् बंधभेदविशेषान्निरूपयन्नाह २२ व्या० मूलपयडीण

अ८ १ सत्त ७ छेगाइ बंधेसु तिन्नि भूयगारा अप्पतरा तिय चउरो अवट्ठिया उ नहु अवत्तव्वो २२ व्या० मूलप्रकृतीनां ज्ञा
नावरणदर्शनावरणवेदनीयमोहनीयआयुर्नामगोत्रांतरायलक्षणानां अष्टसप्तषडेकबंधेषु त्रयो भूयस्काराः त्रयोऽल्प
तराः चत्वारोऽवस्थितबंधा भवंति न तु नैवावक्तव्योऽवक्तव्यबंधो भवत् तत्र भूयस्कारादीनां भावार्थस्त्वयं इह मूलप्रकृतीनां चत्वारि बंध
स्थानानि भवंति तद्यथा अष्टविधबंधः सप्तविधबंधः षड्विधबंधः एकविधबंधश्च सर्वप्रकृतिसमुदायबंधोऽष्टविधबंधः आयु
र्वर्जसप्तप्रकृतिबंधः आयुर्मोहनीयवर्जषट्प्रकृतिबंधः षड्विधबंधः एकस्याः सातवेदनीयलक्षणायाः प्रकृतेर्बंध एक
विधबंधस्ततश्चाष्टविधसप्तविधषड्विधएकविधबंधेषु त्रयो भूयस्कारबंधास्त्रयोऽल्पतरबंधाः चत्वारोऽवस्थितबंधाः अव-
क्तव्यबंधो नास्ति तत्र भूयस्कारादीनां स्वरूपमिदं तत्रैकविधाद्यल्पतरबंधको भूत्वा यत्र पुनरपि षड्विधादिबहुबंधको भव
ति स प्रथमसमये भूयस्कारबंधः १ यत्र त्वष्टविधादिबहुबंधको भूत्वा पुनरपि सप्तविधाद्यल्पतरबंधको भवति स प्रथमसम
य एवाल्पतरबंधः २ यत्र तु प्रथमसमये एकविधादिबंधको भूत्वा द्वितीयसमयादिष्वपि तावन्मात्रमेव बध्नाति सोऽवस्थित
बंधः ३ यत्र तु सर्वथाबंधको भूत्वा पुनः प्रतिपत्य बंधको भवति स आद्यसमये अवक्तव्यबंधोऽयं पुनरुत्तरप्रकृतीनामेव भवति
न मूलप्रकृतीनां तासां सर्वथाबंधकस्यायोगिकेवलिनः सिद्धस्य वा प्रतिपाताभावेन पुनर्बंधाभावात् अथ कथं त्रयो भूयः-
कारबंधाः त्रयो अल्पतरबंधाश्चत्वारोऽवस्थितबंधा भवंतीति चेदुच्यते इहैकविधं बध्नन् उपशांतमोहावस्थातः प्रतिपतन् सू
क्ष्मसंपराये पुनः षड्विधं बध्नतः आद्यसमये प्रथमो भूयस्कारबंधः १ द्वितीयादिसमयेषु त्ववस्थितबंध इति ततोऽप्यधस्तात्प्रति १४६
पतन् सप्तविधं बध्नत आद्यसमये द्वितीयो भूयस्कारबंधः २ द्वितीयादिसमयेषु त्ववस्थितबंधः आयुर्बंधकाले त्वष्टविधं गत
स्य प्रथमसमय एव तृतीयो भूयस्कारबंधो द्वितीयादिसमयेषु त्ववस्थितबंधो इति त्रयो भूयस्काराः तथा आयुर्बंधकालेऽष्ट

विधं बध्वा पुनरप्यायुर्बंधोपरमे सप्तविधं बध्नत आद्यसमये प्रथमसमये प्रथमोऽल्पतरबंधो द्वितीयादिसमयेषु त्ववस्थितबं
धः सप्तविधादपि सूक्ष्मसंपरायावस्थायां षड्विधबंधगतस्य प्रथमसमये द्वितीयोऽल्पतरबंधो द्वितीयादिसमयेषु त्ववस्थितबं
धः षड्विधबंधोदये पुनरुपशांतमोहाद्यवस्थायामेकविधबंधगतस्याद्यसमये तृतीयोऽल्पतरबंधो द्वितीयादिसमयेषु त्व
वस्थितबंध इति त्रयोऽल्पतरबंधाः तथा मूलप्रकृतिविषयाण्येकविधबंधादीनि चत्वारि बंधस्थानानि तेषु चतुर्ष्वपि बंधस्थानेष्व
वस्थितबंधोऽस्त्येवेति चत्वारोऽवस्थितबंधाः अवक्तव्यबंधस्तु मूलप्रकृतिषु न संभवतीत्युक्तमेवेति अथैतदेव भूयस्कारा
दिस्वरूपं व्याचिख्यासुराह २२ एगादहिगे भूओ एगाईऊणगंमि अप्पतरो २ तम्मत्तोवट्ठियओ पढमे समए अवत्तव्वो २३ व्या०
एकादिभिरेकद्वित्र्यादिभिः प्रकृतिभिरधिके बंधे भूयस्कारनामबंधो भवति यथा एकां बध्वा षट् बध्नाति षट् बध्वा सप्त ब-
ध्नाति सप्त वा बध्वाऽष्टौ बध्नातीति तथा एकादिभिरेकद्वित्र्यादिभिः प्रकृतिभिर्न्यूनेहीने बंधेऽल्पतरनामबंधो भवति यथाष्टौ बध्वा
बध्नाति+ सप्त बध्नाति सप्त बध्वा षट् षट् . बध्वा एकां बध्नाति तथा एव भूयस्कारोऽल्पतरो वा द्वितीयादिसमयेषु तन्मात्रस्तावन्मात्रत
या प्रवर्त्तमानोऽवस्थितबंधो भवति एते त्रयोऽपि प्रकारा मूलप्रकृतीनां संभवंति तथा यः सर्वथाऽबंधको भूत्वा भूयोऽपि बंधकः सं
जायते तदा तस्य प्रथमसमयेऽवक्तव्यः संभवतीत्येतावदाह पढमे समये अवत्तव्वो इति स्पष्टं न चायं मूलप्रकृतिषु संभवति
न हि मूलप्रकृतीनां सर्वासां बंधव्यवच्छेदे सत्ययोगिकेवलिनः सिद्धस्य वा भूयोऽपि बंधः संभवतीत्यतोऽवक्तव्यबंधस्तूत्तरप्रकृति
ष्वेव भवति तं चोत्तरप्रकृतिषु यथास्थानं दर्शयिष्यामः उक्ता मूलप्रकृतीरधिकृत्य भूयस्कारादिबंधा अधुनोत्तरप्रकृति
: प्रतीत्य वान् प्रचिकटयिषुराह २३ नव छ चउ४ दंसे दु१ दु२ तिर दु४ मोहे दु २२ इगवीसा २१ सत्तरस १७ तेर
स १३ नव ९ पण ५ चउ ४ तिग ३ दु २ एक्को १ नव अट्ठ २२ दस ३ दुन्नि २४ व्या० दंसि त्ति नामा सत्यभामेति न्यायात्पदैकदेशे

पिपदसमुदायो प्रकार इति दर्शनावरणोत्तरप्रकृतीनां त्रीणि बंधस्थानानि कथमित्याह नवषट्चत्ति नवविधं बंधस्थानं ष-
ड्विधं बंधस्थानं चतुर्विधं बंधस्थानं चेति तत्र निद्रा निद्रानिद्रा प्रचला प्रचलाप्रचला स्त्यानर्द्धिलक्षणं निद्रापंचकं चक्षुर्दर्शनाव-
रणाचक्षुर्दर्शनावरणावधिदर्शनावरणकेवलदर्शनावरणचतुष्टयं चेत्येतन्नवविधं एतच्च मिथ्यादृष्टिसास्वादनगुणस्थानकं
यावद्बध्यते ततः परं स्त्यानर्द्धित्रिकं निद्रानिद्रा प्रचलाप्रचलास्त्यानर्द्धिरूपं व्यवच्छिद्यते अतः सम्यग्मिथ्यादृष्टिगुणस्थानकादिषु
षड्विधं बध्नतः प्रथमसमये प्रथमोऽल्पतरबंधः एतच्च षड्विधमपूर्वकरणप्रथमसप्तभागं यावद्बध्नाति ततः परं निद्राप्रचलाबंध-
व्यवच्छेदे सति शेषं चतुर्विधं बध्नत आद्यसमये द्वितीयोऽल्पतरबंधः एतच्चतुर्विधं सूक्ष्मसंपरायगुणस्थानकं यावद्बध्यते ततः क-
स्यचित्पुनः प्रतिपतितस्य षड्विधं बध्नतः प्रथमसमये प्रथमो भूयस्कारबंधः ततोऽपि प्रतिपतत्नवविधं बध्नत आद्यसमये द्वितीयो
भूयस्कारबंध अत्र च नवविधादिषु त्रिष्वपि बंधस्थानेषु द्वितीयादिषु समयेषु तदेव बध्नतोऽवस्थितबंध इति त्रयोऽवस्थितबं-
धाः यदा तूपशांतमोहावस्थायां दर्शनावरणप्रकृतीनां सर्वथाऽबंधको भूत्वा पुनस्तत्क्षयेण देवः प्रतिपतत्चतुर्विधं बध्नाति त-
दा प्रथमसमयेऽवक्तव्यबंधो भूयस्कारादिलक्षणयोगात् भूयस्कारादिति विकल्पैर्वक्तुं न शक्यते इत्यवक्तव्यो द्वि-
तीयादिसमयेषु त्वत्राप्यवस्थितबंधः यदा पुनरुपशांतमोहावस्थायामेवायुःक्षयेणानुत्तरसुरेषूत्पद्यते तदा तत्र प्रथमस-
मये षड्विधं बध्नतो द्वितीयोऽवक्तव्यबंधो द्वितीयादिसमयेषु त्ववस्थितबंधः तदेवमत्र द्वौ भूयस्कारबंधौ द्वावल्पतरबंधौ अ-
वस्थितबंधास्तु गणनया षट् भवंतोऽपि बंधस्थानानि त्रीण्येवेति तद्भेदात्त्रय एव भवंति अवक्तव्यबंधौ द्वावित्येतदेवाह दु- १४७
इति दुन्नि द्वौ भूयस्कारबंधौ द्वावल्पतरबंधौ त्रयोऽवस्थितबंधाः द्वाववक्तव्यबंधाविति तात्पर्यं सर्वोक्तमेवैतत्कृतो दर्श-
नावरणोत्तरप्रकृतिषु भूयस्कारादिबंधा इदानीं मोहनीयोत्तरप्रकृतिषु विचिंतयन्नाह मोहे दुगइगवीससत्तरसतेर

दि मोहे मोहनीयकर्मणि दश बंधस्थानानि भवंति तद्यथा दुइगवीससत्तरिविंशतिरित्यादि प्रत्येकं संबंधात् द्वाविंशतिः ए-
कविंशतिः सप्तदश त्रयोदश नव पंच चतस्रः तिस्रः द्वे एका च उक्तं च सप्ततिकायां बावीसइक्कवीसा सत्तरसा तेरसे
व नव पंच चउ तिग दुगं च एगं बंधट्ठाणाणि मोहस्स तत्र सम्यक्त्वसम्यग्मिथ्यात्वे बंधेन भवतो न यबंधे सम्ममीसाई इति वच-
नात् न च त्रयाणां वेदानां युगपद्बंधः किं त्वेककालमेकस्यैव हास्यरतियुगलारतिशोकयुगले अपि न युगपद्बध-
यातः किं त्वेकतरमेव युगलं ततो मोहनीयस्योत्कर्षतः उत्कृष्टप्रकृतिबंधो द्वाविंशतिः मिथ्यात्वं षोडश कषायाः एको
वेदः अन्यतरयुगलं भयजुगुप्से इति सा च मिथ्यादृष्टिगुणस्थानके प्राप्यते ततः सास्वादनसम्यग्दृष्टिगुणस्थानके मिथ्यात्व-
बंधाभावादेकविंशतिः यद्यपि अत्र नपुंसकवेदस्यापि बंधो न भवति तथापि तत्स्थाने स्त्रीवेदः पुरुषवेदो वा प्रक्षिप्यत इ-
त्येकविंशतेरेव बंधः ततो मिश्राविरतसम्यग्दृष्टिगुणस्थानकयोरनंतानुबंधिनामपि बंधाभावात् सप्तदश ततोऽपि
देशविरतिगुणस्थानकेऽप्रत्याख्यानावरणकषायाणां बंधाभावात्त्रयोदश ततोऽपि प्रमत्ताप्रमत्तापूर्वकरणगुणस्थान-
केषु प्रत्याख्यानावरणकषायाणां बंधाभावान्नव यद्यप्यरतिशोकरूपं युगलं प्रमत्तगुणस्थानक एव व्यवच्छिन्नं तथा-
पि तत्र तत्स्थाने हास्यरतियुगलं प्रक्षिप्यते इत्यप्रमत्तापूर्वकरणयोर्नवकबंधो न विरुध्यते ततो हास्यरतिभयजुगुप्सा
अपूर्वकरणचरमसमये च बंधमाश्रित्य व्यवच्छिद्यंत इत्यनिवृत्तिबादरसंपरायगुणस्थानके प्रथमभागे पंचानां बंधः द्वि-
तीयभागे पुरुषवेदस्याभावाच्चतसृणां बंधः तृतीयभागे संज्वलनक्रोधस्य बंधाभावात्तिसृणां बंधः चतुर्थभागे संज्व-
लनमानस्य बंधाभावात् द्वयोर्बंधः पंचमभागे संज्वलनमायाया अपि बंधाभावादेकस्याः संज्वलनलोभप्रकृतेर्बं-
धः ततः परं बादरसंपरायाभावात्तस्या अपि न बंधः उक्तानि मोहनीयस्य दश बंधस्थानानि अथैतेषु दशसु बंधस्था-

नेषु त्र्यस्कारादीनाह नवअठदसइगिति नवत्र्यस्कारबंधाः अष्टावल्पतरबंधाः दशावस्थितबंधाः द्वा
ववक्तव्यबंधौ इयमत्र भावना एकविधबंधात्प्रतिपत्यो सूक्ष्मसंपरायो द्विविधं बध्नन् आद्यसमये प्रथमो त्र्यस्कारबंधो द्विवि
धात् त्रिविधबंधं गतस्य द्वितीयो त्र्यस्कारबंधः त्रिविधाच्चतुर्विधबंधं गतस्य तृतीयो त्र्यस्कारबंधः चतुर्विधात्पंचविधब
धं गतस्य चतुर्थो त्र्यस्कारबंधः पंचविधान्नवविधबंधं गतस्य पंचमो त्र्यस्कारबंधः नवविधात् त्रयोदशविधबंधं गत
स्य षष्ठो त्र्यस्कारबंधः त्रयोदशविधात् सप्तदशविधबंधं गतस्य सप्तमो त्र्यस्कारबंधः सप्तदशविधादेकविंशतिवि
धबंधं गतस्याष्टमो त्र्यस्कारबंधः एकविंशतिविधात् द्वाविंशतिविधबंधं गतस्य नवमो त्र्यस्कारबंधः अल्पतराः
पुनरेवमष्टौ भवंति तथाहि द्वाविंशतिविधबंधात् सप्तदशविधबंधं गतस्य प्रथमोऽल्पतरबंधः सप्तदशविधात् त्रयोदश
विधबंधं गतस्य द्वितीयोऽल्पतरबंधः त्रयोदशविधबंधान्नवविधबंधं गतस्य तृतीयोऽल्पतरबंधः नवविधबंधात्पंच
विधबंधं गतस्य चतुर्थोऽल्पतरबंधः पंचविधबंधा चतुर्विधबंधं गतस्य पंचमोऽल्पतरबंधः चतुर्विधबंधात् त्रिविधबंधं ग
तस्य षष्ठोऽल्पतरबंधः त्रिविधबंधात् द्विविधबंधं गतस्य सप्तमोऽल्पतरबंधः द्विविधबंधादेकविधबंधं गतस्याष्टमोऽल्पत
रबंधः न तु द्वाविंशतिबंधादेकविंशतिगमने नवमोऽल्पतरबंधः कस्मान्नोक्त इति चेन्नैवमसंभवादेव तथाहि द्वावि
शतिं मिथ्यादृष्टिरेव बध्नाति एकविंशतिं तु सास्वादनसम्यग्दृष्टिरेवोक्तं न च मिथ्यादृष्टिरनंतरभावेन सास्वादनत्वं प्रतिप
द्यते येन द्वाविंशतेरेकविंशतिगमनं स्यात् किं तु प्रथमसम्यग्दृष्टिरेव सास्वादनत्वं प्रतिपद्यते तस्माद् द्वाविंशतेः सप्तद १४८
शबंधगमनमेव संभवतीत्यष्टावेवाऽल्पतरबंधाः तथा दशस्वपि मोहनीयबंधस्थानेषु द्वितीयादिसमये ध्रुवस्थितबंधो
लभ्यते इत्यवस्थितबंधा दश अवक्तव्यबंधौ द्वौ पुनरेवं यदा सूक्ष्म उपशांतमोहनीयस्य अबंधको भूत्वा उपशांताद्धाक्षयेण प्र

॥

तिपत्य पुनरेकं संज्वलनलोभं बध्नाति तदाद्यसमये प्रथमोऽवक्तव्यबंधः यदि चोपशांतमोहावस्थायामेवायुःक्षये
ण मृत्वाऽनुत्तरसुरेषु समुत्पद्यते तदा प्रथमसमये सप्तदशविधबंधं बध्नतो द्वितीयोऽवक्तव्यबंधः तदेवं मोहनीयेन नवत्र्य
स्कारबंधाः अष्टावल्पतरबंधाः दशावस्थितबंधाः द्वावक्तव्यबंधाविति भावितं उक्तं च नवत्र्यस्कारबंधा अट्ठेव
द्वे तिअप्पतरबंधा दो अवत्तगबंधा अवट्ठिया दस उ मोहंमि त्ति संप्रति नामकर्मप्रकृतिषु त्र्यस्कारादिबंधान् प्रतिपि
पादयिषुराह २४ बः ति २३ पण २५ छ २६ अड २८ नव २९ हिया वीसा ३० तीसे ३१ गतीस ३१ इग १ नामे छस्सग अट्ठ
तिबंधा य सेसेसु ठाणमिक्किक्कं २५ व्या० नाम्नि नामकर्मणि बंधस्थानान्यष्टौ भवंति तद्यथा विंशतिशब्दस्य प्र
त्येकं संबंधात् त्रयोविंशतिः पंचविंशतिः षड्विंशतिः अष्टाविंशतिः एकोनत्रिंशत् त्रिंशत् एकत्रिंशत् एका चेति उ
क्तं च सप्ततिकायां तेवीस पणवीसा छव्वीसा अट्ठवीस गुणतीसा तीसेगतीसमेगं बंधट्ठाणाणि नामस्स तत्र वर्ण
चतुष्क तैजस कार्मण अगुरुलघु निर्माण उपघातमित्येता नव प्रकृतयो ध्रुवबंधिन्यः सर्वैरपि चतुर्गतिकजीवैः प्राप्त
विशेषगुणैः प्रतिसमयमवश्यं बध्यमानत्वात् तथा तिर्यग्गतिः तिर्यगानुपूर्वी एकेंद्रियजातिः औदारिकशरीरं हुं
डकसंस्थानं स्थावरं बादरसूक्ष्मयोरन्यतरं अपर्याप्तकं प्रत्येकसाधारणयोरन्यतरत् अस्थिरनाम अशुभनाम अना
देयनाम अयशःकीर्तिनाम दुर्भगनाम इत्येता अष्टादश प्रकृतयो ध्रुवबंधिनीभिर्नवभिः सह त्रयोविंशतिरित्येतासां त्रयो
विंशतिप्रकृतीनां समुदाय एकं बंधस्थानमेवमुत्तरत्रापि भावनीयं एतां च त्रयोविंशतिमेकेंद्रियद्वींद्रियत्रींद्रियचतुरिंद्रि
यपंचेंद्रियाणामन्यतरो मिथ्यादृष्टिरेवापर्याप्तैकेंद्रियप्रायोग्यं बध्नाति पंचविंशतिं पुनः पर्याप्तैकेंद्रियप्रायोग्यां तरोत्पा
दयोग्यपानानाडीवा बध्नंति तत्र च त्रयोविंशतिः श्वैकेव पराघातोच्छ्वासाभ्यां सह पंचविंशतिर्भवति नवरमपर्याप्तकस्था

ने पर्याप्तकं स्थिरास्थिर शुभाशुभ यशःकीर्त्ति अयशःकीर्त्तिनां परावर्त्तितव्या एवमेषां पंचविंशतिरन्येषामपि विक
लेंद्रियादिजीवानां प्रयोग्या ना संगेसंभवति केवलं ग्रंथविस्तरभयान्नेदोच्यते सप्ततिकाटीकायां तद्विस्तरोन्वेषणीयः ए
व मुत्तरेष्वपि बंधस्थानेषु गमनिकामात्रमेवाभिधास्यते इति एषैव पंचविंशति रातपोद्योतयोरेकतरप्रक्षेपे षड्विंशति र्भवति सा
च पर्याप्तैकेंद्रियप्रायोग्येव बध्यते नान्यप्रायोग्यं बंधकाश्चतत्रोत्पादयोग्याजीवा इष्टव्याः अष्टाविंशतिस्तु देवगतिप्रायोग्यां
तिर्यङ्मनुष्यास्तत्प्रायोग्यविशुद्धा बध्नंति तद्यथा देवगति र्देवानुपूर्वी पंचेंद्रियजाति वैक्रियशरीरं वैक्रियांगोपांगं समचतु
रस्रसंस्थानं उच्छ्वासनाम पराघातनाम प्रशस्तविहायोगतिनाम त्रसनाम बादरनाम पर्याप्तकनाम प्रत्येकनाम स्थिरास्थि
रयोः शुभाशुभयोर्यशःकीर्त्त्ययशःकीर्त्त्योश्चैकैकमन्यतरत्प्राप्यं सुभगनाम सुस्वरनाम आदेयनाम वर्णचतुष्कं ते
जसकार्मणागुरुलघु निर्माणोपघातमित्यष्टाविंशतिर्भवति एषा च मिथ्यादृष्टि सास्वादन मिश्राविरतानां देवगतिप्रायो
ग्यं बध्नतामवसेया एषैवाष्टाविंशतिस्तीर्थंकरनामकर्म्मणो बंधे प्रक्षिप्ते एकोनत्रिंशद्भवति तां च सम्यग्दर्शनिनो मनुष्याए
वं बध्नंती तीर्थंकरनामानो देवगतिप्रायोग्यां बध्नंति यद्विवा पर्याप्तपंचेंद्रियतिर्यक्प्रायोग्यापीयमेकोनत्रिंशद्बध्यते तद्यथा।
तिर्यङ्गति स्तिर्यगानुपूर्वी पंचेंद्रियजातिः अदारिकशरीरं अदारिकांगोपांगं ५ तैजसकार्मणे ७ षण्णां संस्थानानामेक
तमत्संस्थानं ८ षण्णां संहननानामेकतमत्संहननं ९ वर्णचतुष्कं १३ अगुरुलघु १४ उपघातं १५ पराघातं १६ उच्छ्वासनाम १७।
प्रशस्ताप्रशस्तविहायोगत्योरेकतरा १८ त्रसनाम १९ बादरनाम २० पर्याप्तकनाम २१ प्रत्येकनाम २२ स्थिरास्थिरयोरेकत १४९
रं २३ शुभाशुभयोरेकतरं २४ सुभगदुर्भगयोरेकतरं २५ सुस्वरदुःस्वरयोरेकतरं २६ आदेयानादेययोरेकतरं २७ यशः
कीर्त्त्ययशःकीर्त्त्योरेकतरं २८ निर्माणमिति २९ त्रिंशत्पुनरियं देवगति र्देवानुपूर्वी पंचेंद्रियजाति वैक्रियशरीरं वैक्रियां

गोपांगं आहारकशरीरमाहारकांगोपांगं तैजसकार्मणे समचतुरस्रसंस्थानं वर्णचतुष्कं अगुरुलघु उपघातं पराघातं उच्छ्वा २
सं प्रशस्तविहायोगतिः त्रसं बादरं पर्याप्तकं प्रत्येकं स्थिरं शुभं सुभगं सुस्वरं आदेयं यशःकीर्त्तिनाम निर्माणनामेति इत्येतां दे
वगतिप्रायोग्यं बध्नतो प्रमत्तसंयतस्यापूर्वकरणस्य वा वेदितव्यं अथवा कश्चिद्बद्धतीर्थंकरनामकर्मादिविसमुत्पन्नः पुनर
पि मनुष्येषु समुत्पद्यते इति मनुष्यगतिप्रायोग्यां तीर्थंकरनामसहितां त्रिंशतं देवो बध्नाति तद्यथा मनुष्यगति मनुष्यानुपूर्वी
पंचेंद्रियजातिः अदारिकशरीरमौदारिकांगोपांगं समचतुरस्रसंस्थानं वज्रऋषभनाराचसंहननं पराघातं उच्छ्वासं प्रश
स्तविहायोगतिः त्रसं बादरं पर्याप्तं प्रत्येकं स्थिरास्थिरयोरेकतरं शुभाशुभयोरेकतरं यशःकीर्त्त्योरेकतरं सुभगं सुस्वरं
आदेयं तीर्थंकरनाम वर्णचतुष्क तैजसकार्मणागुरुलघु निर्माणोपघातनामेति एकत्रिंशत्पुनरेवं देवगति देवानुपूर्वी पं
चेंद्रियजातिः वैक्रियशरीरं वैक्रियांगोपांगं आहारकशरीरमाहारकांगोपांगं तैजसकार्मणे च समचतुरस्रसंस्थानं वर्णच
तुष्कं अगुरुलघु उपघातं पराघातं उच्छ्वासं प्रशस्तविहायोगतिः त्रसं बादरं पर्याप्तं प्रत्येकं स्थिरं शुभं सुभगं सुस्वरं आदेयं
यशःकीर्त्तिनाम निर्माणं तीर्थंकरनामेति तामप्रमत्तयतिः कियंतमपि च भागं यावदपूर्वकरणश्च देवगतिप्रायोग्यामे
व बध्नाति एकविधबंधस्तु यशःकीर्त्तिस्वरूपमपूर्वकरणानिवृत्तिबादरसूक्ष्मसंपरायाः स्वरूपेणैव बध्नंति ननु कस्यचित्
प्रायोग्यं देवगतिप्रायोग्यस्यापि बंधस्यापूर्वकरणस्य मध्ये व्यवच्छिन्नत्वात् तदेवं स्वरूपतोऽष्टावप्युक्तानि नामकर्म्मणो बंध
स्थानानि सांप्रतमेतेषु प्रकृतीषु त्र्यस्कारादिबंधास्तावदंते भूयस्कारः अल्पतरः अवस्थितः अवक्तव्यश्च भूयस्कारादिषु योजनीयस्त
तो भूयस्कारादिषु योजनीयः ततो भूयस्कारबंधाः षट् अल्पतरबंधाः सप्त अवस्थितबंधाः अष्टौ अवक्तव्यबंधाः त्र
य इति भूयस्कारबंधाः षडेवं कस्यचिदपर्याप्तैकेंद्रियप्रायोग्यं त्रयोविंशतिं बध्नतस्तत्प्रायोग्यविशुद्धिवशात्पंचविंशति

विधबंधंगतस्याद्यसमये प्रथमो भूयस्कारबंधः ततोऽपि पंचविंशतिबंधात्तथायोग्यविशुद्धिवशतः षड्विंशतिबंधंगतस्य
प्रथमसमये द्वितीयो भूयस्कारबंधः षड्विंशतिविधबंधादष्टाविंशतिविधबंधंगतस्य प्रथमसमये तृतीयो भूयस्कारबंधः।
अष्टाविंशतिबंधादेकोनत्रिंशद्बंधंगतस्य प्रथमसमये चतुर्थो भूयस्कारबंधः एकोनत्रिंशतं बद्ध्वा त्रिंशतं बध्नत आद्यसमये
पंचमो भूयस्कारबंधः आहारकद्विकसहितां त्रिंशतं बध्वा एकत्रिंशद्बंधंगतस्याद्यसमये षष्ठो भूयस्कारबंधः अथवा यश
ःकीर्तिलक्षणमेकविधं बध्वा श्रेणेर्निपततः पुनरपूर्वकरणे एकत्रिंशदादिं बध्नत आद्यसमये षष्ठ एव भूयस्कारबंधो न सप्तम
एकत्रिंशल्लक्षणस्थानकस्योभयथाप्येकत्वादिति अल्पतरबंधाः सप्त पुनरेवं अपूर्वकरणे देवगतिप्रायोग्यामष्टाविंश
तिमेकोनत्रिंशतं वा त्रिंशतं वा एकत्रिंशतं वा बध्नतः बंधव्यवच्छेदे एकविधबंधंगतस्याद्यसमये प्रथमोऽल्पतरबंधः एकत्रिंश ॰त्रिशद्देवेषु॰
द्बंधंगतस्याद्यसमये द्वितीयोऽल्पतरबंधः एतच्च कथं संभवतीत्युच्यते इह कश्चिदाहारकद्विकतीर्थकरनामसहितां श॰
वीतिहितामेकत्रिंशतं बध्वा दिवि समुत्पन्नः तस्य प्रथमसमय एव मनुष्यगतिप्रायोग्यां पूर्वोक्तामेव त्रिंशतं बध्नतः एकत्रिं॰
शतः त्रिंशतिगमनं संभवति ततस्तस्यैव दिवश्च्युत्वा मनुष्येषु समुत्पन्नस्य पुनरपि देवप्रायोग्यां तीर्थकरनामसहितां पूर्वोक्ति
तामेकोनत्रिंशतं बध्नतः प्रथमसमये तृतीयोऽल्पतरबंधः यदा तु तिर्यङ्मनुष्याणामन्यतरः तिर्यग्प्रायोग्यां पूर्वोक्तामेको
नत्रिंशतं बध्वा तथाविधविशुद्धिवशाद्देवगतिप्रायोग्यामष्टाविंशतिं बध्नाति तदा प्रथमसमये चतुर्थोऽल्पतरबंधः अष्टावि
शतेश्च तथाविधसंक्लेशवशादेकेंद्रियप्रायोग्यां षड्विंशतिबंधंगतस्याद्यसमये पंचमोऽल्पतरबंधः षड्विंशतिबंधात् पंचविं १५०
शतिबंधंगतस्याद्यसमये षष्ठोऽल्पतरबंधः पंचविंशतिबंधादपि त्रयोविंशतिबंधंगतस्याद्यसमये सप्तमोऽल्पतरबंधः एते
चाष्टस्वपि बंधस्थानेषु द्वितीयादिसमयेषु सर्वत्रावस्थितबंधो लभ्यतः इत्यवस्थितबंधा अष्टौ अथावक्तव्यकबंधाः त्रयः पु

नरेवं उपशांतमोहावस्थायां नामकर्मणः सर्वथाऽबंधको भूत्वा इहैवोपशांताद्धाक्षयेण प्रतिपतन् पुनरप्येकविधं
बध्नाति तदाद्यसमये प्रथमोऽवक्तव्यबंधः अथवोपशांतमोहावस्थायामेवायुःक्षयेणानुत्तरसुरेषूत्पद्यते उपात्तती
र्थकरनामा च भवति तदा तस्य प्रथमसमय एव मनुष्यगतिप्रायोग्यां पूर्वोक्तरूपां तीर्थकरसहितां त्रिंशतं बध्नतो द्वितीयो २
ऽवक्तव्यबंधः अथवानुपात्ततीर्थकरनामा यदा भवति तदा तस्य तीर्थकरनामरहितां तत्रैव मनुष्यगतिप्रायोग्यामे॰
कोनत्रिंशतं बध्नतः प्रथमसमये तृतीयोऽवक्तव्यबंधः तदेवमुक्ता विता नामकर्मणि भूयस्कारबंधाः सप्ताल्पतरबंधाः अ
ष्टावस्थितबंधाः त्रयोऽवक्तव्यबंधाः उक्तं च भुज्जयगारबंधा सत्तेव हवंति अप्पतरबंधा तिण्णेव अवत्तबंधा अवठिया ॥ तिन्नि वत्तगा ॥
अठ्ठ नामंमि १ उक्तो नामकर्माश्रित्य भूयस्कारादिबंधः संप्रति शेषकर्माण्याश्रित्याह सेसेसु ठाणमिक्किक्कं तिशेषेषु ६
स्थानतोऽवरितेषु ज्ञानावरणवेदनीयायुर्गोत्रांतरायलक्षणेषु पंचसु कर्मसु स्थानं बंधस्थानमेकैकं भवति तत्राद्यकर्मणि मति॰
ज्ञानावरणाद्युत्तरप्रकृतिपंचकस्य समुदितमेवैकं बंधस्थानं मिथ्यादृष्टेरारभ्य सूक्ष्मसंपरायं यावद्भवति एवमंतरायपंचकस्य २
पि वाच्यं वेदनीयस्याप्येकमेव बंधस्थानं सातमसातं वा आयुषः चतुर्णामायुषामन्यतरैकायुष्कलक्षणमेकमेव बंधस्थानं
गोत्रस्य तु नीचैर्गोत्रमुच्चैर्गोत्रं वा एकं बंधस्थानं अ एकत्वकत्वात् तत्रैतत् स्वयमेव द्रष्टव्यं यथात्र कर्मपंचकेऽपि भू
यस्काराल्पतरबंधौ न संभवतस्तल्लक्षणायोगात् अवक्तव्यबंधावस्थितबंधौ तु वेदनीयकर्मचतुष्टये संभवतः तथा
-ज्ञानावरणांत राय+ हि गोत्राणामुपशांतमोहावस्थायां सर्वथाऽबंधको भूत्वा प्रतिपत्य यदा पुनस्तान्येव बध्नाति तदा प्रथमसमयेऽवक्तव्यबंध
ः आयुषस्तु यदा त्रिभागादिसमयादौ बंधकस्तदा प्रथमसमयेऽवक्तव्यबंधो द्वितीयादिसमयेषु त्ववस्थितबंधः वे
दनीयद्विकस्य त्ववस्थितबंधोऽस्ति प्रभूतकालमवस्थितत्वेन बध्यमानत्वादवक्तव्यबंधस्तु न संभवति सा हि सर्वथाऽबं

धको भूत्वा यदा प्रतिपत्य पुनः तदेव बध्नाति तदा संभवति न चैतद्वेदनीये ऽस्ति तस्य सर्वथा ऽबंधकत्वमयोगिकेव
लिचरमसमये एव न चायोगिकेवलिनो भगवतो भूयो बंधोऽस्तीति उक्तं च नाणावरणे तइए चउसुवि गोयंमि अंतरा
एअ वियअभवनग बंधा अधुविया वेयणिज्जंमिति तदेवं भूयस्कारादिप्रकारैः चिंतितः प्रकृतिबंधः संप्रतं स एव स्वामि
त्वद्वारेण चिंतनीयः स च गुणस्थानकान्याश्रित्य लघुकर्मस्तवटीकायां मार्गणास्थानकान्याश्रित्य पुनः स्वोपज्ञबंधस्वा
मित्वटीकायां विस्तरेण निरूपितः तत एवावधारणीय इति ॥ बंधः समाप्तः ॥ इदानीं स्थितिबंधव्याख्यावसरः प्रथमं मूल
प्रकृतीनामुत्कृष्टेतरं तं तावदाह २५ ॥ वीसयरकोडिकोडी नामे गोए य २० सत्तरी मोहे ७० । तीसियर२० चउसु उदही
निरयसुराउंमि तित्तीसा २६ व्या० अतिमहत्वाद्दधिवत्तरीतुमचिरात्पारं नेतुं न शक्यंत इत्यतराणि सागरोपमाणि तेषां
कोटिकोट्यो ऽतरकोटिकोट्यः कियंत्य इत्याह विंशतिर्विंशतिसंख्या भवंति केत्याह नामेत्ति नामकर्मणि गोत्रे चो
त्कृष्टा स्थितिरुत्तरगाथायां जघन्यस्थितेर्भणिष्यमाणत्वादिहोत्कृष्टा स्थितिर्लभ्यते ततो ऽयमर्थः नामकर्मणि उत्कृष्टा स्थि
तिर्विंशतिकोटिकोट्यः सागरोपमाणां तथा गोत्रेपि उत्कृष्टा स्थितिर्विंशतिकोटीकोट्यः सागरोपमाणां सप्ततिकोटी
कोट्यः सागरोपमाणां मोहे मोहनीये इतरेषु आयुषोऽभिधास्यमाणत्वेन ततोद्धरितेषु ज्ञानावरणदर्शनावरणवेदनी
यांतरायलक्षणेषु चतुर्षु कर्मसु त्रिंशत्कोटीकोट्यः सागरोपमाणां प्रत्येकमुत्कृष्टा स्थितिर्भवति आयुःशब्दस्य
प्रत्येकं संबंधात् निरयत्ति निरयायुषि उत्कृष्टा स्थितिः त्रयः त्रिंशदुदधयः सागरोपमाणि सुरायुषि चोत्कृष्टा स्थि १५।
तिः त्रयः त्रिंशदुदधयः सागरोपमाणि भवंतीति २६ ॥ मुत्तुं अकसायठिइं बारमुहुत्ता जहन्न वेयणिए अट्ठ
ठ नाम गोएसु सेसएसु मुहुत्तंतो २७ व्या० इह वेदनीयकर्मणो द्विस्थितिर्द्विधा संभवति अकषायिणः प्रतीत्य स

॥

कषायिणश्च तत्राकषायिणो वेदनीयस्य स्थितिर्द्विसमयस्थितिका यतस्तत्कर्म प्रथमसमये वेदितं तृतीयसमये ऽकर्म + बद्धं द्वितीय समये वेदितं +
तामनुभवति सा चेह न विवक्ष्यते सकषायिणः स्थितिबंधस्यैवेहाधिकृतत्वादत एवोक्तं मुक्त्वा त्यक्त्वा अकषायिणामुपशांतमो
हक्षीणमोहसयोगिकेवलिनां जघन्यां वेदनीयस्थितिं तर्हि सकषायिणां जघन्या किं प्रमाणेत्याह द्वादशमुहूर्त्ता चतुर्विंश
तिघटिका जघन्या जघीयसी वेदनीये तृतीये कर्मणि स्थितिर्भवतीति अट्ठ नामगोएसुत्ति मुहूर्त्तशब्दस्यात्रापि संबंधा
त् प्रत्येकमष्टावष्टौ मुहूर्त्ता नामगोत्रयोर्जघन्या स्थितिर्भवति शेषेषु ज्ञानावरणदर्शनावरणमोहनीयायुरंतरा
यलक्षणेषु पंचसु कर्मसु मुहूर्त्तंतो त्रिमीयते इति मुहूर्त्तः मुहुः क्रियतीति वा मुहूर्त्तः पृषोदरादित्वादिष्टरूपसिद्धिः घटिकाद्वय
प्रमाणः कालो मुहूर्त्तस्यांतर्मध्ये मुहूर्त्तांतः अंतर्मुहूर्त्तप्रमाणा जघन्या स्थितिर्भवति इह च सेसएसु इत्यत्र ककारः स्वार्थिक इ
ति तथेहाबाधाकालः कर्मणोऽनुदयलक्षणो य उत्तराः प्रकृतीरुद्दिश्य वक्ष्यमाणस्याबाहा वाससयत्ति गाथावयवेन वक्ष्यते स एव
तदनुसारतो मूलप्रकृतिष्वपि द्रष्टव्यः तत्र ज्ञानावरणदर्शनावरणवेदनीयांतरायाणां त्रीणि वर्षसहस्राण्यबाधा द्रष्टव्या व
धमपीत्थमेतत्कर्म वर्षसहस्रत्रयं यावद्विपाकोदयलक्षणां बाधां न करोतीत्यर्थस्तथा चतुर्वर्षसहस्रत्र यलक्षणया बाधया
या ऊना हीना कर्मस्थितिः कर्मनिषेको द्रष्टव्यो निषेको नाम प्रथमसमये बहु द्वितीयसमये हीनं तृतीयसमये हीनतरं ततो
हीनतमं कर्मदलिकं स्थाप्यते यत्र एवं तत्कर्मदलिकस्य रचना विशेषः स्थाप्यते च अबाधां विहाय तत ऊर्ध्वं वेदनार्थं कर्मनिषेको

भवतीति सा च मोहनीयस्य सप्तवर्षसहस्राण्यबाधा अबाधोना च कर्मस्थितिः कर्मनिषेको निगदितलक्षणो
द्रष्टव्याः नामगोत्रयोर्द्वे वर्षसहस्रे बाधा बाधोना च कर्मस्थितिः कर्मनिषेकः आयुष्कस्य तु नरकायुः सुरा
युर्लक्षणस्योत्कृष्टा स्थितिः त्रयस्त्रिंशत् इतराणि पूर्वकोटीत्रिभागोऽबाधा अबाधोना च कर्मस्थितिः कर्मनिषेको ऽत्र वसर्ते वा

र्थं यथा निरयसुराउं मिति तित्तीसा इति निषेककाल एवोक्तो अत एव श्री शिवशर्मसूरिपादैः शतके तित्तीसुदहिआउं मिकेव
लो दो इत्येवं उक्तो सा इत्यत्र केवला बाधारहितेत्युक्तं तथा मूलप्रकृति स्थिति बंधप्रस्तावे पि निरयसुराउंमिति तित्तीसा इति उत्तर
? प्रकृति स्थिति प्रतिपादने तत्रैव ला ४ बा ५ मिति परिभावनीय एवमेव बाधा सर्वासामपि तम्मुकृत्तीत्यके ति प्ररूपिता मूलप्रकृ
तीनामुत्कृष्टेतर भेदा स्थितिः संप्रतमुत्तर प्रकृतीनामुत्कृष्टां स्थितिं प्रतिपादयन्नाह २७ ब: विग्घावरण १ ध३ असाय ८
तीसं ३० अट्ठार १८ सुहुम२ विगलतिगे ३ पढमा गि इ संघयणे १ दस १० दुसु वरिमेसु दुग वुड्ढी २८ व्या० नपुंसकखगइ सास
६ चउति गाथोक्त कोटाकोटी शब्दस्य सर्वत्र संबंधादेवं प्रयोजनीयं विघ्नान्यंतरायलाभलोगोपभोग वीर्यांतरायाख्यानि पंचा
आवरणानि च ज्ञानावरणपंचक दर्शनावरणनवक लक्षणानि चतुर्दश असातं चासातवेदनीयं समाहार द्वंद्वे विघ्नावरणा
साते विघ्नेषु पंचसु ज्ञानावरणेषु पंचसु दर्शनावरणेषु नवसु असातवेदनीये च त्रिंशत्कोटीकोट्यो उत्कृष्टा स्थिति सागरोपमाणामिति
सर्वत्र योज्यं अष्टादश कोटीकोट्य उत्कृष्टा स्थितिर्भवति केष्वित्याह त्रिकशब्दस्य प्रत्येकं संबंधात् सूक्ष्मत्रिके सूक्ष्म अपर्याप्तक साधा १
रणरूपे विकलत्रिके द्वीन्द्रिय त्रीन्द्रिय चतुरिन्द्रिय लक्षणे तथा प्रथमशब्दस्य प्रत्येकं योगात् प्रथमाकृतौ प्रथमसंस्थाने समचतुरस्र
नामनि प्रथमसंहनने वज्रर्षभनाराचाख्ये दशकोटीकोट्य उत्कृष्टा स्थितिर्भवति उपरिमेसु द्वयोर्वृद्धिरिति उपरितनेषु न्यग्रोधपरि
मंडलादिसंस्थानेषु ऋषभनाराचादिसंहननेषु च द्विकवृद्धिः सागरोपमकोटीकोटीदशकोपरि द्विकवृद्धिर्द्रष्टव्याः तद्यथा न्यग्रो
धपरिमंडलसंस्थान ऋषभनाराचसंहननयो द्वादश सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः सादिसंस्थाननाराचसंह १५२
ननयो चतुर्दश सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः कुब्जसंस्थान अर्धनाराचयोः षोडश सागरोपमकोटीकोट्य उत्
कृष्टा स्थितिः वामनसंस्थान कीलिकासंहननयोः अष्टादश सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः हुंडसंस्थान संहनन। +सेवार्त+
+ नं +

योर्विंशति सागरोपमकोटीकोट्य उत्कृष्टा स्थितिरिति २८ ब: चालीस ४० कसाएसुं १६ मिउ १ लहु १ निद्ध १ उन्ह १ सु
रहि १ सिय १ महुरे १ दस १० दो सड्ढ समहिया ते हालिद्दं बिलाईणं २९ व्या० चत्वारिंशत्सागरोपमकोटीकोट्यः कषायेषु
अनंतानुबंधि चतुष्क अप्रत्याख्यानावरण वरण चतुष्क प्रत्याख्यानावरण चतुष्क संज्वलन चतुष्क लक्षणेषु षोडशसु उत्कृ
ष्टा स्थितिः मृदु लघु स्निग्धोष्णानां चतुर्णां शुभानां स्पर्शानां सुरभिगंधस्य स्थितिरिति सितवर्णस्य मधुररसस्य दशेति दशसा
गरोपमकोटीकोट्य उत्कृष्टा स्थितिः तथा ते एव दश द्विसार्द्धसमधिकाः संतो हारिद्रम्लादीनां पश्चानुपूर्व्या उत्कृष्टा स्थितिर्वेदित
व्याः इयमत्र भावना: हारिद्रवर्णस्य आम्लरसस्य च सार्द्धत्रयोदश सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः लोहितवर्णकषाय
रसयोः पंचदश सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः नीलवर्णकटुकरसयोः सार्द्धसप्तदश सागरोपमकोटीकोट्य उत्कृष्टा स्थि
तिः कृष्णवर्णतिक्तरसयो विंशतिः सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः यद्यपि वर्णगंधरसस्पर्शचतुष्कमेवाविवक्षितःनेदं ब
धेऽधिक्रियते भेदराहित्येव च तस्य कर्मप्रकृत्यादिषु विंशति सागरोपमकोटीकोटीरूपा स्थितिर्निरूपिता तथापि वर्णादिचतु
ष्कभेदानां विंशतेरपि पृथक् पृथक् स्थितिः पंचसंग्रहे तिदिता ऽस्माभिरपि तथैवाभिहिता बंधे उपतीसवर्णादिचतुष्कमेवावि
ज्ञेयं तं गणनीयमिति २९ ब: दससुह विहगइ उच्चे सुरदुग थिरछक्क पुरिस रइ हासे १ मिच्छे सत्तरि १ [illegible] मणुदुग इत्थीसा
एसु पंनरस ३० व्या० दशसागरोपमकोटीकोट्य उत्कृष्टा स्थितिर्भवति केष्वित्याह शुभविहायोगतौ प्रशस्तविहायोगतौ उच्चै
र्गोत्रे सुरद्विके सुरगति सुरानुपूर्वी लक्षणे स्थिरषट्के स्थिरशुभसुभगसुस्वर आदेययशः कीर्तिसंज्ञिते पुरुषेषु पुरुषवेदे रतौ
हास्ये तथा मिथ्यात्वे सप्ततिः सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः तथा मनुजद्विके मनुजगति मनुजानुपूर्वी स्वरूपे स्त्रीवे
दे साते सातवेदनीये पंचदश सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः ३० ब: भय कुच्छ अरइ सो २१ विउव्वि [illegible] तिरि उर

ल ३ निरयदुगा २ नीए २ तेयपणपज्जथिरछक्के तसचउथावरइगपणिंदी २० नपुकुखगइ २ सासचउ ४ गुरुकक्ख
क्खरुक्ख २ सीय २ दुगंधे २ वीसं कोडाकोडी एवइया बाहवाससया २२ व्या० सयेऽकत्सायां जुगुप्सायां अरतिशो
के द्विकशब्दस्य प्रत्येकं संबंधात् वैक्रियशरीर वैक्रियांगोपांगरूपे तिर्यक्द्विके तिर्यग्गति तिर्यगानुपूर्वी लक्षणे औदारि
कद्विके औदारिकशरीर औदारिकांगोपांगरूपे नरकद्विके नरकगति नरकानुपूर्वी स्वरूपे नीचैर्गोत्रे तैजसकार्मणागुरुल तैजसपंचके
घु निर्माणोपघातात्तिथे अस्थिरषट्के अस्थिराशुभदुर्भगदुःस्वर अनादेयायशःकीर्त्तिःलक्षणे कीर्त्तियशःकीर्त्तिलक्षणे
त्रसचतुष्के त्रस बादर पर्याप्त प्रत्येकरूपे स्थावर इगत्ति एकेंद्रियजातौ पंचेंद्रियजातौ नपुत्ति नपुंसकवेदे कुखगतौ अप्र
शस्तविहायोगतौ सासचउत्ति उच्छ्वासचतुष्के उच्छ्वास उद्योत आतप पराघात लक्षणे गुरुकर्कशरूक्षशीतेषु अशुभस्पर्शेषु दुर्ग
धे दुरभिगंधे इत्येतासु द्विचत्वारिंशत्संख्यासु प्रकृतिषु विंशतिसागरोपमकोटीकोट्यः उत्कृष्टा स्थितिर्भवति तथात्राहारकव
र्जितानामौदारिकादिशरीराणां ये बंधनसंघातास्तेषामपि स्थितिः स्वशरीरस्थितितुल्यैव विज्ञेया तेन बंधनादीनामपि विं
शतिः सागरोपमकोटीकोट्यः उत्कृष्टा स्थितिरिति द्रष्टव्य तथा चोक्तं पंचसंग्रहटीकायां स्थित्युदयबंधकालाः संघातबंधना
नां स्वशरीरतुल्या ज्ञेयाः तदत्र स्थितितुल्यतया प्रयोजनमिति संप्रत्युक्तोत्तरप्रकृतीनामेवोत्कृष्टामबाधामाह एवइया बाहवा
ससयात्ति लिंगव्यत्ययादेतावंति वर्षशतान्यबाधा कर्मणः। प्रदेशविपाकाभ्यामनुदयकाल इत्यर्थः घटना भावार्थस्त्वयं
यासां प्रकृतीनां यावंत्यः कोटीकोट्यः स्थितिरुक्ता तासां तावंति वर्षशतान्यबाधेति तावन्मात्रेषु न वेद्यदलिनिक्षेपं क १५२
रोतीति यावत् तद्यथा पंचानां विघ्नप्रकृतीनां पंचानां ज्ञानावरणप्रकृतीनां नवानां दर्शनावरणप्रकृतीनां असातवेद
नीयस्य त्रिंशत्सागरोपमकोटीकोट्यः उत्कृष्टा स्थितिरुक्ता अबाधाकालोऽप्युत्कृष्टस्त्रिंशद्वर्षशतानि विदितव्यो यथा दानांत

रायमुत्कृष्टस्थितिकं बद्धं सत् त्रिंशद्वर्षशतानि यावन्न कांचिदपि स्वोदयतो जीवस्य बाधामुत्पादयति अबाधाही
नकर्मदलिकनिषेकः एवं सर्वप्रकृतिष्वपि वाच्यं यथा सूक्ष्मत्रिके विकलत्रिके चाष्टादशवर्षशतान्यबाधा अबाधाही
नश्च कर्मदलिकनिषेकः समचतुरस्रसंस्थानवज्रऋषभनाराचसंहननयोर्दशवर्षशतान्यबाधा अबाधाहीनश्च क
र्मदलिकनिषेकः न्यग्रोधपरिमंडलसंस्थानऋषभनाराचसंहननयोर्द्वादशवर्षशतान्यबाधा अबाधाहीनश्चक
र्मदलनिषेकः सादिसंस्थाननाराचसंहननयोः चतुर्दशशतान्यबाधा अबाधाहीनश्च कर्मदलिकनिषेकः कुब्जसं
स्थानअर्धनाराचसंहननयोः षोडशवर्षशतान्यबाधा अबाधाहीनश्च कर्मदलिकनिषेकः वामनसंस्थानकीलिकासं
हननयोः अष्टादशवर्षशतान्यबाधा अबाधाहीनश्चकर्मदलिकनिषेकः हुंडसंस्थानसेवार्त्तसंहननयोः विंशतिवर्षश
तान्यबाधा अबाधाहीनश्च कर्मदलिकनिषेकः षोडशसु कषायेषु चत्वारि वर्षसहस्राण्यबाधा अबाधाहीनश्चकर्मदल
निषेकः मृदुलघुस्निग्धउष्णस्पर्शसुरभिगंधश्वेतवर्णमधुररसलक्षणानां सप्तानां प्रकृतीनां वर्षसहस्रमेकमबाधाऽबा
धाहीनश्च कर्मदलिकनिषेकः हरिद्रवर्णाम्लरसयोः सार्धद्वादशवर्षशतान्यबाधाऽबाधाहीनश्च कर्मदलिकनिषे
कः लोहितवर्णकषायरसयोः पंचदशवर्षशतान्यबाधा अबाधाहीनश्चकर्मदलिकनिषेकः नीलवर्णकटुकरसयोः
सार्धसप्तदशवर्षशतान्यबाधाऽबाधाहीनश्च कर्मदलिकनिषेकः कृष्णवर्णतिक्तरसयोः वर्षसहस्रद्वयमबाधा अबाधा
हीनश्च कर्मदलिकनिषेकः तथा प्रशस्तविहायोगति उच्चैर्गोत्र सुरगति सुरानुपूर्वी स्थिरशुभसुभगसुस्वरादेययश
:कीर्त्तिपुरुषवेदहास्यरतिलक्षणानां त्रयोदशप्रकृतीनामेकं वर्षसहस्रमबाधा अबाधाहीनश्चकर्मदलिकनिषेकः मि
थ्यात्वस्य सप्तवर्षसहस्राण्यबाधा अबाधाहीनश्चकर्मदलिकनिषेकः मनुष्यगति। मनुष्यानुपूर्वीः स्त्रीवेद सातावेदनीयदल

क्षणानां चतसृणां प्रकृतीनां पंचदशवर्षशतान्यबाधा अबाधाहीनश्च कर्मदलिकनिषेकः तथा भयजुगुप्सा अरति
शोक वैक्रियशरीर वैक्रियांगोपांग तिर्यग्गति तिर्यगानुपूर्वी औदारिकशरीर औदारिकांगोपांग नरकगति नरकानुपूर्वी नी
चैर्गोत्र तैजस कार्मण अगुरुलघु निर्माण उपघात अस्थिर अशुभ दुर्भग दुःस्वर अनादेय अयशःकीर्ति त्रस बादर पर्याप्त प्र
त्येक स्थावर एकेंद्रियजाति नपुंसकवेद अप्रशस्तविहायोगति उच्छ्वास उद्योत आतप पराघात गुरु कर्कश रूक्ष शीत दुर
भिगंध लक्षणानां द्विचत्वारिंशत्प्रकृतीनां द्वे वर्षसहस्रे अबाधा अबाधाकालहीनश्च कर्मदलिकनिषेक इति "३१" "३२" अं॰ गु
रु कोडिकोडिअंतो तित्थाहाराण भिन्नमुहु बाहा लहुठिइ संखगुणूणा नरतिरियाणाउ पल्लतिगं "३३" व्या॰ स्थि
तिशब्दस्योत्तरपदस्यास्येहापि संबंधात् गुर्वी गरीयसी उत्कृष्टा स्थितिः सागरोपमाणां कोटीकोट्या अंतर्मध्ये तित्थाहाराणेति
तीर्थकरनाम आहारकशरीर आहारकांगोपांग लक्षणानां तिसृणां प्रकृतीनां भवतीति शेषः किमुक्तं भवति तीर्थकरना २
म्न आहारकद्विकस्य च सागरोपमाणामंतःकोटीकोटीप्रमाण एवोत्कृष्टः स्थितिबंधकालो भवति नोपरिष्टादिति भिन्नमुहु
बाहा इति प्राकृतत्वाद्दकारलोपे भिन्नमुहूर्तमंतर्मुहूर्तमात्रमेव कालमबाधा उदयाभावस्तूत्कृष्टा जघन्या वांतर्मुहूर्तमात्रैव त
तः परं दलिकरचनायाः सद्भावेनाप्रदेशोदयस्य संभवादिति केवलं तीर्थकरनामकर्मांतर्मुहूर्तादूर्ध्वं कस्य चित्प्रदेशत उदे
ति तदुदयश्चाशैश्वर्यादयरूपविशेषात् अन्येषां वेद्यो विशिष्टतरस्तस्य संभवतीति संभावयाम इति व्याख्यायते उत्कृष्टा तीर्थक
राहारकयोः स्थितिरुक्ता अथैतयोरेव जघन्यां स्थितिमाह लहुठिइ संखगुणूणत्ति लघुस्थितिः तीर्थकराहारकयोः संख्ये १५४
नसंख्यातकाललक्षणेन गुणेन गुणकारेण ऊना हीना संख्यगुणोना उत्कृष्टस्थितिबंधकाल एव सागरोपमांतःकोटीकोटीरू
पः संख्येयगुणहीनो जघन्यस्थितिबंधः सागरोपमांतःकोटीकोटीप्रमाण इति तात्पर्यं तथेहाप्याहारकस्य ये बंधनसंघाता

स्तेषामपि स्वशरीरस्थितिप्रमाणैव स्थितिर्विज्ञेयेति ननु तीर्थकरनामकर्म तीर्थकरभवाद्वाक् तृतीयभव एव बध्यते य
दागमः बज्झइ तं तु भगवओ तइयभवोसक्कइत्ताणं तत्कथं जघन्यतोऽप्यंतःसागरोपमकोटीकोटीप्रमाणा तस्य स्थितिरु
पपद्यते तदयुक्तमभिप्रायापरिज्ञानात् बज्झइ तं तु इत्यादिकं निकाचनापेक्षयोक्तमितरथा तु तृतीयभवाद्वाक्तरामपि
प्रबध्यते यदाह संशयशातशातनानिशिताकुंभकगारकल्पाः श्रीजिनभद्रगणिक्षमाश्रमणपादा विशेषणवत्यां
कोडाकोडी अयरोवमाण तित्थयरनामकम्मठिई बज्झइ य तं अणंतरभवंमि तइअंमि निद्दिट्ठं ततः कथमेतत्परस्परं युज्यते
अत्रोत्तरं जं बज्झइ त्ति भणियं निकाइअं तत्थ नियमोयं तदबंझफलं नियमा भयणा अनिकाइआवत्थे आह यदि तीर्थ
करनाम्नो जघन्यापि स्थितिरंतःसागरोपमकोटीकोटीप्रमाणा तर्हि तावत्या स्थितेस्तिर्यग्भवभ्रमणमंतरेण पूरयितुमश
क्यत्वात् तिर्यग्गतावपि तीर्थकरनामसत्कर्मा जंतुः कियंतं कालं यावद्भवेत् तथा च सत्यागमविरोधः आगमे तिर्यग्ग
तौ तीर्थकरनामसत्कर्मसत्ता प्रतिषिध्यते अत्रोच्यते निकाचितरूपे तीर्थकरनामकर्मणि तिर्यग्गतौ सतः प्रतिषेधात्
उक्तं च जमिह निकाइयतित्थं तिरियभवे तं निसेहियं संतं इयरंमि नत्थि दोसो उवट्टणुवट्टणासज्झे अस्या अक्षरगमनिका इ
हास्मिन् प्रवचने यत्तीर्थकरनामकर्म निकाचितमवश्यवेद्यतया व्यवस्थापितं तदेव स्वरूपेण सद्विद्यमानं तिर्यग्गतौ नि
षिद्धं इतरस्मिन् पुनरनिकाचिते उद्वर्तनापवर्तनासाध्ये तिर्यग्गतावपि विद्यमाने न कश्चिद्दोषः यतस्तस्य तत्स्थितिक
मप्यपवर्तनाकरणेन लघुस्थितिकं क्रियते उद्वलनया वा चतदन्यप्रकृतित्वेनावस्थाप्यते इति "नरतिरिआण उपल्लतिगं
ति नरतिरश्चामायुषोः पल्यत्रिकं पल्योपमत्रिकमुत्कृष्टा स्थितिरिति यद्यपि मूलप्रकृत्युत्कृष्टस्थितिप्रस्तावे देवनार
कायुषोः त्रयस्त्रिंशत्सागरोपमलक्षणैव स्थितिरुक्ता नरतिर्यगायुषोस्तु पल्योपमत्रयप्रमाणैव तथापि पूर्वकोटित्रिभा

गाधिके वासौ सर्वाबाधाकालस्तत्र वसेयं न त्वेवं तर्हि पूर्वकोटित्रिभागाधिकत्वं कस्माल्लोकं सतं असौ पूर्वकोटित्रिभागो ब १
धारूपतयैवोपयाति न पुनरुदयमायाति अतो यावती स्थितिरायुषो वेद्यते तावत्प्रमाणैवाबाधारहितास्त्रैवोपात्तत्पूर्वदोष
इति ३३ अ: इगविगलपुव्वकोडी पलियासंखंस आउचउअमणा निरुवकमाणछमासा अबाहसेसाणभवतंसो॥
३४ व्या० एकेंद्रिया विकलेंद्रियाश्च पूर्वाण्यागमप्रतीतानि तद्यथा पुव्वस्सउपरिमाणं सयरं खलु कोडिलक्खाउ
छप्पन्नं च सहस्सा बोधव्वा वासकोडीणं १ तेषां पूर्वाणां कोटी पूर्वकोटी तां पूर्वकोटीं यावदायुषो उत्कृष्टां स्थितिं बध्नंति न पू
र्वकोट्यभ्यधिकामपीति आयुः शब्दस्य आउचउअमणा इति पदाद्योजनीयः इदमत्र हृदयं एकेंद्रिया विकलेंद्रिया
श्चोत्कृष्टतोपि पूर्वकोट्यायुष्केष्वेव नरतिर्यक्षु समुत्पद्यंते न नारकदेवासंख्येयवर्षायुष्कतिर्यङ्मनुष्येषु अत एकेंद्रि
यविकलेंद्रियाणामुत्कृष्टायुर्बंधः पूर्वकोटी स्वस्वभवत्रिभागाभ्यधिका वेदितव्या एषां स्वस्वभवत्रिभागोऽबाधा ऽबाधाही
नश्च कर्मदलिकनिषेकः यदुक्तं कर्मप्रकृतौ सेसाण पुव्वकोडी साउतिभागो अबाहा सिं अत्र टीका शेषाणामेकेंद्रि
यद्वींद्रियत्रींद्रियचतुरिंद्रियाणां पर्याप्तापर्याप्तानां असंज्ञिपंचेंद्रियसंज्ञिपंचेंद्रियाणां वा पर्याप्त नामायुष उत्कृष्टस्थि
तिबंधकानां परभवायुषो उत्कृष्टस्थितिबंधः पूर्वकोटी स्वस्वभवत्रिभागाभ्यधिका वेदितव्या आयुषश्च उत्कृष्टस्वस्वभवत्रि
भागोऽबाधाकालः अबाधाकालहीनश्च कर्मदलिकनिषेकः पलियासंखंस आउचउअमणत्ति अमनसो मनोयो
गरहिता असंज्ञिनः पर्याप्ता इत्यर्थः पल्योपमासंख्यांशं पल्योपमासंख्येयभागं आयुषं चतुष्कं बध्नंति विभक्तिलोपश्च १५५
प्राकृतत्वात् किमुक्तं भवति असंज्ञिपंचेंद्रियेषु पर्याप्तेषु आयुरुत्कृष्टस्थितिबंधकेषु चतुर्णामप्यायुषां परभवसंबंधिना उ
त्कृष्टा स्थितिः पल्योपमासंख्येयभागमात्रा पूर्वकोटित्रिभागाधिका भवति पूर्वकोटित्रिभागश्चाबाधा अबाधाहीनश्च क

र्मदलिकनिषेकः यदवादि कर्मप्रकृतौ श्रीमदाराध्यपादैः आउचउक्क कोसं पल्लासंखिज्जभागअमणेसु इत्यायु
षामुत्कृष्टां स्थितिमतिधाय तेषामेवोत्कृष्टामबाधामाह निरुवक्कमाण छमासा अबाहसेसाण भवतंसो निरुपक्रमाणां सत्या सत्यभा १
मेति न्यायात् निरुपक्रमायुषां देवनारकाणामसंख्येयवर्षायुषां नरतिरश्चां चरमशरीराणां योग्यायुर्बंधकारिणां ष
ण्मासाः षण्मासप्रमाणा अबाधा व्यावलितिस्वल्पा वा भवतीति शेषः यतस्ते षण्मासावशेषायुष एवोत्तरभवप्रायोग्य
मायुर्बध्नंति यदाह साम्प्रतीयूषपयोधिः देवा नेरइया वा असंखवासाउआ य तिरिमणुया छम्मासवसेसाऊ परभवि
यं आउं बंधंतीति यथोक्तं एवाबाधाकालः केचित्तु मन्यंते युगलधर्मिकाः पल्योपमासंख्येयभागे निजायुषोऽवशि
ष्टमाने परभवायुष्कं बध्नंति तन्मतेनाबाधापि युगलधर्मिकाणां हि पल्योपमासंख्येयभागप्रमाणैवेति मंतव्यं तदु
क्तं पलियासंखिज्जंसं युगधम्मीणं वयंतन्ने इति सेसाण भवतंसोत्ति शेषाणां संख्येयवर्षायुषां सोपक्रमनिरुपक्रम १
युषां नरतिरश्चां भवस्य स्वकीयजन्मनस्त्र्यंशः त्रिभागो भवत्यंशोऽबाधेत्यत्रापि संबध्यनीयं यतस्ते निजजन्मनः त्रिभाग ऊ+
एवावशिष्टे सेसाउणो ति साए इति वचनादुत्कृष्टतः परभवप्रायोग्यमायुर्बंधं विदधतीति प्रतिपादितासर्वोत्तरप्रकृतीनाम
बाधान्विता उत्कृष्टा स्थितिरिदानीं तासामेव जघन्यां स्थितिं निरूपयितुकाम आह ३४ अ: लहुठिइबंधो संजलणलोह
पणविग्घनाणदंसेसु भिन्नमुहुत्तं ते अट्ठ जसुच्चे बारस य सायए १ ३५ व्या० लघुस्थितिबंधो जघन्यस्थिति
बंधो भिन्नमुहूर्तं भवति केषामित्याह संज्वलनलोभे प्रतीते पणशब्दस्य प्रत्येकं संबंधात् विघ्नपंचके दानलाभभोगोपभोग
वीर्यांतरायरूपे ज्ञानावरणपंचके मतिश्रुतावधिमनःपर्यायकेवलज्ञानावरणलक्षणे दंसेसुत्ति दर्शनचतुष्के च
क्षुरचक्षुरवधिकेवलदर्शनावरणस्वभावे कोऽर्थः ज्ञानावरणपंचकांतरायपंचकदर्शनचतुष्कसंज्वलनलोभलक्षण

णानां पंचदशप्रकृतीनां जघन्यस्थितिबंधोऽन्तर्मुहूर्तमात्र एव यतः संज्वलनलोभस्यानिवृत्तिबादरगुणस्थानके
शेषचतुर्दशप्रकृतीनां सूक्ष्मसंपरायगुणस्थानकचरमसमये स्वबंधव्यवच्छेदकालेऽन्तर्मुहूर्तमात्रैव स्थितिर्बध्यते।
तेऽत्र भवंति व्याख्यानतो विशेषप्रतिपत्तिरिति न्यायादन्तर्मुहूर्तं घटिकाद्वयप्रमाणं अष्टावष्ट संख्या यशःकीर्तिनाम उच्चैर्गोत्रयो
र्जघन्यस्थितिर्भवति बारस यत्ति द्वादशमुहूर्ताश्च पुनरर्थे स च भिन्नक्रमः ततः सातेसातवेदनीये कर्मणीति उक्तं च कर्म
प्रकृतौ भिन्नमुहुत्तं आवरणविग्घ दंसणचउक्कलोहंते बारससायमुहुत्ता अट्ठय जसकित्तिउच्चेसु २५ बः दो इगमासो २
पक्खो २ संजलणा तिगे पुंमट्ठवरिसाणि सेसाण उक्कोसाउ मिच्छत्तठिईइजं लद्धं २६ व्या० द्वौ मासौ एको मासः पक्षश्च जघन्या
स्थितिः केषामित्याह संज्वलनत्रिके क्रोधमानमायारूपे एतदुक्तं भवति संज्वलनक्रोधे द्वौ मासौ जघन्या स्थितिः संज्वलनमाने एको मा
सो जघन्या स्थितिः संज्वलनमायायां पक्षः पंचदशदिनात्मको जघन्या स्थितिः पुमट्ठवरिसाणित्ति। पुंवेदेऽष्टौ वर्षाणि जघन्या स्थि
तिः यतश्चतसृणामप्येतासां प्रकृतीनामनिवृत्तिबादरगुणस्थाने निजबंधव्यवच्छेदसमये प्रतिपादितप्रमाणैव स्थितिर्बध्यते इति
यासां द्वाविंशतेः प्रकृतीनां स्वबंधव्यवच्छेदसमये जघन्या स्थितिरन्तर्मुहूर्तादिका संभवति तासां तथैव साप्रतिपादिता आहारकद्वि
कतीर्थकरलक्षणप्रकृतित्रयस्य तदुत्कृष्टस्थितिप्रतिपादनप्रस्ताव एव जघन्याप्यसामभिहिता आयुश्चतुष्टयस्य स्थितिस्तत्प्र
स्तावे वैक्रियषट्कस्य च जघन्यस्थितिर्वक्ष्यते शेषपंचाशीतेः प्रकृतीनां बादरपर्याप्तैकेंद्रियएव प्राप्यमाणजघन्यस्थितिबंध
नां जघन्यस्थितिनिरूपणार्थं करणमाह सेसाण उक्कोसाउ इत्यादि गाथार्धं शेषाणां भणितवक्ष्यमाणपंचत्रिंशत्प्रकृतिसोऽवशिष्टा १५६
नां निद्रापंचकादीनां पंचाशीतिप्रकृतीनामुत्कृष्टात्सर्वप्रकृतीनां निजनिजोत्कृष्टस्थितिबंधान्मिथ्यात्वस्थित्या सप्ततिकोटीको
टीरूपाया भागे हृते यल्लभ्यते तावत्सा जघन्यस्थितिः एवं च निद्रापंचके असातवेदनीये त्रयः सप्तभागाः [३/७] मिथ्यात्वस्य सागरोप

मे संज्वलनवर्जद्वादशकषायाणां चत्वारः सप्तभागाः [४/७] स्त्रीवेदमनुष्यद्विकयोस्त्रयः चतुर्दशभागाः [१॥/७] यतः पंचदशानां पंचमे
भागे त्रयः सप्तमेऽश्च पंचमे भागे त्रयः सप्तमेऽश्च पंचमे सा। गोश्चतुर्दशभागस्यांते सूक्ष्मत्रिके विकलेंद्रिय। [७] जातित्रिके च नव पंचा
त्रिंशद्भागाः [९/३५] यत एतेषामष्टादशकोटीकोट्य उत्कृष्टा स्थितिरुक्ता तस्याः सप्ततिभागे हृते लब्धा अष्टादश सप्ततिभागाः [१८/७०]
अनयोश्च [३५] सार्धभागहारकरणेऽपवर्तनयोरपवर्तीकरणे संपन्ना [९] एवमन्यत्रापि निजनिजमुत्कृष्टस्थितिकं साऽपरा
शिं मिथ्यात्वस्थितिरूपं भागहारकराशिं चाधीकृत्य जघन्या स्थितिर्वाच्येत [३५] था स्थिरशुभसुभगसुस्वरआदेयहास्यरतिशुभविहाये २
गति वज्रऋषभनाराचसंहननसमचतुरस्रसंस्थानसुरभिगंधशुक्लवर्णमधुररसमृदुलघुस्निग्धउष्णस्पर्शलक्षणस्य प्रकृतिसप्तद
शकस्य एकः सप्तभागः [१/७] शेषस्य च शुभाशुभवर्णादिचतुष्कस्य द्वौ सप्तभागौ [२/७] केवलवर्णादिचतुष्कं बंधे विशेषितमेवाधिक्रिय
ते इति भागेवोक्तं ततः [७] सप्तभागद्वयमेव च चतुर्णामपि सामान्येन दृष्टव्यं द्वि [७] तीययोः संस्थानसंहननयोः षट्पंचत्रिंशद्भा
गाः [६/३५] तृतीययोः संस्थानसंहननयोः सप्त पंचत्रिंशद्भागाः [७/३५] चतुर्थयोः संस्थानसंहननयोरष्टौ पंचत्रिंशद्भागाः [८/३५] पंचमा
योः [३५] संस्थानसंहननयोर्नव पंचत्रिंशद्भागाः [९/३५] शेषा [३५] णां त्रसबादरपर्याप्तप्रत्येकअगुरुलघुउपघातपरा [३५] घातउ
च्छ्वासअस्थिरअशुभदुर्भगदुःस्वरअनादेयअय [३५] शःकीर्तिऔदारिकशरीरऔदारिकांगोपांगतिर्यग्गतितिर्यगानुपूर्वीएकें
द्रियजातिपंचेंद्रियजातिनिर्माणआतपउद्योतअप्रशस्तविहायोगतिहुंडकसंस्थानसेवार्तसंहननतैजसकार्मणनीचैर्गो
त्र अरतिशोकभयजुगुप्सानपुंसकवेदलक्षणानां पंचत्रिंशत्प्रकृतीनां सागरोपमस्य द्विसप्ततिभागौ [२/७] इयं चासां जघन्या स्थितिः ए
केंद्रियानेवोद्दिश्य प्राप्यते न शेषजीवानिति तथा जघन्यस्थितिप्रस्तावादेकेंद्रियाणामुत्कृष्टापि स्थि [७] तिबंधो वाच्यो यथा च एव ज
घन्यस्थितिबंधः पल्योपमासंख्येयभागमात्राभ्यधिक उत्कृष्टो भवतीति तथा चोक्तं जाएगिंदिजघन्ना पलियासंखंससंजुया साउते

५

कर्मग्रंथस्वोपज्ञ-
त्तिः १५७

सिंडिढित्ति इति पंचसंग्रहवृत्तिपाठेण व्याख्यातं अथ चेदमेव गाथार्धं कर्मप्रकृतिपाठेणान्यथा व्याख्यायते सेसाणमित्यादि शेषा-
णामवशिष्टानां पंचाशीतेः प्रकृतीनामित्यर्थः उक्कोसाउत्ति सूत्रत्वात्तत्र मितिन्यायात् उत्कृष्टादिति सामान्योक्तावपि वर्गोत्कृष्टात्
स्थितिबंधादिति द्रष्टव्यं अथ कोयं वर्गोत्कृष्टः स्थितिबंध उच्यते सजातीयप्रकृतीनां समुदायो वर्गः यथा मतिज्ञानावरणादिप्र-
कृतिसमुदायो मतिज्ञानावरणवर्गः चक्षुर्दर्शनावरणादिप्रकृतिसमुदायो दर्शनावरणवर्गः वेदनीयप्रकृतिसमुदायो वेद-
नीयवर्गः दर्शनमोहनीयप्रकृतिसमुदायो मोहनीयवर्गः कषायमोहनीयप्रकृतिसमुदायः कषायमोहनीयवर्गः नोकषाय-
मोहनीयप्रकृतिसमुदायो नोकषायमोहनीयवर्गः नामप्रकृतिसमुदायो नामवर्गः गोत्रप्रकृतिसमुदायो गोत्रवर्गः अंतरायप्र-
कृतिसमुदायोऽन्तरायवर्गः इत्येवंविधस्य वर्गस्य संबंधी उत्कृष्टो वर्गोत्कृष्टः स्थितिबंधोऽभिधीयते तस्माद्वर्गोत्कृष्टात् स्थितिबंधान्मि-
थ्यात्वस्थित्या सागरोपमकोटीकोटीसप्ततिरूपया भागे हृते यल्लब्धं यदवाप्तं तत्पल्योपमासंख्येयभागोनं सत् जघन्यस्थिति-
तयावतीति गम्यते अ अत्र वर्गोत्कृष्टादिति व्याख्यानेनैतदवसीयते वर्गांतर्गतानामवमस्थिति कानामपि सातवेदनीयादीनां १
प्रकृतीनां जघन्यस्थितिप्राप्तये न तु निजनिजवर्गस्योत्कृष्टत्रिंशत्कोटीकोट्यादिस्थितिर्विभजनीया न तु स्वकीया पंचदशको-
टीकोट्यादिकेति तथा यद्यपि पल्योपमासंख्येयभागोनमिति नोक्तं तथापि पल्यासंख्यंशहीन लघुबंधे इति अनंतरगाथावयवे-
नैकेंद्रियाणां लब्धसप्तभागाः पल्योपमासंख्येयभागोना एव जघन्यस्थितितयाऽभिधास्यते अतोऽत्रापि जघन्यस्थितिप्रस्तावात्
पल्योपमासंख्येयभागोनत्वमवसीयते यद्वादि द्वर्वादिकं सितकं तत्सकलदलनकेसरिविशिष्टैः श्रीशिवशर्मसूरिपादैः कर्म- २ १५७
प्रकृतौ वग्गुक्कोसठिईणं मिच्छत्तुक्कोसगेण जं लद्धं सेसाणं तु जहन्ना पल्लासंखिज्जभागूणा अस्या अक्षरगमनिका ज्ञाना-
वरणप्रकृतेः समुदायो ज्ञानावरणीयवर्गः, दर्शनमोहनीयवर्गः कषायमोहनीयवर्गः नोकषायमोहनीयवर्गः नामवर्गः।

+ दर्शन +

+ चारित्रमोहनीयसमुदायो चारित्रमोहनीयवर्गः + पं५ +

+ दर्शनावरणीयवर्गः वेदनीयवर्गः +

गोत्रवर्गः अंतरायवर्गः एतेषां वर्गाणां या आत्मीया आत्मीया स्थितिः त्रिंशत्सागरोपमकोटीकोट्यादिलक्षणा तस्या मिथ्या-
त्वस्योत्कृष्टया स्थित्या सागरोपमसप्ततिकोटीकोटीरूपया भागे हृते सति यल्लभ्यते तत्पल्योपमासंख्येयभागोनं सत् शेषा-
णां प्रकृतीनां जघन्यस्थितिः परिमाणमवसेयं तथाहि दर्शनावरणवेदनीयवर्गयोरुत्कृष्टा स्थितिः त्रिंशत्सागरोपमकोटीको-
टीप्रमाणा तस्या मिथ्यात्वस्य स्थित्या सप्ततिसागरोपमकोटीकोटीप्रमाणया भागे हृते सति शून्यं शून्येन पातयेदिति वचनात्
लब्धाः त्रयः सागरोपमसप्तभागाः ३/७ ते पल्योपमासंख्येयभागोना निद्रापंचकासातावेदनीययोः जघन्या स्थितितया मंतव्याः द-
र्शनमोहनीयवर्गस्य चोत्कृष्टा स्थितिः सागरोपमकोटीकोटीसप्ततिरूपा तस्या मिथ्यात्वस्थित्या तावत्यैव भागे हृते लब्धाः
सप्त सागरोपमसप्तभागाः ७/७ ते च पल्योपमासंख्येयभागोना मिथ्यात्वस्य जघन्यस्थितितयावसेयाः कषायमोहनीयवर्गस्य
चोत्कृष्टा स्थितिश्चत्वारिंशत्सागरोपमकोटाकोट्यस्तस्या मिथ्यात्वस्थित्या भागे हृते लब्धाश्चत्वारः सागरोपमसप्तभागाः ४/७
ते च पल्योपमासंख्येयभागोनाः संज्वलनरहितकषायद्वादशकस्य जघन्यस्थिततया बोधव्याः नोकषायमोहनीयस्य वर्गो-
त्कृष्टा स्थितिर्विंशतिसागरोपमकोटीकोट्यस्तस्याश्च मिथ्यात्वस्थित्या भागे हृते सति लब्धौ द्वौ सागरोपमसप्तभागौ २/७ तौ पल्यो-
पमासंख्येयभागोनौ पुरुषवेदवर्जानामष्टानां नोकषायाणां जघन्यस्थितितयावसेयौ नामगोत्रयोश्च प्रत्येकं विंशतिसा-
गरोपमकोटीकोट्यो वर्गोत्कृष्टा स्थितिः तस्याश्च मिथ्यात्वस्थित्या भागे हृते लब्धौ द्वौ सागरोपमसप्तभागौ २/७ तौ च पल्योपमासंख्ये- + च +
यभागोनौ देवगतिदेवानुपूर्वीनरकगतिनरकानुपूर्वीवैक्रियशरीरवैक्रियांगोपांगआहारकशरीराहारकांगो-
पांगतीर्थकरयशःकीर्तिवर्जानां नाम्नः शेषसप्तपंचाशत्प्रकृतीनां नीचैर्गोत्रस्य च जघन्यस्थितितया बोधव्यौ इत्युक्ता सर्व-
प्रकृतीनां जघन्या स्थितिः इदानीमेकेंद्रियाणां सर्वस्वप्रायोग्योत्तरप्रकृतीनामुत्कृष्टां जघन्यां च स्थितिमाह ॥ २६ ॥ वः ॥

अयमुक्कोसो गिंदिसु पलिआसंखंसहीण लहुबंधो कमसो पणवीसाए पन्ना सय सहस संगुणिओ ॥ ३७ ॥ व्या
० अयमित्यनंतरोद्दिष्टो वर्गोत्कृष्टस्थितिबंधो मिथ्यात्वस्थित्या भागे हृते लब्धसप्तभागरूप उत्कृष्टस्थितिबंध एकेंद्रियेषु ज्ञात
व्यः तथाहि ज्ञानावरणपंचकदर्शनावरणनवकवेदनीयद्विकांतरायपंचकलक्षणानामेकविंशतिप्रकृतीनां त्रयः सागरो
पमसप्तभागाः ३/७ यत एतद्वर्गाणां त्रिंशत्सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः तस्या मिथ्यात्वस्थित्या भागे हृते त्रय एव सागरोप
मसप्तभागा लभ्यंते इत्येवमन्यत्रापि भागभावना कार्या ततश्च मिथ्यात्वस्य सप्त सागरोपमसप्तभागाः ७/७ कषायषोडशक ३॥
स्य चत्वारः सागरोपमसप्तभागाः ४/७ नोकषायनवकस्य द्वौ सागरोपमसप्तभागौ २/७ एकेंद्रियबंधायोग्यदे[ ]वगति । देवानु
पूर्वी नरकगतिनरकानुपूर्वीवै[ ]क्रियशरीरवैक्रियांगोपांगआहारकद्विक[ ]तीर्थंकरवर्जानां शेषाणां नाम्नोऽष्टपंचाश
त्प्रकृतीनां गोत्रद्वयस्य च प्रत्येकं द्वौ द्वौ सागरोपमसप्तभागाविति एकेंद्रियाणामुत्कृष्टस्थितिबंधः इदानीं तेषामेव जघन्यस्थि
तिमाह पल्लासंखंसेत्यादि पल्लस्य पल्योपमस्यासंख्यांशेनासंख्येयभागेन हीनो न्यूनः पल्यासंख्यांशहीनो य एवोत्कृष्टस्थितिबंध
: सप्तभागत्रयादिकः किमित्याह लघुबंधो जघन्यस्थितिबंधो भवतीति अयमभिप्रायः यासां प्रकृतीनां यावत्प्रमाणः सप्तभाग
रूपः स एव पल्योपमासंख्येयभागहीनस्तेषां जघन्यस्थितितया मंतव्य इति निरूपित एकेंद्रियाणामुत्कृष्टो जघन्यश्च स्थितिबंधो ग्र
थापूर्वार्द्धेन संप्रत्ययमेवैकेंद्रियोत्कृष्टस्थितिबंधो यैर्गुणाकारैः संगुणितस्तादित्यो द्वीन्द्रियादीनामसंज्ञिपर्यंतानां प्रायोग्यस्थितित
या भवति तान्गुणाकारानुत्तरार्द्धेनाह कमसो पणवीसाए इत्यादि क्रमशः क्रमेण यथासंख्यमित्यर्थः पंचविंशत्याः संगुणितः प्राकृत १५८
त्वाद्विभक्तिलोपे पंचाशता संगुणितः शतेन संगुणितः सहस्रेण संगुणितः ततः किमित्याह ॥ ३७ ॥ विगलअसंनिसु जिट्ठो कणिट्ठ
पल्लसंखभागूणो सुरनरयाउ समा दस सहस्स सेसाउ खुड्डभवं ॥ ३८ ॥ व्या० विकलेषु विकलेंद्रियेषु द्वीन्द्रियत्रीन्द्रियचतुरिंद्रियेषु

+ एकेंद्रियाणा
मुत्कृष्टस्थितिबंध
इत्कृता साता वेद
प्रमाण सप्तभा
गरूप +

असंज्ञिषु संमूर्छजपंचेंद्रियतिर्यङ्मनुष्येषु ज्येष्ठो उत्कृष्टः स्थितिबंधो भवति अयमत्र भावना एकेंद्रियाणामुत्कृष्टः स्थितिबंधः सागरो
पमसप्तभागत्रयादिकः पंचविंशत्या गुणितो द्वीन्द्रियाणां ज्येष्ठः सन् सर्वप्रकृतीनामुत्कृष्टस्थितिबंधो भवति स एवैकेंद्रियाणामुत्कृष्टः स्थि
तिबंधः पंचाशता संगुणितस्त्रींद्रियाणामुत्कृष्टः स्थितिबंधः स एवैकेंद्रिया
णामुत्कृष्टः स्थितिबंधः शतेन गुणितश्चतुरिंद्रियाणां ज्येष्ठः स्थितिबंधः सहस्रेण गुणितोऽसंज्ञिपंचेंद्रियाणां स्वप्रायोग्यसर्वप्रकृ
तीरधिकृत्य ज्येष्ठः स्थितिबंधो भवतीति द्वीन्द्रियादीनामेव जघन्यस्थितिबंधमानमाह कणिट्ठ पल्लसंखभागूण त्ति पल्यस्य प
ल्योपमस्यासंख्येयभागेन संख्याततमभागेन ऊनो न्यून उत्कृष्ट एव स्थितिबंधः कनिष्ठो जघन्यस्थितिबंधो भवति एतदुक्तं भ
वति द्वीन्द्रियत्रीन्द्रियचतुरिंद्रियासंज्ञिपंचेंद्रियाणां य आत्मीयोत्कृष्टः स्थितिबंधः पल्योपमसंख्येयभागहीनः कनिष्ठकश्चतुष्ट
यो भवति आयुश्चतुष्टयस्य जघन्यस्थितिमानमाह सुरनारकायुषो देवनारकायुष्कयोः समा वर्षाणि दश सहस्राणि
समा दश सहस्राणि दश वर्षसहस्राणि इत्यर्थो जघन्या स्थितिर्भवतीति प्रक्रमः सेसाउ खुड्डभवं ति शेषायुषोस्तिर्यङ्
मनुष्यायुष्कयोः खुड्डभवं ति क्षुल्लकः सर्वभवापेक्षया लघीयान् लिंगव्यत्ययाद्भवो जन्म क्षुल्लकभवः स जघन्या स्थिति
र्भवतीति प्ररूपिता जघन्यस्थिति रिदानीं सर्वोत्तरप्रकृतीः प्रतीत्य जघन्याबाधामाह ॥ ३८ ॥ सव्वाण वि लहुबंधे भिन्नमुहू
अबाह आउजिट्ठे वि केइ सुराउसमं जिणमंतमुहू बिंति आहारं ॥ ३९ ॥ व्या० सर्वासामपि सर्वप्रकृतीनां विंशत्युत्तरशतसंख्या
नामपि लघुबंधे जघन्यस्थितिबंधे भिन्नमुहूर्त्तमंतर्मुहूर्त्तमबाधा अनुदयकालः किं सर्वप्रकृतीनां जघन्यबंधे एवायं ज
घन्याबाधा आहोश्विदस्ति कासांचिदियमुत्कृष्टेपीत्याह आउजिट्ठे वि आयुषां ज्येष्ठेपि ज्येष्ठबंधेपि न केवलं जघन्य एवेत्य
पिशब्दार्थः जघन्याबाधा अंतर्मुहूर्त्तप्रमाणा भवतीति योगः एतेनायुष्कचतुरंगिकेषु बाधते श्चित्तं तद्यथा उत्कृष्टआयुः

+ विंशत्यासं +

DR BHAU DAJI

५

कर्मग्रंथस्वो०ट त्रि:१५९

स्थितिबंधे ज्येष्ठाऽबाधा १ ज्येष्ठे आयुःस्थितिबंधे जघन्याबाधा २ जघन्ये आयुःस्थितिबंधे ज्येष्ठाबाधा ३ जघन्यायां स्थितिबं
धे जघन्याबाधेति ॥ अथ कृतो तीर्थकराहारकद्विकयोः प्राङ् निरूपितामपि जघन्यां स्थितिं पुनर्मतांतरेणाह केइ सुराउसमं
त्यादि केचिदाचार्याः सुरायुः देवायुः केन दशवर्षसहस्रप्रमाणेन समं तुल्यं सुरायुःसमं देवायुस्तुल्यां स्थितिकं जघन्यतो ब
ध्नते किंतदित्याह जिणत्ति तीर्थकरनामकर्म ब्रुवते तथा च ते एवमाहुः सुरनारयाउ अणंदसवाससहस्स लहुं सतित्थाणं ति
तलघ्वी जघन्या स्थितिः सतीर्थयोः तीर्थकरनामयुक्तयोरित्यर्थः तथा आहारंति आहारकद्विकमाहारकशरीरआहा
रकांगोपांगलक्षणमंतर्मुहूर्तं जघन्यतो बध्नते किंचिदूनमुहूर्तं स्थितिकं जघन्येन बध्नतीति ब्रुवते तथा चैतदुक्तं आहा
रकविग्घावरणाण किंचूणं ति किंचिदूनमुहूर्तं जघन्या स्थितिः ॥ तिर्यङ्मनुष्यायुषोर्जघन्या स्थितिः क्षुल्लकभव
प्रमाणा भवतीति प्रागुक्तं ततस्तं क्षुल्लकभवं सप्रपंचं निरूपयितुकामो गाथायुगलमाह ३९ सत्तरससमहिया किर इ
गाणुपाणंमि हुंति खुड्डभवा १७ अंशाः १३९५ छेदांशाः ३७७३ सगतीससयतिहुत्तर पाणू पुण इगमुहुत्तंमि ॥ ४० ॥ ३७७
३ पणसट्ठिसहस्सपणसय छत्तीसा इगमुहुत्तखुड्डभवा आवलियाणं दोसय छप्पन्ना एगखुड्डभवे ॥ ४१ ॥ व्या० सप्तदशाधि
काः दशांससहस्रमधिकाः किंविशेषमर्गलाः किलेत्याप्तोक्तौ विद्येवं ब्रुवते एकानप्राणे हृष्टानवकल्यादिगुणोपेतस्य जंतोर्यः का
स्मन्नुच्छ्वासनिःश्वासरूपे भवंति क्षुल्लकाः भवाः चत्र्याणपाणे मित्ति उकारः स्वराणां स्वरा इति प्राकृतसूत्रेण अयमर्थः एक
स्मिन् प्राणापाने क्षुल्लकभवाः समधिकाः सप्तदश भवंतीति किल प्राहो ब्रुवते एते च साधिकसप्तदश क्षुल्लकभवा मुहूर्तगतक्षु
ल्लकभवग्रहणराशेर्वक्ष्यमाणगाथोपन्यस्तस्य तस्य मुहूर्तगतप्राणापानराशिनैव भागे हृते लभ्यंते अतः प्रथमं मुहूर्तांत
र्गतप्राणापानराशेर्भागहारकरूपस्य प्रमाणनिरूपणार्थमाह सगतीससयतिहुत्तरत्यादि सप्तत्रिंशच्छतानि

१५९

त्रिसप्तत्यधिकान्यंकतोऽपि ३७७३ पाणंत्ति प्राकृतत्वात् प्राणापाना उच्छ्वासनिःश्वासाः पुनरेकमुहूर्ते घटिकाद्वयरूपे भवंति उक्ते १
भागहारकोराशिरधुना भाज्यस्य मुहूर्तांतर्गतक्षुल्लकभवग्रहणराशेः प्रमाणमाह पणसठ्ठीत्यादि किल पंचषष्टिसह
स्राणि पंचशतानि षट्त्रिंशदधिकानि अंकतोऽपि ६५५३६ एकमुहूर्ते क्षुल्लकभवा एकमुहूर्ते क्षुल्लकभवग्रहणानि भवंती
त्यर्थः पंचषष्टिसहस्रपंचशतषट्त्रिंशदधिकलक्षणस्य मुहूर्तगतक्षुल्ल कगतक्षुल्लकभवग्रहणराशेर्भाज्यस्य मुहूर्तांतर्ग
तप्राणापानराशिना त्रिसप्तत्यधिकसप्तत्रिंशच्छतप्रमाणेन भागे हृते सति यल्लभ्यते तदेकत्र प्राणापाने क्षुल्लकभवग्रहण
प्रमाणं भवतीति तानि च सप्तदश १७ तथा येऽर्भागहारांकमानेऽशाः क्षुल्लकभवग्रहणं भवति तेऽत्रैकत्र प्राणापाने अष्टाद
शस्यापि क्षुल्लकभवग्रहणस्यांशाः पंचनवत्यधिकत्रयोदशशतप्रमाणा अवशिष्यंते अष्टसप्तत्यधिकत्रयोविंशतिश
तानि च शतानां न पूर्यंत इति स्थापना ८: [१७ अंशाः १३९५ / छेदांशाः ३७७३] अतो यदुक्तं सत्तरससमहिया किर इगाणपाणंमि हुंति
खुड्डभवा इति तद्युक्तमिति क्षुल्लकभव ग्रहणं च सर्वेषामप्यौदारिकशरीरिणां भवतीत्येवसेयं भग
वत्यामेवमेवोक्तत्वात् कर्मप्रकृत्यादिषु औदारिकशरीरिणां तिर्यङ्मनुष्याणामायुषो जघन्यस्थितेः क्षुल्लकभवग्रहणरू
पायाः प्रतिपादनाच्च यत्पुनः शाबरकटीकायां क्षुल्लकभवग्रहणं वनस्पतिष्वेव प्राप्यते इत्युक्तं तन्मतांतरमित्यवसेय
मिति संप्रत्येकस्मिन् क्षुल्लकभवग्रहणे आवलिकाद्वारेण कालमानं निरूपयितुकामो यावत्य आवलिका एकस्मि
न् क्षुल्लकभवग्रहणे भवंति तदेवाह आवलिआणं दोसयेत्यादि आवलिकानां असंख्येयानां समयानां समुदयसमिति
समागमेणं सा एगा आवलियत्ति वचनात् इत्यागमप्रतिपादितस्वरूपाणां द्वे शते षट्पंचाशदधिके भवत एकक्षुल्लकभवे एक
क्षुल्लकभवग्रहणे इति प्रतिपादिते स्थितिबंधप्रसंगागतं क्षुल्लकभवग्रहणप्रमाणं नत्वोत्कृष्टस्थितिबंधस्यैव क्रियत

ज्ञो जघन्यस्थितिबंधश्च सर्वाः प्रकृतीराश्रित्य संप्रत्येता एव प्रकृतीः प्रतीत्य उत्कृष्टस्थितिबंधस्वामिनो निरूपयन्नाह
॥४०॥४१॥ त्ति ॥ अविरयसम्मेतित्थं आहारगामराउअपमत्तो मिच्छद्दिट्ठी बंधइ जिट्ठठिइं सेसपयडीणं ॥४२॥ व्या० अविरत
सम्यक्त्वोऽविरतसम्यग्दृष्टिर्व्याख्यानतो विशेषप्रतिपत्तिरिति न्यायान्मनुष्यः पूर्वं नरकबद्धायुष्को नरकं जिगमिषुरवश्यं मि
थ्यात्वं यत्र समये प्रतिपद्यते ततोऽनंतरेऽर्वाक्स्थितिबंधे तिष्ठंति तीर्थंकरनामोत्कृष्टस्थितिकं बध्नाति तित्थयरं मिमएसो
अविरयसंमो समेयइ इति वचनात् इयमत्रता भावना तीर्थंकरनाम्नोऽविरतसम्यग्दृष्ट्यादयोऽपूर्वकरणावसाना बंधा-
का भवंति किंतु उत्कृष्टां स्थितिमुत्कृष्टसंक्लेशेन बध्यते स च तीर्थंकरनामबंधकेषु विरतस्यैव यथोक्तविशेषणविशिष्टस्या-
स्यत इति शेषव्युदासेन अस्यैवोपादानमिति भावः तत्र तिर्यंचं तीर्थंकरनाम्नः प्रबंधप्रतिपन्नाः प्रतिपद्यमानकाश्च नवपत्य
येनैव भवंतीति मनुष्यग्रहणं बद्धतीर्थंकरनामकर्मा विशुद्धमबद्धनरकायुर्नरकं न व्रजतीति पूर्वं नरकबद्धायुष्कस्य ग्र-
हणं क्षायिकसम्यग्दृष्टिश्च श्रेणिकादिवत्सम्यक्त्वोऽपि कश्चिन्नरकं प्रयाति किंतु तस्य विशुद्धत्वेनोत्कृष्टस्थित्यबंधक
त्वात्तस्यापृथक्त्वेदप्रकृतत्वान्नासौ गृह्यतेऽतः तीर्थंकरनामकर्मोत्कृष्टस्थितिबंधकत्वान्मिथ्यात्वाभिमुखस्यैव ग्रहणमिति
तथा आहारकद्विकमाहारकशरीराहारकांगोपांगलक्षणं पमत्तेति प्रमत्तसंयतो अप्रमत्ततां वानिवर्तमान इति वि
शेषोद्भवः उत्कृष्टस्थितिकं बध्नाति अशुभत्वादीयं स्थितिरुत्कृष्टसंक्लेशे नैवोत्कृष्टा बध्यते तद्बंधकश्चाप्रमत्तयतिरप्रमत्तताव १
न्निवर्तमान एवोत्कृष्टसंक्लेशयुक्तो जायते इतीदं विशेष्यते तथा अमरायुर्देवायुष्कं प्रमत्तसंयतः पूर्वकोट्यायुरप्रमत्तता
वाभिमुखो वेद्यमानपूर्वकोटीलक्षणायुषो भागद्वये गते सति तृतीयभागस्याद्यसमये उत्कृष्टस्थितिकं पूर्वकोटीत्रिभाग
धिकं त्रयः त्रिंशत्सागरोपमलक्षणं बध्नाति पूर्वकोटीत्रिभागस्य द्वितीयादिसमयेषु बध्नतो नोत्कृष्टत्वं स्यात् ऽबाधया प

रिगलितत्वेन मध्यमत्वप्राप्तेरित्याद्यसमयग्रहणं अप्रमत्ततावाभिमुखता विशेषतदिकिम र्थमिति चेदुच्यते शुभेयं स्थितिर्वि
शुद्ध्या बध्यते सा चास्याऽप्रमत्ततावाभिमुखस्यैव लभ्यत इति तर्ह्यप्रमत्तस्य कस्मादेतद्बंधकत्वेन नोच्यते इति चेदुच्यते अप्रमत्तस्यायु
र्बंधारंभनिषेधात् देवाउयं पमत्तो इति वचनात् प्रमत्तेनैवारब्धमायुर्बंधमप्रमत्तः कदाचित्समर्थयते देवाउयं च एक्कं नायव्वं अपमत्तंमि
इति वचनात् शेषाणां षोडशोत्तरशतसंख्यप्रकृतीनां उत्कृष्टस्थितिमुत्कृष्टस्थितिं मिथ्यादृष्टिः सर्वपर्याप्तिपर्याप्तः सर्वसंक्लिष्टो ब
ध्नाति यतः स्थितिरशुभत्वात् संक्लेशप्रत्यया च संक्लिष्टश्च बंधकेषु मध्ये मिथ्यादृष्टिरेव भवतीति भावः अत्र च प्रायोग्यासर्वसंक्लि
ष्टत्वमुच्यते यावता तिर्यङ्मनुष्यायुषी उत्कृष्टे तत्प्रायोग्यविशुद्धो बध्नातीति द्रष्टव्यं ततो शुभस्थितिकत्वेन विशुद्धिजन्यत्वात् ॥
सव्वठिईणमुक्कोसगो उक्कोससंकिलेसेणं विवरीए य जहन्नो आउगतिगवज्जसेसाणं ति ननु यदि विशुद्धिद्वयमायुष्कद्वयं
बध्यते तर्हि मिथ्यादृष्टेः सकाशात् सास्वादनो विशुद्धतरः प्राप्यते स कस्मादेतद्बंधकत्वेन नोक्तो न च वक्तव्यं तिर्यङ्मनुष्या
युषी सास्वादनो न बध्नाति तद्बंधस्य सप्ततिकादिष्वस्यानुज्ञानात् पाचोक्तमायुः संबंधभंगकावसरे सप्ततिकाटीकायां तिर्य
गायुषो बंधे मनुष्यायुषो उदये तिर्यङ्मनुष्यायुषी सति एषो विकल्पो मिथ्यादृष्टेः सास्वादनस्य वा मनुष्यायुषो बंधे मनुष्यायु
ष उदये मनुष्यमनुष्यायुषी सति एषोऽपि विकल्पो मिथ्यादृष्टेः सास्वादनस्य वा तत्कथमुक्तं मिच्छद्दिट्ठी बंधइ जिट्ठठिइं सेसपय
डीणमिति अत्र प्रतिविधीयते सत्यमपि हि सामान्यतो मनुष्यतिर्यगायुर्बंधमनुज्ञायामसंख्येयवर्षायुष्कयोग्यमुत्कृष्टं पल्य
त्रयायुर्द्वयं सास्वादनतो न निवर्तयति सास्वादनस्य गुणप्रतिपातोन्मुखत्वेन गुणाभिमुखविशुद्धमिथ्यादृष्टेः सकाशाद्विशु
द्धाधिकस्यानवगमात् मानत्वात् शास्त्रांतरेऽपि च मिथ्यादृष्टेः सकाशादविरतादय एव यथोत्तरमनंतगुणविशुद्धाः प्रत्यपादि न सा
स्वादनः न चैतन्निजमनीषिकाशिल्पिकल्पितं यदाह श्रीशिवशर्मसूरिपादाः सव्वुक्कोसठिईणं मिच्छद्दिट्ठी उ बंधउ त्त

णां उ आहारगतित्थयरं देवाउं वा विमुत्तूणं ॥ इह शेषं मिथ्यादृष्टिः षोडशोत्तरशतप्रकृतीनां तस्यामुत्कृष्टस्थितिबंधकः सामान्येनैवोक्तः
स च नारकादिभेदेन चिंत्यमानश्चतुर्धा भवति ततो नारकास्तिर्यंचो मनुष्या देवाश्च मिथ्यादृष्टयः पृथक्केषां कर्मणां स्थिति
मुत्कृष्टां बध्नंतीति भेदतश्चिंतयन्नाह ॥ ४२ ॥ विगलसुहुमाउतिगं तिरिमणुआ सुरविउव्विनिरयदुगं
एगिंदिथावरायव आईसाणा सुरुक्कोसं ॥ ४३ ॥ व्या॰ त्रिकशब्दस्य प्रत्येकं संबंधाद् विकलत्रिकं द्वी
न्द्रियत्रीन्द्रियचतुरिन्द्रियजातिलक्षणं सूक्ष्मत्रिकं सूक्ष्मापर्याप्तसाधारणलक्षणं आयुःत्रिकं देवायुर्वर्जं नारक
तिर्यग्मनुष्यायुर्लक्षणं द्विकशब्दस्यापि प्रत्येकं संबंधात् सुरद्विकं सुरगतिसुरानुपूर्वीस्वरूपं वैक्रियद्वि
कं वैक्रियशरीरवैक्रियांगोपांगलक्षणं नरकद्विकं नरकगतिनरकानुपूर्वीलक्षणमित्येतासां पंच
दशप्रकृतीनामुत्कृष्टां स्थितिं तिर्यग्मनुष्या एव मिथ्यादृष्टयो बध्नंति न देवनारकाः देवनारका ह्येतासां मध्ये ति
र्यग्मनुष्यायुर्द्वयं मुक्त्वा शेषाः त्रयोदशप्रकृतीर्भवप्रत्ययेनैव बध्नंति तिर्यङ्मनुष्यायुषोरपि देवकुर्वादिप्राये
णोत्कृष्टः त्रिपल्योपमलक्षणः स्थितिबंधः प्रकृतस्तत्र च देवनारका भवप्रत्ययादेव नोत्पद्यंते इत्येतद्बंधोप्य
मीषां न संभवति तस्माद्देवतिर्यङ्मनुष्यायुषामुत्कृष्टस्थितिके पूर्वकोट्यायुषः तिर्यङ्मनुष्या मिथ्यादृष्टयः तत्
प्रायोग्यविशुद्धाः स्वायुःत्रिभागाद्यसमये वर्त्तमाना बध्नंति सम्यग्दृष्टेरिति विशुद्धमिथ्यादृष्टेश्च देवायुर्बंधः
स्यादिति मिथ्यादृष्टित्वं तत्प्रायोग्यविशुद्धत्वविशेषणद्वयं नारकायुषः पुनरेत एव तत्प्रायोग्यसंक्लिष्टा वाच्या १६१
ः अत्यंतशुद्धस्यात्यंतसंक्लिष्टस्य चायुर्बंधस्य सर्वथा निषेधादिति नरकद्विकवैक्रियद्विकयोः त्वेत एव सर्वसंक्लि
ष्टाः पूर्वोक्तोत्कृष्टस्थितेर्बंधका वाच्याः विकलजातित्रिकसूक्ष्मत्रिकयोस्तु तत्प्रायोग्यसंक्लिष्टा इष्टव्याः अति

संक्लिष्टा हि प्रस्तुतप्रकृतिबंधमुल्लंघ्य नरकप्रायोग्यमेव निर्वर्त्तयेयुर्विशुद्धास्तु विशुद्धितारतम्यात्पंचेंद्रियतिर्यक्प्रा
योग्यं वा मनुष्यप्रायोग्यं वा देवप्रायोग्यं वा बध्नीयुरिति तत्प्रायोग्यसंक्लेशग्रहणं देवद्विकस्यापि तत्प्रायोग्यसंक्लिष्टा इष्टव्याः
अतिसंक्लिष्टा नामधोवर्त्तिमनुष्यादिप्रायोग्यं बंधसंभवाद् विशुद्धे पुनरुत्कृष्टबंधाभावादिति ता ह्येताः पंचदशापि प्रकृतयः
तथा एकेंद्रियजातिस्थावरनाम आतपनामलक्षणस्य प्रकृतित्रिकस्य आईशानात् ईशानदेवलोकमभिव्याप्य सुरा दे
वाः कोऽर्थः भवनपतयो व्यंतरा ज्योतिष्काः सौधर्मेशानदेवाश्चोत्कृष्टां स्थितिं बध्नंति तथाहि ईशानादुपरितनदे
वा नारकाश्च एकेंद्रियेषु नोत्पद्यंते इत्येकेंद्रियप्रायोग्यान्येतानि न बध्नंत्येवेति तन्निषेधः तिर्यग्मनुष्यास्त्वेतावति संक्ले
शे वर्त्तमाना एतद्बंधमतिक्रम्य नरकप्रायोग्यमेव बध्नंतीति तेषामपि निषेधः ईशानांतास्तु देवाः सर्वसंक्लिष्टा अप्येकेंद्रि
यप्रायोग्यमेव बध्नंत्यतस्त एव स्थावरैकेंद्रियातपलक्षणप्रकृतित्रयस्य विंशतिसागरोपमकोटीकोटीलक्षणमुत्कृष्टस्थि
तिं बध्नंतीति ॥ ४३ ॥ तिरिउरलदुगुज्जोअं छिवट्ठसुरनरयसेस चउगइआ ॥ आहारजिणमपुव्वो नियट्टिसंज
लणपुरिसलहुं ॥ ४४ ॥ व्या॰ द्विकशब्दस्य प्रत्येकं संबंधात् तिर्यग्द्विकं तिर्यग्गतितिर्यगानुपूर्वीरूपं औदारिकद्विकं औ
दारिकशरीरऔदारिकांगोपांगलक्षणं उद्योतनाम सेवार्त्तसंहननं नाम इत्येतासां षण्णां प्रकृतीनामुत्कृष्टस्थितिं सुरनारका १
बध्नंति सर्वत्र विसंक्लिष्टपदोपलक्षितत्वात् मनुष्यतिर्यंचः तेषु स्थितिबंधार्हसंक्लेशे वर्त्तमानाः एतासां षट्प्रकृतीनामुत्कृष्टतोऽप्यष्टा १
दशकोटीकोटीलक्षणामेव मध्यमां स्थितिमुपरचयंति अथाप्यधिकसंक्लेशे वर्त्तमाना गृह्यंते तर्हि प्रस्तुतप्रकृतिबंधमतिक्रम्य
नरकप्रायोग्यमुपरचयेयुः देवनारकास्तु सर्वोत्कृष्टसंक्लेशेऽपि तिर्यग्गतिप्रायोग्यमेव बध्नंति न नरकगतिप्रायोग्यं तत्र
तेषामुत्पत्त्यभावात्तस्माद्देवनारका एव सर्वसंक्लिष्टाः प्रस्तुतप्रकृतिषट्कस्य विंशतिसागरोपमकोटीकोटीलक्षणमुत्कृष्टस्थि

तिं स्वयंति अत्र च सामान्योक्तावपि सेवार्त्तसंहननौदारिकांगोपांगलक्षणप्रकृतिद्वयस्योत्कृष्टस्थितिबंधका देवा ईशानादु
परितनसनत्कुमारादय एव द्रष्टव्या न ईशानांता देवास्ते हि तत्प्रायोग्यसंक्लेशे वर्त्तमानाः प्रकृतप्रकृतिद्वयस्योत्कृष्टतोऽष्टाद
शकोटीकोटीलक्षणां मध्यमामेव स्थितिं स्वयंति अथ सर्वोत्कृष्टसंक्लेशग्रहणात तर्ह्येकेंद्रियप्रायोग्यमेव निर्वर्त्तयेयुर्न चैकें
द्रियप्रायोग्यबंधे एते प्रकृती बध्यते तेषां संहननोपांगाभावात् सुरनेरइयाण्गं दियाय सेवेअसंघयणा इति वचनात् सनत्कु
मारादिदेवास्तु नः सर्वसंक्लिष्टा अपि पंचेंद्रियतिर्यक्प्रायोग्यमेव बध्नंति नैकेंद्रियप्रायोग्यं तेषामेकेंद्रियेषूत्प॰ त्त्यभावात्तस्मात्
प्रस्तुतप्रकृतिद्विकस्य विंशतिसागरोपमकोटीकोटीलक्षणामुत्कृष्टस्थितिं सर्वसंक्लिष्टाः सनत्कुमारादय एव बध्नंति नाधस्तना
देवा इति तदेवं जिननाम आहारकदेवायुर्विकलत्रिक सूक्ष्मत्रिक आयुष्कत्रिक देवद्विक वैक्रियद्विक एकेंद्रियजातिस्था
वरनाम आतपनाम तिर्यग्द्विक औदारिकद्विक उद्योतनाम सेवार्त्तसंहननलक्षणानामष्टाविंशतिप्रकृतीनामुत्कृष्टस्थि
तिबंधस्वामिन उक्ताः शेषप्रकृतीनां तु का वार्त्तेत्याशंक्याह सेसाण चउगइय त्ति गणिताष्टाविंशतिप्रकृतिभ्यः शेषाणां द्विन
वतिसंख्यप्रकृतीनां मिथ्यादृष्टयः चतुर्गतिका उत्कृष्टां स्थितिं बध्नंति तत्रैता अशुभवर्णचतुष्क तैजसकार्मण अगुरु
लघु निर्माण उपघात भय जुगुप्सा मिथ्यात्व कषायषोडशक ज्ञानावरणपंचक दर्शनावरणनवक अंतरायपंचक लक्ष
णानां सप्तचत्वारिंशतो ध्रुवबंधिप्रकृतीनां ऽर्थव्यावर्णितस्वरूपाणां अध्रुवबंधिनीनां मध्ये असात अरति शोक नपुंस
कवेद पंचेंद्रियजाति हुंडसंस्थान पराघात उच्छ्वास अशुभविहायोगति त्रस बादर पर्याप्तक प्रत्येक अस्थिर अशुभ दुःस्वरदु १६२
र्भग अनादेय अयशःकीर्त्ति नीचैर्गोत्रलक्षणानां चत्वारिंशतप्रकृतीनां सर्वोत्कृष्टसंक्लेशे उत्कृष्टां स्थितिं चतुर्गतिका अपि
मिथ्यादृष्टयो बध्नंति शेषाणां त्वध्रुवबंधिनीनां सातहास्यरतिस्त्रीपुंवेदमनुष्यद्विकसेवार्त्तवर्ज्जसंस्थानपंचककुंडवर्ज्ज

संस्थानपंचक प्रशस्तविहायोगति स्थिर शुभ सुभग सुस्वर आदेय यशःकीर्त्ति उच्चैर्गोत्रलक्षणानां पंचविंशतिप्रकृतीनां २
तद्बंधकेषु तत्प्रायोग्यसंक्लिष्टाश्चतुर्गतिका अपि मिथ्यादृष्टय उत्कृष्टां स्थितिं बध्नंतीति उक्ता उत्कृष्टस्थितिबंधस्वामिनो अ
थ जघन्यस्थितिबंधस्वामिन आह आहारजिणमपुव्वो इत्यादि आहारकद्विकं जिननाम लघुं लघुस्थितिकं जघन्य
स्थितिकं करोतीति शेषः क इत्याह अपुव्वुत्ति पदैकदेशे पदसमुदायोपचारादपूर्वोऽपूर्वकरणक्षपकस्तद्बंधस्य चरमस्थि
तिबंधे वर्त्तमानः स्थितिमाश्रित्य तस्य यः तद्बंधकेषु अस्यैवातिविशुद्धत्वात् तिर्यग्मनुष्यदेवायुर्वर्ज्ज कर्म्मणां च जघन्यस्थितेः
विशुद्धिप्रत्ययत्वात् तथा अनियट्टिसंजलणपुरिस लहुं ति संज्वलनानां क्रोधमानमायालोभलक्षणानां चतुर्णां प्रकृ
तीनां पुरुषवेदस्य च लघुं त्ति लघुस्थितिं जघन्यस्थितिबंधं अनियट्टि त्ति अनिवृत्तिबादरक्षपकस्तद्बंधस्य यथास्वं
चरमस्थितिबंधे वर्त्तमानः करोति तद्बंधकेष्वस्यैवातिविशुद्धत्वादिति ॥ ४४ ॥ सायजसुच्चावरणा विग्घं सुहुमो
विउव्विछ असंनी संनी विअ आउ बायर पज्जेगिंदी उ सेसाणं ॥ ४५ ॥ व्या० सातं सातवेदनीयं जस त्ति यशःकीर्त्ति
नाम उच्च त्ति उच्चैर्गोत्रं आवरणं त्ति ज्ञानावरणपंचकं दर्शनावरणचतुष्कं विघ्नमंतरायं पंचकं सुहुम त्ति सूक्ष्मसंपरायः
क्षपकः चरमस्थितिबंधे वर्त्तमानो लघुस्थितिकं करोति तद्बंधकेष्वस्यैवातिविशुद्धत्वात् विउव्विछ असंनि त्ति वैक्रियष
ट्कं नरकद्विक वैक्रियद्विक देवद्विक लक्षणं असंज्ञी तिर्यक्पंचेंद्रियः सर्वपर्याप्तिभिः पर्याप्तो लघुस्थितिकं करोति किमुक्तं
भवति वैक्रियषट्कस्य हि नामगोत्रयोः नाम्नश्च द्वौ सप्तभागौ पल्योपमासंख्येयभागोनौ एकेंद्रियाणां जघन्यस्थितिः प्रति
पादिता सा च सहस्रगुणिता सागरोपमसहस्रभागसहस्रद्वयप्रमाणा वैक्रियषट्कस्य जघन्या स्थितिर्भवति वैक्रियषट्कस्य
जघन्यस्थितिबंधका असंज्ञीपंचेंद्रिया एव नैकेंद्रियादयस्ते चासंज्ञिपंचेंद्रिया जघन्यां स्थितिमेवं नून्यूनामपि यद्युक्तं वे + बध्नंति +

उ बित्रअक्के सहस्सताडियं असंनिणो तेसिं पलियासंखंसूणं ठिई अबाहूणियनिसेगो असंज्ञादरगमनिका वा गुरुकोसठि
ईणं मिच्छत्तुक्कोसेयाऽऽ इत्यनेन करणेन यल्लब्धं तत्सहस्रताडितं सहस्रगुणितं ततः पल्योपमासंख्यांशेन सागेमन्यू
नैरा दे क्रियषट्कं देवगति देवानुपूर्वी नरकगति नरकानुपूर्वी वैक्रियशरीर वैक्रियांगोपांगलक्षणे जघन्यस्थिति
परिमाणमवसेयं कुतइत्याह यत् यस्मात्कारणात् तेषां वैक्रियषट्कलक्षणानां कर्मणामसंज्ञिपंचेंद्रियाएव ज
घन्यस्थितिबंधकाः ते च जघन्यां स्थितिमेतावतीमेव बध्नंति न न्यूनां अंतर्मुहूर्त्तमबाधा अबाधाहीना च कर्मस्थितिः
कर्मदलिकनिषेक इति किंच एताः षट्प्रकृतयो यथासंभवं नरकदेवलोकप्रायोग्या बध्यंते तत्र च देवनारकासं
ज्ञिमनुष्यैकेंद्रियविकलेंद्रिया नरकेषु देवलोकेषु नोत्पद्यंत एवेति तेषामेतद्बंधासंभवः तिर्यङ्मनुष्यास्तु संज्ञिनः
स्वतावादेवप्रकृतषट्प्रकृतिस्थितिं मध्यमामुत्कृष्टां वा कुर्वंतीति तेपी दोपदिताः संनी वि अत्राउत्ति संज्ञी अपि
ष्टादसंज्ञी गृह्यंते ततः संज्ञी असंज्ञी वा आयुः चतुःप्रकारमपि जघन्यस्थितिं करोति तत्र देवनारकायुषोः पंचेंद्रियति
र्यङ्मनुष्याः मनुष्यतिर्यगायुषोः पुनरेकेंद्रियादयो जघन्यस्थितिकर्त्तारो द्रष्टव्याः उक्ताः पंचत्रिंशत्प्रकृतीनां जघन्य
स्थितिबंधस्वामिनः शेषाणामाह बायरपज्जेगिंदि सेसाणं ति शेषाणां तल्लिखितोद्धरितानां निद्रापंचक असातवेदनी
य अनंतानुबंधिचउक्क अप्रत्याख्यानावरणचउक्क प्रत्याख्यानावरण नपुंसकवेद स्त्रीवेद हास्यादिषट्क मिथ्यात्वम
नुष्यगति तिर्यग्गति जातिपंचक औदारिकशरीर औदारिकांगोपांग तैजसकार्मण संहननषट्क संस्थानषट्क वर्णचउ
क्क मनुजानुपूर्वी तिर्यगानुपूर्वी प्रशस्ताविहायोगति पराघात उच्छ्वास आतप उद्योत अगुरुलघु निर्माण उपघात त्र
सनवक स्थावरदशक नीचैर्गोत्रलक्षणानां पंचाशीतिप्रकृतीनां बादरः पर्याप्तेष बंधः केषु सर्वविशुद्धएकेंद्रियाः प ९६२

ल्योपमासंख्येयभागहीनसागरोपम द्विसप्तभागाधिकां जघन्यां स्थितिं करोति अन्ये एकेंद्रियास्तथाविधविशुद्ध्यभावादुत्त
रां स्थितिमुपकल्पयंति विकलेंद्रियपंचेंद्रियेषु शुद्धिरधिका पि लभ्यते केवलं ते विशुद्ध्यभावादेवप्रस्तुतप्रकृतीनामल्पां स्थि
तिमुपस्वयंतीति शेषपरिहारेणायमेकेंद्रियस्यैव ग्रहणमिति प्रतिपादितं जघन्यस्थितिबंधमाश्रित्य स्वामित्वं अथ स्थिति
बंधएवोत्कृष्टानुत्कृष्टादिसंगकान्विचारयितुमाह ॥ उक्कोसजहन्नेयरभंगा साई अणाइ धुव अधुवा। चउहा स
ग अजहन्नो सेसतिगे आउचउसु दुहा ॥४६ व्या० बंधः आत्मप्रकर्षप्राप्तोत्कृष्टबंधः जघन्यबंधः इतरत्रि उत्कृष्टबंधप्रति
तपक्षोऽनुत्कृष्टबंधः जघन्यबंधप्रतिपक्षोऽजघन्यबंधः ४ इति चत्वारो भंगाः तत्र ययोऽन्योरुत्तरबंधोनास्ति उत्कृष्टबंधः ततोऽ
धस्तात्समयहानिमादौ कृत्वा यावज्जघन्यबंधस्तावत्सर्वोऽप्यनुत्कृष्टबंधः इत्युत्कृष्टानुत्कृष्टप्रकाराभ्यां सर्वेपि स्थितिविशेषाः संगृही
ताः यस्मादन्यो हीनतरबंधो नास्ति स जघन्यबंधः ततः परं समयवृद्धिमादौ कृत्वा यावदुत्कृष्टस्तावत्सर्वोऽप्यजघन्यबंध इति जघ
न्याजघन्यप्रकाराभ्यां वा सर्वेपि स्थितिविशेषाः संगृहीताः अन्यथा बंधस्य चत्वारो भंगाः तद्यथा सादिबंधः अनादिबंधः ध्रुवबंध
ः अध्रुवबंधश्चेति तत्र यः सर्वथा व्यवच्छिन्नः पश्चात्पुनरपि भवति स सादिबंधः यस्त्वनादिकालात्संतानभावेन प्रवृत्तो न कदा
चिद्व्यवच्छिन्नः सोऽनादिबंधः यः पुनरग्रेपि न कदाचिद्व्यवच्छेदं प्राप्स्यति सो अभव्यसंबंधो ध्रुवः यः पुनरायत्यां कदाचिद्व्यवच्छेदं प्रा
प्स्यति स भव्यसंबंधी बंधोऽध्रुवबंधः एवं चउहा सगअजहन्नो त्ति सप्तानां मूलप्रकृतीनां ज्ञानावरणदर्शनावरणवेदनीय
मोहनीयनामगोत्रांतरायलक्षणानां संबंधिन्या याः स्थितयस्तासां यो जघन्योऽजघन्यबंधः स चतुर्धा चतुर्विकल्पः सादिरना
दिः ध्रुवोऽध्रुवश्चेति तथाहि एतासां प्रकृतीनां मध्ये मोहनीयस्य क्षपका निवृत्तिबादरस्वरमस्थितिबंधे जघन्यः स्थितिबंधः प्राप्यते
शेषप्रकृतीनां क्षपकसूक्ष्मसंपरायचरमस्थितिबंधे सोऽजघन्यः ततोऽन्यः सर्वोऽप्युपशमश्रेणवप्यजघन्यो भवत्युपशमकस्य

विरूपकात् द्विगुणबंधकत्वाद् जघन्य एव भवतीति भावः ततश्चोपशांतमोहावस्थायामजघन्यबंधस्याबंधको भूत्वा यदा
प्रतिपत्य पुनरपि श्रुतप्रकृतिसप्तकस्याजघन्यं बध्नाति तदाजघन्यबंधः सादिर्भवति बंधव्यवच्छेदानंतरं तत्प्रथमतया बध्यमा
नत्वात् उपशांतमोहाद्यवस्थामबंधस्थानमप्राप्तपूर्वाणां बंधव्यवच्छेदाभावेन अनादिकालान्निरंतरं बध्यमानत्वादनादिर्ध्रुवश्च
व्यानां ध्रुवोऽभव्या विपर्ययत्वात् भव्यानामध्रुवोऽभव्या विपर्ययत्वात् सेसतिगे साइअधुवो इति शेषत्रिके जघन्योत्कृष्टानुत्कृष्टलक्षणे
एतासां मूलप्रकृतीनां बंधे ऽध्रुवे सादिरध्रुवश्च भवति तथाहि एतासां प्रकृतीनां मध्ये मोहनीयस्य रूपकानिवृत्तिबादरचरमस्थितिबं
धे शेषाणां तु रूपकसूक्ष्मसंपरायचरमस्थितिबंधे जघन्यो बंधोऽनंतरमेवोक्तः स चाबद्धपूर्वोऽजघन्यबंधादवतीर्य तत्प्रथमतया
तस्मिन्नेव समये बध्यत इति सादिस्ततः परं क्षीणमोहाद्यवस्थायां सर्वथा न भवतीत्यध्रुव इति द्वावेव विकल्पौ संभवतो न शेषो उ
त्कृष्टस्तु त्रिंशत्सागरोपमकोटीकोट्यादिकः सर्वसंक्लिष्टमिथ्यादृष्टिपर्याप्तसंज्ञिपंचेंद्रियेन लभ्यते स चानुत्कृष्टबंधादवतीर्य कदा
चिदेव बध्यते न सर्वदेति सादिः अंतर्मुहूर्त्तोर्ध्वं परं नियमादनुत्कृष्टं बध्नतोऽसौ निवर्त्तत इत्यध्रुवः उत्कृष्टस्य प्रतिपक्षो अनुत्कृष्टोऽपि
सादिः ततः परं जघन्यतोऽन्तर्मुहूर्त्तेनोत्कृष्टतस्त्वनंतोत्सर्पिणीपर्यंते पुनरुत्कृष्टं बध्नतोऽनुत्कृष्टो निवर्त्तत इत्यध्रुव इत्येवमुत्कृष्ट १
ऽनुत्कृष्टौ पुद्गलाः परिभ्रमंतीति द्वयोरप्यनादिध्रुवत्वासंभवः आउचउसु इति आयुः चतुर्थ्यो द्विप्रकारो द्विविकल्पः सादि
रध्रुवश्च बंधो भवतीत्यर्थः आयुषो हि उत्कृष्टादिबंधे वेद्यमानायुषस्त्रिभागादौ प्रतिनियतकाल एव बध्यमानत्वात् सादित्वं
अंतर्मुहूर्त्तात् उपरमवश्यमुपरमत इत्यध्रुव इति ४६ ॥ चउभेओ अजहन्नो संजलणावरणनवगविग्घाणं । सेसतिगि साइ अ १६४
ध्रुवो तह चउहा सेसपयडीणं ॥ ४७ ॥ व्या० संज्वलनानां क्रोधमानमायालोभलक्षणानां चतुर्णां आवरणनवकस्य ज्ञा २
नावरणपंचकदर्शनावरणचतुष्कलक्षणस्य विघ्नानां पंचानां दानलाभभोगोपभोगवीर्यांतरायलक्षणानां सर्वेषामजघन्यो बं

धश्चतुर्भेदः साद्यनादिध्रुवाध्रुवलक्षणश्चतुर्विकल्पो भवति तथाहि एतासां सप्तदशप्रकृतीनां सर्वोऽपि युक्तित उपशमश्रे
ण्यां बंधव्यवच्छेदं कृत्वा प्रतिपत्य पुनरजघन्यं बध्नतः सादिस्तद्बंधः तत्स्थानमप्राप्तस्य सर्वस्यानादिः ध्रुवोऽभव्यानां इति सर्वमिदम
र्ववदेव भावनीयं एतासामेव प्रकृतीनां सेसतिगि साइअधुवुत्ति शेषत्रिके जघन्योत्कृष्टानुत्कृष्टलक्षणे सादिरध्रुवश्च द्विविधो भव
+य+ ति तथाहि संज्वलनचतुष्कस्य रूपकानिवृत्तिबादरगुणस्थाने आत्मीयआत्मीयबंधव्यवच्छेदसमये जघन्यो बंधो ज्ञानावरणपंचकद
र्शनावरणचतुष्कांतरायपंचकलक्षणानां चतुर्दशप्रकृतीनां सूक्ष्मसंपरायचरमस्थितिबंधे जघन्यः स च तत्प्रथमतया बध्यमान त्वा
त्वात् सादिस्ततऊर्ध्वं न भवतीत्यध्रुवः उत्कृष्टानुत्कृष्टौ प्रागेव ज्ञानावरणे उक्तवत् तयोः साद्यध्रुवत्वं तथैव भावनीयमिति तह चउ
हा सेसपयडीणंति शेषप्रकृतीनां भणिताष्टादशप्रकृतिभ्योऽवशिष्टानां द्व्युत्तरशतसंख्यानां प्रकृतीनां चतुर्धा उत्कृष्टानुत्कृ
ष्टजघन्याजघन्यलक्षणेन चतुर्विकल्पः तद्बंधः सादिरध्रुवश्च भवति तथाहि निद्रापंचकमिथ्यात्वप्रथमद्वादशकषायभयजु
गुप्सातैजसकार्म्मणवर्णादिचतुष्कागुरुलघुउपघातनिर्माणलक्षणनाम्नामेकोनत्रिंशतः प्रकृतीनां सर्वविशुद्धबादरपर्याप्तै
केंद्रियजघन्यस्थितिबंधं विदधाति ततोंतर्मुहूर्त्तेन संक्लिष्टो भूत्वा अजघन्यबंधं करोति ततस्तथैवं भवे भवांतरे वा विशुद्धिमासा
द्य पुनरपि स एव जघन्यबंधं निर्मापयत्येवं जघन्याजघन्योः परावृत्तिर्भवतीति द्वावप्येतौ जघन्याजघन्यौ साद्यध्रुवौ भवतः उत्कृष्ट
बंधं पुनरेतासां सर्वसंक्लिष्टपंचेंद्रियो विदधाति अंतर्मुहूर्त्तात् पुनरप्यनुत्कृष्टबंधं विरचयति ततः पुनरपि कदाचिदुत्कृष्टमित्येवं प
रावर्त्तितत्वात् एतावपि साद्यध्रुवौ भवतः शेषाणामध्रुवबंधिनीनामौदारिकद्विकवैक्रियाहारकद्विकसंस्थानषट्कसंहननष
ट्कजातिपंचकगतिचतुष्कविहायोगतिद्विकआनुपूर्वीचतुष्टयजिननाम उच्छ्वासनाम उद्योतनाम आतपनाम पराघात
+स्थावरदशक त्रसदशक उच्चैर्गोत्र नीचैर्गोत्र सातासातवेदनीय हास्यरति अरति शोक वेद त्रिक आयुश्चतुष्टयलक्षणानां त्रिसप्ततिप्र

DR BHAU DAJI

कृतीनां जघन्यादि स्थितिबंधः सर्वोपि कर्मबंधित्वादेव सादिरध्रुवश्चेति निरूपिताः स्थितिबंधे साद्यादि भंगा अथ नाम स्थितिमेव सा
मान्यतो गुणस्थानकेषु चिंतयन्नाह ४७ ब: साणाइ अपुव्वंते १ अयरंतो १ कोडिकोडीउ नहिगो बंधोनहु हीणोनय मिच्छेत वि
यरसन्निमि ४८ व्या० प्राकृतत्वान्निर्देशस्य सास्वादनमादौ यस्य तत् सास्वादनादि अपूर्वकरणमंते यस्य गुणस्थानक कदंबक
स्य तदपूर्वांतं सास्वादनादि च तदपूर्वांतं सास्वादनाद्यपूर्वांतं तस्मिन् सास्वादनाद्यपूर्वांत गुणस्थानककदंबके अंतरा एणसा
गरोपमाणमंतर्मध्ये कोटीकोटी तस्या अंतरांतः कोटीकोड्या रांतः कोटीकोटीतः आद्यादेस्पष्टीकृतगणस्य प्रत्ययः।
ननैवाधिको बंधो भवति किंतु मिथ्यादृष्टिरेव भवतीति सामर्थ्याद्गम्यते इदमुक्तं भवति सास्वादनादपूर्वकरणांतानां भिन्नसा
गरोपमांतः कोटीकोटीरूपैव स्थितिर्बध्यते न उपरितोपि न उभिन्नग्रंथिकानप्याश्रित्य समस्ति सागरोपमकोटीकोटीप्रमाणो
मिथ्यात्वस्योत्कृष्टस्थितिबंधः कर्मप्रकृत्यादिषु निरूपितः तत्कथमुच्यते भिन्नग्रंथिकत्वादंतः कोटीकोटीरूपैव स्थितिर्बध्यते
न परतोपि सत्यमस्ति भिन्नग्रंथिकानामुत्कृष्टोपि स्थितिबंधः केवलं सम्यक्त्वं परित्यज्य मिथ्यादृष्टिगुणस्थानकं प्राप्तानामेवासौ
संभवति अत्र उ भिन्नग्रंथिकानां सास्वादनादीनामेवांतः सागरोपमकोटीकोटीपरतः स्थितिबंधो निषिध्यत इत्यदोषः यत्पुन
र्बीधिएण नवालई कयाइ इति वचनादावश्यकादिषु भिन्नग्रंथिकस्य मिथ्यादृष्टेः अप्युत्कृष्टः स्थितिबंधः इति निषिध्यते तत् सिद्धांतक
मतमेव कार्मग्रंथिकाभिप्रायतस्तु भिन्नग्रंथिर्मिथ्यात्वस्योत्कृष्टां स्थितिं बध्नाति केवलं तथाविधतीव्रानुभागयुक्तासौ न भवति १६५
ननु सागरोपमांतः कोटीकोटीतः समयेनतरः सास्वादनादीनां बंधो माभूदधस्तात्ततो भवति वा न वेत्याह नहु नैव हीनो न्यूनः
सागरोपमांतः कोटीकोटीतः सकाशात् स्थितिबंधो भवति एतदुक्तं भवति सास्वादनाद्यपूर्वकरणपर्यवसानेषु गुणस्थानके
षु सागरोपमांतः कोटीकोटीप्रमाणैव स्थितिर्भवति नाधिका नाप्यूना इत्यर्थः न उ यदा एकेंद्रियादि सास्वादनगुणस्थाना भवति

तदा सागरोपमत्र्यादिसप्तभाग रूपमेव स्थितिबंधं विधत्ते अतः सास्वादनाद्यपूर्वांतेषु न हीनो बंध इति कथं ; घटाकोटीमा
टीकते सत्यमेतत् केवलं कदाचित्कोसौ न सार्वदिक इति न तस्य विवक्षाकृतेत्यसंभावयामि अपूर्वकरणात् परतोऽनिवृत्तिक
रणादौ सागरोपमांतः कोटीकोटीतोपि हीनः स्थितिबंधो भवतीति सामर्थ्याद्गम्यते अथ किं सास्वादनादिष्वेवांतः सागरोप
मकोटीकोटीहीनः स्थितिबंधो न लभ्यते आहोस्विन्मिथ्यादृष्टेरपि इति विशिष्टस्य कस्यचिज्जंतोरित्याह नय मिच्छेत्ति वियर
संनिमि त्ति नचैव मिच्छेत्ति मिथ्यादृष्टौ संज्ञिग्राहकस्य प्रत्येकं संबंधात् व्याख्या सोसंज्ञी च तदसंज्ञी तस्मिन् तदसंज्ञिनि इतरश्च
भवः सचासौ संज्ञी चेतरसंज्ञी तस्मिन् इतरसंज्ञिनि असंज्ञिनीत्यर्थः आयुर्वर्जानां सप्तानां कर्मप्रकृतीनां सागरो
पमांतःकोटीकोटीतो हीनो न भवति मिथ्यादृष्टिरिति ग्रहणाद्ध्यसंज्ञिनः कस्मिंश्चिद्गुणस्थानकेऽनिवृत्तिबादरादौ हीनोऽपि
बंधो भवतीत्याचष्टे संज्ञिग्रहणाच्चासत्योऽपसंज्ञिनि हीन एव प्रतिनियतसप्तभागरूपायाः एव प्रागसंज्ञिनः प्रतीत्य स्थिते
र्भणनात् अतदसंज्ञिनि सागरोपमांतः कोटीकोटीतो हीनो बंधो न भवत्येवयतो भिन्नग्रंथिकस्येव हीनो बंधः स्या
दभव्यसंज्ञी चोत्कृष्टतोपि ग्रंथिप्रदेशमेवागच्छतीति तदनंतरं ग्रंथिप्रदेशमप्राप्याऽपि निवर्त्तते निवर्त्तनप्रवृत्तं स्थितिबंधं करो
तीति निरूपितः सर्वगुणस्थानकेषु स्थितिबंधः सांप्रतं एकेंद्रियादिजीवानाश्रित्य स्थितिबंधानामेवाल्पबहु
त्वं गाथात्रयेणाह ४८ ब: जइलहुबंधोबायरपज्जअसंखगुणसुहुमपज्जाहिगो एसिं अपज्जाणलहु सु
हुमे अप १ अपज्ज २ पज्ज ३ गुरू ए ४९ व्या० सर्वस्तोको यतिः लघुबंधो जघन्यस्थितिबंध इत्यर्थः सूक्ष्मसं
परायान्तर्मुहूर्त्तिक एव भवतीति कृत्वा १ ततोऽयतिलघुस्थितिबंधाद्बादरपर्याप्तकेंद्रियस्य जघन्यस्थितिबंधोऽसं
ख्यातगुणः २ ततः सूक्ष्मपर्याप्तकेंद्रियस्य जघन्यस्थितिबंधो द्विगुणितविशेषेणाधिकः ३ ततो एसिं ति एनयोर्बा

+ त्रीन्द्रियेष्वपर्याप्तपर्याप्ते द्वौ गुरुस्थितिबंधौ वाच्यौ चउत्ति चउरिंदियपर्याप्तापर्याप्ते लघुस्थितिबंधौ द्वौ चउरिंदियपर्याप्तापर्याप्ते गुरुस्थितिबंधौ द्वौ वा + २ला
च्यौ असंनिसुत्ति असंज्ञिपर्याप्तापर्याप्ते लघुस्थितिबंधौ द्वौ + ३९॥

+ अ + दरपर्याप्तयोर्लघुत्ति जघन्यस्थितिबंधिको वाच्यः अयमर्थः ततः सूक्ष्मपर्याप्तैकेंद्रियस्य जघन्यस्थितिबंधाद्बादरापर्याप्तैकेंद्रियस्य जघन्यस्थितिबंधो विशेषाधिकः ४ ततः सूक्ष्मापर्याप्तैकेंद्रियस्य जघन्यः स्थितिबंधो विशेषाधिकः ५ सुहुमेयरअपज्जपज्जगुरुत्ति ततः सूक्ष्मापर्याप्तैकेंद्रियस्य गुरुरित्युत्कृष्टस्थितिबंधो विशेषाधिकः ६ ततस्तस्मा(द)न बादरापर्याप्तैकेंद्रियस्योत्कृष्टः स्थितिबंधो विशेषाधिकः ७ ततः सूक्ष्मपर्याप्तैकेंद्रियस्योत्कृष्टस्थितिबंधो विशेषाधिकः ८ ततो बादरपर्याप्तैकेंद्रियस्योत्कृष्टस्थितिबंधो विशेषाधिकः ९ ४९ अ: लहुबिअपज्जअपज्जे २११ अपज्जेयरविय गुरु १३ अहिगो एवं तिचउ २२ असंनिसु २५ नवरं संखगुणो बिअअमणपज्जे ५० व्या० ततो लहुत्ति लघुर्जघन्यस्थितिबंधो बियत्ति द्वीन्द्रिये पज्जत्ति पर्याप्ते वाच्यः कियत्प्रमाण इत्याह संखगुणो बिअअमणपज्जे इति वचनात् संख्यातगुण इत्यर्थः ततस्तस्मिन्नेवापर्याप्ते अधिको लघुः स्थितिबंधस्ततोऽपर्याप्तेतरद्वीन्द्रिये गुरुस्थितिबंधोऽधिको वाच्यः एवं द्वीन्द्रियोक्तप्रकारेण तित्ति त्रीन्द्रिये पर्याप्तापर्याप्ते लघुस्थितिबंधौ द्वौ असंज्ञिन्येवाऽपर्याप्तपर्याप्ते गुरुस्थितिबंधौ द्वौ वाच्यौ किंप्रमाणाः पुनरेते स्थितिबंधा वाच्या इत्याह अहिगुत्ति अधिका विशेषाधिका वाच्याः किं सर्वे
+ विशेषाधिका + पि स्थितिबंधा एवं वाच्या उताहोऽस्ति कश्चिद्विशेषोऽपीत्याह नवरं संखगुणो बिय अमणपज्जत्ति नवरं केवलमयं विशेषः संख्यातगुणो वाच्यः पर्याप्तशब्दस्य प्रत्येकं संबंधात् द्वीन्द्रियपर्याप्ते असंज्ञिनि पर्याप्ते प्यत्र सर्वत्र विशेषाधिक
इति गाथाद्वयार्थो भावार्थस्त्वयं बादरपर्याप्तैकेंद्रियोत्कृष्टस्थितिबंधात् द्वीन्द्रियपर्याप्तस्य जघन्यस्थितिबंधः संख्येयगुणः १० ततोऽपर्याप्तद्वीन्द्रियस्य जघन्यः स्थितिबंधो विशेषाधिकः ११ ततोऽपर्याप्तद्वीन्द्रियस्योत्कृष्टस्थितिबंधो विशेषाधिकः १२ ततः पर्याप्तद्वीन्द्रियस्योत्कृष्टः स्थितिबंधो विशेषाधिकः १३ ततः पर्याप्तत्रीन्द्रियस्य जघन्यस्थितिबंधो विशेषाधिकः १४ त १६६

तोऽपर्याप्तत्रींद्रियस्य जघन्यस्थितिबंधो विशेषाधिकः १५ ततोऽपर्याप्तत्रींद्रियस्योत्कृष्टस्थितिबंधो विशेषाधिकः १६ ततः पर्याप्तत्रींद्रियस्योत्कृष्टस्थितिबंधो विशेषाधिकः १७ ततः पर्याप्तचउरिंद्रियस्य जघन्यस्थितिबंधो विशेषाधिकः १८ ततोऽपर्याप्तचउरिंद्रियस्य जघन्यः स्थितिबंधो विशेषाधिकः १९ ततोऽपर्याप्तचउरिंद्रियस्योत्कृष्टः स्थितिबंधो विशेषाधिकः २० ततः पर्याप्तचउरिंद्रियस्योत्कृष्टस्थितिबंधो विशेषाधिकः २१ ततः पर्याप्तासंज्ञिपंचेंद्रियस्य जघन्यः स्थितिबंधः संख्यातगुणः २२ ततोऽपर्याप्तासंज्ञिपंचेंद्रियस्य जघन्यः स्थितिबंधो विशेषाधिकः २३ ततोऽपर्याप्तासंज्ञिपंचेंद्रियस्योत्कृष्टः स्थितिबंधो विशेषाधिकः २४ ततः पर्याप्तासंज्ञिपंचेंद्रियस्योत्कृष्टस्थितिबंधो विशेषाधिकः २५ ॥ ५० ॥ अ: ॥ ताजइजेट्ठोबंधो
२६ संखगुणो देसविरयह्रस्सियरो २७ सम्मचउ २८ सं निचउरो ३६ ठिईबंधाणुकमसंखगुणा ५१ व्या० ततो यतेः संयतस्य जघन्यबंधः संख्यातगुणः ततो देशविरतस्य ह्रस्वो जघन्य इतर उत्कृष्टः ततः सम्मचउत्ति सम्यग्दृष्टेश्चत्वारः स्थितिबंधाः क्रमेण भवंति तद्यथा अविरतसम्यग्दृष्टेः पर्याप्तस्य जघन्यस्तस्यैवोत्कृष्टः स्थितिबंध इति द्वौ एवमपर्याप्तस्यापि द्वौ मिलिताश्चत्वार इति सं निचउरोत्ति संज्ञिनां संज्ञिपंचेंद्रियाणां मिथ्यादृष्टीनामिति सामर्थ्याद्गम्यते चत्वारः स्थितिबंधास्तद्यथा पर्याप्तसंज्ञिपंचेंद्रियस्य जघन्योत्कृष्टभेदात् द्वौ एवमपर्याप्तस्यापि जघन्योत्कृष्टभेदाद्द्वौ
स्थितिबंधा विति सर्वे चत्वारः एते प्रदर्शितरूपाः सर्वेऽपि स्थितिबंधाः यथा यावद्गुणा भवंति तदाह ठिईबंधाणुकमसंखगुणत्ति स्थितीनां बंधाः स्थितिबंधाः प्रदर्शितरूपा अनुक्रमेणोत्तरोत्तरपरिपाट्या संख्यगुणाः संख्येयगुणा भवंतीत्यक्षरार्थो भावार्थः पुनरयं पर्याप्तासंज्ञिपंचेंद्रियोत्कृष्टस्थितिबंधाद्यतेरुत्कृष्टः स्थितिबंधः संख्येयगुणः २६ ततो देशविरतस्य जघन्यः स्थितिबंधः संख्येयगुणः २७ ततो देशविरतस्योत्कृष्टः स्थिति बंधः संख्येयगुणः २८ ततोऽविरतो

ऽपर्याप्तस्य जघन्यः स्थितिबंधः संख्येयगुणः २९ ततः पर्याप्ताविरतस्य जघन्यस्थितिबंधः संख्येयगुणः ३० ततोऽपर्याप्ताविरतस्य
उत्कृष्टः स्थितिबंधः संख्येयगुणः ३१ ततः पर्याप्ताविरतस्योत्कृष्टः स्थितिबंधः संख्येयगुणः ३२ ततो पर्याप्तसंज्ञिपंचेंद्रियस्य जघन्य
:स्थितिबंधः संख्येयगुणः ३३ ततः पर्याप्तसंज्ञिपंचेंद्रियस्य जघन्यस्थितिबंधः संख्येयगुणः ३४ ततः संज्ञिपंचेंद्रियापर्याप्तस्य
उत्कृष्टस्थितिबंधः संख्येयगुणः ३५ ततः पर्याप्तसंज्ञिपंचेंद्रियस्योत्कृष्टः स्थितिबंधः संख्येयगुणः ३६ अथैतद्गाथात्रयोक्ताल्प
बहुत्वपदानां सुखावबोधार्थं विनेयजनानुग्रहाय यंत्रकमुपदर्श्यते तच्चेदं अत्र च विशेषानिर्देशोपि संयतोत्कृष्टस्थितिबंधा

संयतस्य सर्वस्तोकः स्थितिबंधो जघन्यः १	बादरएकेंद्रिय पर्याप्तजघन्य० ऽसंख्यगुण० २	सूक्ष्मएकें०प० र्याप्तजघन्यस्थितिः विशेषाधिकः ३	बादरएकेंद्रिय अपर्या० जघन्यः स्थितिविशेषाधिकः ४	सूक्ष्मएकें० अपर्या० जघन्य विशेषाधिकः ५	सूक्ष्मएकें० अपर्या० उत्कृष्ट विशेषाधिक ६	बा० अप० एकें० उत्० विशेषाधिक ७	सूक्ष्मएकें० पर्या० उत्कृ० विशे० ८	बादरप० एकें० उत्कृष्ट विशेषाधिक ९	बेंद्रियपर्याप्तजघन्यसंख्येयगुण० १०	बेंद्रियअ० पर्या० जघ० विशेषाधिक ११	ते० प० जघ० विशे० १२	
बेंद्रियअ० उत्कृष्टस्थिति विशेषाधि० १३	बेंद्रियपर्या० उत्कृष्टस्थिति विशेषाधि० १४	तेंद्रियअ० जघन्यस्थिति विशेषाधिक १५	ते० अप० उत्कृष्ट विशेषाधिक १६	ते० पर्या० उत्कृष्ट विशेषाधिक १७	चउरिंद्रिय पर्या० जघन्य विशेषाधिक १८	चउरिंद्रिय अपर्या० जघन्य विशेषा० विशेषा० १९	चउरिंद्रिय अपर्याप्त उत्० विशेषाधिक २०	चउरिंद्रिय पर्या० उत्कृष्ट विशेषाधिक २१	असंज्ञिपं० चेंद्रियजघन्य संख्येयगुण २२	असंज्ञि अप० जघन्य विशेषाधिक २३	असंज्ञिपंचेंद्रियअपर्याप्तोत्कृष्ट विशेषाधिक २४	असंज्ञिपंचेंद्रियपर्याप्तउत्कृष्ट विशेषाधिक २५
संयतस्य उ० संख्येयगुणः २६	देशविरतिजघन्य संख्यातगुणः २७	देशविरतिउत्कृष्ट संख्येयगुणः २८	अविरतसम्य० जघन्य संख्येयगुणः २९	अविरतसम्य० अप० जघन्य संख्येयगुणः ३०	अविरतअप० उत्० संख्येयगुणः ३१	अविरतपर्या० उत्० संख्येयगुणः ३२	संज्ञिपंचें० पर्या० जघ० संख्येयगुण ३३	संज्ञिपं० अ० जघन्य संख्ये० ३४	संज्ञिपंचें० अप० उत्कृ० संख्येयगुणः ३५	सं० पं० प० उत्कृ० सागरोपमांतः कोटीकोटीप्रमाण एव ३६		

१६७

दारस्य संज्ञिपंचेंद्रियापर्याप्तोत्कृष्टस्थितिबंधं यावदेते केचन स्थितिबंधा निरूपितास्ते सर्वेपि सागरोपमांतःकोटीकोटीप्रमाणा एवावसेयाः ॥ सर्वोत्कृष्टस्थितिबंधस्तु संज्ञिपंचेंद्रियमिथ्यादृष्टेः पर्याप्तस्यैव संभवति नान्यस्य सव्वाण वि पयडी
णमुक्कोसं सन्निणो कुणंति ठिइं इति वचनात् कर्मप्रकृत्यादिषु तथैवोक्तत्वात् तदेवं स्थितिबंधस्याल्प

बहुत्वद्वारेण स्वामित्वं च चिंतितं । अधुना कर्मस्थितेरेव शुभाशुभत्वप्ररूपणाप्रत्ययप्ररूपणार्थमाह । ५१ ॥ सव्वाणवि जिट्ठठिई
असुहा जं साइसंकिलेसेणं । इयरा विसोहिओ पुण मुत्तुं नरअमरतिरिआउं ५२ व्या० सर्वासामपि शुभानामशुभानामपि कर्म
प्रकृतीनां ज्येष्ठा स्थितिरुत्कृष्टा स्थितिरशुभा अप्रशस्ता कुतो हेतोरित्याह जं साइ किलेसेणंति यद्यस्मात्कारणात्सा ज्येष्ठा स्थि
तिरतिसंक्लेशेनात्यंततीव्रकषायोदये नोत्कृष्टस्थितिबंधाध्यवसायस्थानकेन जन्यते निर्वर्त्यत इति शेषः ननु कैः स्थितिबंधाध्यवसा
यस्थानैरियमुत्कृष्टा स्थितिर्निर्वर्त्यत इति चेदुच्यते इह ज्ञानावरणादिकर्मणः सर्वजघन्याया अपि स्थितेर्निर्वर्तका नियमोत्तरं विशेषव
द्धान्यसंख्येयलोकाकाशप्रदेशप्रमाणानि स्थितिबंधाध्यवसायस्थानानि भवंति एतेष्वसार्वपि केवलजघन्या स्थितिर्नानाजीवाना
श्रित्य जन्यते पृथगनेकशस्तुल्यपतवलपुरुषैर्वारकवारकेण निर्वर्त्यमानकटाद्येककार्यवत् ततः समयोत्तरां स्थितिं यानि निर्वर्त्त
यंति तान्यपि यथोत्तरं विशेषवृद्धान्यसंख्येयलोकाकाशप्रदेशप्रमाणान्यन्यानि स्थितिबंधाध्यवसायस्थानानि भवंति केवलं पूर्वेभ्यो
विशेषाधिकानि ततो द्विसमयोत्तरां स्थितिं निर्वर्त्तयंति यान्यतान्यनंतरेभ्यो विशेषाधिकानि त्रिसमयाधिकां तां यानि निर्वर्त्तयंति
तान्यमीभ्योपि विशेषाधिकानि तामेव चतुःसमयाधिकां यानि निर्वर्त्तयंति तानि तेभ्योपि विशेषाधिकानि एवं तावन्नेयं यावत्सर्वोत्कृष्टं
स्थितिं यानि निर्वर्त्तयंति तान्यपि समयोनोत्कृष्टस्थितिजनकाध्यवसायस्थानेभ्योऽन्यानि विशेषाधिकानि असंख्येयलोकाकाशप्र
देशप्रमाणानि यथोत्तरं विशेषवृद्धानि स्थितिबंधाध्यवसायस्थानानि भवंति एतानि च स्थाप्यमानानि  विषमचतुरस्रक्षे
त्रमापूरयंति स्थापना तत्र प्रथमपंक्तावप्यसंख्येयालोकाकाशप्रदेशप्रमाणानि दृष्टव्यानि किंत्वसत्कल्पनया चतुःसं
ख्यात्वेन दर्शितानि द्वितीयादिपंक्तिषु तान्येव विशेषाधिकानीति पंचादित्वेन दर्शितानि एताश्चैवं पंक्तयो जघन्याया स्थि
तेरारभ्य यावदुत्कृष्टा स्थितिस्तावंतः समयास्तावंति तावत्प्रमाणा असंख्येया द्रष्टव्याः असत्कल्पनया च पंच दर्शिताः तत्रैतत्

स्थित्यादिरेकः स्थितिबंधकानां अध्यवसायस्थानान्यसंख्येयानि परस्परं विचित्राण्युपगम्यंते तद्वैचित्र्यापगमे च स्थितिर
पि वैचित्र्यं प्राप्नोतीति तदयुक्तं तानि ह्येकस्थितिबंधकानामपि संति क्षेत्रकालानुभागयोगाद्वैचित्र्यादिवैचित्र्याण्युच्यंते न स्थि
तिमाश्रित्य तेषामेकस्थितिबंधकानां विशेषेण वैचित्र्याभिधेरित्यलमस्तु तेन प्रस्तुतमुच्यते इह सर्वोत्कृष्टस्थितिबंधकानि चर
मपंक्तिनिदर्शितानि यानि स्थितिबंधाध्यवसायस्थानानि तेषां मध्ये यच्चरमाध्यवसायस्थानं तदुत्कृष्टसंक्लेशात्मकं तेषामेवाद्य
मपंक्तिरुच्यते उभयांतरालवर्तीनि तु मध्यमानि तत्र चेतरोत्तमाध्यमोत्कृष्टैः स्थितिबंधाध्यवसायस्थानैरुत्कृष्टा स्थितिर्बध्यते अ
थवा चरमस्थितिबंधाध्यवसायस्थानमुत्कृष्टसंक्लेशात्मकं तेनाऽशेषाण्युपचरमपंक्तिनिदर्शितानि स्थितिबंधाध्यवसाय
स्थानानि ईषन्मध्यमानि उच्यंते तैश्चैव चरमपंक्तिनिदर्शितैः सर्वोत्कृष्टस्थितिबंधकैः सर्वैरपि स्थितिबंधाध्यवसायस्थानैरुत्
कृष्टा स्थितिर्जन्यत इति भावः यदुक्तं प्राग्बृहत्शतके उत्कृष्टस्थितिबंधप्रस्तावे उक्कोसं संकिलेसेणं ईसिअहव मज्झिमेणावि ततश्चा
यं प्रस्तुतार्थः सर्वासामपि प्रकृतीनामुत्कृष्टा स्थितिरशुभा यस्मात्सा तीव्रसंक्लेशेनात्यंततीव्रकषायोदयेन यदुक्तं भवति सर्वासां
शुभानामशुभानां च प्रकृतीनां स्थितयः संक्लेशवृद्ध्या वर्धंते तदपचये च हीयंते इत्यन्वयव्यतिरेकाभ्यां संक्लेशमेव स्थितयोऽनु
वर्तंते इत्यशुभास्ताः अशुभकारणनिष्पन्नादशुभहेतुकाशुभफलवत् नन्वेवं तर्हि शुभप्रकृतीनामनुभागः कषायजन्य इतिवचनादनु
भागोऽपि कषायप्रत्ययप्रवृत्ततो यमप्यशुभकारणत्वादशुभत्वं प्राप्नोति अथ च शुभप्रकृतीनामसौ शुभत्वेनेष्यत इति नैवमस्ति
प्रायापरिज्ञानात् यतः सत्यपि क्लिष्टकषायजन्यत्वे कषायवृद्धावनुभागोऽशुभप्रकृतीनामेव वर्धते शुभानां तु परिहीयते एवं क १६८
षायमंदतया तु शुभप्रकृतीनामेवानुभागो वर्धते अशुभप्रकृतीनां तु हीयत इति न कषायमनुवर्तंते स्थितयस्तु शुभानामशुभा
नां च प्रकृतीनां कषायवृद्धौ नियमाद्वर्धंते तदपचये च हीयंते इत्येकांतेन कषायानुवर्तित्वं व्यतिरेकाद्विधायित्वादशुभा एवेति

यदि वा यथा शुभप्रकृतीनां स्थितिर्वर्धते तथा शुभानुभागः तत्संबंधी हीयते परिगालितरसेक्षुयष्टिकल्पानि शुभकर्माणि
भवंतीत्यर्थः अशुभप्रकृतीनां स्थितिवृद्धावशुभतरसोऽपि तत्संबंधी वर्धते एवं च ततोऽपि कारणात् स्थितीनामेवाशुभत्वं तद्वृद्धेः शुभानु
भागक्षयहेतुत्वादशुभभागवृद्धिहेतुत्वाच्चेति ननु येष्टा स्थितिः संक्लेशेन बध्यते जघन्या तु किंप्रत्यया इत्याह इयरा विसोहिउ पुणत्ति इत
१ प्रत्यया = रा जघन्या पुनर्विशोधिता विशुद्ध्या कषायारूपया बध्यते इदमुक्तं भवति इह ये विवक्षितमूलोत्तरप्रकृतीनां बंधकास्तेषां मध्ये यो
यदुत्कृष्टा स्थितिः सततविवक्षितकर्मस्थितिं जघन्यां बध्नातीति भावः किं सर्वप्रकृतीनामयमेव न्यायो यदुत्कृष्टा स्थितिः संक्लेशेनै
व बध्यते अशुभा च भवति जघन्या पुनर्विशुद्धैवेति नेत्याह मुत्तुं नरअमरतिरिआयु त्ति आयुःशब्दस्य प्रत्येकं संबंधात् मुक्त्वा
नरायुरमरायुस्तिर्यगायुः अयमर्थः नरामरतिर्यगायुषां स्थितिं मुक्त्वा शेषस्थितीनामेवाशुभत्वं द्रष्टव्यं एतत्स्थितिः पुनः शु
भैव भवतीत्यर्थः विशुद्धिलक्षणस्य तत्कारणस्य शुभत्वात् मनुष्यतिर्यगायुषोर्हि द्वित्रिपल्योपमावसाना देवायुषस्तु
त्रयस्त्रिंशत्सागरोपमावसानोऽपि शुभा विशुद्धिलक्षणस्य तत्कारणस्य शुभत्वाद्विशुद्धितारतम्यादेव च भवतो मनुष्य
तिर्यग्देवायुः स्थितिशुभा शुभकारणप्रभवत्वाच्छुभद्रव्यनिष्पन्नघृतपूर्णादिद्रव्यवदिति अथवा प्रस्तुतायुष्कत्रयस्थितिवृ
द्धौ रसोऽपि वर्धते स च शुभः सुखजनकत्वादितोऽपि प्रस्तुतायुष्कस्थितेः शुभत्वं तद्वृद्धेः शुभतरसवृद्धिहेतुत्वात् किं च नर १
अमरतिर्यगायुर्लक्षणं प्रकृतित्रयं मुक्त्वा शेषप्रकृतीनां उत्कृष्टसंक्लेशविशुद्धिभ्यां स्थित्युपचयापचयौ दृष्टौ प्रस्तुतायुस्त्र
यस्य तु तद्बंधकेषु सर्वोत्कृष्टविशुद्धिरुत्कृष्टस्थितिबंधं करोति सर्वसंक्लिष्टस्तु जघन्यमिति विपरीतं दृष्टव्यमिति सर्वप्रकृ
तीनामुत्कृष्टस्थितिरुत्कृष्टसंक्लेशेन कषायरूपेण बध्यत इत्युक्तं न च केवलं कषायेण स्थितिर्बध्यते किंतर्हि योगसव्य
पेक्षेणेत्याह तत्संयोगं सर्वज्ञो वेषल्पबहुत्वद्वारेण चिंतयन्नाह ५२ ॥ सुहुमनिगोआइखणप्पजोग १ बायरय २ विगल

पज्जमणमणा १ अपज्जत्तजुअपढमजुगुरूए पज्जहस्सियरो असंखगुणो ५२ व्या० इह योगो वीर्यं स्थामेत्यादि पर्या
याः वाङ्योगो विरियंथा मोत्तेछादपरक्कमोत. टीका: सत्तीसामत्थं वियजोगस्स हवंति पज्जाया सव्वयोगस्त्रिधा मनोयोगो वा
ग्योगः काययोगः चेति उक्तं च कर्मप्रकृतौ परिणामालंबणगहणसाहणं तेण लद्धनामतिगं कज्जब्भासाणुन्नप्पवेसविसमीक+
पएसं अस्यार्थः गमनिकापरिणमनं परिणामः अंतर्गतणिगर्थत्वात् प्रत्ययः परिणामापादनमित्यर्थः आलंबं ग्रहणं आलंबनं आवे
नहप्रत्ययगृहीतनिर्ग्रहणं तेषां साधनं साध्यते अनेनेति साधनं योगसंज्ञं वीर्यं करणं शरीरे इत्यनट्प्रत्ययः तथाहि तेन वीर्यविशेष
ण योगसंज्ञितेन औदारिकादिशरीरप्रायोग्यान् पुद्गलान् प्रथमतो गृह्णाति गृहीत्वा च प्राणापानादिरूपतया परिणमय्य
+नत्+ ति परिणमय्य च तन्निसर्गहेतुसामर्थ्यविशेषसिद्धये तानेव पुद्गलानवलंबते यथा मंदशक्तिः कश्चिन्नगरे परिभ्रमणाय
यष्टिमविलंबते ततस्तदवष्टंभतो जातसामर्थ्यविशेषः सन् तान् प्राणापानादिपुद्गलान् विसृजतीति परिणामालंबन
ग्रहणसाधनं वीर्यं तेन च वीर्येण योगसंज्ञकेन मनोवाक्कायावष्टंभतो जायमानेन लब्धनामतिगं लब्धं नामत्रिकं मनोयो ।नि। आयमानेन+
गः वाग्योगः काययोगेति तत्र मनसा करणभूतेन योगो मनोयोगः वाचा योगो वाग्योगः कायेन योगः काययो
+भु+ गः स्यादेतत् सर्वेष्वपि जीवप्रदेशेषु तुल्यः क्षायोपशमिकादिलब्धिलाभेऽपि किमिति कश्चित् स्तोकः कश्चिद्बहुतरः कश्चि
त्स्तोकतर इत्येवं वैषम्येण वीर्यमुपलभ्यत इत्यत्र आह कज्जेत्यादि यदर्थं चेष्टते तत्कार्यं तस्याभ्यासः अभ्यासनम १६९
भ्यासः अस्तु इत्याक्तोऽस्यास्याभिशर्वस्यपन्न तस्य भायोगः कार्याभ्यासः कार्यस्यासन्नता निकटीभवनमित्यर्थः त
थाजीवप्रदेशानामन्योन्यं परस्परं प्रवेशः शृंखलावयवानामिव परस्परसंबंधविशेषः तास्यां कृत्वा विषमीकृतास्तु
प्रत्यासन्नतरसद्भावतो विसंस्थुलीकृताः प्रदेशाः येन वीर्येण तत्कार्याभ्यासा . मोन्यप्रवेशविषमीकृतप्रदेशं
सा

+तर+ ध

तथाहि ये आत्मप्रदेशानां हस्तादिगतानामुत्पाद्यमानघटादिलक्षणकार्यनिकटं तेषां प्रत्यासन्नतराचेष्टाऽस्वाभाव्या
मंऽसादिगतानां स्वल्पाह्रस्त्वानां उपादादिगतानां स्वल्पतरा अनुभवसिद्धं चैतत् अपि च लोष्टादिना निर्घातस्तथा यद्यपि
सर्वप्रदेशेषु युगपद् ह नोपजायते तथापि तेषामात्मप्रदेशानामभिघातकलोष्टादिद्रव्यनैकट्ये तेषां तीव्रतरा वेदना
शेषाणां तु मंदमंदतरा तथेहापि जीवप्रदेशेषु परिस्पंदात्मकं वीर्यमुपजायमानं कार्याभ्यासवशतः केषुचित् स्वल्पतम
मन्येषु मंदमपरेषु मंदतमं भवति एतच्चैवं जीवप्रदेशानां परस्परसंबंधविशेषे भवति नान्यथा यथा शृंखलावयवानां परस्प + शृंखलावयवानां तथाहि तेषां+५
रसंबंधविशेषे सति एकस्मिन्नवयवे परिस्पंदमाने अपरेऽप्यवयवाः परिस्पंदंते केवलं केचित् स्तोकं अपरे तु स्तो
कतरमिति संबंधविशेषाभावे त्वेकस्मिन् चलति नापरस्यावश्यं ता चिवलनं यथा गोर्गो पुरुषयोः तस्मात्कार्याभ्य १
भ्यासवशतो जीवप्रदेशानां परस्परसंबंधविशेषस्य वीर्यं जीवप्रदेशेषु केषुचित् स्वल्पतममन्येषु स्तोकमपरेषु स्तोकतर +भु+
मित्येवं वैषम्येणोपजायमानं न विरुध्यत इत्यलं विस्तरेण प्रकृतं प्रस्तुमः तत्र सूक्ष्मनिगोदस्य सूक्ष्मसाधारणलब्ध्यपर्य १+स्प
प्तकस्य सर्वजघन्यवीर्यस्येति च सामर्थ्याद्दृश्यं तस्यैव सर्वजघन्ययोगस्य प्राप्यमाणत्वादादि क्षणः प्रथमोत्पत्तिसमय
+दा+ : सूक्ष्मनिगोदिलक्षणः तत्र समस्तमेकवचनलोपः प्राकृतत्वात् किमित्याह अप्पजोगत्ति अल्पः सर्वस्तोको योगो वी
+व्या र्यव्यापार इति व . तत् ततः बादरस्य विगलत्ति विगलत्रिकस्य अमणत्ति असंज्ञिनः मनत्ति संज्ञिनः अपज्जत्ति प्रत्येकं
संबंधात् सूक्ष्मादीनां समस्तानामप्यपर्याप्तानां लद्धत्ति जघन्यो योगोऽसंख्येयगुणो वाच्यः आदिक्षण इत्यपि सर्वत्र
वाच्यं ततः प्रथमद्विकस्यापर्याप्तसूक्ष्मनिगोदबादरलक्षणस्य गुरुरुत्कृष्टो योगोऽसंख्येयगुणो वाच्यः ततः प्रथम
द्विकस्य पज्जहस्सियरोऽसंखगुणत्ति पर्याप्तस्य ह्रस्वो जघन्य इतरः उत्कृष्टो योगो यथाक्रममसंख्येयगुणो वाच्यः इति

+ लब्ध्य+

गाथाक्षरार्थस्त्वावार्थस्त्वयं सूक्ष्मनिगोदस्यापर्याप्तकस्य प्रथमसमये वर्त्तमानस्य जघन्यो योगः सर्वस्तोकः १ ततो बा
दरैकेंद्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्त्तमानस्य जघन्यो योगो असंख्येयगुणः २ ततो द्वींद्रियस्य लब्ध्यपर्याप्त
कस्य प्रथमसमये वर्त्तमानस्य जघन्यो योगोऽसंख्येयगुणः ३ ततः त्रींद्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्त्तमान
स्य जघन्यो योगो असंख्येयगुणः ४ ततश्चतुरिंद्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्त्तमानस्य जघन्यो योगो असं
ख्येयगुणः ५ ततो असंज्ञिपंचेंद्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्त्तमानस्य जघन्यो योगो असंख्येयगुणः ६ ततः
संज्ञिपंचेंद्रियस्य प्रथमसमये वर्त्तमानस्य जघन्यो योगो असंख्येयगुणः ७ ततः सूक्ष्मनिगोदस्य लब्ध्यपर्याप्तकस्योत्
कृष्टो योगो असंख्येयगुणः ८ ततो बादरैकेंद्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसंख्येयगुणः ९ ततः सूक्ष्मनि
-यो+ गोदस्य पर्याप्तकस्य जघ॰ योगो असंख्येयगुणः १० ततो बादरैकेंद्रियस्य पर्याप्तकस्य जघन्यो योगो असंख्येयगु
णः ११ ततः सूक्ष्मनिगोदस्य पर्याप्तकस्योत्कृष्टो योगो असंख्येयगुणः १२ ततो बादरैकेंद्रियस्य पर्याप्तकस्योत्कृष्टो असं -योगो+
ख्येयगुणः १३ ५३ ब: असमत्ततसुक्कोसो ८ पज्जजहन्नियरु एवं ठिइठाणा अपजेयरसंखगुणा परमपजबिए
असंखगुणा ४ ५४ व्या० असमाप्तत्रसा अपर्याप्तास्ते च ते त्रसाश्च द्वींद्रियादयो असमाप्तत्रसा अपर्याप्तद्वित्रिचतुरिंद्रियासं
-सा.रु. ज्ञिपंचेंद्रियास्तेषामुत्कृष्टोऽसंख्येयगुणो वाच्यः अयमर्थः पर्याप्तबादरैकेंद्रियोत्कृष्ट योगात् द्वींद्रियस्य लब्ध्यपर्याप्त १७०
कस्योत्कृष्टो योगो असंख्येयगुणः १४ ततस्त्रींद्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगो ऽसंख्ये
यगुणः १५ ततश्चतुरिंद्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसंख्येयगुणः १६
ततो असंज्ञिपंचेंद्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसंख्येयगुणः १७ त

+ असमाप्तत्रसोत्कृष्टो : ३४

तः संज्ञिपंचेंद्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसंख्येयगुणः १८ पज्जजहन्नियरु त्ति ततस्त्रसानां पर्याप्तानां जघ
न्यो योगो असंख्येयगुणो वाच्यः ततो ठिइयरु त्ति त्रसानां पर्याप्तानामुत्कृष्टो योगोऽसंख्येयगुणो वाच्यः इत्यक्षरार्थः भाव
अ र्थस्त्वयं ततः संज्ञिपंचेंद्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्ट योगात् पर्याप्तद्वींद्रियस्य जघन्यो योगो असंख्येयगुणः १९ ततस्त्रींद्रि
यस्य पर्याप्तकस्य जघन्यो योगोऽसंख्येयगुणः २० ततश्चतुरिंद्रियस्य पर्याप्तकस्य जघन्यो योगो असंख्येयगुणः २१ ततो
असंज्ञिपंचेंद्रियस्य पर्याप्तकस्य जघन्यो योगो असंख्येयगुणः २२ ततः संज्ञिपंचेंद्रियपर्याप्तस्य जघन्यो योगो असंख्ये -स्य
यगुणः २३ ततः पर्याप्तद्वींद्रियस्योत्कृष्टो योगोऽसंख्येयगुणः २४ ततः पर्याप्तत्रींद्रियस्योत्कृष्टो योगोऽसंख्येयगुणः २५
ततः पर्याप्तचतुरिंद्रियस्योत्कृष्टो योगो असंख्येयगुणः २६ ततः पर्याप्ताऽसंज्ञिपंचेंद्रियस्योत्कृष्टो योगो असंख्येयगुण
: २७ ततः पर्याप्तसंज्ञिपंचेंद्रियस्यो॰ त्कृष्टो योगोऽसंख्येयगुणः २८ ततः पर्याप्तकस्य संज्ञिपंचेंद्रियस्योत्कृष्टो योग
त् अनुत्तरोपपातिनामुत्कृष्टो योगो असंख्येयगुणः २९ ततः ग्रैवेयकवासिनामुत्कृष्टो योगो असंख्येयगुणः ३० .. -देवा
+ ततो भोगभूमिजानां तिर्यङ्मनुष्याणा ... मुत्कृष्टो योगोऽसंख्येयगुणः ३१ ततो आहारकशरीरिणामुत्कृष्टो योगोऽसंख्येयगुणः ३२ ततः शेषदेवनार
कतिर्यङ्मनुष्याणां यथोत्तरमुत्कृष्टो योगो असंख्येयगुणः अथ सुखावबोधाय अल्पबहुत्वपदानां यंत्रमुपदर्श्य ते

सूक्ष्मनिगो० अपर्याप्त जघन्य स्तोक १	बादर अप० जघन्य योग असंख्ये० २	बेइंद्रि० अप० जघ० योग० असंख्ये० ३	तेइंद्रि० अप० जघन्य योग असं० ४	चउरिं० अप० जघ० यो० असं० ५	असंज्ञि० अप० जघ० योग असं० ६	सं० अप० जघ० योग असं० ७	सूक्ष्मनि० अप० उत्कृ० यो० असं० ८	बादर अप० उ० योग असं० ९	सूक्ष्मनि० प० जघ० यो० असं० १०	बाद० पर्या० ज० योग असं० ११	सूक्ष्मनि० प० उ० यो० असं० १२	बाद० प० उ० यो० असं १३	बेइंद्रि० अप० उ० यो० असं० १४		
तेइंद्रि० अप० उ० योग असंख्या १५	चउ० अप० उ० अ० सं १६	असं० अ० उ० यो० असं १७	संज्ञि अप० उ० यो० असं० १८	बेइंद्रि० प० जघ० यो० असं १९	तेइं० पर्या० जघ० यो० असं २०	चउ० प० ज० योग असं २१	असंज्ञि पर्या० ज० योग असंख्या २२	संज्ञि प० ज० यो० असं २३	बेइं० पर्या० उ० यो० असं० २४	तेइंद्रि० प० उ० योग असं २५	चउ० पर्या० उ० योग असं २६	असं० प० उ० योग असं २७	संज्ञि प० उ० यो० असं २८	अनुत्तर उ० यो० असं २९	ग्रैवेयक उ० योग असं ३०

BHAU DAJI

पल्यो० स्थितमिति

युगलिक ज०योगश्र मं० ३१ | तद्वेदं गुणकारस्थानापि सूक्ष्मत्वेन पल्यासंख्येयभागरूपः एतेकं न्यासः तदत्र जघन्ययोगी जघन्यकर्मप्रदे
शाग्रहणं जघन्यस्थितिं च बध्नाति योगस्थोपवत. ६ इति एवं ठिइगणा इत्यादि एवमकारस्य लोपः प्राकृ
तत्वात् वैक्रियोगप्ररूपणान्यायेन सूक्ष्मैकेंद्रियादिजीवक्रमेणैव स्थितीनां स्थानानि वाच्यानीति शेषः त
आहारक ज० योगश्रसं० ३२ | त्र जघन्यस्थितेरारभ्य एकैकसमयवृद्ध्या सर्वोत्कृष्टानि स्थितिपर्यवसानानि ये स्थितिभेदास्ते स्थितिस्थानान्यु
च्यंते कथं च नेतानि वाच्यानीत्याह अपज्जेयरसंखगुणाणि अपर्याप्तकान् सूक्ष्मबादरएकेंद्रियादीन
द्विः प्रवाच्यानीति कियद्गुणानि पुनस्तानीत्याह संख्यगुणाणि तत्र संख्यानं संख्यातं मर्यादी तिसंख्यादृश्याद्यः इ
तिय प्रत्ययः ततः संख्यसंख्येयः संख्याता इत्यर्थो गुणो गुणकारो येषां तानि संख्यगुणानि संख्यातगुणितानी
त्यर्थः किं सर्वपदेषु संख्यातगुणान्येव आहोस्वित् क्वचित् कस्मिंश्चित्पदे विशेष इत्याह परमपज्ज बिएअसंखगुणाणि परं के
वलमपर्याप्तद्वीन्द्रिये अपर्याप्तद्वीन्द्रियपदे तानि स्थितिस्थानान्यसंख्यगुणान्यसंख्यगुणितानि वाच्यानि एतदुक्तं भवति
सूक्ष्मैकेंद्रियस्यापर्याप्तकस्य स्थितिस्थानानि स्तोकानि ततो बादरएकेंद्रियस्यापर्याप्तकस्य स्थितिस्थानानि संख्यात
गुणानि २ ततः सूक्ष्मैकेंद्रियस्य पर्याप्तस्य स्थितिस्थानानि संख्यातगुणानि ३ ततो बादरएकेंद्रियस्य पर्याप्तकस्य स्थि
तिस्थानानि संख्यातगुणितानि ४ एतानि च पल्योपमसंख्येयभागसमयतुल्यानि स्थितिस्थानानि सर्वत्र अतः एकेंद्रि
याणां जघन्योत्कृष्टस्थित्यंतराले एतावन्मात्रमेवेति ततो पर्याप्तद्वीन्द्रियस्य स्थितिस्थानान्यसंख्यातगुणितानि पल्योपमसंख्येय
भागमात्राणीति कृत्वा ततः तस्यैव द्वीन्द्रियस्य पर्याप्तस्य स्थितिस्थानानि संख्यातगुणितानि ६ ततस्त्रीन्द्रियस्यापर्याप्त स्थ १७१
स्थितिस्थानानि संख्यातगुणानि ७ ततस्त्रीन्द्रियस्य पर्याप्त स्थितिस्थानानि संख्यातगुणानि ८ ततः चतुरिंद्रियस्यापर्याप्त
स्य संख्यातगुणितानि ९ ततः पर्याप्तचतुरिंद्रियस्य स्थितिस्थानानि संख्यातगुणितानि १० ततो संज्ञिपंचेंद्रियस्याप

र्याप्तस्य स्थितिस्थानानि संख्यातगुणितानि ११ ततो संज्ञिपंचेंद्रियस्य पर्याप्तस्य स्थितिस्थानानि संख्यातगुणानि १२ ततः
संज्ञिपंचेंद्रियस्यापर्याप्तस्य स्थितिस्थानानि संख्यातगुणानि १३ ततः संज्ञिपंचेंद्रियस्य पर्याप्तस्य स्थितिस्थानानि संख्यातगुण १

नित्तवंति ए स्थापनेयं इ०	सूक्ष्मअपर्याप्त स्थितिस्तोक १	बादरअप० स्थि० सं० २	सूक्ष्मप० स्थि० सं० ३	बादरप० स्थितिसंख्या ४	द्वीन्द्रियअप० स्थि० असं० ५	द्वीन्द्रि० प० स्थि० सं० ६	त्रीन्द्रि० अ० स्थि० सं० ७	त्रीन्द्रि० प० स्थि० सं० ८	चतुः अप० स्थि० सं० ९	चतुः प० स्थि० सं० १०	असं० अ० स्थि० सं० ११	असं० प० स्थि० सं० १२	संज्ञिअप० स्थिति सं० १३	संज्ञिप० स्थितिसंख्या १४

व्याः तदेवं निरूपितानि योगप्रसंगेन स्थितिस्थानानि संप्रति योगाक्रमए वा पर्याप्तावस्थायां वर्तमानां जंतवः प्रतिसमयं यावत्या
योगवृद्ध्या वर्धते तन्निरूपणार्थमाह ५४ ल: पज्जत्तजहन्नसंखगुणविरिय अपज्ज पइ ठिइ असंखलोगसमा अज्झवसायाअहिया १
सत्तसु आउसु असंखगुणा ५५ व्या० अपज्जत्त अपर्याप्ताः सर्वेपि चतुर्थादिपर्याप्तयोजीवास्तवंति किंतत्तादृत्याह प्रतिक्षणं
प्रतिसमयं असंख्यगुणवीर्या संख्यातगुणयोगाः यथोक्तं सव्वोवि अपज्जत्तो पइखणमसंखगुणाए जोगवुड्ढीए वड्ढे अपर्याप्ता
नां योगवृद्धिमभिधाय सांप्रतं प्राग्दर्शितानि स्थितिस्थानानि यैरध्यवसायैर्जन्यंते एकैकस्मिन् स्थितिबंधे जनकतया यावंतो सर्वा
त तदेव तन्निरूपयन्नाह पयठिई असंखलोगसमा इत्यादि स्थितिं प्रति स्थितिं प्रति वीप्सायां योगपत्ता वीप्सार्थान्निति इ निसाद
रूपत्वयथी भावः ततः स्थितिबंधे अध्यवसायाः तीव्रतीव्रतरतीव्रतम मंदमंदतरमंदतम कषायोदयविशेषास्तवंति कियंतोन
वंतीत्याह असंखेयलोकसमा असंख्येयलोकाकाशप्रदेशप्रमाणा नन्वकिमेतेऽध्यवसायाः सर्वप्रकृतीनां सर्वस्थिति
बंधेष्वपि आहोस्वित्कस्यचित्तिनियंतो विभाग इत्याह अहिया सत्तसु त्ति अधिका विशेषाधिकाः सप्तस्वायुर्वर्जास
प्तकर्मसु इयमत्र भावना ज्ञानावरणजघन्यस्थितावसंख्येयलोकाकाशप्रदेशतुल्यास्थितिबंधाध्यवसायाः सर्वस्तो
काः ततो ज्ञानावरणस्य द्वितीयस्थितो विशेषाधिकाः ततो ज्ञानावरणस्य तृतीयस्थितो विशेषाधिकाः एवमायुष्कवर्जित १

नां दर्शनावरणमोहनीयनामकर्म्मणामपि द्वितीयादिस्थितिबंधादारभ्य विशेषाधिकत्वमध्यवसायस्थानानां तावज्ज्ञेयं
यावदुत्कृष्टस्वकीयः स्वस्थितिबंध तथा आयुष्के तु स्थितिबंधेऽध्यवसायाः कियद्गुणा भवंतीत्याह असंखगुणि त्ति आ
युः[illegible] चतुर्ष्वपि असंख्यातगुणा अध्यवसाया भवंति तद्यथा आयुष्काणां चतुर्णामपि जघन्यस्थितावसंख्येयलोकाकाशप्रदेशप
माणा अध्यवसायाः सर्वलोकाः तेषामेव द्वितीयस्थितावध्यवसाया असंख्यातगुणाः तेषामेव तृतीयस्थितावध्यवसाया अ
संख्यातगुणाः तेषामेव चतुर्थस्थितावध्यवसाया असंख्यातगुणाः एवमसंख्यातगुणत्वं तावज्ज्ञेयं यावदायुषः चरमस्थितिरिति
प्ररूपितं स्थितिबंधमाश्रित्य सर्वकर्म्मणामध्यवसायाः संप्रति यासां प्रकृतीनामेकचत्वारिंशत्संख्यानां पंचेंद्रियेषु यावंतं कालमु
त्कृष्टबंधो न भवति तावत्कालमानप्रदर्शनद्वारेण गाथाद्वयेन प्रतिपादयन्नाह ५५ ॥ तिरिदुगनिरयतिउज्जोआणं नरत्तवजुअ
सचउपल्लतेसठ्ठसयं थावरचउइगविगलायवेसु पणसीइसयमयरा ५६ व्या० तिर्यग्द्विकं नारकाश्च तेषां तिर्यग्द्विकं
नरकत्रिकमुद्योतं च तिर्यग्नारकत्रिकोद्योतानि तेषां तिर्यग्नरकत्रिकोद्योतानां इह त्रिकशब्दः प्रत्येकमभिसंबध्यते ततः
तिर्यग्त्रिकं तिर्यग्गति तिर्यगानुपूर्वी तिर्यगायुर्लक्षणं नरकत्रिकं नरकगतिनरकानुपूर्वीनरकायुःस्वरूपं उद्योतमित्येतासां
सप्तप्रकृतीनां किमित्याह नरत्तवजुयसचउपल्लतेसठ्ठि त्ति नराणां मनुष्याणां भावो नरत्वं तेन युतं सहितं नरत्वयुतं विभक्तिलोप
श्च प्राकृतत्वात् सह चतुर्भिः पल्योपमैर्वर्त्तत इति सचतुःपल्यं तेसठ्ठसयं ति त्रिषष्ट्यधिकं शतमतराणां कोऽर्थः नरत्वयुतं चतुःपल्योप
माधिकं त्रिषष्ट्यधिकं सागरोपमशतं पंचेंद्रियेषु परमाबंधस्थितिरासां सप्तप्रकृतीनां भवंतीति द्वितीयगाथोत्तरार्द्धेन । १७२
संबंधः कार्यः अयमभिप्रायो यदा कश्चिज्जंतुः त्रिपल्योपमायुष्केषु देवकुर्वादिषु युगलधर्म्मिकेषूत्पन्नः तत्र चैताः स
प्तप्रकृतीर्न बध्नाति यतोऽसौ नरकतिर्यग्प्रायोग्यं न बध्नाति युगलधर्म्मिका हि देवप्रायोग्यमेव बध्नंति ततः पर्यन्तान्तर्मुहूर्ते

[illegible] पल्योपमस्थितिषु देवेषूत्पन्नः तत्रापि सम्यक्त्वप्रत्ययादेता न बद्धवांस्ततोऽपरिपतितसम्यक्त्वो मनुष्येषूत्पद्य दी
क्षामनुपाल्य नवमग्रैवेयके एकत्रिंशत्सागरोपमस्थितिकः समुत्पन्नस्ततोऽन्तर्मुहूर्त्ते मिथ्यात्वं गतः अत्रैव षट्षष्टि
द्वयसम्यक्त्वकालो वक्तव्यः स चात्र सम्यक्त्वावस्थाने सति न संगच्छते इति मिथ्यात्वगमनमभिधीयते तत्र च वर्त्तमानो मिथ्या १
दृष्टिरपि भवप्रत्ययाद् देवत्वात् प्रकृतीर्न बध्नाति तदनु पर्यन्तान्तर्मुहूर्ते सम्यग्दर्शनमवाप्य प्रतिपतितसम्यक्त्वो मनुष्येषूत्प
द्य सर्वविरतिं परिपाल्य पुनरपि गृहीतसम्यक्त्वो वारद्वयं विजयादिगमनेन षट्षष्टिसागरोपमाणि पूरयित्वा मनुष्येष्वंतर्मुहू
र्त्ते सम्यग्मिथ्यात्वमनुभूय ततो द्वितीयषट्षष्टिप्रमाणं सम्यग्दर्शनकालं वारत्रयमच्युतगमनेन पूरयति इह च स
म्यक्त्वात्प्रच्युतस्य मिश्रगमनं यदुच्यते तत्कार्मग्रंथिकाभिप्रायेण संमतमेवेति सिद्धांतिकानां तु न संमतमिति उक्तं च मि
च्छत्तासंकंती अविरुद्धा होइ संमसीसेसु मीसाउ वा वि दोसु संमा मिच्छं न उण मीसं ति सर्वत्र च सम्यग्दर्शनमिश्रयोर्वर्त्तमान
एताः प्रकृतीर्न बध्नातीत्यनेन क्रमेणासां तिर्यक्त्रिकनरकत्रिकोद्योतलक्षणसप्तप्रकृतीनां नरत्वयुतं चतुःपल्योपमा
धिकं त्रिषष्ट्यधिकसागरोपमशतं परमा प्रकृष्टा पंचेंद्रियेष्वबंधस्थितिरबंधकाल इति उक्तं च पलियाइं तिन्नि तो गावणिमि
लवपच्चयं पालय मेगंसो सम्मे संमत्तेणं नरत्तवे सव्वविरईए १ मिच्छत्तवपच्चयउ गेवेज्जे सागराइं इगतीसं अंतमुहुत्तूणाइं सं
मत्तं मिसदुविहेण २ विरइनरत्ते वंतरिं अएण नरसुरो उ अयं वा सही मिस्संमगुज्जुत्तमेगं फासियमएण विरते ३
बावही अयराणं अबंधय एविरय नरत्तं तरिउ ति तिरिनरयतिगुज्जोयाण एसकालो य बंधमि ४ स्थावरचतुष्कं स्थावरसूक्ष्म २
पर्याप्तसाधारणलक्षणं इगत्ति एकेंद्रियजाति विकला द्वीन्द्रियत्रीन्द्रियचतुरिंद्रियजातयः आतपं एतेषां द्वंद्वस्तेष्वेतासु नव
सु प्रकृतिषु पंचाशीत्यधिकं शतं पंचाशीतिशतं अतराणि नतीर्यंते बध्यकालतरणीयत्वादतराणि सागरोपमाणि षष्ठ्यर्थे चात्र प्र

प्रमा यतः प्राकृते हि विभक्तीनां व्यत्ययो भवति यदाह पाणिनिः स्वप्राकृतलक्षणे व्यत्ययोप्यासामिति तेषामंतराणां नरभव
युतं भवतः पल्योपमित्यत्रापि संबंधनीयं ततः त्रयः पल्योपमाधिकं पंचाशीत्यधिकं सागरोपमशतं नरभवयुतमासामबंधस्थि
तिः परमा अथ मथीयथा किल कश्चिज्जंतुस्तमस्तमःप्रभायां षष्ठपृथ्व्यां द्वाविंशतिसागरोपमाणि भवप्रत्ययादेताः प्रकृतीरबं
धापर्यंते मुहूर्ते सम्यक्त्वमासाद्य मनुष्येषूत्पद्य देशविरतिमासाद्य त्रयः पल्योपमस्थितिषु देवेषु देवत्वमनुभूय प्रतिपं ततस्सा
म्यक्त्व एव मनुष्येषूत्पद्य संपूर्णसंयमं परिपाल्य नवमग्रैवेयके एकत्रिंशत्सागरोपमस्थितिकसुरत्वमनुभवन् मासमुहूर्तानि तत्र चांतर्मु
हूर्ते द्वितीयं मिथ्यात्वं गतमागमनरे वर्त्तत्र च वर्त्तमानो मिथ्यादृष्टिरपि भवप्रत्ययादेवेताः प्रकृतीर्न बध्नाति तदायुःपर्यंते तां तर्मुहूर्ते सम्य
क्त्वमवाप्य प्रतिपतितसम्यक्त्वो मनुष्येषूत्पद्य सर्वविरतिमनुपाल्य तत्रैव गृहीतसम्यक्त्वो वारद्वयं विजयादिगमनेन षट्षष्टिं
सागरोपमाणि सम्यक्त्वकालं पूरयित्वा मनुष्येष्वंतर्मुहूर्तं सम्यग्मिथ्यात्वमनुभूय तदंतरितं द्वितीयं षट्षष्टिप्रमाणं सम्यक्त्वकालं वा १
रत्रयं अच्युतगमनेन पूरयति तदेवं नरजन्मसहितं त्रयः पल्योपमाधिकं पंचाशीत्यधिकसागरोपमशतमासां स्थावरभवत्रयमेकें
द्रियविकलेंद्रियजात्यातपलक्षणानां नवानां प्रकृतीनां पंचेंद्रियप्रबंधस्थितिः परमा भवति तथा चावादि छठीए नेरइए भवपच्च
यओ य यस्ववीसं देसविरएउत्तविजे पलियचउक्कं दुरमक्के १ उ बुद्ध कालयोगो पंचासीयं सयं सचउपल्लं आयवथावरचउवि
गल तिय गएगिंदिय अबंधो इति ५६ ॥ व्या० अपढमसंघयणागिइ ५ खगई ५ अण ४ मिच्छ ५ दुसगत्थीणतिगं ३ निअ ३ नपुं ३ इत्थि
दुतीसं १३२ पणिंदिसु अबंधठिइ परमा ५७ व्या० अप्रथमशब्दस्य प्रत्येकं संबंधः ततः अप्रथमसंहननानि ऋषभनाराचनाराचार्ध १७२
नाराचकीलिकासेवार्त्तसंहननलक्षणानि पंच अप्रथमा आकृतयः संस्थानानि न्यग्रोधपरिमंडलसादिवामनकुब्जहुंडलक्ष
णानि अप्रथमखगतिरप्रशस्तविहायोगतिः अणत्ति अनंतानुबंधिनः क्रोधमानमायालोभलक्षणाश्चत्वारः मिथ्यात्वं

त्रिकशब्दस्य प्रत्येकं संबंधात् दुर्भगत्रिकं दुर्भगदुःस्वरअनादेयलक्षणं स्त्यानर्द्धित्रिकं निद्रानिद्राप्रचलाप्रचलास्त्यानर्द्धिरूपं निअत्ति
नीचैर्गोत्रं नपुंसकवेदः स्त्रीवेद इत्येतासां पंचविंशतिप्रकृतीनां नरभवसहितं बत्तीसंति द्वात्रिंशत्तत्रांतराणां नरभ
वीति विशेषः एतदुक्तं भवति कश्चिज्जंतुः सर्वविरतिमनुपाल्य गृहीतसम्यक्त्वो वारद्वयं विजयादिगमनेन षट्षष्टिसागरोप
माणि सम्यग्दर्शनकालं पूरयित्वा मनुष्येष्वंतर्मुहूर्तं सम्यग्मिथ्यात्वं अनुभूय तदंतरितं द्वितीयं षट्षष्टिप्रमाणं सम्यग्दर्श
नकालं वारत्रयमच्युतगमनेन पूरयति तदेवमेतासां पंचविंशतिप्रकृतीनां सम्यक्त्वादियुक्तस्य विजयादिगमनक्रमेण द्वा
त्रिंशदेयं तदुक्तं पणवीसाइ अबंधो उक्कोसो होइ सम्मगुणजुत्ते बत्तीसं समयराणं ज्जतिअ रिस्यामणुस्सभव एवंचता +१क+
वंशतः प्रकृतीनां विचित्रोऽबंधकालः प्रतिपादितः संप्रति सप्तदशप्रकृतीनामेतेषु वर्तीत्यतदाह पणिंदिसु इत्यादि पंचें
द्रियेषु एवं त्रिंशतिश्चैव नरनारकादिषु बंधस्थितिरबंधनाद्यपरमा प्रकृष्टा उत्कृष्टा न तु सर्वजीवेषु उक्तं च पयासिंपयमीणं अबं
धकालो उदहीण संतिस्सं उक्कोसो विन्नेउ न उ सव्वजियाण एवं स विहीणं सांप्रतं श्वेदित द्वात्रिंशदधिक त्रिपल्याधिकं पंचाशीत्यधिक
शतसंख्यास्तत्र विनोपाय्यमाह ५७ ॥ विजयाइसु गेविज्जे तमाइ दहिसयदुतीस तेसठं पणसीइ सययअबंधो
पल्लतिगं सुरविउविदुगे ५८ ॥ व्या० दधिशब्दस्य निउक्तात् लोपादुदधिशतं सागरोपमशतं ततः इत्येकमुदधिशतं शब्दस्य संबंधः
कार्यः ततश्चायमर्थः विजयादिषु गतस्य जीवस्य तिर्यगेषु द्वात्रिंशमुदधिशतं भवति तथा ग्रैवेयके विजयादिषु च गतस्य जीव
स्य त्रिषष्ट्यधिकमुदधिशतं भवति तथा तमाइत्ति तमःप्रभायां षष्ठपृथिव्यां ग्रैवेयके विजयादिषु च गतस्य जीवस्य पंचाशी
त्यधिकमुदधिशतं भवतीत्यक्षरार्थो भावार्थः पुनरयं विजयवैजयंतजयंतापराजितसंज्ञितेषु चतुर्षु विमानेष्वमध्ये अन्य
तरस्मिन्नेकस्मिंश्चिद्विमाने वारद्वयगमनेन एकाषट्षष्टिः ततः सम्यग्मिथ्यात्वांतर्मुहूर्तेनांतरिता पुनरच्युतदेवलोके वारत्रयग

मनेनान्याषट्षष्टिः यदाह तापयसुधंतोधिः दो वारे विजयाइसु गयस्स तिन्नच्चुए अहव ताइं अइरेगं नरभवियं नाणाजीवाण सव्व-
द्धा एवं षट्षष्टिद्वयमीलनेन द्वात्रिंशदुत्तरं सागरोपमाणां विजयादिषु पर्यटतोऽन्तः संपद्यते इति तथा लोकपुरुषस्य ग्रीवायां नवानि विमा-
नानि ग्रैवेयकाणि तेषु ग्रैवेयकेषु ज्ञाताथेकवचनं कोऽर्थः यदा नवमग्रैवेयके एकत्रिंशत्सागरोपमरूपां स्थितिमनुभूय तत्प्रच्युतः पुनः
मनुष्येषूत्पद्येत्यादि प्रागुक्तन्यायेन पुनर्विजयादिगमनेन षट्षष्टिद्वयं भ्रमयति तदा त्रिषष्ट्यधिकमुदधिशतं तत्र भवतीति तथा तमःप्रभायां
द्वाविंशतिसागरोपमाणि स्थितिमनुभूय ततो नवमग्रैवेयके एकत्रिंशत्सागरोपमाणि तदनु विजयादिषु षट्षष्टिद्वयमिति मिलितं पं-
चाशीत्यधिकमुदधिशतमिति सर्वत्र चान्तरालनरभवाधिकत्वं स्वत एव वाच्यमिति एवं यासां प्रकृतीनां येषु जन्तुषु सर्वेष्वेव
बन्धेन तत्र भवति तास्तद्द्वारेण प्रदर्शिताः संप्रति त्रिसप्ततिसंख्यानामध्रुवबन्धिनीनां जघन्यमुत्कृष्टं च सततबन्धकालप्रमाणं प्रति-
पादयन्नाह सययबंधो इत्यादि द्विकशब्दस्य प्रत्येकं संबन्धात्सुरद्विके वैक्रियशरीरवैक्रियाङ्गोपाङ्गस्वरूपे पल्यत्रिकं पल्योपम-
त्रयं सततबन्धः सततबन्धनाम नाम्नैकार्थे समासो वक्तव्यमिति समासो यथा विस्पष्टपटुः विस्पष्टपटुरित्यादिवदक्षरार्थः भाव- १
सुरगति सुरानुपूर्वी वैक्रियद्वि+ उत्कृ०
र्थस्त्वयं सुरद्विके वैक्रियद्विके लक्षणप्रकृतिचतुष्टयस्य पल्योपमत्रिकं सततबन्धकालः तिन्नि सयरा परमो इति पदात्परमशब्द-
स्योत्कर्षेण परमो उत्कृष्टो भवति यतो युगलधर्मिकेषु वर्तमानो जन्मतः प्रारभ्य देवप्रायोग्यमिदं प्रकृतिचतुष्टयं पल्योपमत्रयं यावत्
सततमेव निरन्तरमेव बध्नातीति भावः जघन्यतस्तु समयं वर्तमानत्वादासामपीति ५८ ॥ समयादसंखकालं तिरिदुगनीएसु
आउ अंतमुहू उरलि असंखपरट्टा सायठिई पुव्वकोडूणा ५९ व्या० समयोऽत्यन्तसूक्ष्मः कालांशः स च समयप्रसिद्धात्पट्ट- १७४
शाटिकापाटनदृष्टान्ताज्जरत्पत्रशतवेधोदाहरणाद्वाऽवसेयः तस्मात्समयादारभ्य समयद्वया तावत्सततं बन्धकालो नेयो याव-
दसंख्येयकाल इति तत्र संख्याः संख्याऽतिक्रान्ताः समयपरिमितः स चासौ कालश्च असंख्यकालस्तमसंख्येयलोकाका- १

शप्रदेशप्रमाणसमयराशिरूपं यावदित्यर्थः इह च समयशब्देन जघन्यो बन्धकाल उक्तः स च सर्वत्र मन्तव्यः क्वेत्याह तिर्यग्द्विके
तिर्यग्गति तिर्यगानुपूर्वीरूपे नीचैर्गोत्रे च द्वन्द्वे च तिर्यग्द्विकनीचैर्गोत्रयोः अयमाशयः तिर्यग्गतितिर्यगानुपूर्वीनीचैर्गोत्रल-
क्षणप्रकृतित्रयमिदं जघन्यतः समयमेकं बध्यते द्वितीयसमये परावर्तते विपक्षस्य बन्धसंभवात् यदा तु तेजोवायुषु जन्तुरु-
त्पद्यते तदा भवस्वभावादेवातिसंक्लिष्टो नीचैर्गोत्रं तिर्यग्द्विकमेव बध्नाति न तद्विपक्षमुच्चैर्गोत्रं मनुजद्विकं वा अतस्तेजोवायू-
नां कायस्थितिरूपमसंख्येयकालं यावदासां तिसृणामपि प्रकृतीनां परमसततबन्धकालः प्राप्यत इति आउ अंतमुहू त्ति
आयुःषु चतुर्ष्वपि अन्तर्मुहूर्तमेव कालं यावत्परमः सततबन्धकालः जघन्योऽपि चैतावानेवेति वक्ष्याम इति तथा एकदेशे स-
मुदायोपचारादौदारिके औदारिकशरीरविषये असंख्याः संख्यातिक्रान्ताः परट्ट त्ति परावर्ताः पुद्गलपरावर्ता वक्ष्यमाणस्वरूपा-
ः परमं सततबन्धकाल इति इहापि जघन्यतः समयमेकं सततबन्धः सविपक्षत्वात् उत्कृष्टतस्त्वसंख्येयपुद्गलपरावर्ताः कथं यतो
व्यावहारिकं सत्त्वा अपि स्थावरकायमुपगताः कायस्थित्या इयन्तं कालं तिष्ठन्ति न च तत्र वैक्रियाहारकयोः सद्विपक्षयोर्बन्धो-
स्तीति तात्पर्यं तथा साय ठिई पुव्वकोडूण त्ति सातस्य सातवेदनीयस्य स्थितिः स्थितिबन्धः सततबन्धकालः परमः पूर्वकोटि-
रूना न्यूना भवति इहापि जघन्यतः सातस्य समयमेकं बन्धः सविपक्षत्वात् उत्कृष्टतस्तु देशोना पूर्वकोटिः सततबन्धः यतो यः
कश्चिन्मानवः पूर्वकोट्यायुरष्टवार्षिकः सर्वविरतिमादाय नवमवर्षे केवलज्ञानमासादयेत् स चाष्टाभिर्वर्षैरूनां पूर्व-
कोटिं सातवेदनीयं सततं बध्नाति केवलिनः सातस्यैव बन्धात् उक्तं च उवसंतखीणमोहा केवलिणो एगविहबंधा इति
५९ ॥ जलहिसयं पणसीअं परघुस्सासे पणिंदि तसचउगे बत्तीसं सुहविहगइपुमसुभगतिगुच्चचउरंसे ६० व्या-
ख्या परघातं च उच्छ्वासं च पराघातोच्छ्वासं तस्मिन् पराघातोच्छ्वासे पणिंदि त्ति सूचनात्सूत्रमिति कृत्वा पञ्चेन्द्रियजातौ त्रसेनाप

लक्षितं चतुष्कं त्रसचतुष्कं तस्मिन् त्रसचतुष्के त्रसबादरपर्याप्तप्रत्येकलक्षणे प्रवृत्तकाले निस्सरणीयत्वात् तज्जन्यस्य वज्जल्प
रसागरोपमाणि तेषां शतं जलधिशतं पणसीयंति पंचाशीत्यधिकं परमः सततबंधकालो भवति इह त्रसचउः पल्लमित्यनिर्दे-
शेपि सचउः पल्लमिति व्याख्यानं कार्यं यतो यावानेतद्विपक्षस्याऽबंधकालः तावानेवासां बंधकाल इति पंचसंग्रहादौ
चोपलक्षणादिकेन विचारेणेनयन्नोक्तं तदत्रिपायं न विद्यत इति तथाजघन्यतएतास्त्रपि समयमेकं बध्यंते सविपक्ष
त्वादर्धं च बंधित्वा चउक्कष्टतस्तु सचउः पल्लपंचाशीत्यधिकं जलधिशतं बंधकालः कथं षष्ठस्थित्या . . . मुत्कृष्टस्थितिके 1
द्वाविंशतिसागरोपमाण्यनुभूय तत्र नासौ विपक्षबंधाभावे एव प्रस्तुतसप्तप्रकृतीर्बद्धवान् ततः पर्यंतमुक्ते सम्यक्त्वमास 1
द्य मनुष्यजन्मसंपाद्य देशविरतिरत्र लब्धा चउः पल्योपमस्थितिषु देवेषु पर्यवसम्यक्त्वयापि तिपतितसम्यक्त्व एव मनुष्येषु सचउ के+
त्पद्य संपूर्णसंयमं च परिपाल्य नवमग्रैवेयकविमाने एकत्रिंशत्सागरोपमस्थितिको महर्द्धिरमरोऽन्त्यो त्पादितस्तत्कालं मि
थ्यात्वोदयवानत्रवर्तिच्यवनकाले च सम्यक्त्वं प्रतिपद्य षट्षष्टिसागरोपमाण्यच्युतदेवलोके वारत्रयेणानुत्तरवत्तिनरत्वर्ण
नैसम्यग् (मिश्रा) त्वमनुत्तरयत्त्वापि सम्यग्दर्शनमवाप्य विजयादिषु वारद्वयेनचउः षट्षष्टिसागरोपमाणि समतिक्रम्य तदेतेषु तुत्तर+
::तमःप्रत्नाप्रथिवी प्रवृत्तिस्थानेषु पर्यटन्नेतावत्कविजवप्रयत्नाक्तविसम्यक्त्वप्रत्ययादेतावंतं कालमेताः सप्तापि प्र
कृतीः सततं बध्नातीति पंचाशीतिशतं त्रिंशदधिकं जलधिशतमितिगाथापतेः परमस्तु सततबंधकाल इति संबंधः केत्ता इत्युच्यते
ग इति शुभविहायोगतिर्पुमन्ति पुंवेदसुभगत्रिकं सुभगसुस्वरादेयलक्षणं उच्चैर्गोत्रं चउरंसन्ति चतुरस्रं समचतुरस्रं
संस्थानं तत्तः एतेषां समाहारद्वंद्वस्तत्र द्वात्रिंशत् जघन्यतः समयमेकमासां सप्तानां प्रकृतीनां बंधः सविपक्षत्वादुत्कृष्टतस्तु द्वात्रिं १७५
शत्‌ षट्षष्टिसंततं बंधकालो भवति तथाहि किल यदा कश्चित्‌ चउः सर्वविरतिमवाप्यानुत्तरतसम्यक्त्वोवारद्वयविजयादि

गमनेन षट्षष्टिसागरोपमाणि सम्यक्त्वकालं पूर्यम अनुष्येषु अंतर्मुहूर्तं सम्यग्मिथ्यात्वमनुभूयततदंते द्वितीयं षट्षष्टिप्रमा 1
णं सम्यग्दर्शनकालं वारत्रयमच्युतदेवलोकगमनेन पूरयति तदा सम्यग्दृष्टिरुच्चारतापर्वबध्नाति नपुनरेतत्प्रतिपक्षा
स्तासां मिथ्यादृष्टिसास्वादनगुणस्थानकयोर्बंधव्यवच्छेदादिति ६० अः असुरखगइ ३ उच्छ्वास ४ आगिइ ५ संघयण ५ हार २
नरय २ जोय २ दुग थिर ६ सुहरु ५ जस २ थावर १० दस नपु १ इत्थी ६ दुजुअलमसायं ६२ व्या० सुशब्दः प्रसंसायांन सु नः + तन्न
अ प्रशस्तलक्षणः ततो असुशब्दः प्रत्येकं संबध्यते ततश्चासुखगतिरप्रशस्तविहायोगतिः असुजातयः एकद्वित्रिचतुरिं-
द्रियजातिलक्षणाश्च तस्यः असुसंहननानि ऋषभनाराचादीनि पंच असुआकृतयः आकारा संस्थानानि न्यग्रोधपरिमंडल
यः पंच द्विकशब्दस्य प्रत्येकं संबंधादाहारकद्विकमाहारकशरीराहारकांगोपांगलक्षणं नरकद्विकं नरकगतिनरकानुपू
र्वीलक्षणं जोयदुगंति उद्योतद्विकं उद्योतातपलक्षणं उद्योतायावदपरघा इति संज्ञागाथायांपवनात् स्थिरनाम शुभनाम
त्रसत्ति यशः कीर्तिनाम स्थावरदशकं प्रतीतमेव नपुंत्ति नपुंसकवेदस्त्रीवेदद्वयोर्युगलयोः समाहारो द्वियुगलं हास्य
रत्यरतिशोकलक्षणं असातमसातवेदनीयमिति ६२ अः समयादंतमुहूर्तंबंध । मणुदुग उच्च । वइरत्त उरलुवंगेसु ।
तित्थे सयराप्परमो अंतमुहूर्तलहु विअ आउ ४ जिणे १ ६२ तिइबंधो संमत्तो ॥ ॥ व्या० एतासां सर्वोक्तानां असुखगतिप्र स्ट+
त्येकचत्वारिंशत्प्रकृतीनां किमित्याह समयात् समयकालादारभ्यांतर्मुहूर्तं यावदुत्कृष्टतोपि सततबंधेन परतो
पकिमुक्तं भवति समयप्रमाणो जघन्यो बंधकालोत्कृष्टश्चांतर्मुहूर्तप्रमाणो यतः समयादंतर्मुहूर्ताद्धिंनरकालमासामध्रु
वबंधित्वेनावश्यंपराहत्तेः सद्भावात् संगच्छतएवयथोक्तकाल इति तथामणुदुगंति मनुजद्विकं मनुजगतिमनुजानुपू : उपरमति :
र्वीरूपं जिननामवइरत्ति वज्रऋषभनाराचसंहननं उराल्लिकांगोपांगं ततो मनुजद्विकादीनां द्वंद्वस्तेषु एतासु प्रकृतिषु

BHAU DAJI

विषयेत्रयः त्रिंशदादतराणि परमः उत्कृष्टः सततबंधो निरंतरबंधकाल इतियोगः अत्रापि जिननामवर्जानां वतसृ
णांप्रकृतीनां जघन्यतः समयमेकंबंधः सविपक्षत्वात् उत्कृष्टतस्तु त्रयस्त्रिंशदादतराणि यतो बद्धजिननामकर्मा अनुत्तरसु
रेषु स्थितस्तावंतं कालमेतदेवप्रस्तुतप्रकृतिपंचकं सततं बध्नातीति ननु किमध्रुवबंधिनीनां प्रकृतीनां सर्वासामपि
जघन्यबंधकालः समयमात्र एव किमुत कासांचिदन्यथापीत्यत आह अंतमुहुत्त लहु विय आउ जिणे तित्थयरे पि जघन्य
बंधोपि कस्तु बंधकालोपि न केवलमसुरवगतिप्रकृतीनां प्रकृतीनामुत्कृष्टोंऽतर्मुहूर्त लक्षणो बंधकाल इत्यपि शब्दार्थः
आयुः षु चतुर्षु जिननामकर्मणि चेत्यर्थः अंतमुहूर्तमिति एकदेशे समुदायोपचारादंतर्मुहूर्त लक्षणोन तु समयरूप इति
अयमत्रभावार्थः इह कश्चिज्जंतुस्तीर्थकरनाम बंधक उपशमश्रेणिमारूढस्तत्र चानिवृत्तिबादरसूक्ष्मसंपरायोपशांतमो
हलक्षणगुणस्थानकत्रये वर्तमानो बंधकः संपेदे ततः श्रेणिसमाप्यप्रतिपतितः पुनरप्यंतर्मुहूर्तं यावत्तदेव बध्नात्यर्थं द्वि
तीयवारं श्रेण्यारोहणोऽबंधकोयदा भवति तदासौ कालो लभ्यते न च वाच्यं कथमेकस्मिन्नेव भवे वारद्वयं श्रेणिक
रणं यतः शास्त्रे तस्याभिहितत्वात् उक्तं च एकभवे दुरिकित्तो चरित्तमोहं उवसमिज्जंति आयुर्षु चित्वार्यपि यावदंत
र्मुहूर्तं तावज्जघन्यतोपि बध्यते तत्र तिसुभ्यतीत एवायबंधकाल इति प्रकृतिप्रदेशसंक्रामानुभागसंक्रमस्थितिः स्थितिबं
धः बः इदानीमनुभागबंधस्यावसरः अनुभागो रसो अनुभाव इति पर्यायाः तत्रानुभागस्य किंचिन्मात्रं स्वरूपमु 1 १७६
च्यते इह गोक्षीरपारसौरसरित्यति मध्यविपरिवर्ती रागादिसचिवो जंतुरभवकसिद्धानामनंतभागवर्त्तिभिरभव्येभ्यो
ऽनंतगुणैः परमाणुभिर्निष्पन्नत्वात् कर्मस्कंधानन्प्रतिसमयं गृह्णातिततत्र प्रतिपरमाणुकषायविशेषात्सर्व
जीवानंतगुणः न उ भागस्याविभागपलिच्छेदान् करोति केवलिप्रज्ञयाच्छेद्यमानो यः परमनिकृष्टोऽनुभागांशो ति

॥

ष्ठन्नतया अर्द्धं न ददाति स अविभागपलिच्छेद उच्यते उक्तं च बुद्धीइ छिज्जमाणो अणुभागो सो न देइ जो अद्धं अविभागपलिच्छे
ए सो इह अणुभागबंधंमि तत्र चैकैककर्मस्कंधे यः सर्वजघन्यरसः परमाणुः सोपि केवलिप्रज्ञया छिद्यमानः किल सर्व
जीवेभ्योऽनंतगुणान् रसभागान् प्रयच्छति अन्यस्तु परमाणुः स तान विभागपलिच्छेदानेकाधिकान् यच्छेदपरस्तु तान + ३-
पि द्व्यधिकानन्यस्तु तानपि त्र्यधिकानन्यस्तु तानपि चतुरधिकानित्यादि वृद्ध्या तावन्नेयं यावदन्य उत्कृष्टरसः परमाणु
र्योऽविशेषान् सर्वजीवानंतगुणानपि रसभागान् प्रयच्छति अत्र च सर्वजघन्यरसा ये केचिन परमाणवस्तेषु सर्वजीवानंतगुण
रसभागयुक्तेष्वसत्कल्पनया शतं रसांशानां परिकल्प्यते एतेषां च समुदायः समानजातीयत्वादेका वर्गणेत्यभिधी
यते अन्येषां त्वेकोत्तरशततररसभागयुक्तानामणूनां समुदायो द्वितीयवर्गणा अपरेषां तु द्व्युत्तरशततररसांशयुक्तानामणू
नां समुदायस्तृतीयवर्गणा अन्येषां तु त्र्युत्तरशततररसभागयुक्तानामणूनां समुदायः चतुर्थीवर्गणा एवमनया दिशा एकैक
रसभागवृद्ध्यानामणूनां समुदायरूपवर्गणाः सिद्धानामनंतभागो अभव्येभ्योऽनंतगुणा वाच्याः एतासां चैतावतीनां
वर्गणानां समुदायः स्पर्द्धकमित्यभिधीयते स्पर्द्धंत एवोत्तरोत्तरसवृद्ध्या परमाणुवर्गणा अत्रेति कृत्वा एतास्त्वानंतरोक्त १ ११+
नंतकल्पनया असत्कल्पनया षट् स्थाप्यंते बः १०५ इदमेकं स्पर्द्धकं इत ऊर्ध्वमेकोत्तरया निरंतरवृद्ध्या रसोन लभ्यते
किंतर्हि सर्वजीवानंतगुणैरेव रसभागैर्वृद्धो लभ्यते इ १०४ ति तेनैव क्रमेण द्वितीयं रसस्पर्द्धकमारभ्यते ततस्तेनैव क्रमेण तृ
तीयमित्यादि यावदनंतानि रसस्पर्द्धकानि उत्तिष्ठं १०३ ते अयं चानुभागः शुभाशुभभेदेन द्विविधानामपि प्रकृतीनां
तीव्रमंदरूपतया द्विविधो भवत्यतो शुभाशुभप्रकृती १०२ नां येन प्रत्ययेनासौ तीव्रो बध्यते येन च मंदस्तन्निरूपणार्थमाह
बः तिव्वो असुह सुहाणं संकेस विसोहिओ वि १०१ वज्जय उ मंदरसो गिरिमहिरयजलरेहासरिकसाएहिं • स१
१००

+प्रथमं+ इह व्या० तत्र तावज्जीवमंदत्वस्वरूपमुच्यते पश्चार्द्धाक्षरार्थः इह घोषातकीपिचुमंदाद्यशुभवनस्पतीनां संबंधी यः सहजो द्रवि
र्णः हितागावर्जेलितागत्रयावर्जश्च यथासंख्यं कटुको कटुकतरो कटुकतमोऽतिकटुकतमश्च रसो जलाद्यसंबंधयथातीव्रो भवति
तथैव तेषामेव पिचुमंदादीनां क्षीरादीनां च द्रव्याणां संबंधी सहजो रसो जललवबिंदु अर्द्धचुलुक चुलुक प्रसृत अंजलिकरक कुं
भद्रोणादिसंबंधयथाक्रमं कृते मंदमंदतरादित्वं प्रतिपद्यते तथा अर्द्धावर्त्तादयो पि रसा जललवादिसंबंधान्मंदतर मंदतमादित्वं
प्रतिपद्यंते तथैवाशुभप्रकृतीनां शुभप्रकृतीनां च रसाः तादृशतादृशकषायवशात्तीव्रत्वं मंदत्वं वानुविदधतीति
अक्षरार्थः भावना विधीयते तीव्रो रसो भवति अशुभतः शुभश्च कासामित्याह असुहसुहाणं ति अशुभानां शुभानां च अशुभशुभा
स्तासामशुभशुभानामशुभप्रकृतीनां शुभप्रकृतीनां चेत्यर्थः कथमित्याह संकेसविसोहिउ त्ति संक्लेशाश्च विशुद्धयश्च संक्लेश
विशुद्धयस्ताभ्यां संक्लेशविशुद्धितः आद्यादेराकृतिगणत्वात्तस्प्रत्ययः यथासंख्यमशुभप्रकृतीनां संक्लेशेन शुभप्रकृतीनां वि
शुद्ध्येत्यर्थः इदमत्र हृदयं अशुभप्रकृतीनां घ्यशीतिसंख्यानां संक्लेशेन तीव्रकषायोदयेन तीव्र उत्कटो रसो भवति सर्वाशुभप्रकृ
तीनां तद्बंधविधायिनां ऊर्द्धमध्ये यो यस्तकृष्टसंक्लेशो हि उस्सतीव्रतरसंबंधीत्यर्थः शुभप्रकृतीनां विशुद्ध्या कषायविशुद्ध्या २
तीव्रोऽनुभागो भवति शुभप्रकृतेः बंधकानां मध्ये यो यो विशुद्धिमान परिणामः स सतासां तीव्रमनुभागं बध्नातीत्यर्थः उत्कृष्टी
व्रतरस्य बंधप्रत्ययः संप्रति स एव मंदरसस्याभिधीयते विवक्षायत उ मंदरसो त्ति विपर्ययेण विपर्ययस्तउक्तवैपरीत्येन मंदोऽनुत्क
टो रसो भवति अयमर्थः सर्वप्रकृतीनामशुभानां विशुद्ध्या मंदो रसो जायते शुभानां तु मंदः संक्लेशेनेति उक्तः संक्लेशविशुद्धि १७७
वशादशुभशुभप्रकृतीनां तीव्रो मंदश्चानुभागोऽयं चैकद्वित्रिचतुःस्थानिकभेदाच्चतुर्द्धा भवत्यत एकस्थानिकादिरसो यैः
प्रत्ययैर्यासां प्रकृतीनां भवति तदाह गिरिमहिरिय इत्यादि पूर्वार्द्धं वृत्तिः मही च पृथ्वी रजश्च वालुका जलं च पानीयं गिरिमहीरजो

+गिरिश्च+

जलानि तेषु रेखा राजयः ताभिः सदृशास्तुल्या गिरिमहीरजोजलरेखासदृशास्तैर्वतैः कषायाश्च संपरायास्तैर्रसो भवतीति प्र
क्रमः कीदृगित्याह इह बः चउठाणाई असुहो सुहन्नहा विग्घदेसआवरणा उ पुमसंजलणिगदुतिचउठाण
रसा सेसा दुगमाइ ६४ व्या० चतुःस्थानकआदिर्यस्य रसस्य त्रिस्थानिकद्विस्थानिकएकस्थानिकरूपपरिग्रहः स चतुःस्थाना
दिः कासामित्याह असुहत्ति इह प्रथम ततोऽशुभेति नाम शुभप्रकृतीनां इयमत्र भावना इह रेखाशब्दस्य प्रत्येकं संबंध २
गिरिरेखया एकेन प्रस्तकालव्यपदेशादयः इति तीव्रत्वं कषायाणां प्रतिपाद्यते ततश्च गिरिरेखासदृशैः कषायैरनंतानुबंधिभिरि
त्यर्थः सर्वासामशुभप्रकृतीनां चतुःस्थानिकरसबंधो भवति आतपशोषितक्षमामहीरेखासदृशैः कषायैरप्रत्याख्यान २+न+
वरणैः मनागमंदोदयैरशुभप्रकृतीनां त्रिस्थानिकरसबंधो भवति वालुकारेखासदृशैः कषायैः प्रत्याख्याना वरणैर
शुभप्रकृतीनां द्विस्थानकरसबंधः जलरेखासदृशैः कषायैरतिमंदोदयैः संज्वलनाभिधैर्विघ्नपंचकादिवक्ष्यमाणसप्तदशाशु
भप्रकृतीनामेवैकस्थानिकरसबंधो भवति न शेषाणामशुभप्रकृतीनाम शुभप्रकृतीनां द्विस्थानमः उक्तोऽशुभानां रसस्य बंध
प्रत्यय इदानीं शुभानां रसप्रत्ययविभागमाह सुहन्नहत्ति शुभप्रकृतीनां ग्रंथाग्रं २००० अन्यथोक्तवैपरीत्येन हेतुविपर्यया
च्चतुःस्थानिकादिरसबंधो भवति तत्र वालुकाजलरेखासदृशैः कषायैश्चतुःस्थानिको रसबंधो भवति महीरेखासदृशैः
कषायैः त्रिस्थानिको रसबंधो भवति गिरिरेखासदृशैः कषायैः द्विस्थानिको रसबंधः शुभप्रकृतीनां भवति शुभप्रकृतीनां २
त्वेकस्थानिको रस एव नास्तीति पूर्वमेवोक्तं अथ यासां प्रकृतीनां एकद्वित्रिचतुःस्थानिकभेदाच्चतुर्विधोऽपि रसबंधः संभव
ति यासां चैकस्थानिकवर्जः त्रिविध एवेत्येतच्चिंतयन्नाह विग्घदेसघाइआवरणा इत्यादि विघ्नानि दानलाभभोगोपभो
गवीर्यांतरायभेदादंतरायाणि पंच देशघात्यावारिकाः सप्तप्रकृतयः तद्यथा मतिज्ञानश्रुतज्ञानावधिज्ञानमनःपर्याय

ऽवधिदर्शना

ज्ञानावरणाश्चतस्रः चक्षुर्दर्शनाचक्षुर्दर्शनावरणानि तिस्रः एता ७ मिलिताः वेदः संज्वलनाश्चत्वारः क्रोधमानमायालोभा १
इत्येताः सप्तदशप्रकृतयः किमित्याह इगदुतिचउठाणरस त्ति सामान्यपदस्य प्रत्येकं संबंधात् एकस्थानद्विस्थानत्रिस्थान
चतुःस्थानरसा यासां ता एकद्वित्रिचतुःस्थानरसाः एताः सप्तदशापि प्रकृतय एकद्वित्रिचतुःस्थानिकरूपेण चतुर्विधेनापि र
सेन संयुक्ता बध्यंते इति तात्पर्यार्थः तत्रानिवृत्तिबादरगुणस्थाने संख्येयेषु भागेषु गतेष्वासां सप्तदशानामपि प्रकृतीनामे
कस्थानिको रसः प्राप्यते शेषस्थानिकास्तु रसास्त्रयोप्यासां संसारस्थान् जीवानाश्रित्य प्राप्यंते इति शेषाः प्रकृतयः तर्हि
किंरूपा भवंतीत्याह सेसदुगमाई इति शेषास्तेभ्यः सप्तदशप्रकृतिभ्य उद्धरिताः सर्वाः शुभाऽशुभाश्च प्रकृतयो बध्यंते
आदिशब्दात् त्रिस्था नरसा+ दुगमाई इति सूचनात् सूत्रमिति न्यायात् द्विस्थानादिरसाश्चतुःस्थानरसाः शेषाः प्रकृतयो द्विस्थानिकरसयुक्ता भवंति न त्वेक +त्रिस्थानिकच तुःस्थानिक+
स्थानिकरसयुक्ता इति भावः अयमत्राशयः सप्तदशप्रकृतिष्वेवैकस्थानिको रसो बध्यते न तु शेषासु यतोऽशुभप्रकृती
नामेकस्थानिको रसो यदि लभ्यते तदा निवृत्तिबादरसंख्येयभागेभ्यः परत एव तत्र च सप्तदशप्रकृतिर्वर्जयित्वा शेषा
णामशुभप्रकृतीनां बंध एव नास्त्यतः शेषाणामशुभानामेकस्थानिको रसो न भवति येऽपि केवलज्ञानकेवलदर्शनावर
णलक्षणे द्वे अपि प्रकृती तत्र बध्येते तयोरपि सर्वघातित्वाद् द्विस्थानिक एव रसो निर्वर्त्तित नैकस्थानिक इति शुभानां तु सर्वासा
मप्येकस्थानिको रसो न भवति यत इहासंख्येयलोकाकाशप्रदेशप्रमाणानि संक्लेशस्थानानि भवंति विशुद्धिस्थानान्यपि तावं
त्येव यथा यावंत्येव संक्लिश्यमानः संक्लेशस्थानान्यारोहति तावंत्येव विशुध्यमानोऽवतरति ततश्च यथा प्रासादमारोहतां यावं १७८
ति सोपानस्थानान्यवतरतामपि तावंत्येव तथात्रापीति भावः केवलं विशुद्धिस्थानानि विशेषाधिकानि कथमिति चेदुच्यते क्षप
+क+ को येष्वध्यवसायस्थानकेषु क्षपकश्रेणिमारोहति न तेषु पुनरपि निवर्त्तते तस्य संक्लेशस्थानाभावात् ततो विशुद्धिस्थाना

न्यधिकानि भवंति न संक्लेशस्थानानीति तैरध्यवसायस्थानैर्विशुद्धिस्थानान्यधिकानि एवं च क्षपकेऽत्यंतविशुद्धौ वर्त्तमानः शुभप्रकृ
तीनां चतुःस्थानिकं रसमभिनिर्वर्त्तयति अत्यंतसंक्लेशे तु वर्त्तमानस्य शुभप्रकृतयो बंध एव नागच्छंति यास्त्वपि वैक्रियतैज
सकार्मणाद्याः शुभा नरकप्रायोग्याः संक्लिष्टोपि बध्नाति तासामपि स्वभावात् सर्वसंक्लिष्टोपि द्विस्थानिकमेव रसं विदध्या
ति ये तु मध्यमाध्यवसायस्थानेषु शुभप्रकृतयो बध्यंते तेषु तासां द्विस्थानिकपर्यंत एव रसो बध्यते नैकस्थानिको मध्यमपरिणामत्वा १
देवेति न क्वापि शुभप्रकृतीनामेकस्थानिकरससंभव इति कृता चतुर्विधस्यापि रसस्य प्ररूपणा संप्रति शुभाशुभरसस्यैव वि
शेषतः किंचित्स्वरूपमाह ६४ मू० निंबुच्छुरसो सहजो दुतिचउभागकढिइक्कभागंतो इगठाणाई असुहो असुहा
ण सुहो सुहाणं तु ६५ व्या० इहैवमक्षरघटना अशुभानामशुभप्रकृतीनां रसोऽशुभोऽशुभाध्यवसायनिष्पन्नत्वात् कटुक इ
त्याह निंबवत् निंबवृक्षवत् मंदवत् रसशब्दस्याप्युत्तरस्य प्रयोगो द्रष्टव्यः तथा शुभानां शुभप्रकृतीनां रसः शुभः शुभाध्यवसायनि
ष्पन्नत्वात् मधुर इत्याह इक्षुवत् इक्षुयष्टिवत् तथा डमरुकमणिन्यायात् निंबेक्षुरसशब्द एवमप्यावर्त्यते तथा निंबरस एव इक्षुरस
एव सहजः स्वाभाविकः एकस्थानिक उच्यते स एवैकस्थानिकरसो द्वित्रिचतुर्भागक्वथितैकभागांतो द्विस्थानिकादिर्भवति
कोऽर्थः द्वौ च त्रयश्च चत्वारश्च द्वित्रिचत्वारस्ते च ते भागाश्च द्वित्रिचतुर्भागा द्वित्रिचतुर्भागाश्च ते क्वथिताश्च क्वथितेन चाश्रयेषु क
थिताश्च द्वित्रिचतुर्भागक्वथितास्तेषामेक एकसंख्यो भागोंऽतेऽवसाने यस्य सहजरसस्य स द्वित्रिचतुर्भागक्वथितैकभागांतः स कि
मित्याह एकस्थानकादिरा दिशब्दाद् द्विस्थानक त्रिस्थानिक चतुःस्थानिकरसपरिग्रहः इत्यक्षरार्थः भावार्थस्त्वयं इह यथा निंबघो १
षातकीवल्लीनां कटुकद्रव्याणां सहजोऽक्वथितः कटुकरस एकस्थानिक उच्यते स एव भागद्वयप्रमाणः स्थाल्यां क्वथितोऽर्द्धा
वर्त्तितः कटुकतरो द्विस्थानिकः स एव भागप्रमाणः स्थाल्यां क्वथितः त्रिभागांतः कटुकतम त्रिस्थानिकः स एव भागचतुष्ट
+त्रय+

यमाणो विच्छिन्नस्थानेकथितः चतुर्भागांतोऽतिकटुकतमश्चतुःस्थानिकः तथा इक्षुक्षीरादीनां सहजो मधुररसस्थानिक
उच्यते स एव सहजोभागद्वयप्रमाणः पृथग्भाजनेकथितोऽर्द्धावशिष्टो मधुरतरो द्विस्थानिकः स एव भागत्रयप्रमाणः पृथक्स्थाल्यां
कथितत्रिभागांतो मधुरतमस्त्रिस्थानिकः स एव भागचतुष्टयप्रमाणो विच्छिन्नस्थानेकथितश्चतुर्भागांतोऽतिमधुरतमश्चतुःस्था
निक एवमशुभानां प्रकृतीनां तादृशतादृशकषायनिष्पाद्यः कटुकः कटुकतरः कटुकतमेति कटुकतमश्च शुभप्रकृतीनां
तु मधुरो मधुरतरो मधुरतमोऽतिमधुरतमश्च रसो यथासंख्यमेकद्वित्रिचतुःस्थानिको भवति एवं च रसोऽशुभप्रकृतीनामशु
भः शुभप्रकृतीनां शुभ इति उक्तो विशेषो सचैवं विशिनष्टि यथा सम्यग्दृष्टेः शुभप्रकृतीनां एकस्थानिकरसस्पर्द्धकान्यसंख्येय
व्यक्तिमत्त्वादसंख्येयानि भवंति तत्र च सर्वजघन्यस्पर्द्धकरसस्येयं निंबाद्युपमा तदनु चानंतेषु रसपलिच्छेदेषु व्यतिक्रांतेषु उत्त
रद्वितीयस्पर्द्धकं भवति एवमुत्तरोत्तरक्रमेण प्रवृद्धप्रवृद्धतररसोपेतानि शेषस्पर्द्धकान्यपि भवंति एवं शेषा अशुभप्रकृतीनामपि द्वि
त्रिचतुःस्थानिकरसस्पर्द्धकान्यसंख्येयव्यक्तिव्यक्तानि प्रत्येकमसंख्येयानि भवंति तान्यपि यथोत्तरमनंतरसपलिच्छेदनिष्पन्न
त्वात् परस्परमनंतगुणरसानि अत उत्तरोत्तरस्पर्द्धकान्यप्यनंतगुणरसानि किं पुनरशुभानां द्वित्रिचतुःस्थानिकरसा इति तथा
ह्यशुभानां निंबोपमवीर्ये य एकस्थानिको रसः तस्मादनंतवीर्यो द्विस्थानिकः ततोऽप्यनंतगुणवीर्यस्त्रिस्थानिकः तस्मादप्य
नंतगुणवीर्यश्चतुःस्थानिक इति परस्परं सुप्रतीतमेवानंतगुणरसत्वमिति शुभप्रकृतीनां पुनरेकस्थानिको रस एव नास्ति यस्मा
शुभानामिक्षूपमो रसोऽभिहितः स द्विस्थानिकरसस्य सर्वजघन्यस्पर्द्धके प्रवृत्तः उत्तरस्पर्द्धकेषु चानंतगुणो रसा संभवंति तेन सर्वा १७९
च संग्रहाभिप्रायतो व्याख्यातं किं च केवलज्ञानावरणादिरूपाणां सर्वघातिनीनां विंशतिसंख्यानां प्रकृतीनां सर्वाण्यपि सर्वरसस्पर्द्ध
कानि सर्वघातीन्येव देशघातिनीनां तु मतिज्ञानावरणप्रभृतिपंचविंशतिप्रकृतीनां रसस्पर्द्धकानि कानिचित्सर्वघातीनि कानिचि

द्देशघातीनि तत्र यानि चतुःस्थानिकरसानि वा रसस्पर्द्धकानि तानि नियमतः सर्वघातीनि द्विस्थानिकरसानि पुनः कानिचिद्देशघा
तीनि एकस्थानिकानि तु सर्वाण्यपि देशघातीन्येव उक्तं च यानि रसस्पर्द्धकानि सकलमपि स्वघात्यं ज्ञानादिगुणं घ्नंति तानि च
स्वरूपेण ताम्रभाजनवन्निश्छिद्राणि घृतमिवातिशयेन स्निग्धानि द्राक्षावत् तनुप्रदेशोपचितानि स्फटिकाभ्रगृहवच्चातीव निर्म
लानि उक्तं च जो घाएइ नियगुणं सयलं सो होइ सव्वघाईरसो सो निच्छिद्दो निद्धो तणुओ फलिहब्भहरविमलो यानि देशघाती
रसस्पर्द्धकानि तानि स्वघात्यं ज्ञानादिगुणं देशतो घ्नंति तद्देशस्य क्षयोपशमसंभवात् तानि च स्वरूपेणानेकविधविवरसंकु
लानि तथाहि कानिचित् कटवातिस्थूरच्छिद्रशतसंकुलानि कानिचित्कंबलवन्मध्यमविवरशतसंकुलानि कानिचित्सु
नरतिसूक्ष्मविवरनिकरसंकुलानि यथा वा सांसितघातानि देशघातीनि रसस्पर्द्धकानि स्तोकस्नेहानि भवंति विमलप्रहिता
नि च उक्तं च देसविघाइ तणंतो कडगकंबलंसुसंकासो विविहबहुछिद्दभरिओ अप्पसिणेहो अविमलोय इति प्ररूपितः
सप्रपंचमनुभागबंधस्तस्य स्वामिनो निरूपयन्नाह ६५ बः तिव्वमिगथावरायव सुरमिच्छा विगलसुहुमनरयतिरि
गं तिरिमणुआउ तिरिनरा तिरिदुग छेवट्ठ सुरनिरया ६६ व्या० शाति एकेंद्रियजातिः स्थावरनाम आतपनामेत्येतस्य प्रकृति
त्रयस्य सुरमिथ्यात्वि सुरा देवा मिथ्यादृष्टयस्तीव्रमनुभागमुत्कृष्टानुभागं कुर्वंतीति शेषः अत्र चावशेषो भावपि व्याख्यानतो विशेष
प्रतिपत्तिरिति न्यायात् सुराईशानांता एव द्रष्टव्या नोपरितना स्तेषामेकेंद्रियेषु उत्पत्त्यभावादेकेंद्रियप्रायोग्यं प्रकृतित्रयबंधासं
भवात् अयमपि विशेषानंतो देवएकेंद्रियजातिस्थावरयोरुत्कृष्टानुभागं सर्वसंक्लिष्टो बध्नाति तस्य च तत्प्रायोग्यविशुद्धित्वपृष्ठ
त्यमिदं हि शुभप्रकृतित्वाद्विशुध्या उत्कृष्टरसं जन्यते सापि विशुद्धिर्यद्यधिकतरा स्यात्तदा पंचेंद्रियतिर्यक्प्रायोग्यं मनुष्यप्रायो
ग्यं वा बध्नीयान्न त्वातपं तत्प्रायोग्यबंधे बध्यते एकेंद्रियप्रायोग्यत्वादेवेत्यालोच्य तत्प्रायोग्यविशुद्धत्वविशेषणोपादा

DR BHAU DAJI

न आहारपरः ननु सवत्वेवं किंतु मिथ्यादृष्टिदेवएवेता स्तिस्र उत्कृष्टरसाः करोति नान्य इत्यत्र किं निबंधनमत्रोच्यते नारकाणां तावद्देव २
एकेंद्रियप्रायोग्यत्वात्तत्रोत्पत्त्यभावाद्बंध एवानागच्छंति तिर्यङ्मनुष्यास्तु यावत्तथाविशुद्धौ वर्त्तमानोऽयमातपमुत्कृष्टरसं करोति
तावत्तथाविशुद्धौ वर्त्तमानाः पंचेंद्रियतिर्यगादिप्रायोग्यमन्यत्किंचिच्छुभतरमुपरचयंत्यथ यावति संक्लेशे वर्त्तमानोऽसावेकेंद्रिय
जातिस्थावरयोः उत्कृष्टानुभागं बध्नाति तावति संक्लेशे स्थितास्त्वमी नरकगतिप्रायोग्यं निर्वर्त्तयेयुर्देवास्तूत्कृष्टसंक्लेशेऽपि स्व
भवप्रत्ययादेकेंद्रियप्रायोग्यमेव बध्नंति न तु नारकप्रायोग्यमिति तिर्यङ्मनुष्याणामपि प्रकृतकर्मत्रयोत्कृष्टानुभागबंधकत्वासं
भवस्तु अपि सम्यग्दृष्टयो मनुष्यप्रायोग्यमेव बध्नंतीति मिथ्यादृष्टिग्रहणं तस्मादीशानांता मिथ्यादृष्टिदेवा यदा आतपस्य सर्वल
घ्वीं स्थितिमुपकल्पयंति तदा तद्बंधकेष्वतिविशुद्धास्ते उत्कृष्टानुभागं विदधति यदा तूत्कृष्टसंक्लेशे वर्त्तमाना एकेंद्रियजाति
स्थावरयोः सर्वोत्कृष्टां स्थितिमुपरचयंति तदा तयोरुत्कृष्टानुभागं कुर्वत इति स्थितं तथा त्रिकशब्दस्य प्रत्येकं संबंधात् विकल
त्रिकं द्वींद्रियत्रींद्रियचतुरिंद्रियलक्षणं सूक्ष्मत्रिकं सूक्ष्मापर्याप्तसाधारणाख्यं नरकत्रिकं नरकगति नरकानुपूर्वी नरकायु
: स्वरूपं आयुः शब्दस्य प्रत्येकं संबंधात् तिर्यगायुर्मनुजायुरित्येतासामेकादशप्रकृतीनां काकलिकान्यायेन मिथ्यादृष्टिश
ब्दस्योभयत्रानुकर्षणात् मिथ्यादृष्टयस्तिर्यंचश्च नराश्च तिर्यग्नरास्ते उत्कृष्टानुभागं बध्नंति न देवनारका इत्यर्थः तथाहि तिर्यङ्मनु
ष्यायुषी अप्रशस्ते अपि योग्यत्वादुत्कृष्टरसे प्रकृते अतस्ते अमी न बध्नंति अतस्तेषां तदनुभागबंधसंभवः तस्मात् संक्लिष्टा मिथ्यादृष्ट
यः तिर्यङ्मनुष्या एतत्प्रायोग्यविशुद्धा एते आयुषी बध्नंति नारकायुषस्तत्प्रायोग्यसंक्लिष्टा उत्कृष्टरसं बध्नंति संक्लिष्टस्यायु
र्बंधविरोधात् नरकद्विकं ते तत्प्रायोग्यसर्वसंक्लिष्टा बध्नंत्येकं द्वौ वा समयौ यावदुत्कृष्टसंक्लेशस्यैतावन्मात्रकालत्वात् देवनारकाणां तु वि
कलत्रिकसूक्ष्मत्रिकलक्षणानामष्टानां प्रकृतीनामेतदेव तत्प्रायोग्यसंक्लिष्टा उत्कृष्टानुभागं बध्नंति सर्वसंक्लिष्टास्तु पंचेंद्रियस्तुत प्र

+देवा नैव प्रकृति तद्भवप्रत्ययादेव देवनारका न बध्नंति तिर्यङ्मनुष्या युः+३५

१८०

कृतिबंधमुल्लंघ्य नरकप्रायोग्यं निर्वर्त्तयेयुरिति तत्प्रायोग्यसंक्लेशग्रहणमिति तथा तिर्यग्द्विकं तिर्यङ्गति तिर्यगानु
पूर्वीस्वरूपं छेदपृष्ठसंहननमित्येतत्प्रकृतित्रयस्य सुरा नारका वा अत्यंतसंक्लिष्टा उत्कृष्टानुभागं बध्नंति तिर्यङ्मनुष्यास्तु
ह्येतावति संक्लेशे वर्त्तमाना नारकगतिप्रायोग्यमेव निर्वर्त्तयेयुर्न च तत्प्रायोग्यता प्रकृतयो बध्यंत इति तदुदासेन देवना
रकाणां ग्रहणं ते हि सर्वसंक्लिष्टा अपि तिर्यङ्गतिप्रायोग्यमेव बध्नंतीति इत्थं च व्याख्यानतो विरोधप्रतिपत्तिः सेवार्त्तस्ये-
शानादुपरि सनत्कुमारादयो देवा उत्कृष्टानुभागं बध्नंति न त्वीशानांतास्ते ह्यतिसंक्लिष्टा एकेंद्रियप्रायोग्यमेव विरचयेयुः
न च तद्योग्यमिदं बध्यत इति ॥६६॥ वि॰ वि॰ २ सुर २ आहार २ दुगं सुखगइ १ वन्नचउ ४ तेय ४ जिणसायं १ समचउ १ परघा १ तस
दस १० पणिंदि सासुच्च १ खवगाउ ॥२२॥ ६७ द्विकशब्दस्य प्रत्येकं संबंधात् वैक्रियद्विकं वैक्रियशरीरांगोपांगाख्यं सुरद्विकं सु
रगति सुरानुपूर्वी स्वरूपं आहारकद्विकं आहारकशरीर आहारकांगोपांगलक्षणं सुखगतिः प्रशस्तविहायोगति
र्वर्णचतुष्कं वर्णगंधरसस्पर्शलक्षणं डमरुकमणिन्यायादि चतुःशब्दस्य संबंधात्तैजसचतुष्कं तैजसकार्मणागुरु
लघुनिर्माणाख्यं जिननाम सातवेदनीयं समचउत्ति समचतुरस्रसंस्थानं परघत्ति पराघातनामत्रसदशकं त्रसबादर
पर्याप्तप्रत्येकस्थिरशुभसुभगसुस्वरादेययशःकीर्त्तिस्वभावं पणिंदित्ति पंचेंद्रियजाति सासत्ति उच्छ्वासनाम उच्चैर्गोत्रमित्येता
सां द्वात्रिंशतः प्रकृतीनामुत्कृष्टानुभागं यथासंभवं क्षपकः सूक्ष्मसंपरायापूर्वकरणलक्षणः कुरुते अपूर्वकरणो मोहनीयक्ष +म:
पणाय न पियोग्यतया रात्र्यादिक्रमारोहक्षपक उक्त इति दृष्टव्यं तत्र सातवेदनीययशःकीर्त्त्युच्चैर्गोत्रलक्षणप्रकृतित्रय
स्य क्षपकः सूक्ष्मसंपरायश्चरमसमये वर्त्तमान उत्कृष्टानुभागं बध्नाति स्वगुणस्थानकचरमसमये स्योत्स्यस्य तद्बंधकेष्वत्यंतगु
णविशुद्धत्वादिति शेषाणां तु एकोनत्रिंशतः प्रकृतीनां क्षपकापूर्वकरणो देवगतिप्रायोग्यबंधव्यवच्छेदसमये वर्त्तमानः तीव्र

मनुत्तागं बध्नाति तद्बंधकेषु सर्वेष्वपि विशुद्धत्वादिति ६७ ॥ तमतमगा उज्जोअं सम्मसुरा मणुअउरलदुगवइरं अपमा-
त्तो अमराउं चउगइमिच्छा उ सेसाणं ॥ ६८ ॥ व्याख्या० तमस्तमाधःसप्तमनरकपृथिवी तदाधारा नारकास्तमस्तमकाः उद्योते अर्थादुद्यो-
तनामकर्मण उत्कृष्टानुभागं बध्नंति तथाहि कश्चित्सप्तमनरकपृथिवीनारको यथाप्रवृत्तादीनि त्रीणि करणानि कृत्वा निवृत्तिकरणे
स्थितो मिथ्यात्वस्यांतरकरणं करोति तत्र च कृते मिथ्यात्वस्य स्थितिद्वयं भवति अंतरकरणात् अधस्तनी प्रथमा स्थितिरंतर्मुहूर्त्तमा-
त्रा तस्मादेवोपरितनी शेषा द्वितीया स्थितिः स्थापना तत्राधस्तनीति मिथ्यात्ववेदनस्य चरमसमये उद्योतस्योत्कृष्टमनुभागं बध्ना- १
ति इदं हि शुभप्रकृतित्वाद्विशुद्धप्रत्ययोत्कृष्टरसं करोति तद्बंधकेषु च अयमेव सर्वविशुद्धोऽन्यस्थानवर्त्तिसेतावतां विशुद्धो वर्त्तमानो
मनुष्यप्रायोग्यं देवप्रायोग्यं वा बध्नीयात् इदं च तिर्यग्गतिप्रायोग्यबंधस्य चरितमेव बध्नात इति सप्तमपृथिवीनारकस्यैवोपादानं त-
त्र हि यावत्किंचिदपि मिथ्यात्वमस्ति तावत्तदेवानुसारात् तत एव तिर्यक्प्रायोग्यमेव बध्नात एवेति भावः तथा द्विकशब्दस्य प्रत्येकं संबं-
धात् मनुजद्विकं मनुजगति मनुजानुपूर्वीरूपं औदारिकद्विकं औदारिकशरीरऔदारिकांगोपांगरूपं वइरं ति वज्रऋषभनाराच-
संहननमित्येतासां पंचानां प्रकृतीनां सम्मसुरत्ति सम्यग्दृष्टिसुरा अत्यंतविशुद्धास्तीव्रानुभागमेकं द्वौ वा समयौ यावत् बध्नंति मिथ्यादृष्टि-
र्हि सम्यग्दृष्टिरनंतगुणविशुद्ध इति सम्यग्दृष्टिग्रहणं नारका अपि हि विशुद्धाः संत एताः प्रकृतीरुपरचयंति केवलं वेदनाभिरव-
कलीकृतत्वान्नतरवपुरुष्टलाभनिबंधनतीर्थंकरादिसमृद्धिसमुदायसंदर्शनितद्वचःश्रवणनंदीश्वरादिचैत्यदर्शनाद्यसंभवात्
तथाविधविशुद्ध्यसंभवात्तेषामिहाग्रहणं तिर्यङ्मनुष्याणां पुनरतिविशुद्धानां देवगतिप्रायोग्यबंधकत्वात्तद्योग्यप्रकृ- १८२
तिबंधासंभव इति सर्वमुदासेन सुरस्यैवोपादानं तथा अपमत्तो त्ति अप्रमत्तयतिरमरायुरुत्कृष्टानुभागं बध्नाति अपरेभ्यो देवायु-
र्बंधकमिथ्यादृष्ट्यविरतसम्यग्दृष्टिदेशविरतादिभ्योऽस्यानंतगुणविशुद्धत्वादिति तदेवं द्विचत्वारिंशतः शुभप्रकृतीनां चतुर्दश- १

नां च अशुभप्रकृतीनां तीव्रानुभागं बंधस्वामिन उक्ताः सांप्रतं शेषाणामष्टषष्टेरशुभप्रकृतीनां बंधस्वामिनो निरूपयन्नाह चउग-
इमिच्छा उ सेसाणं ति चतुर्गतिका अपि मिथ्यादृष्टयस्तु अप्रशस्ता उत्कृष्टकषायाद्धीवाः शेषाणां पूर्वोक्तेतराणां ज्ञानावरणपं-
चक दर्शनावरणनवक सातावेदनीय मिथ्यात्व कषायषोडशक नोकषायनवक प्रथमवर्ज्जसंस्थानपंचक प्रथमवर्ज्जसंहनन-
चतुष्काप्रशस्तवर्णगंधरसस्पर्शोपघाताप्रशस्तविहायोगति स्थिराशुभदुर्भगदुःस्वरानादेयायशःकीर्त्तिनीचैर्गोत्रांतरायपं-
चकलक्षणानामष्टषष्टेरशुभप्रकृतीनां तीव्रमुत्कृष्टमनुभागं बध्नंति तत्र हास्यरतिस्त्रीवेदपुंवेदप्रथमांतिमवर्ज्जसंस्थानसंहननलक्ष-
णा दश प्रकृतीर्वर्जयित्वा शेषा अष्टपंचाशत्प्रकृतीरुत्कृष्टतत्प्रायोग्यसंक्लेशा अत्युत्कटास्तीव्रानुभागाः कुर्वंति सर्वोत्कृष्टसंक्लेशो हि
तावत् हास्यरतियुगलमतिक्रम्यारतिशोकयुगलमेव रचयति स्त्रीवेदपुंवेदावतिक्रम्य नपुंसकवेदं निर्वर्त्तयति संस्थानसंहनन-
तेष्वपि सर्वसंक्लिष्टो विंशतिसागरोपमकोटाकोटीस्थितिके हुंडकसेवार्त्ते निवर्त्तयति ततो विशुद्धोऽष्टादशसागरोपमकोटाको- १
टीस्थितिके वामनकीलिके रचयति ततो विशुद्धतरः षोडशसागरोपमकोटाकोटीस्थितिके कुब्जार्द्धनाराचे बध्नाति ततो-
पि विशुद्धश्चतुर्दशसागरोपमकोटाकोटीस्थितिके सादिनाराचे निर्वर्त्तयति ततो विशुद्धो द्वादशसागरोपमकोटाकोटीस्थि-
तिके न्यग्रोधपरिमंडलऋषभनाराचे उपकल्पयति ततोऽपि विशुद्धो दशसागरोपमकोटाकोटीस्थितिके समचतुरस्रवज्रऋषभ-
नाराचे बध्नाति तस्मात् प्रथमांतिमवर्ज्जसंस्थानचतुष्टयस्य तथा प्रथमांतिमवर्ज्जसंहननचतुष्टयस्य वा तत्प्रायोग्योत्कृष्टस्थि-
तिबंधकाले तत्प्रायोग्यसंक्लेशा एवोत्कृष्टानुभागं बध्नंति हीनाधिकसंक्लेशोऽन्योन्यबंधसंभवात् तत्प्रायोग्यसंक्लेशग्रह-
णमिति भावः प्रथमांतिमसंस्थानसंहननद्विवर्ज्जनं किमर्थमिति चेदुच्यते हुंडसंस्थानं तावत् चउगइमिच्छा उ सेसाणं ति गा-
थावयवे एवाभिहितं समचतुरस्रसंस्थानं विशुद्धाराधकं इत्यादानंतरगाथायां साक्षितं वज्रऋषभनाराचसंहननं असं-

मसुराम एक यउरलङ्गावद्वरं इत्यत्रापि निरूपितं सेवार्त्तसंहननं पुनः तिरिङ्गावेवठसुरनिरया इत्यत्रानावितमिति पारिशे-
ष्यान्मध्यमसंस्थानचतुष्टयं मध्यमसंहननचतुष्टयं तस्या योग्यसंक्लेशो वर्त्तमानाः चतुर्गतिका मिथ्यादृष्टयो जीवाः उत्कृष्टरसं कुर्व-
त इत्युक्तमित्यस्तिहिताः सर्वप्रकृतीः प्रतीत्योत्कृष्टानुभागबंधस्वामिनः इदानीं सर्वप्रकृतीरुद्दिश्य जघन्यानुभागबंधस्वामिनश्चिं-
तयन्नाह ६८ व्या० थीणतिगं अणमिच्छं मंदरसं संजमुम्मुहो मिच्छो बिअतिअ कसाय अविरय देस पमत्तो अरइसोए
६९ व्या० स्त्यानर्द्धित्रिकं स्त्यानर्द्धि निद्रानिद्रा प्रचलाप्रचलास्त्यानर्द्धिलक्षणं अणेति अनंतानुबंधिनः क्रोधमा-
नमायालोभाख्याश्चत्वार मिथ्यात्वमित्येतासामष्टानां प्रकृतीनां स्वगुणस्थानचरमसमये वर्त्तमानाः मिथ्यादृष्टिः संजमुम्मुहत्ति
सम्यक्त्वसंयमाभिमुखः सम्यक्त्वसामायिकं प्रतिपित्सुर्मंदरसं जघन्यानु भागं बध्नाति प्रस्तुतप्रकृतिबंधकेष्वयमेव सर्वविशु-
द्ध इति तथा कषाय शब्दस्य प्रत्येकं योगा द्वितीय कषाय चतुष्टयस्य अप्रत्याख्यानावरणलक्षणस्य अविरयत्ति अविरतसम्यग्दृ-
ष्टिः स्वगुणस्थानचरमसमये वर्त्तमानः संयमोन्मुख इत्यत्रापि योज्यं संयमाभिमुखो देशविरतिसामायिकं प्रतिपित्सुर्मंदरसं
बध्नाति प्रस्तुतप्रकृतिबंधकेष्वस्यैव विशुद्धत्वात् तथा तृतीय कषाय चतुष्टयस्य प्रत्याख्यानावरण कषायलक्षणस्य देसत्ति देश-
विरतिः स्वगुणस्थानचरमसमये वर्त्तमानः संयमोन्मुख सर्वविरतिसामायिकं प्रतिपित्सुर्मंदरसं करोति तत्प्रकृतिबंधकेष्व-
स्यैव विशुद्धतरत्वात् तथा प्रमत्तः प्रमत्तयतिः संयमोन्मुखोऽप्रमत्तसंयमं प्रतिपित्सुः रतिश्च शोकश्च अरतिशोकं तस्मिन्नरति-
श्री के अरतिशोकयोर्मंदरसं विदधाति इदं द्विप्रकृतिद्वयमशुभत्वात् सर्वविशुद्धि एव जघन्यरसं करोति तद्बंधकेषु त्वयमेव सर्ववि- १८२
शुद्ध इति ६९ व्या० अपमाइ हारगदुगं दुनिद्द असुवन्नहास रइ कुच्छा भयमुवघाय मपुव्वो अनिअट्टी पुरिससं-
जलणे ७० व्या० आहारकद्विकं आहारकशरीराहारकांगोपांगलक्षणं नयप्रमादी तेषां शीलोऽप्रमादी अप्रमत्तयतिः सं-

॥ ॥

त्वमेव प्रमत्तभावं प्रतिपित्सुर्मंदरसं जघन्यरसं करोतीति यावदिदं द्विप्रकृतिद्वयं शुभरूपत्वात् संक्लिष्ट एव जघन्यरसं करोति।
तद्बंधकेषु त्वयमेवातिसंक्लिष्ट इति तावदः तथा दुनिद्दत्ति द्वयोर्निद्रयोः समाहारो द्विनिद्रं निद्राप्रचलालक्षणं सुअशोत्तने वन्नेति
वर्णचतुष्कं नसुवर्णनसुवर्णमसुवर्णमप्रशस्तवर्णचतुष्कमप्रशस्तवर्णगंधरसस्पर्शाः हास्य रतिः हास्यरतिः कुत्सा तिजुगुप्सात-
य मुपघा तेमित्येतासामेकादशप्रकृतीनामपूर्वः इति सामान्योक्तावपि क्षपकाः पूर्वकरण एकैकस्मिनात्मीयात्मीय बंधव्यव-
च्छेदसमये जघन्यानुभागं बध्नाति एतास्त्वशुभप्रकृतयोऽशुभप्रकृतीनां च सर्वविशुद्ध एव जघन्यानुभागं बध्नाति प्रस्तुतप्रकृ-
तबंधकेषु त्वयमेव सर्वविशुद्ध इति तथा पुरिस त्ति पुरुषवेदसंज्वलनाः क्रोधमानमायालोभाश्चत्वार इत्येतस्य प्रकृतिपंचक-
स्यैकैकस्मिन्नात्मीयात्मीयबंधव्यवच्छेदसमये अनियट्टि त्ति सामान्योक्तावपि क्षपका निवृत्तिबादरो जघन्यानुभागं निर्वर्त्त-
यति एतास्त्वशुभप्रकृतयोऽशुभप्रकृतीनां च सर्वविशुद्ध एव जघन्यानुभागं बध्नाति प्रस्तुतप्रकृतिबंधकेषु त्वयमेव सर्वविशुद्ध इ-
ति ७० व्या० विग्घावरणे सुहुमो मणुतिरिआ सुहुमविगलतिगआउ वेउविछक्कममरा निरया उज्जोअउरलदु-
गं ७१ व्या० विघ्नानि दानलाभभोगोपभोगवीर्यांतरायलक्षणानि पंच आवरणानि मतिज्ञानावरणश्रुतज्ञानावरणाव-
धिज्ञानावरणमनःपर्यायज्ञानावरणकेवलज्ञानावरणचक्षुर्दर्शनावरणाचक्षुर्दर्शनावरणावधिदर्शनावरणकेवलदर्शना- १
वरणलक्षणानि नव इत्येतासां चतुर्दश प्रकृतीनां सुहुमत्ति सामान्योक्तावपि क्षपकसूक्ष्मसंपरायचरमसमये वर्त्तमानो ज-
घन्यानुभागं बध्नाति एतास्त्वशुभप्रकृतयो अशुभप्रकृतीनां च सर्वविशुद्ध एव जघन्यानुभागं बध्नाति प्रस्तुतप्रकृतिबंध-
केषु त्वयमेव सर्वविशुद्ध इति तथा त्रिकशब्दस्य प्रत्येकं संबंधात् सूक्ष्मत्रिकं सूक्ष्मापर्याप्तसाधारणाख्यं विकलत्रिकं द्वीन्द्रियत्रीन्द्रिय-
चतुरिंद्रियजातिरूपं आउत्ति आयूंषि देवमनुष्यतिर्यङ्नारकायुर्लक्षणानि चत्वारि वैक्रियषट्कं देवगतिदेवानुपूर्वीनरकगतिनरकानु-

र्वी वैक्रियशरीरं वैक्रियांगोपांगलक्षणं इत्येतासां षोडशप्रकृतीनां मध्ये तिर्यञ्च मनु – शब्देन मनुष्या उच्यंते ततो मनुष्याश्च तिर्यंचश्च
मनुष्यतिर्यंचो जघन्यानुभागं कुर्वंति अत्र हि तिर्यङ्मनुष्यायुर्द्वयं वर्जयित्वा शेषाश्चतुर्दश प्रकृती र्देवनारका भवप्रत्ययादेव न बध्नंति
तिर्यङ्मनुष्यायुर्द्वयमपि यदा जघन्यस्थितिकं बध्यते तदा जघन्यरसं क्रियते देवनारकास्तु तज्जघन्यं न बध्नंत्येव तत्स्थितिकेषु तेषा
मुत्पत्त्यभावात्तस्मान्नैतत्प्रकृतिषोडशकं देवनारका बध्नंतीत्यतस्तिर्यङ्मनुष्याणामेव ग्रहणं तत्र नारकायुषोऽशुभप्रकृतित्वा
त्तद्बंधकेषु सर्वविशुद्धा दशवर्षसहस्रलक्षणजघन्यस्थितिबंधकाले जघन्यानुभागं तिर्यङ्मनुष्याः कुर्वंति शेषस्य त्वायुःत्रयस्य शुभ + वि
प्रकृतित्वात्तद्बंधकेषु सर्वसंक्लिष्टा आत्मीयात्मीयसर्वजघन्यस्थितिबंधकाले ऽमी जघन्यानुभागं रचयंति नरकद्विकस्याशुभप्र
कृतित्वाज्जघन्यस्थितिबंधकाले तद्बंधकेषु सर्वविशुद्धा एते जघन्यानुभागं विदधति देवद्विकस्य शुभप्रकृतित्वात्तदात्मीयोत्कृष्टस्थि
तिबंधकाले तत्प्रायोग्यसंक्लिष्टा अमी जघन्यानुभागं बध्नंति अतिसंक्लिष्टो नरकादियोग्यं बध्नीयादिति तत्प्रायोग्यसंक्लेशग्र
हणं एवमन्यत्रापि द्रष्टव्यं वैक्रियद्विकस्यापि शुभप्रकृतित्वान्नरकगतिबंधसहितां सर्वोत्कृष्टां स्थितिं बध्नंतो जघन्यानुभागं नि
र्वर्त्तयंति विकलत्रिकसूक्ष्मत्रिकयोस्त्वशुभप्रकृतित्वात्तत्प्रायोग्यं विशुद्धा अमी सर्वजघन्यमनुभागं बध्नंति अतिविशुद्धा मनु
ष्यादिप्रायोग्य विशुद्धा अमी सर्वजघन्यमनुभागं बध्नंति अतिविशुद्धा मनुष्यादिप्रायोग्यं बध्नंतीति तत्प्रायोग्यविशुद्धग्रहणं
मतिरसावित्तिवृत्ता षोडशकप्रकृतयः तथा उद्योतं औदारिकद्विकं औदारिकशरीरं औदारिकांगोपांगलक्षणमित्येतासां तिसृणां
+ णं + प्रकृतीं अमरा निरया तिसामीन्यतो ऽमरा देवाः निरया निर्गतमयमिष्टफलं देवं कर्म येभ्यस्ते निरया नारकाः सर्वोत्कृष्टसंक्लेशे
वर्त्तमानास्तिर्यक्प्रायोग्यं बध्नंतो जघन्यानुभागं कुर्वंति केवलमौदारिकांगोपांगमीशानादुपरितनाः सनत्कुमारादय ए १८२
व देवा जघन्यरसं विदधति नेशानांतास्ते हि सर्वोत्कृष्टसंक्लेशे वर्त्तमाना एकेंद्रियप्रायोग्यमेव बध्नंत्येकेंद्रियाणां चांगोपांगं

न भवत्यतस्तेषां तद्देवानां जघन्यरसांगोपांगनामबंधासंभवेन तज्जघन्यरसबंधकत्वासंभवः स्यादेवं किंतु तिर्यङ्मनुष्याः क
स्मादिदं प्रकृतित्रयं जघन्यरसं न कुर्वंतीत्यत्रोच्यते एतत्प्रकृतित्रयं तिर्यङ्गतिप्रायोग्यबंधसहचरितं जघन्यरसं बध्यते तिर्यङ्म
नुष्यास्तु तावति संक्लेशे वर्त्तमानाः नरकगतिप्रायोग्यमेव बध्नंतीति तेषामिहाग्रहणमिति ७६ ॥ तिरिदुगनिअं तमतमा
जिणमविरय निरयविणिगथावरयं आसुहुमायव सम्मो व सायथिरसुभजसा सिअरा ॥ ७७ ॥ व्या० तथा तिर्यग्द्वि
कं तिर्यग्गति तिर्यगानुपूर्वीरूपं नीयं नीचैर्गोत्रमित्येतासां तिसृणां प्रकृतीनां तमस्तमा सप्तमनरकपृथिवी तस्यामुत्पन्ना नारकास्त
पितमस्तमा यथा तमो विद्यते येषां ते तमस्तमा अत्यादिरूपतयास्त्यः सप्तमनरकपृथिवीनारका इत्यर्थः जघन्यानुभागं कुर्वंति
तथाहि कश्चित्सप्तमपृथिवीनारकः सम्यक्त्वाभिमुखो यथाप्रवृत्तादीनि त्रीणि करणानि कृत्वा ऽनिवृत्तिकरणस्य चरमसमये मिथ्या
त्वस्य चरमपुद्गलान्वेदयन् प्रकृतित्रयस्य जघन्यानुभागं बध्नाति अस्य हि प्रकृतित्रयस्याशुभत्वात्सर्वविशुद्धो जघन्यानुभागं करोति
तद्बंधकेषु त्वयमेव सर्वविशुद्ध इति सम्यक्त्वाभिमुखादिविशेषणोपादानं अन्यस्थानवर्त्तिनो वा त्वेतावत्यां विशुद्धौ वर्त्तमानश्चोच्चैर्गोत्रमनुष्य
द्विकादिशुभमेव बध्नीयादिति सप्तमपृथिवीनारकस्यैव ग्रहणं अस्यापि यावत्किंचिदपि मिथ्यात्वमस्ति तावद्भवप्रत्ययादेव नीचैर्गोत्र
सहचरितः तिर्यग्गतिप्रायोग्य एव बंधो भवति तथा जिणंति जिननाम तीर्थकरनामकर्मेत्यर्थः अविरयत्ति अविरतसम्यग्दृष्टिः ।
सामान्योक्तावपि त्वारम्यान्तो विशेषप्रतिपत्तिरिति न्यायाद्विरतसम्यग्दृष्टिर्नरके बद्धायुष्को नरकोत्पत्त्यभिमुखो ऽनंतरमेव मि
थ्यात्वं प्रतिपित्सुर्मनुष्यस्तीर्थकरनाम्नो जघन्यानुभागं बध्नातीति तद्बंधकेष्वयमेव सर्वसंक्लिष्ट इति कृत्वा ऽयमत्रावगंतीर्थकरनाम्नो
ह्यविरतसम्यग्दृष्टिआद्योऽपूर्वकरणावसाना अनुभागबंधका भवंति किंतु जघन्यानुभागः शुभप्रकृतीनां संक्लेशेन बध्यते
स च तीर्थकरनामबंधकेष्वविरतस्यैवेत्यविरतविशेषणविशिष्टस्योपलक्षणं तेन विशेषव्युदासेन अस्यैवोपादानमिति तत्र तिर्यक्तीर्थ

करनाम्नः प्रतिपन्नाः प्रतिपद्यमानकाश्च सम्यक्त्वप्रत्ययादेव न तद्बध्नन्तीति मनुष्यग्रहणं बद्धतीर्थकरनामकर्मा हि पूर्वमबद्धनरकायु
र्नरकं न व्रजतीति पूर्वं नरके बद्धायुष्कस्य ग्रहणं क्षायिकसम्यग्दृष्टिश्च श्रेणिकादिवत् सम्यक्त्वोऽपि कश्चिन्नरकं प्रयाति किंतु त
स्य विशुद्धत्वेन जघन्यानुभागं बंधकत्वात्तस्यैव देवत्वकृतत्वान्नासौ गृह्यते ऽतः तीर्थकरनामकर्म जघन्यस्थितिबंधकत्वान्मिथ्या
त्वाभिमुखस्यैव ग्रहणमिति तथा निरयविणिगथावरयंति निरया नारकास्तान् विना वर्जयित्वा शेषगतित्रयवर्तिनो जीवा ए
केंद्रियजातिस्थावरनाम्नोरप्येतत्प्रकृतिद्वयस्य सामान्योक्तावपि व्याख्यानतो विशेषप्रतिपत्तिरिति न्यायात् परावर्तमानमध्यमप
रिणामा जघन्यानुभागं बध्नन्ति इदं हि प्रकृतिद्वयमत्यन्तं तत्रातिसंक्लिष्टो जन्तुरनयोरुत्कृष्टानुभागं बध्नाति अतिविशुद्धस्त्विदमुल्लंघ्योत्
कृष्टानुभागे पंचेंद्रियजातित्रसनाम्नी बध्नातीत्यतो मध्यमपरिणामग्रहणं अयं च मध्यमपरिणामो यदैकस्मिन्नन्तर्मुहूर्ते एकेंद्रि
यजातिस्थावरनाम्नी अन्यस्मिन् द्वितीयेऽन्तर्मुहूर्ते त एव बध्नाति तदापि न भवति केवलं तदावस्थितपरिणामे तथाविधा विशु
द्धिर्न लभ्यत इति मध्यमपरिणामस्यापि परावर्तमानता विशेषणं इदमुक्तं भवति यत् एकेंद्रियजातिस्थावरे बद्ध्वा पंचेंद्रियजातित्रस
नाम्नी बध्नाति ते अपि बद्ध्वा पुनरेकेंद्रियजातिस्थावरे बध्नाति तदेवं परावर्तमानमध्यमपरिणामः तत्प्रायोग्यविशुद्धः प्रत्येकमेतत्प्रकृ बध्नन्परावर्त
तिद्वयस्य जघन्यानुभागं बध्नाति ननु भवत्वेवं तत्रापि नारकवर्जनं किमर्थमिति चेदुच्यते नारकाणां स्वभावादेव प्रत्येकमेतत्प्रकृतिद्व
थ य बंधकत्वासंभवादिति तथा आसुहमायवंति सुधर्मा नाम सभा विद्यते यत्र स सौधर्मो ज्योत्स्नादिभ्योऽणित्यण्प्रत्ययः इह च
सौधर्मग्रहणेन समश्रेणिव्यवस्थितत्वादीशानोऽपि गृह्यते ततश्च भवनपत्याद्यैशानपर्यन्ता देवाः तद्बंधकेषु सर्वसंक्लिष्टा ए १८४
केंद्रियप्रायोग्यं बध्नन्त आतपनाम जघन्यानुभागं बध्नन्ति तस्य हि शुभप्रकृतित्वात् सर्वसंक्लिष्ट एव जघन्यानुभागं बध्नाति त
द्बंधकेषु चैत एव सर्वसंक्लिष्टाः यतस्ते तिर्यङ्मनुष्या एतावति संक्लेशे वर्तमाना नारकादिप्रायोग्यं बध्नन्ति येऽपि नारकाः सनत्कुमारादि

देवाश्च भवप्रत्ययादेव तन्न बध्नन्तीति विशेषपरिहारेण यथोक्तदेवानामेव ग्रहणं तथा सातवेदनीयं स्थिरनाम शुभनाम यशः
कीर्तिनामेत्येताः चतस्रः प्रकृतीः सेतराः सप्रतिपक्षाः असातवेदनीयास्थिराशुभायशःकीर्तिनामसहिताः सर्वा अष्टौ प्रकृतीः सम्मो व
त्ति सम्यग्दृष्टिर्वा शब्दात् मिथ्यादृष्टिर्वा सामान्योक्तावपि परावर्तमानमध्यमपरिणामो जघन्यानुभागाः करोति कथमिति चेदु
च्यते इह पूर्वं सातस्य पंचदश सागरोपमकोटीकोट्यः उत्कृष्टा स्थितिरभिहिता असातस्य त्रिंशत्सागरोपमकोटीकोट्यः
तत्र प्रमत्तसंयतस्तत्प्रायोग्यविशुद्धो ऽसातस्य सम्यग्दृष्टियोग्यस्थितिषु सर्वजघन्यामन्तःसागरोपमकोटीकोटीप्रमाणं
स्थितिं बध्नाति ततोऽन्तर्मुहूर्तात् परावृत्त्य सातं बध्नाति पुनरप्यसातमित्येवं देशविरताविरतसम्यग्दृष्टिसम्यग्मिथ्यादृष्टिसा
स्वादनमिथ्यादृष्टयोऽपि परावृत्त्य सातासाते बध्नन्ति तत्र च मिथ्यादृष्टिः सातासाते परावृत्त्य तावद्बध्नाति यावत्सातस्य पंच
दश सागरोपमकोटीकोटीलक्षणोत्कृष्टा स्थितिः ततः परतोऽपि संक्लिष्टसंक्लिष्टतरः संक्लिष्टतमो ऽसातमेव केवलं तावद्ब
ध्नाति यावत्त्रिंशत्सागरोपमकोटीकोट्यः प्रमत्तादपि परतोऽप्रमत्तादयो विशुद्धविशुद्धतरः सातमेव केवलं बध्नन्ति याव
त्सूक्ष्मसंपराये द्वादशमुहूर्ता इत्येवं सातस्य समयोनपंचदशसागरोपमकोटीकोटीलक्षणायाः स्थितेरारभ्यासातेन स
ह परावृत्त्य बध्यतो जघन्यानुभागबंधो भवति परावर्तमानमध्यमपरिणामस्य लभ्यते यावत्प्रमत्तगुणस्थानकेऽन्तःसागरोपम
कोटीकोटीलक्षणाः सर्वजघन्यासातस्थितिः एतेषु हि सम्यग्दृष्टिमिथ्यादृष्टियोग्येषु स्थितिस्थानेषु प्रकृतेः प्रकृत्यन्तरसं
क्रमे मंदः परिणामो जघन्यानुभागबंधयोग्यो लभ्यते नान्यत्र तथाहि ये प्रमत्तादयः सातमेव केवलं बध्नन्ति ते विशुद्धत्वात्तस्य प्र
कृष्टमनुभागमुपकल्पयन्ति योऽपि मिथ्यादृष्टिः सातस्योत्कृष्टां स्थितिमतिक्रान्तो ऽसातमेव केवलमुपस्थापयति सोऽप्यतिसंक्लि
ष्टत्वात्तस्य प्रकृष्टरसमभिनिर्वर्तयति सागरोपमसप्तभागत्रयादिरूपवेदनीयस्थितिबंधकैकेंद्रियादिर्जघन्यानुभागं बं

क्षेनसंक्लिश्यति तथाविधाध्यवसायात्तावान्नस्मात्स्थितोऽक्रस्थितिबंधएवजघन्यानुभागबंधसंभववस्तथाविधपरिणामसद्भावा
दिति अस्थिराशुभायशःकीर्तीनां विंशतिसागरोपमकोटीकोट्यउत्कृष्टास्थितिरुक्ता स्थिरशुभयशःकीर्तीनांतु दश ति सा
गरोपमकोटीकोट्यः तत्रप्रमत्तसंयतस्तत्प्रायोग्यविशुद्धोऽस्थिराशुभायशःकीर्तीनांसम्यग्दृष्टियोग्यस्थितिषु सर्वजघन्या
ंतःसागरोपमकोटीकोटीलक्षणां स्थितिं बध्नाति ततोऽन्तर्मुहूर्त्ताद्विशुद्धः पुनरपि स्थिरादिकाः प्रतिपक्षस्ता बध्नाति ततः
पुनरप्यस्थिरादिका इत्येवं देशविरताविरतमिश्रसास्वादनमिथ्यादृष्टयोऽपिपरावृत्त्यपरावृत्त्या स्थिराशुभायशःकीर्तिस्थिरशुभ
यशःकीर्तिर्बध्नंति तत्रच मिथ्यादृष्टिः स्थिरशुभयशःकीर्तीरपरावृत्तताबध्नाति यावन्मिथ्यादृष्टिगुणस्थाने स्थिरादीनामुत्कृ
ष्टा स्थितिः तेषुवसम्यग्दृष्टिमिथ्यादृष्टियोग्येषु स्थितिस्थानेषु जघन्यानुभागबंधोलभ्यते नान्यत्र दशसागरोपमकोटीकोटीपरतो
ह्यस्थिरादयएवाशुभाः प्रकृतयो बध्यरसाबध्यंते अथमात्त्वादयस्तु विशुद्धाः स्थिरादिकाः शुभप्रकृतीरेव बहुरसा निर्वर्त्तयंतीति
नान्यत्र जघन्यानुभाग आसां लभ्यत इति विशेषः शेषाणां तु सान्तासां तत्त्वं बोध्यमिति ७१ अ तसधवन्नधतेयधचउमणुखगइ
दुग ३७ पणिंदि सासपरघुच्चं संघयणागिइनपुंथी सुभगियरतिमिच्छचउगई ४०७२ व्या० चतुरश्रस्यप्रत्येकं
संबंध्यत्वात्रसचतुष्कं त्रसबादरपर्याप्तप्रत्येकाख्यं वर्णचतुष्कं वर्णगंधरसस्पर्शाख्यं तैजसचतुष्कं तैजसकार्मणागुरुलघुनि
र्माणलक्षणं द्विकशब्दस्यप्रत्येकंसंबंधान्मनुजद्विकं मनुजगति मनुजानुपूर्वीस्वरूपं खगतिद्विकं प्रशस्तविहायोगत्यप्रशस्तग
तिरूपं पंचेंद्रियजातिः उच्छ्वासनाम पराघातनाम उच्चैर्गोत्रं संहननानि वज्रऋषभनाराचऋषभनाराचनाराचअर्द्धनारा १८५
चकीलिकासेवार्त्तलक्षणानिषट् आकृतयः आकारास्सं स्था नानि समचतुरस्रन्यग्रोधपरिमंडलसादिवामनकुब्जहुंडल
क्षणानिषट् नपुंसकवेदः स्त्रीतिस्त्रीवेदः त्रिकशब्दस्यप्रत्येकंसंबंधात्सुभगत्रिकं सुभगसुस्वरादेयलक्षणं इतरत्रि
कं दुर्भगदुःस्वरानादेयलक्षणमित्येतासां चत्वारिंशत्प्रकृतीनां मिच्छत्ति मिथ्यादृष्टयः चउगतिकाजघन्यानुभागंकुर्वंति
इदमत्राकूतं किमपि व्याख्याने विशेषप्रतिपत्तिरिति न्यायात्पंचेंद्रियजाति तैजसकार्मणे प्रशस्तवर्णगंधरसस्पर्शगुरुल
घुपराघातोच्छ्वासत्रसबादरपर्याप्तप्रत्येकनिर्माणलक्षणानां पंचदशप्रकृतीनां चतुर्गतिकाअपिजीवामिथ्यादृष्टयः सर्वोत्कृष्ट
संक्लेशाजघन्यानुभागंकुर्वंति एतादिशुभप्रकृतित्वात्तस्याः सर्वोत्कृष्टसंक्लेशेऽजघन्यरसाक्रियंते तत्रचतिर्यङ्मनुष्यास्सर्वोत्कृष्टसं
क्लेशेवर्त्तमाना नरकगतिसहचरिता एता बध्नंतोजघन्यरसाकुर्वंति नारकादेवाश्चेशानादुपरिवर्त्तिनः सनत्कुमारादयः सर्वसं
क्लिष्टाः पंचेंद्रियतिर्यक्प्रायोग्याएताबध्नंतो जघन्यरसाः कुर्वंति ईशानांतासुदेवाः सर्वसंक्लिष्टाः पंचेंद्रियजातित्रसवर्जाः शेषा
स्त्रयोदशप्रकृतीरेकेंद्रियप्रायोग्याबध्नंतोजघन्यरसाविदधतीति पंचेंद्रियजातित्रसनाम्नीतु विशुद्धाः अमी बध्नंतीतिजघन्यर
सोनलभ्यत इति तथौदारिकंस्त्रीवेदनपुंसकवेदलक्षणप्रकृतिद्वयस्य चतुर्गतिकाअपिमिथ्यादृष्टयोजीवास्तत्तुलादेतत्प्रकृ
तीद्विकस्यतत्प्रायोग्यविशुद्धाजघन्यानुभागं रचयंतिजातिविशुद्धः पुरुषवेदबंधकः स्यादितितत्प्रायोग्यविशुद्धिग्रहणमिति
मनुष्यद्विकसंहननषट्कसंस्थानषट्कः विहायोगतिसुभगसुस्वरादेयदुर्भगदुःस्वरानादेयोच्चैर्गोत्रलक्षणानां त्रयोविंशतिप्रकृ
तीनां चतुर्गतिकाअपिमिथ्यादृष्टयोमध्यमपरिणामा जघन्यानुभागंकुर्वंति सम्यग्दृष्टीनां ह्येतासां परावृत्तिर्नास्ति तथा
हितिर्यङ्मनुष्याः सम्यग्दृष्टयोदेवद्विकमेवबध्नंति नमनुष्यादिद्विकादिसंस्थानेषुतुसमचतुरस्रमेवस्वयंति संहननंतु किंचि
दपिनबध्नंति तथाशुभविहायोगति सुभगसुस्वरादेयोच्चैर्गोत्राण्येवबध्नंति नप्रतिपक्षान् देवनारकाअपिसम्यग्दृष्टयो
मनुष्यद्विकमेवबध्नंति नतिर्यग्द्विकादिकं संस्थानेषुतु समचतुरस्रसंस्थानमेव संहननेषुपुनर्वज्रऋषभनाराचसंहननमेव
विहायोगत्यादिकाअपि शुभाएवबध्नंतिनप्रतिपक्षाइति तेषामेवपरावृत्त्यसंभवान्मिथ्यादृष्टिर्यस्तत्तत्रमनुष्यगतिद्विकस्य
पंचदशसागरोपमकोटीकोट्युत्कृष्टा स्थितिः प्रशस्तविहायोगतिसुभगसुस्वरादेयोच्चैर्गोत्रवज्रऋषभनाराचसंहनन
समचतुर

स्वसंस्थानानां तु दश सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः एताः शुभप्रकृतयश्च आत्मीयात्मीयोत्कृष्टस्थितेरारभ्य प्रतिपक्ष
प्रकृतिभिः सह तावत्परावृत्त्य बध्यंते यावदासामेव प्रतिपक्षप्रकृतीनां सर्वजघन्यांतःसागरोपमकोटीकोटीलक्षणा स्थि
तिः एतेषु स्थितिस्थानेषु परावर्त्तमानमध्यमपरिणाम एतासां जघन्यानुभागं बध्नाति ऋषभसेवार्त्तयोरपि वामनकीलिक
योरुत्कृष्टस्थितेरारभ्य तावत्परावृत्तिर्लभ्यते यावदात्मीयात्मीयजघन्या स्थितिः शेषसंस्थानसंहनननाम्नामप्यात्मीया १
त्मीयोत्कृष्टस्थितेरारभ्य सह इतरसंस्थानसंहननैः सह परावृत्तिस्तावल्लभ्यते यावदात्मीयात्मीयजघन्या स्थितिः एते
षु स्थितिस्थानेषु मिथ्यादृष्टिः परावर्त्तमानमध्यमपरिणामो जघन्यानुभागं बध्नातीति प्ररूपिताः सप्रपंचं जघन्यानुभागबंधस्वामिन
ः सांप्रतमनुभागबंधमेव मूलोत्तरप्रकृतीरुद्दिश्य सांगकैर्विचारयन्नाह ७२ अः चउतेअधुवनवेअणिअ१ नामएक्कोसतेअ
सधुवबंधी धर घाईणं धुअजहन्नो गोए दुविहो इमो चउहा ॥७४॥ सेसंमि दुहा अणुभागबंधो सम्मत्तो व्या० इह ध्रुवबंधा घ
ातिप्रकृतयो भंगकैर्विचार्यंते तत्र चतुःशष्ट्या प्रत्येकं संबंधी तैजसचतुष्कं तैजसकार्मणागुरुलघुनिर्माणलक्ष
णं वर्णचतुष्कमध्ये प्रशस्तस्वरूपमाणत्वादि प्रशस्तवर्णगंधरसस्पर्शा गृह्यंते इत्येतासामुत्तरप्रकृतीनामष्टानामनु
त्कृष्ट इमो चउह त्ति पदं सर्वत्र योजनीयं अयमनुत्कृष्टो बंधश्चतुर्धा सादिरनादिर्ध्रुवोऽध्रुवश्च भवति तथा वेदनीयनाम्नो १
र्मूलप्रकृत्योरनुत्कृष्टो बंधश्चतुर्धा सादिरनादिर्ध्रुवोऽध्रुवश्च भवति तथा सेसधुवबंधिणि त्ति पश्चार्धे प्रथमा ततो भणितशेषाणां
ध्रुवबंधिनीनां ज्ञानावरणपंचकदर्शनावरणनवकमिथ्यात्वकषायषोडशभयजुगुप्साऽप्रशस्तवर्णचतुष्कोपघातांत
रायपंचकलक्षणानां त्रिचत्वारिंशतः प्रकृतीनामजघन्यानुभागबंधश्चतुर्धा सादिरनादिर्ध्रुवोऽध्रुवश्च भवति तथाज्ञानदर्शनच १
रित्रलाभादिगुणान् घ्नंतीत्येवंशीला निघाती निज्ञानावरणदर्शनावरणमोहनीयांतरायाणि तेषामजघन्यानुभागबंधश्चतुर्धा
सादिरनादिर्ध्रुवोऽध्रुवश्च भवति तथा गोत्रे कर्मणि द्विविधोऽनुत्कृष्टजघन्यलक्षणो बंधश्चतुर्धा सादिरनादिर्ध्रुवोऽध्रुवश्च भवती

त्यक्षरार्थो भावार्थस्त्वयं तत्र तैजसकार्मणागुरुलघुनिर्माणप्रशस्तवर्णगंधरसस्पर्शलक्षणानामष्टानामुत्तरप्रकृतीनामनु
त्कृष्टानुभागबंधः साद्यादिचतुर्विकल्पोऽपि भवति तथाहि कर्मणां द्विरसो यस्मादल्पो रसो नास्ति स सर्वजघन्यः तत ऊर्ध्वमेकैक
स्यांशमादौ कृत्वा यावत्सर्वोत्कृष्टस्तावदजघन्य इत्यनंतभेदभिन्नोऽपि सोऽजघन्यः जघन्यप्रकारद्वयेन कोडीकृतस्तथा यस्माद
न्योऽधिको रसो न बध्यते स उत्कृष्टस्तत एकैकांशहानिमादौ कृत्वा यावत्सर्वजघन्यस्तावत्सर्वोऽप्यनुत्कृष्ट इत्यनेन प्रकारद्व
येनानंता अपि रसविशेषाः संगृहीतास्तत एतासां प्रस्तुताष्टप्रकृतीनामुत्कृष्टमनुभागबंधं क्षपकापूर्वकरणे देवगतिप्रायोग्या
नां त्रिंशतः प्रकृतीनां बंधव्यवच्छेदसमये करोति एता हि शुभप्रकृतयोऽत उत्कृष्टानुभागं सर्वविशुद्ध एव बध्नाति तद्बंधकं
चुत्वयमेव सर्वविशुद्धः ततस्तस्मात्पुनरन्यत्रोपशमश्रेण्यामप्यनुत्कृष्टोऽनुभागबंधो लभ्यते स चोपशांतमोहाद्यवस्थायां सर्वथा न
भवतीति ततः प्रतिपतितैर्बध्यमानः सादिः तदवस्थानमप्राप्तपूर्वाणां सदा बध्यमानत्वादनादिः ध्रुवोऽभव्यानामध्रुवो १
भव्यानामिति प्रतिपादितस्तैजसचतुष्कवर्णचतुष्कलक्षणप्रकृत्यष्टकस्यानुत्कृष्टो बंधः शेषबंधत्रिकस्य तु कादाचित्कत्वात् सेसं
मि दुह त्ति शेषे भणितोद्धरिते उत्कृष्टजघन्याजघन्यानुभागत्रिके द्विप्रकारः साद्यध्रुवलक्षणो बंधो भवतीत्यर्थः तथाहि प्रस्तुतप्रक
त्यष्टकस्योत्कृष्टानुभागबंधोऽनंतरमेव क्षपकापूर्वकरणे प्रोक्तः स च तत्प्रथमतया बध्यमानत्वात्सादिः एकं च समयं कृत्वा पु
नरबंधनं भवतीत्यध्रुवः जघन्यानुभागं त्वेतासां शुभप्रकृतित्वात्सर्वोत्कृष्टसंक्लेशे वर्तमानो मिथ्यादृष्टिः पर्याप्तः संज्ञिपंचेंद्रियो
बध्नाति पुनरपि जघन्यतः समयादुत्कृष्टतः समयद्वयाद्वक्तव्यं स एवाजघन्यं बध्नाति पुनः कालांतरे स एवोत्कृष्टसंक्लेशं प्राप्य
जघन्यं बध्नातीत्येवं जघन्याजघन्येषु परावर्तमानानां द्वयानामपि साद्यध्रुवतैवेति तथा वेयणियनामएक्को सु त्ति वेद
नीयनाम्नोरनुत्कृष्टोऽनुभागबंधः साद्यादिचतुर्विकल्पोऽपि भवति तथाह्यनयोः कर्मणोः सातयशःकीर्तिलक्षणं तदंतर्गतं
प्रकृतिद्वयमाश्रित्य सर्वोत्कृष्टो रसः क्षपकस्य सूक्ष्मसंपरायचरमसमये प्राप्यते ततोऽन्यः सर्वोऽप्युपशमश्रेण्यामप्यनुत्कृष्टोऽनु १

गबंधो लभ्यते ततस्तस्योपशान्तमोहावस्थायां सर्वथा न भवतीति ततः प्रतिपतितस्य पुनर्बध्यमानोऽनुभागः सादिः उ
पशान्तमोहावस्थामप्राप्तस्य सर्वस्यानादिरनादिकालाद्बध्यमानत्वात् ध्रुवोऽभव्यानामपर्यवसितत्वात् अध्रुवो भव्यानामप
र्यवसितत्वात् इति सातावेदनीयनाम्नोऽनुत्कृष्टे शेषे तु कावार्जेत्याह सेसंमि दुहा त्ति एतत्पदं सर्वसंबंधितमप्यादृत्याऽत्रापि
संबध्यते ततः शेषेषु उत्कृष्टजघन्याजघन्यलक्षणानुभागत्रिके द्विप्रकारः साद्यध्रुवलक्षणो बंधो भवति तथा
ह्युत्कृष्टमनुभागबंधं वेदनीयनाम्नोरनन्तरमेवोक्तकर्मबंधेषु अतिविशुद्धत्वात् क्षपकः सूक्ष्मसंपरायो बध्नातीत्युक्तं
स च तस्य प्रथमतया बध्यमानत्वात् सादिः क्षीणमोहावस्थायां तु नियमान्न तं बध्नातीत्यध्रुवः जघन्यानुभागस्त्वनयोः कर्म
णोः सम्यग्दृष्टिर्मिथ्यादृष्टिर्वा मध्यमपरिणामो बध्नाति सर्वविशुद्धो ह्येतत्कर्मद्वयग्रहणगृहीतानां सातयशःकीर्ति
आदिलक्षणशुभप्रकृतीनामुत्कृष्टस्वरूपं शुभतरसं करोति सर्वसंक्लिष्टस्तु असातनरकगत्यादिप्रकृतीनामुत्कृष्टस्वरूप
मशुभतरसं करोतीति मध्यमपरिणामग्रहणं अयं च जघन्यानुभागोऽजघन्याद्भवतीति बध्यत इति सादिः पुनर्जघन्यत
:समयादुत्कृष्टसमयचतुष्टयाद्वा जघन्यानुभागं बध्नतो जघन्यो ध्रुवोऽजघन्यस्तु सादिः पुनस्तत्रैव तत्तद्भवस्थान्तरे वाऽजघन्यं
बध्नतोऽजघन्योऽध्रुवस्त्वेवं जघन्याजघन्यानुभागबंधयोः परावर्तमानतामनुभवतोऽत्र साद्यध्रुवत्वमेव भवतीति तथा से
सधुवबंधिनि त्ति शेषध्रुवबंधिनीनां ज्ञानावरणपंचकदर्शनावरणनवकमिथ्यात्वकषायषोडशकभयजुगुप्साऽगुरु
लघुवर्णादिचतुष्कान्तरायपंचकोपघातलक्षणानां त्रिचत्वारिंशतः प्रकृतीनामजघन्योऽनुभागः साद्यादिचतुर्विकल्पो भ
वति तथाहि मतिश्रुतावधिमनःपर्यायकेवलावरणपंचकचक्षुरचक्षुरवधिकेवलदर्शनावरणचतुष्कान्तरायपंच १८७
कलक्षणानां चतुर्दशप्रकृतीनां तावदशुभत्वात् क्षपकः सूक्ष्मसंपरायश्चरमसमये जघन्यानुभागं बध्नाति तद्बंधकेष्व
न्येष्वस्य सर्वविशिष्टविशुद्धिमत्त्वात् ततोऽन्यः सर्वोऽप्युपशमश्रेण्यामप्यजघन्य इति प्राप्यते स चोपशान्तावस्थायां सर्वथा न भ

वति तस्मादितः प्रतिपत्य बध्यमानः सादिः तां तु उपशान्तावस्थां वाऽप्राप्तस्य सर्वस्यानादिः ध्रुवोऽभव्यानां अध्रु
वो भव्यानामिति संज्वलनचतुष्कस्याप्यशुभत्वात् क्षपकोऽनिवृत्तिबादरो यथास्वं बंधव्यवच्छेदसमये एकैकं समयं जघन्य
मनुभागं बध्नाति ततोऽन्यः सर्वोऽजघन्यस्तस्योपशमश्रेण्यां बंधव्यवच्छेदं कृत्वा प्रतिपततः पुनस्तमेव बध्नतः सादित्वं उपशां
तावस्थां वाऽप्राप्तस्य सर्वस्यानादित्वं ध्रुवोऽभव्यानां अध्रुवो भव्यानामिति निद्राप्रचलाप्रशस्तवर्णादिचतुष्कोपघातभयजुगुप्सा
लक्षणानां नवप्रकृतीनां क्षपकोऽपूर्वकरणो यथास्वं बंधव्यवच्छेदकाले एकैकं समयं जघन्यमनुभागं बध्नाति ततोऽन्यः
सर्वोऽप्यजघन्यस्तस्योपशमश्रेण्यां बंधव्यवच्छेदं कृत्वा प्रतिपततः पुनस्तमेव बध्नतः सादित्वं बंधस्थानं वाऽप्राप्तस्य सर्व
स्यानादिः ध्रुवोऽभव्यानां अध्रुवो भव्यानामिति चतुर्णां प्रत्याख्यानावरणानां देशविरतः संयमप्रतिपत्त्यभिमुखोऽत्यंतवि
शुद्धः स्वगुणस्थानस्य चरमसमये वर्तमानो जघन्यमनुभागं बध्नातीति तस्मात् पुनः स्थानात् सर्वोऽप्यजघन्यः चतुर्णाम
प्रत्याख्यानावरणानामविरतसम्यग्दृष्टिः क्षायिकसम्यक्त्वं संयमं च युगपत्प्रतिपित्सुरत्यंतविशुद्धः स्वगुणस्थानकचरम
समये वर्तमानो जघन्यमनुभागं बध्नातीति ततोऽन्यः सर्वोऽप्यजघन्यः स्त्यानर्द्धित्रिकमिथ्यात्वानंतानुबंधिचतुष्टयलक्ष
णानामष्टानां प्रकृतीनां मिथ्यादृष्टिः सम्यक्त्वं युगपत्संयमं प्रतिपित्सुः सर्वविशुद्धो मिथ्यात्ववेदनस्य चरमसमये वर्तमानो जघन्य
मनुभागं बध्नाति तस्माच्चान्यत्र सर्वोऽप्यजघन्यः एते हि देशविरतादयस्तद्बंधकेषु अतिविशुद्धत्वाद्यथानिर्दिष्टकर्मणां जघ
न्यमनुभागं २५०० भागं बध्नंति ततश्च संयमादीन् गुणान् प्राप्य पुनरपि प्रतिपतस्य यदाऽजघन्यानुभागं बध्नंति तदा
ऽयमजघन्यानुभागः सादिः एतानि च स्थानान्यप्राप्तस्य सर्वस्यानादिः ध्रुवोऽभव्यानामपर्यवसितत्वात् अध्रुवो भव्यानां सपर्य
वसितत्वादिति तदेवं त्रिचत्वारिंशत्प्रकृतीनामजघन्यानुभागो भावितः शेषत्रिके तु किमित्याह सेसंमि दुहा इत्ति शेषत्रि
केऽत्र उत्कृष्टजघन्यानुत्कृष्टानुभागत्रिके द्विप्रकारः साद्यध्रुवलक्षणो भवति तत्राजघन्यानुभागभावनाप्रसंगेन सर्वा

सोऽजघन्योऽनुभागोऽपि सूक्ष्मसंपरायादिगुणस्थानतो निर्दिष्टः स च तत्र तत्र प्रथमतया बध्यमानत्वात् सादिः क्षीणमोहाद्युपरित
नावस्थासु चावश्यं न भवतीत्यध्रुवः उत्कृष्टस्त्वनुभाग एतासां चतसृणां प्रकृतीनां मिथ्यादृष्टिः सर्वोत्कृष्टसंक्लेशः पर्याप्तसंज्ञि
पंचेंद्रियो बध्नात्येकं द्वौ वा समयौ यावत्ततः परं पुनरनुत्कृष्टं बध्नाति कालांतरे च पुनरप्युत्कृष्टसंक्लेशमासाद्योत्कृष्टमनुभागं बध्न
ति इत्येवमुत्कृष्टानुभागौ संसरतां जंतूनामुभयत्रापि साद्यध्रुवत्वे एव संभवति ततश्च विकल्पद्वितीयमिति तदेवमजघन्यादिषु चतु
र्ष्वपि भेदेषु साद्यादिभंगकाश्चिंतिताः संप्रत्यध्रुवबंधिनीनां तेषु तानाह सेसंमि दुहत्ति शेषे इतोद्धरिते तत्र प्रकृतिवृंदे
ऽध्रुवबंधिनीप्रकृतिकदंबके त्रिसप्ततिसंख्ये उत्कृष्टोऽनुत्कृष्टो जघन्योऽजघन्यश्चानुभागबंधो द्विधा द्विप्रकारः सादिरध्रुवश्च
भवति प्रकृतय एवैता अध्रुवबंधित्वात् साद्यध्रुवास्ततस्तत्सन्नानुविधायी जघन्यादिरूपस्तदनुभागोऽपि यथोक्तरूप एव भव
ति न त्वनादिर्ध्रुवो वेति तथा घातिनां घातिकर्मणां ज्ञानावरणदर्शनावरणमोहनीयांतरायलक्षणानां चतुर्णामजघन्योऽनु
भागः साद्यादिचतुर्विकल्पो भवति तथाहि अशुभप्रकृतीनां सर्वजघन्यमेवैतत्प्रकृतीनां तु सर्वोत्कृष्टमनुभागं यः कश्चिद्बंध
केषु सर्वविशुद्धः स एव निर्वर्तयति तत्र ज्ञानावरणदर्शनावरणांतरायलक्षणकर्मत्रयस्याशुभत्वात् क्षपकः सूक्ष्मसंपरायश्चर
मसमये जघन्यरसं निर्वर्तयति तद्बंधकेषु स एवातिविशुद्ध इति कृत्वा मोहनीयस्य त्वनिवृत्तिबादर एव यावद्बंधो भवतीति स
एव क्षपकश्चरमसमयेऽस्य जघन्यरसमुपकल्पयति तद्बंधकेषु स एवातिविशुद्धत्वादेतस्मान्नान्यत्र सर्वत्रोपशमश्रेण्यामपि
प्रकृतिकर्मचतुष्टयस्यानुभागोऽजघन्य एव बध्यते उपशमकानामपि क्षपकेभ्यो विशुद्ध्यानंतगुणहीनत्वात् तत्र यदोपशांतमोहः सू
क्ष्मसंपरायश्च यथानिर्दिष्टप्रकृतिकर्मचतुष्टयसंबंधिनोऽजघन्यानुभागस्याबंधको भूत्वा प्रतिपत्य यदा तं बध्नाति तदा १८८
ऽस्यमजघन्यानुभागः सादिर्भवति बंधव्यवच्छेदकृते तस्य प्रथमतया बध्यमानत्वात् अधस्तूपशांतमोहाद्यवस्थानादप्राप्तेषाम
नादिकालादारभ्याविच्छिन्नं बध्यमानत्वादनादिः ध्रुवोऽभव्यानां अध्रुवो भव्यानां तदेवं घातिकर्मणामजघन्योऽनुभागो भावि

तः शेषत्रिकेऽपि किमित्याह सेसंमि दुहत्ति शेषे जघन्योत्कृष्टानुत्कृष्टलक्षणेऽनुभागत्रिके द्विधा द्विविकल्पः साद्यध्रुवलक्षणो
बंधो भवति तथाहि प्रकृतिकर्मचतुष्टयमध्ये मोहनीयस्य तावज्जघन्यानुभागः क्षपकानिवृत्तिबादरस्य चरमसमयेऽनंतरमे
वोक्तः शेषकर्मत्रयस्य तु क्षपकसूक्ष्मसंपरायचरमसमये असावुक्तः स चानादिकालेऽपि पर्यटता जीवेन सर्वथा न बद्ध इति
तत्प्रथमतया तत्रैव बध्यमानत्वात् सादिः क्षीणमोहाद्यवस्थायां प्राप्तस्य नियमाभावाद्भवतीत्यध्रुवः अनादिस्तु न सदनि
र्श्वं कदाचिदपि तद्बंधसंभवात् ध्रुवोऽप्यसौ न भवत्यभव्यानां तद्बंधस्य दूरोत्सारितत्वादिति उत्कृष्टानुभागं तु प्रशस्तक
र्मणामशुभत्वात् सर्वसंक्लिष्टो मिथ्यादृष्टिः पर्याप्तसंज्ञिपंचेंद्रिय एकं द्वौ वा समयौ यावद्बध्नाति न परतः स चानुत्कृष्टस्य द्वि
तीये बध्यत इति सादिः जघन्यतः समयादुत्कृष्टतस्तु समयद्वयात्पुनरप्यनुत्कृष्टानुभागबंधगतस्योत्कृष्टोऽध्रुवो भवत्य
नुत्कृष्टस्तु सादिः पुनरपि जघन्यतोंऽतर्मुहूर्तेनोत्कृष्टतस्त्वनंताभिरुत्सर्पिण्यवसर्पिणीभिरुत्कृष्टसंक्लेशं प्राप्योत्कृष्टानु
भागं बध्नतोऽनुत्कृष्टोऽध्रुव एतासां प्रकृतीनामेवमुत्कृष्टानुत्कृष्टयोर्जंतवो भ्रामंतीत्युभयत्र साद्यध्रुवत्वे एव संभवति नेतरविकल्प
द्वयमिति तथा गोत्रे गोत्रकर्मणि द्विविधोऽजघन्योऽनुत्कृष्टश्चानुभागबंधः साद्यादिचतुर्विकल्पो भवतीति तथा सेसंमि दुहत्ति
शेषे तस्मादितोद्धरिते जघन्योत्कृष्टलक्षणे द्वये द्विधा द्विविकल्पः साद्यध्रुवरूपो भवति तत्रोत्कृष्टावनुभागबंधे यथोक्तमेव द्वि
चतुर्विकल्पो यथा वेदनीयनाम्नोस्तथा निर्विशेषं भावनीयो इदानीं जघन्याजघन्यौ भाव्येते तत्र कश्चित्सप्तमनरकपृथिवी
नारकः सम्यक्त्वाभिमुखो यथाप्रवृत्त्यादीनि त्रीणि करणानि कृत्वा मिथ्यात्वस्यांतरकरणं करोति तस्मिंश्च कृते मिथ्यात्वस्य
स्थितिद्वयं भवत्यंतर्मुहूर्तप्रमाणाधस्तनी शेषा तूपरितनी स्थापना | तत्र चाधस्तनीं स्थितिं प्रतिसमयं वेदयन् यस्मादनं
तरसमये सम्यक्त्वं प्राप्स्यति तत्र चरमसमये वर्तमानो नीचैर्गोत्रमा | श्रित्य गोत्रकर्मणोऽजघन्यानुभागं बध्नाति अंतस्थ १
न वर्ती स एतावता विशुद्धो वर्तमानश्च नीचैर्गोत्रमजघन्यानुभागं | न्वभागान्वितं बध्नीयादिति शेषपरिहारेण समर्प

विवीनारकस्यग्रहणं अयं हि यावत्किंचिदपि मिथ्यात्वमस्ति तावद्भवप्रत्ययेनैव तिर्यग्गतिप्रायोग्यं नीचैर्गोत्रं च बध्ना-
ति तच्चान्यदा बद्धमिथ्यात्वावस्थायामजघन्यरसं निर्वर्तयति प्राप्तसम्यक्त्वोऽप्युच्चैर्गोत्रस्याजघन्यानुभागं बध्नातीति तद्बंधके-
ष्वतिविशुद्धत्वात्पूर्वोक्तविशेषणविशिष्टस्य सम्यक्त्वाभिमुखस्य ग्रहणं अयं च जघन्यानुभागस्तत्प्रथमतया बध्यमानत्वा-
त्सादिः तथा सम्यक्त्वस्य सकृदुच्चैर्गोत्रमाश्रित्याजघन्यानुभागं रचयतीति जघन्योऽध्रुवो जघन्यानुभागस्तु सादिः तत्स्था-
नमप्राप्तपूर्वस्यानादिः अभव्यानां ध्रुवो भव्यानामध्रुव इति जघन्याजघन्यानुभागो गोत्रकर्मणो यथोक्तद्विचतुर्विकल्पाविति सं-
सिद्धस्त्रि शेषतणितमूलप्रकृतयस्तत्प्रकृतिस्थोऽविशिष्टआयुषि नारकतिर्यङ्मनुष्यदेवायुर्भेदाजघन्याजघन्योत्कृष्टानुत्कृ-
ष्टानुभागबंधचतुष्केपि द्विधा द्विप्रकारः साद्यध्रुवबंधलक्षणो बंधो भवति तथाहि तुल्यमानायुः त्रिभागादौ प्रतिनियतका-
ल एवायुषो बध्यमानत्वात्सादित्वात्तदनुभागस्यापि जघन्यादिरूपस्य सादित्वं अन्तर्मुहूर्तं च तत्परत आयुर्बंधोऽवश्य-
मुपरमत इति तस्याध्रुवत्वात्तदनुभागबंधस्याप्यध्रुवत्वमिति तावता अनुभागबंधमाश्रित्य मूलोत्तरप्रकृतीराश्रित्य संग्रे-
काऽप्यनुभागबंधः समाप्तः संप्रति प्रदेशबंधस्यावसरस्ते च प्रदेशाः कर्मवर्गणास्कंधास्तेषां संबंधिनो जीवेनात्मसात्क्रियं-
ते अतः कर्मवर्गणास्वरूपं वक्तव्यं तच्च प्राचीनवर्गणास्वरूपे निगदिते सति ज्ञातुं शक्यमतः प्रसंगतः शेषवर्गणास्वरूप-
मपि निगदनीयं शेषाः पुनरौदारिकाद्यास्ता ग्रहणप्रायोग्याग्रहणप्रायोग्यभेदात् द्विधा अतएकाणुकद्व्यणुका-
दिस्कंधनिष्पन्ना अग्रहणवर्गणाद्याः कर्मवर्गणावसाना वर्गणाः सजातीयद्रव्यसमुदायरूपा निरूपयन्नाह
७४ सेसंमि दुहा अणुभागबंधः इगदुगणुगाइजा अभवणंतगुणिआणू खंधउरलोचिअवग्गणा उ तह अग-
हणंतरिआ ७५ व्या० सेसंमि दुहा इति पदं अनुभागबंधाधिकारे व्याकृतं प्राकारेण समाप्तमित्यनुभागबंधस-
माप्तिः आणकशब्दः प्रत्येकं संबध्यते ततः केवलेनैकेनाणुनैकः परमाणुरित्यर्थः एकाणुको यत्र स एक-

काणुकः द्वौ अणुकौ यत्र स द्व्यणुकः एकाणुकद्व्यणुकस्कंधा आदिर्येषां त्र्यणुकादीनां ते एकाणुकद्व्यणुकाद्या म-
यूरव्यंसकेत्यादय इति मध्यपदलोपी समासः विभक्तिलोपश्च प्राकृतत्वात् किमवसाना इत्याह जा अभवणंतेत्यादि याव-
दित्यव्ययं पर्यवसानार्थे अभव्येभ्योऽनंतगुणिता अल्परूपत्वात् सिद्धानामनंतभागे णवो येषां ते अभव्यानंतगुणिताणवः
गमकत्वात् समासः स्कंधा द्विपरमाण्वादिरूपा अयमर्थः एकाणुकद्व्यणुकादयः स्कंधा एकैकपरमाणुवृद्ध्या ताव-
ज्ज्ञेया यावदभव्येभ्योऽनंतगुणैः सिद्धानंतभागवर्तिभिः परमाणुभिर्निष्पन्नास्ते स्कंधा एवंभूता किमित्याह औदारिके-
उचितवर्गणा भवंति तत्रोदारा स्फारता मात्रसारा वैक्रियादिशरीरपुद्गलापेक्षया स्थूला इत्यर्थस्तैरिह्बलैः पुद्गलै-
र्निष्पन्नमौदारिकशरीरं तस्यौदारिकनिष्पत्तौ कर्तव्यतायामुचिता योग्या औदारिकोचिताश्च ता वर्गणाश्च
समानजातीयपुद्गलसमूहात्मिका औदारिकोचितवर्गणा भवंतीत्यक्षरार्थो भावार्थस्त्वयं इह समस्तलोकाकाशप्र-
देशेषु ये केचिन एकाकिनः परमाणवो विद्यंते तत्समुदायः समानजातीयत्वादेका वर्गणा एवं द्विप्रदेशिकानामनंताना-
मपि स्कंधानां सजातीयत्वात् द्वितीया वर्गणा त्रिप्रदेशिकानामनंतानामपि स्कंधानां सजातीयत्वात् तृतीया वर्गणा
एवमेकैकपरमाणुवृद्ध्या संख्येयप्रदेशिकानामनंतानामपि स्कंधानां सजातीयसमुदायरूपाः संख्याता वर्गणा
: असंख्यातप्रदेशिकस्कंधानामेकैकपरमाणुवृद्ध्यानामसंख्येयवर्गणा अनंतपरमाणुनिष्पन्नस्कंधानामनंता-
नामनंता वर्गणाः अनंतानंतप्रदेशिकानां स्कंधानामनंतानंतवर्गणाः सर्वा अप्येता अल्पपरमाणुसमयत्वेन स्थूल-
परिणामतया च स्वभावाज्जीवानां ग्रहणं न समागच्छंतीति अग्रहणवर्गणाः सर्वा अप्युच्यंते एताश्च सर्वाः समतिक्रम्याऽ-
भव्यानंतगुणैः सिद्धानंतभागवर्तिभिः परमाणुभिर्निष्पन्नैः स्कंधैरारब्धा ग्रहणप्रायोग्या जघन्यौदारिकवर्गणा भवं-
ति ततश्चारभ्यैकैकपरमाणुवृद्धस्कंधारब्धा औदारिकशरीरयोग्योत्कृष्टवर्गणा यावत्तावदपि जघन्योत्कृष्टमध्य-

DR BHAU DAJI
DR BHAU DAJI

वर्त्तिन्यो ऽनंतावर्गणा भवंति यतो जघन्यायाः सकाशादुत्कृष्टाया अनंततमभागाधिकत्वं वर्त्तते अनंततमभाग
श्चानंतपरमाणुमयस्ततः एकोत्तरवृद्ध्योपचये सति मध्यवर्त्तिनीनामानंत्यं न विरुध्यते तत्र अग्रहणांतरितास्तथा
तेनैकैकपरमाणूपचयरूपेण प्रकारेणाग्रहणांतरिता अग्रहणवर्गणांतरिता वर्गणा भवंति एतदुक्तं भवति औदारिक
शरीरोत्कृष्टवर्गणायाः परतः एकपरमाण्वभ्यधिकस्कंधरूपा वर्गणा औदारिकस्यैव जघन्याग्रहणप्रायोग्या ततो द्विप
रमाण्वभ्यधिकस्कंधरूपा द्वितीया अग्रहणप्रायोग्या एवमेकैकपरमाण्वभ्यधिकस्कंधरूपा वर्गणास्तावद्वाच्या यावदुत्कृष्टा अ
ग्रहणप्रायोग्या वर्गणा भवंति जघन्यायाश्चाग्रहणवर्गणायाः सकाशादुत्कृष्टा वर्गणा अनंतगुणा गुणकारश्चाभव्यानंत
गुणः सिद्धानंतभागकल्पराशिप्रमाणो द्रष्टव्यः एतासां चाग्रहणप्रायोग्यता औदारिकं प्रतिप्रभूततरपरमाणुनिष्पन्नत्वात्
वेदितव्येति १५ ॥ एमेव विउव्वा२हार३ तेअ४भासा५णपाण६मण७कम्मे८ सुहुमा कमावगाहो ऊणूणंगुलअ
संखंसो १६ एवमेव वकारलोपे यावन्ना वत्ता जीवितवर्त्तमानावटप्रावारकदेवकुलदेवउलेवमेवइति प्राकृतलक्षणेन सर्वो
क्तौदारिकशरीरग्रहणप्रायोग्याग्रहणप्रायोग्यवर्गणान्यायेन वैक्रियाहारकतैजसभाषानापानमनःकर्म्मविषय
वर्गणा भवंति तत्र विविधा नानाप्रकारा क्रिया विक्रिया तथा च तद्धेतुत्वादयाः क्रिया या वैक्रिया समुद्घातकरणदंड
निसर्गादि विविधत्वं प्ररूप्या द्विष्टा निर्दिष्टमेव औदारिकाद्यपेक्षया वा विशिष्टा विलक्षणा वा क्रिया विक्रिया तस्यां भवं वैक्रि
यशरीरं तथा सर्वार्थग्रहणादिनिमित्तमुत्कृष्टतो हस्तप्रमाणं चतुर्दशपूर्वविदा क्रियते यत्तदाहारकं रुहकुलमितिक १८०
र्मणि णकः यथा पादहारक इत्यादौ यद्वा आह्रियंते गृह्यंते सूक्ष्मा जीवादयः पदार्थाः केवलिसमीपेऽनेनेति निपातन
ग्रहणादाहारकं तथाहारपाककारणं तेजः तेजो निसर्गहेतवश्चाप्याः शुभलाभ्याशुभ्यस्तेनेनेतेजसा निर्वृत्तं तैजसं श
रीरस्यूष्मादिलिंगगम्यं तथा भाष्यते या सा भाषा तथा आनापानौ उच्छ्वासनिःश्वासौ तथा मन्यते चिंत्यते वस्त्वनेनेति मनः तथा कर्म

णा नाम कर्म्मेत्तिरप्ररूप्या निर्वृत्तं कार्म्मणं ज्ञानाद्यष्टविधकर्म्मस्य प्रायोग्यपुद्गलानां गृहीतानां तद्रूपेण परिणमजन
कमित्यर्थः ततो वैक्रियादिनिष्पत्तियोग्याः पुद्गलवर्गणा अपि वैक्रियादिशब्दैः प्रोच्यंते यावत् ज्ञानावरणाद्यष्टविधक
र्मपरिणमहेतुकं दलिकं अपि कार्म्मणवर्गणेति ततश्च वैक्रियं चाहारकं च तैजसं च भाषा चानापानश्च मनश्च का
र्मणं चेति समाहारद्वंद्वस्तस्मिन् वैक्रियाहारकतैजसभाषानापानमनःकार्म्मणे एता वैक्रियाद्या वर्गणा अग्रहणव
र्गणांतरिता भवंतीत्यध्याहार्यो तावर्थस्त्वयं तत्र याः सर्वमौदारिकं प्रतिप्रभूततरपरमाणुनिष्पन्नत्वात् स्थूलपरिणमत्वाच्चाग्रह
णप्रायोग्या वर्गणा उक्तास्ता एव वैक्रियं प्रतिस्वल्पपरिमाणनिष्पन्नत्वात् स्वल्पपरिणमत्वाच्चाग्रहणप्रायोग्या वेदितव्या त
तोऽग्रहणप्रायोग्योत्कृष्टवर्गणापेक्षया च एकपरमाण्वधिकस्कंधरूपा वर्गणा वैक्रियशरीरप्रायोग्या जघन्या वर्गणा ततो
द्विपरमाण्वधिकस्वरूपा द्वितीया वैक्रियशरीरस्य ग्रहणप्रायोग्या एवमेकैकपरमाण्वधिकस्कंधरूपा वैक्रियशरीरस्य प्रायो
ग्या वर्गणास्तावद्वाच्या यावदुत्कृष्टग्रहणप्रायोग्या वर्गणा भवति जघन्यायाश्चोत्कृष्टा अनंतगुणेति एवं सर्वत्र वैक्रियश
रीरोत्कृष्टवर्गणापेक्षया च एकपरमाण्वभ्यधिकस्कंधरूपा जघन्या अग्रहणप्रायोग्या वर्गणा ततो द्विपरमाण्वधिकस्कंध
रूपा द्वितीया अग्रहणप्रायोग्या एवमेकैकपरमाण्वधिकस्कंधरूपा अग्रहणप्रायोग्या वर्गणास्तावद्वाच्या यावदुत्कृ
ष्टा अग्रहणप्रायोग्यवर्गणा एताश्च प्रभूततरद्रव्यनिष्पन्नत्वात् स्थूलपरिणामोपेतत्वाच्च वैक्रियशरीरस्याग्रहणयोग्य
ः आहारकस्याप्यल्पपरिमाणनिष्पन्नत्वाद्बादरपरिणामोपेतत्वाच्चाग्रहणप्रायोग्या एवमुत्तरत्रापि भावना कार्या ॥
अग्रहणप्रायोग्योत्कृष्टवर्गणापेक्षया च एकपरमाण्वधिकस्कंधरूपा वर्गणा आहारकशरीरप्रायोग्या जघन्या वर्ग
णा जघन्यायाश्चोत्कृष्टांता एतां अपि यथोत्तरमेकोत्तरपरमाणुवृद्धिमत्स्कंधात्मिका अनंता भवंति ततः तदुपरि रूपाधिक
स्कंधैरारब्धा आहारकतैजसयोरंतरालवर्त्तिनोऽयोग्या जघन्या अग्रहणवर्गणा जघन्यायाश्चोत्कृष्टांता एता अप्येकोत्तर

परमाणुरूपद्विमत्स्कंधरूपा अनंता एवमंतव्याः तदुपरि स्वरूपाधिकस्कंधरूपा तैजसशरीरनिष्पादनहेतुर्जघन्या
तैजसशरीरवर्गणा जघन्याया उत्कृष्टा यावदेता अप्येकोत्तरद्विमत्स्कंधरूपा अनंता एवमंतव्याः तदुपरि एकोत्तरप
रमाणुरूपाः स्कंधाः प्रागुक्तहेतोरेव तैजसभाषयोरयोग्यत्वादनंता अग्रहणवर्गणा वाच्याः तदुपरि रूपाधिक
स्कंधैरारब्धा जघन्या भाषावर्गणा यां भाषापर्याप्तो जीवोऽवलंबते यां च गृहीत्वा चतुर्विधभाषात्वेन परिणमय्य विसृ
जतीति तावत् जघन्याया उत्कृष्टां यावदेता अप्येकैकपरमाणुरूपद्विमत्स्कंधरूपा अनंता ज्ञेयास्तदुपरि स्वरूपाधिकस्कंधै
रारब्धा जघन्या अग्रहणवर्गणाः जघन्यामादौ कृत्वोत्कृष्टां यावदेता अप्येकैकपरमाणुरूपद्विमत्स्कंधरूपा अनंता अवसे
याः तदुपरि रूपाधिकस्कंधैरारब्धा जघन्या आनापानवर्गणा भवति यां गृहीत्वा आनापानभावं नयति जघन्याया आरभ्यो १
त्कृष्टां यावदेता अप्येकोत्तरद्विमत्स्कंधरूपा अनंता मंतव्याः ततः तदुपरि पुनरेकोत्तरस्कंधारब्धा जघन्याद्या उत्कृ
ष्टांता अनंता एवाग्रहणवर्गणा वाच्याः तत उत्कृष्टाग्रहणवर्गणोपरि रूपवृद्धिमज्जघन्या मनोनिष्पत्तिहेतुर्मनोवर्गणा भवति।
यां गृहीत्वा जीवः सत्यासत्यादिचतुर्विधमनोभावेन परिणमय्य चिंतयति जघन्याद्या उत्कृष्टांता एता अप्येकैकोत्तरपरमाणु
रूपद्विमत्स्कंधरूपा अनंता अवसेयाः ततस्तदुपरि एकैकपरमाणुरूपद्विमत्स्कंधारब्धा जघन्याद्या उत्कृष्टवर्गणांता अनं
ता अग्रहणवर्गणा तत उत्कृष्टाग्रहणवर्गणोपरि रूपवृद्धिमज्जघन्या ज्ञानावरणादिहेतुत्वतः कार्मणवर्गणा भवति जघन्या।
द्या उत्कृष्टां यावदेता अप्येकोत्तरपरमाणुरूपद्विमत्स्कंधरूपा अनंता मंतव्याः अत्रौदारिकादिवर्गणा आदौ कृत्वा जघन्य १९१
मध्यमोत्कृष्टा अग्रहणग्रहणाग्रहणप्रायोग्यवर्गणा स्थापनाया स्थाप्यंते यथा: औदारिकअग्रहणवर्गणा १ अग्रहणवर्ग
णा ३ वैक्रियग्रहणवर्गणा ४ अग्रहणवर्गणाः ५ आहारकग्रहणवर्गणाः ६ अग्रहणवर्गणा ७ तैजसग्रहणवर्गणा ८॥
अग्रहणवर्गणा ९ भाषाग्रहणवर्गणाः १० अग्रहणवर्गणा ११ आनापानग्रहणवर्गणा १२ अग्रहणवर्गणाः १३ मनोग्रह
+ औदारिकग्रहणवर्गणा २ +



णवर्गणाः १४ अ
ग्रहणवर्गणाः १५
कार्मणग्रहणवर्ग
णाः १६ एवमेता औदारिकाद्याः कार्मण
वर्गणावसाना वर्गणाः प्ररूपिता इत्थं
द्विमन्नुत्कर्मप्रकृत्या जघन्याऽपि क्वाप्यन्यवर्गणा निरूपितास्ताश्चेहानुपयोगित्वेन नोक्तास्
त एवावसेया संक्षेपरुचिसत्वानुग्रहार्थत्वात्प्रस्तुतप्रारंभस्य निश्चिता वर्गणा एता अपि बहुतरपरमाणुनिच
यरूपा अपि सिद्धाः अतः कियन्मात्रक्षेत्रं वा व्याप्नुवंतीत्याह सुहुमा कमेत्यादि एता औदारिकाद्या वर्गणाः
क्रमात्क्रमेणोत्तरोत्तरपरिपाट्या सूक्ष्मा ज्ञातव्याः अयमर्थः प्रथममग्रहणवर्गणाः औदारिकस्य सूक्ष्मास्ततस्तस्यैव ग्रहणव
र्गणाः सूक्ष्मास्ततस्तस्यैवाग्रहणवर्गणाः सूक्ष्मास्ततो वैक्रियस्य ग्रहणवर्गणाः सूक्ष्मास्ततस्तस्यैवाग्रहणवर्गणाः सूक्ष्मा
स्तत आहारकग्रहणवर्गणाः सूक्ष्मास्ततस्तदग्रहणवर्गणाः सूक्ष्मास्ततः तैजसग्रहणवर्गणाः सूक्ष्मास्ततस्तदग्रहणवर्ग
णाः सूक्ष्माः ततो भाषाग्रहणवर्गणाः सूक्ष्माः ततस्तदग्रहणवर्गणाः सूक्ष्माः तत आनापानवर्गणाः सूक्ष्माः ततस्तदग्र
हणवर्गणाः सूक्ष्माः ततो मनोग्रहणवर्गणाः सूक्ष्मास्ततस्तदग्रहणवर्गणाः सूक्ष्माः ततः कार्मणग्रहणवर्गणाः सूक्ष्मा १
इति अवगाहो अङ्गुलअसंखभागो सुत्ति अवगाहंते अवस्थानं कुर्वंति वर्गणा यस्मिन् सोऽवगाहोऽवस्थानक्षेत्रं सर्वा
कियन्मात्रमित्याह अङ्गुलासंख्येयांशो न्यूनो न्यूनतरोऽङ्गुलस्यासंख्येयांशोऽङ्गुलासंख्येयभागो यत्र स तथा एतदुक्तं
भवति यथा यथा द्रव्याणां द्रव्यपरमाणुनिचयः संपद्यते तथा तथा सूक्ष्मः सूक्ष्मतरः परिणामः संजायते ततश्च

THE ASIATIC SOCIETY OF BOMBAY
(Established in 1804) Town Hall, Bombay-400 023
A4 8 9

दारिकवर्गणास्कंधानामवगाहनांगुलासंख्येयभागः स एव तदग्रहणवर्गणानां न्यूनः स एव वैक्रियग्रहणवर्गणानां न्यूनः
तदग्रहणवर्गणानां स एव न्यूनः आहारकवर्गणानां स एव न्यूनः तदग्रहणवर्गणानां स एव न्यूनः तैजसग्रहणवर्गणा
नां स एव न्यूनः तदग्रहणवर्गणानां स एव न्यूनः भाषाग्रहणवर्गणानां स एव न्यूनः तदग्रहणवर्गणानां स एव न्यूनः आनाप
२नग्रहणवर्गणानां स एव न्यूनः तदग्रहणवर्गणानां स एव न्यूनः मनोग्रहणवर्गणानां स एव न्यूनः तदग्रहणवर्गणा
नां स एव न्यूनः कार्मणग्रहणवर्गणानां स एवांगुलासंख्येयभागो न्यूनतर इति उक्तं वर्गणानां स्वरूपमवगाहक्षेत्रमा
नं च अथ कैकादिरूपवृद्ध्या वर्धमानानामग्रहणवर्गणानां परिणामनिरूपणायाह ७६ ब: इक्किक्कहिआ सिद्धाणंतंसा
अंतरेसु अग्गहणा सवच्छजहंनुचिआ निअणंतंसाहियाजिहा ७७ व्या० एकैकपरमाणुः अतिस्कंधमधिकम
धिकं तत्र स्थूलयासु ता एकैकाधिका एकैकपरमाण्वभ्याहत्यर्थः अग्रहणवर्गणा भवंतीति योगः कियत्स्य
२८ सिद्धानंतांशाः सिद्धानामनंततमो भागो यासां ताः सिद्धानंततमभागवर्तिन्यः उपलक्षणत्वादभव्यानंतगुणाः आस
२माधारनिरूपणायाह अंतरेष्वंतरालेष्वौदारिकवैक्रियादिवर्गणामध्येष्वित्यर्थः अग्रहणाऽग्रहणवर्गणाः एत
ड्कं भवति निजनिजजघन्यग्रहणवर्गणैकस्कंधे ये परमाणवस्तेभ्यः स्वराशिप्रमाणेनानंतकेन गुणिता यावंतो भ
वंति तावत्प्रोग्रहणवर्गणा एकैकपरमाण्वभ्या अंतरे भवंत्याः अधुनाग्रहणयोग्यवर्गणासु निजनिजजघन्य
वर्गणायाः स्वकीयात् स्वस्वोत्कृष्टवर्गणाया यावन्मात्राधिकत्वं तदाह सव्वत्थ जहंनुचिया नियणंतंसाहियाजि
ट्ठाति सर्वत्र सर्वास्वप्यौदारिकवैक्रियाहारकतैजसभाषानापानमनःकार्मणवर्गणासु जघन्या चासावुचि १८२
ता ग्रहणयोग्या च जघन्योचिता ग्रहणयोग्यजघन्येत्यर्थः तस्याशकाशात् श्रुकत्वात् एकवचनस्यार्थत्वात् निजेन स्वकी
येन स्वकीयेनानंततमेनानंततमभागेनाधिकाः समग्र वर्गणा भवंति कास्ता विसाह जेष्ठा उत्कृष्टा किमुक्तं भवति औदारिक
जघन्यग्रहणव

र्गणास्कंधस्यानंततमो भागो यावंतः परमाणवस्तत्समाणैन विशेषेणोत्कृष्टवर्गणारंभक एकैकस्कंधो अधिको मंतव्यः अत एवानंततमा
गवर्तिपरमाणूनामनंतत्वेनैकैकपरमाण्वभ्या जायमाना जघन्योत्कृष्टांतराले वर्तिन्य औदारिकवर्गणा अप्यनंता सि
द्धा भवंति एवं वैक्रियाहारकतैजसभाषानापानमनःकार्मणवर्गणास्वपि ग्रहणप्रायोग्यासु निजनिजजघन्यवर्गणारंभ
कस्कंधस्यानंततमो भागो ये अनंतपरमाणवस्तावन्मात्रेणानंततमेन स्वस्वोत्कृष्टवर्गणारंभक एकैकः स्कंधो अधिको
वाच्यस्तस्य चानंततमभागस्यानंतपरमाणुमयत्वेनैकैकपरमाण्वभ्या सर्वग्रहणवर्गणा अप्यनंता भवंति याः केव
लमुत्तरोत्तरवर्गणास्कंधानामनंतगुणपरमाणूपचितत्वेनानंततमो भागो उत्तरोत्तरानुपूर्व्या सूक्ष्मसूक्ष्मतर सूक्ष्मतमादिभेदेन
नानाविधोदयरूपत इति अथ यादृशं कर्मस्कंधदलिकं जीवो गृह्णाति तदाह ७७ ब: अंतिमचउफासदुगंधपं
पंचवन्नरसपकम्मखंधदलं सव्वजिअणंतगुणरसं अणुजुत्तमणंतयपएसं ७८ व्या० जीवः कर्मस्कंधदलं
गृह्णातीसुत्तरगाथायां संबंधः तत्रांतिमत्ति अंते भवा अंतिमाः पश्चादाद्यंतायुग्मादिम इतीमप्रत्ययः अंत्याः पर्यंतवर्तिनश्च
तिमत्वं च फासागुरुलहुमिउखरसीउण्हसिणिद्धरुक्खा इति कर्मविपाकस्तवप्रतिपादितक्रममाश्रित्य ज्ञेयं चत्वारः
चतुःसंख्याः स्पर्शाः शीतोष्णस्निग्धरूक्षलक्षणा यस्य कर्मस्कंधदलस्य कर्मस्कंधद्रव्यस्येत्यर्थः तदंतिमचउः स्प
र्शाः अयमत्राशयः अमीषां चतुर्णां स्पर्शानां मध्यात्कोपि परमाणुः केनापि विरुद्धेन स्पर्शद्वयेन संयुक्तस्तत्र विद्य
ते तथाहि स्निग्धोष्णस्पर्शद्वितीयोपेतः कश्चित्परमाणुस्तत्र वर्तते कश्चन रूक्षशीतस्पर्शद्वययुक्तः परमाणुः क
श्चन स्निग्धशीतस्पर्शद्वयोपेतः कश्चित्तु रूक्षोष्णस्पर्शद्वयसमन्वितः इत्यतः स्कंधद्रव्यमभव्यानंतगुणपरमाणुनिष्प
न्नं सिद्धानंतभागवर्तिः परमाणुकलितम विरुद्धस्पर्शद्वयोपेतपरमाणुसहिततया चतुःस्पर्शसंपन्नं संजातमेव
गुरुलघुमृदुकठिनस्पर्शा पुनरमी परमाणौ न संति कर्मस्कंधद्रव्ये न भवंतीत्येतत्र प्रज्ञप्तिकर्मप्रकृत्याद्यभिधाये

णोक्तं हस्तकृतटीकायां उष्णं तुलफलदृष्टांतेन स्पर्शद्वयं तावदवस्थितं सदवस्थापरौ च स्निग्धोष्णौ स्निग्धशीतौ वा रूक्षो
ष्णौ रूक्षशीतौ वा अविरुद्धौ भवत इत्थं चत्वारः स्पर्शाः किंरुक्ताः तथा द्वौ सुरभिदुरभिलक्षणौ गंधौ यस्य तत् द्विगंधं पंचश
ब्दस्य प्रत्येकं संबंधात् पंचेति पंचसंख्या वर्णाः कृष्णनीललोहितहारिद्रशुक्ललक्षणा यस्य तत् पंचवर्णं पंचरसास्तिक्तकटु
ककषायाम्लमधुररसस्वरूपा यस्य तत् पंचरसं कार्म्मणवर्गणाः प्रधानाः स्कंधाः कर्मस्कंधास्त एव क्यधास्तत्कालं दलनाद् वि
शरारुभवनात् दलंति फलाविशरणे इति वचनाद्दलं दलिकं कर्मस्कंधदलं ततोऽन्तिमचतुःस्पर्शं चैतत् द्विगंधं चान्तिम
चतुःस्पर्शद्विगंधं चान्तिमचतुःस्पर्शद्विगंधं चैतत् पंचवर्णं च अन्तिमचतुःस्पर्शद्विगंधपंचवर्णं अन्तिमचतुःस्पर्शद्विगंधपंचव
र्णं च पंचरसं च अन्तिमचतुःस्पर्शद्विगंधपंचवर्णपंचरसं अन्तिमचतुःस्पर्शद्विगंधपंचवर्णपंचरसं च तत्कर्मस्कंधदलं चान्
तिमचतुःस्पर्शद्विगंधपंचवर्णपंचरसकर्मस्कंधदलं इह कर्मस्कंधग्रहणेन एतत्सूचयति ये कर्मस्कंधास्त एव चतुःस्प
र्शवंतो जीवेन गृह्यंते औदारिकवैक्रियाहारकशरीरयोग्यास्तु स्कंधा अष्टस्पर्शा एव गृह्यंते इति तैजसाद्यास्तु ये ग्रहणप्रायो २
ग्यास्तेऽपि सर्वे चतुःस्पर्शवंत एव जीवेन गृह्यंते इति मंतव्यं। वर्णगंधरसाः पुनरौदारिकादीनां सर्वेषामपि स्कंधानां यथोक्तप्रमा
णा एव भवंति उक्तं च पंचरसपंचवर्णेहिं परिणया अट्ठफास दोगंधा जीवाहारगजोग्गा चउफासविसेसिआ उवरिं आहा
रकस्कंधेभ्य उपरितनास्तैजसाद्यास्कंधा ग्रहणप्रायोग्याः सर्वे चतुःस्पर्शा भवंतीत्यर्थः तथा सर्वजीवेभ्योऽनंतगुणो येषां ते
सर्वजीवानंतगुणाः रस्यते विपाकानुभवनेनास्वाद्यते इति रसोऽनुभागस्तस्याणवो अंशा रसाणवः सर्वजीवानंतगुणा
श्च ते रसाणवश्च सर्वजीवानंतगुणरसाणवस्तैर्युक्तं समन्वितं इदमत्र हृदयं इह सर्वजघन्यरसस्यापि पुद्गलस्य रसः के १९३
वलिप्रज्ञया छिद्यमानः सर्वजीवानंतगुणान् भागान् प्रयच्छति ते च भागा अतिसूक्ष्मतया अपरभागमलभमाना निरंशा अंशा
रसाणव इत्युच्यंते रसाणवो रसाविभागा भागरसपरिच्छेदा भावपरमाणव इति पर्यायाः ते च रसाणवः प्रतिस्कंधं सर्वकर्मप

रमाणुषु सर्वजीवानंतगुणा विद्यंते तैश्चैव विधै रसाणुभिर्युक्तं परिगतं कर्मस्कंधदलिकं जीवो गृह्णातीति एत
दुक्तं भवति निंबेक्षुरसादिविषय एतस्मिन्नेव प्रत्येकं यथा रसविशेषं तत्तद्रूपं पंचकं जनयति तथानुभागबंधाध्यवसायैः
सर्वस्कंधेष्वसंख्यानंतगुणकर्मप्रदेशनिष्पन्नेषु प्रतिपरमाणु सर्वजीवेभ्योऽनंतगुणान् रसाविभागपरिच्छेदान् जीवो
जनयतीति तथा अणंतपएसं ति अनंता असंख्यानंतगुणाः सिद्धेभ्योऽनंतगुणहीनाः प्रदेशाः पुद्गला यत्र तदनंतप्रदेशं इ
दमुक्तं भवति अभव्येभ्योऽनंतगुणैः सिद्धेभ्योऽनंतगुणहीनैः परमाणुभिर्निष्पन्नमेकैकं कर्मस्कंधं गृह्णाति तानपि स्कं
धान् प्रतिसमयमभव्येभ्योऽनंतगुणान् सिद्धानामनंतभागवर्तिन एव गृह्णातीति १८ ॥ एगपएसोगाढं नियसव्वपए
सउ गहेइ जीउ । थोवो आउ तदंसो नामे गोए समो अहिउ १९ व्या० एकस्मिन् प्रदेशेऽवगाढमेकप्रदेशावगाढं येष्वाका
शप्रदेशेषु जीवोऽवगाढस्तेष्वेव यत्कर्मपुद्गलद्रव्यं तदेवागाढमित्येकगुणस्योगादात्मनि गलतीति यदाह वाचकमु
ख्यः स्नेहाभ्यक्तशरीरस्य रेणुना श्लिष्यते यथा गात्रं रागद्वेषाक्लिन्नस्य कर्मबंधो भवत्येवं नत्वनंतरपरंपरप्रदेशावगा
ढं भिन्नदेशस्थस्य कर्मपुद्गलद्रव्यस्य ग्रासत्वपरिणामाभावात् यथा हि स्वकः स्वप्रदेशस्थितान् योग्यपुद्गलानात्मभा
वेन परिणमयति इत्येवं जीवोऽपि स्वक्षेत्रस्थमेव द्रव्यमादत्ते न त्वनंतरपरंपरप्रदेशस्थं एतच्च द्रव्यं गृह्णमाणं जीवेनैकेन प्रदे
शेन गृह्यत आहोस्वित् प्रदेशैः किंतु सर्वैरप्यात्मीयप्रदेशैरित्येतदेवाह निजास्वात्मीयाः सर्वे समस्ताः प्रदेशाः निजसर्वप्रदेशा
स्तैर्निजसर्वप्रदेशैः तत्र आद्यादेशात्सगणत्वात्तस्य तृतीया निजसर्वप्रदेशैः कर्मस्कंधदलिकं गृह्णातीत्यर्थः जीवप्रदेशानां २
सर्वेषामपि शृंखलावयवानामिव परस्परं संबंधविशेषभावात् तथा हि एकस्य जीवस्य समस्तलोकाकाशप्रदेशरा
शिप्रमाणाः प्रदेशा वर्तंते मिथ्यात्वादिबंधकारणोदये च सति एकस्मिन् प्रदेशे स्वक्षेत्रावगाढग्रहणप्रायोग्यपुद्गलद्रव्य
ग्रहणाय व्याप्रियमाणे सर्वेऽप्यात्मप्रदेशा अनंतरपरंपरया तद्द्रव्यग्रहणाय व्याप्रियंते यथा हस्ताग्रेणायस्मिं विशा

से घटादिके गृह्यमाणे मणिबंधरूपसंज्ञादयोपि तद्ग्रहणाय अनंतरपरंपरतया व्याप्रियंते इति अथैवमेकाध्यवसाय
गृहीतकर्मपुद्गलद्रव्यस्य अस्मिन् कर्मणि यावन्मात्रो भागो भवतीत्येतदभिधित्सुराह थोवो आउतदंसो त्ति इहाष्ट
विधबंधकेन जंतुना यदेकेनाध्यवसायेन विचित्रतामनीय गृहीतं दलिकं तस्याष्टौ भागा भवंति सप्तविधबंधकस्य
सप्त भागाः षड्विधबंधकस्य षड् भागाः एकविधबंधकस्यैको भागः तत्र यदायुर्बंधकाले अष्टविधबंधको जं-
तुर्भवति तदाशेषकर्मस्थित्यपेक्षया आयुषोऽल्पस्थितित्वेन गृहीतस्य तस्यानंतस्कंधात्मककर्मद्रव्यासांशो
भागः सर्वस्तोकः आयुष्करूपतया परिणमयति ततो नामगोत्रयोश्च अल्पस्थितित्वेन स्वस्थाने द्वयोरपि भागः।
समस्ततः आयुष्कभागात्त्वधिको विशेषाधिक इति ७९ गा: विग्घावरणे मोहे सव्वोवरि वेयणीइ जेण-
प्पे तस्स फुडत्तं न हवइ ठिईविसेसेण सेसाणं ८० गा० विघ्नस्यांतरायस्यावरणयोर्ज्ञानदर्शनावरणयो
र्भागः समः स्वस्थाने त्रयाणामपि तुल्यस्थितिकत्वात् नामगोत्रापेक्षया त्वधिको विशेषाधिक इत्यर्थः ततोंत-
रायज्ञानावरणदर्शनावरणभागान् मोहे मोहनीये भागोऽधिको विशेषाधिकः ननु तर्हि वेदनीये किंरूपो भागो
भवतीत्याह सर्वोपरि वेदनीये सर्वकर्मभागोपरिष्टाद्विशेषाधिको भवति इदमुक्तं भवति शेषकर्मापेक्षया
तावन्मोहनीयस्योपरि भाग उक्तो वेदनीयस्य पुनर्मोहनीयभागादपि सकाशादुपर्येव भागः अत्र विनेयः पृच्छ-
ति किं पुनरिह कारणं येनोत्क्रमेण कर्मणां भागाधिक्यं भवति तत्र वेदनीयस्य तद्भागाधिक्ये कारणमाह
तस्स फुडत्तं न हवइ येन कारणेनाल्पे स्तोके दलिके सति तस्य वेदनीयस्य कर्मणः स्फुटत्वं सुखदुःखानुभव- १९४
नव्यक्तिरिति यावत् न नैव भवति एतदुक्तं भवति सुखदुःखजननस्वभावं वेदनीयं कर्म तच्च बहुपरिणत-
स्वपुद्गलाः स्वभावात्स्फुटा एव संतः स्वकार्यं सुखदुःखरूपं व्यक्तीकर्तुं समर्थाः शेषकर्मपुद्गलाः पुनः स्व-

ल्पा अपि स्वकार्यं निष्पादयंति दृश्यते च पुद्गलानां स्वकार्यजनने अल्पबहुत्वकृतं सामर्थ्यवैचित्र्यं यथा हि धृ-
ष्टादिकं द्रव्यं बहुतरमुपभुक्तं शरीरे तिलकृणां स्वकार्यमातनोति मृद्विकारादिकं स्वल्पमपि भुक्तं शरीरमुपकल्पा-
यति यथा विषं स्वल्पमपि मारणादिकार्यं साधयति लेष्टुकादिकं तु बहुतरमित्येवमिहाप्युपनयः कार्यस्तस्मात्प्र-
भूता वेदनीयपुद्गलाः सुखदुःखे साधयंतीति सुखदुःखस्फुटत्वकारणाद्वेदनीयस्य महान् भाग इति स्थितं
शेषः कर्मणां भागस्य हीनाधिकत्वे कारणमाह ठिईविसेसेण सेसाणं ति वेदनीयाच्छेषकर्मणामायुष्कादीनां
भागस्य हीनत्वमाधिक्यं वा विज्ञेयं केनेत्याह स्थितिविशेषेण हेतुभूतेन यस्य नामगोत्रादेरायुष्काद्यपेक्षया
महती स्थितिः तस्य तदपेक्षया भागोपि महान् यस्य त्वसौ हीना तस्य सोपि हीन इति भावः ननु स्थित्यनुरोधेन भागो भ-
वन्नायुषः सकाशान्नामगोत्रयोर्भागः संख्यातगुणः प्राप्नोति तत्किमित्युक्तं विशेषाधिक इति सत्यमेतत् किं तु सर्वो-
ऽपि नरकगत्यादिकर्मकलापश्चायुष्कोदयमूलस्तदुदय एव तस्योदयादत आयुष्कं प्रधानत्वाद्बहुपुद्गलद्रव्यं
लभते तदपेक्षया प्रधानत्वान्नामगोत्रयोर्भागस्य विशेषाधिकमयुक्तमिति सत्यमेतत् किं तु नामगोत्रे सततबं-
धिनी ततस्तदपेक्षया बहुमाप्नुवत आयुष्कं तु कादाचित्कबंधत्वादल्पद्रव्यमवाप्नोति इदमुक्तं भवति स्थित्यनुसारेण
संख्यातगुणहीनताप्राप्तावपि शेषकर्मोदयाक्षेपकत्वेन प्राधान्यान्नामगोत्रापेक्षया किंचिदूनमेव भागमायु-
ष्कं लभते नामगोत्रे त्वप्रधानतया हीनताप्राप्तावपि सततबंधित्वादायुष्कापेक्षया विशेषाधिकमेव भागं लभेते नन्व-
त्रापि ज्ञानावरणापेक्षया मोहनीयस्य संख्यातगुणो भागः प्राप्नोति तत्र स्थितेर्ज्ञानावरणीयादिस्थित्यपेक्षया
संख्यातगुणत्वादतः कथं विशेषाधिक उक्तः सत्यं दर्शनमोहनीयलक्षणाया एकस्या एव मिथ्यात्वप्रकृतेः सप्ततिसा-
गरोपमकोटिलक्षणा स्थितिरुक्ता चारित्रमोहनीयस्य तु कषायलक्षणस्य चत्वारिंशत्सागरोपमकोटीकोटीलक्ष।

लेव स्थितिरसस्तदनुसारेण विशेषाधिको वक्तव्यो भागः संयुक्तो न तु संख्यातगुणः दर्शनमोहनीयद्रव्यं तु सततमेव चा
रित्रमोहनीयदलिकात् सर्वघातित्वेनानंतभाग एव वर्त्तत इति न किंचित्तेन नर्द्धात इति युक्तमात्रं चैतत् निश्चयतस्तु
श्रीसर्वज्ञवचनप्रमाणादेवावबोद्धव्यार्थप्रतिपत्तिः ननु यद्येवं तदा एकस्मिन् समये गृहीतद्रव्यस्य कथमष्टधा परिणाम
ः कथं चैवं भागविकल्पने ति चेदुच्यते अविशेषाज्जीववशात् केवैचित्र्यात् च उज्जलपरिणामस्याजीवव्यतिरिक्तानामपि
हस्तेंद्धधुरादिपुद्गलानां विचित्रपरिणतिरवलोक्यते किमुत जीवपरिगृहीतानामित्यलं विस्तरेणेति कृता मूलप्र
कृतीनां भागप्ररूपणा सांप्रतमुत्तरप्रकृतीनां भागप्ररूपणां विधित्सुराह ८० ॥ निअजाइलद्धदलिआ णंतंसो
होइ सव्वघाईणं बज्झंतीण विभज्जइ सेसं सेसाण पइसमयं ८१ व्या० यकाय काः प्रकृतयो यस्याः यस्याः मूलप्र
कृतौ पठिता विद्यंते तासां सैव मूलप्रकृतिर्निजजातिर्विज्ञेया तया निजनिजरूपतया निजजात्या यल्लब्धं प्राप्तं संयद +मूलप्रकृति+
लिकाग्रं तस्य यो अनंतभागः सर्वघातिरसयुक्तः स एव सर्वघातिप्रकृतीनां केवलज्ञानावरण केवलदर्शना
वरण निद्रापंचक मिथ्यात्वसंज्वलनवर्जद्वादशकषायलक्षणानां विंशतिसंख्यानामपि भवतीति ज्ञायते कोऽत्र
युक्तिरिति चेदुच्यते इहाष्टानामपि मूलप्रकृतीनां प्रत्येकं ये स्निग्धतराः परमाणवस्तेभ्यः कास्तेभ्यश्च मूलप्रकृ
तिपरमाणूनामनंततमो भागस्तस्य च सर्वघातिप्रकृतियोग्यास्तस्मिंश्चानंततमे भागे सर्वघातिरसयुक्तेऽपसा
रिते शेषस्य दलकस्य देशघातिरसोपेतस्य कावार्त्तेत्याह बज्झंतीण विभज्जइ इत्यादि बध्यमानानामन्यबध्यमाना
नां विभज्यते विभागी क्रियते विभाग विभजद्धीयत इत्यर्थः शेषं सर्वघातिप्रकृत्यनंतभागात् शिष्टं प्रदेशाग्रं केषां १९५
बध्यमानानां विभज्यत इत्याह शेषाणां सर्वघातिप्रकृतिविशिष्टानां स्वजातिप्रकृतीनां कथमित्याह प्रतिसमयं प्र
तिक्षणं बंधनविभजनक्रिययोरुभयोरपि क्रियाविशेषणमिदं योजनीयं अयमत्र तात्पर्यार्थः इह ज्ञानावरण
स्य पंच

ताव उत्तरप्रकृतयस्तासु चैका केवलज्ञानावरणलक्षणा सर्वघातिनी शेषाश्चतस्रो देशघातिन्यः तत्र ज्ञानावरणस्य
भागो यद्दलिकमायाति तस्य यदनंतभागवर्ति सर्वघातिरसोपेतं द्रव्यं तत्केवलज्ञानावरणस्यैव भागतया परिण
मति शेषं तु देशघातिरसोपेतं द्रव्यं चतुर्द्धा विभज्यते मतिज्ञानावरण श्रुतज्ञानावरणावधिज्ञानावरण म
नःपर्यायज्ञानावरणेभ्यः प्रदीयते दर्शनावरणस्य च नवोत्तरप्रकृतयस्तासु च केवलदर्शनावरणं निद्रापंचकं चे
ति षट् सर्वघातिन्यः शेषास्तिस्रो देशघातिन्यः तत्र दर्शनावरणस्य भागे यद्द्रव्यमागच्छति तस्य मध्ये यत्सर्वघा
तिरसोपेतमनंततमभागवर्ति द्रव्यं तत् षट्स्विति भागी कृत्वा सर्वघातिप्रकृतिषट्कस्य तत्तयैव परिणमति शेषं तु
देशघातिरसयुक्तं द्रव्यं शेषप्रकृतित्रयभागरूपतयेति वेदनीयस्य पुनः सातरूपासातरूपा चैकैव प्रकृतिरे
ताभ कदा बध्यते न युगपद् द्वे अपि सातासातयोः परस्परं विरोधात् ततो वेदनीयभागलब्धं द्रव्यमेकस्या एव बध्यमाना
याः प्रकृतेः सर्वस्य भवति मोहनीयस्य स्थित्यनुसारेण यो मूलभाग आगच्छति तस्यानंततमो भागः सर्वघातिप्रकृतियो
ग्यो द्विधा क्रियते अर्द्धं दर्शनमोहनीयस्य अर्द्धं चारित्रमोहनीयस्य तत्रार्द्धं दर्शनमोहनीयसत्कं समग्रमपि मिथ्यात्व
मोहनीयस्य ढौकते चारित्रमोहनीयस्य सत्कमर्द्धं द्वादशधा क्रियते ते च द्वादश भागाः आद्येभ्यो द्वादशकषाये
भ्यो दीयंते स्वस्थाने उक्तकषायद्वादशकस्यापि उक्तं शेषं तु देशघातिरससमन्वितं द्रव्यं द्विधा क्रियते तत्रैको भागः
कषायमोहनीयं द्वितीयो नोकषायमोहनीयस्य तत्र कषायस्य भागश्चतुर्द्धा क्रियते ते च चत्वारोऽपि भागाः संज्व
लनक्रोधमानमायालोभानां दीयंते नोकषायमोहनीयस्य पुनर्भागः पंचधा क्रियते ते च पंचापि भागाः यथाक्रमं त्र
याणां वेदानामन्यतमस्मै वेदाय बध्यमानाय हास्यरतियुगलारतिशोकयुगलयोरन्यतरस्मै युगलाय जुगुप्सा
याश्च दीयंते नान्येभ्यो बंधाभावात् न हि नवापि नोकषाया युगपद् बध्यमाना इति किंचायं क्रमोऽपि चैवं आयुष

स्कन्धभागे यद्द्रव्यमागच्छति तत्सर्वमेकस्या एव बध्यमानप्रकृतेर्भवति यतस्तासु एकस्मिन् काले एकैव प्रकृति
र्बध्यत इति नामकर्मणो भागाभावना कर्मप्रकृत्यभिप्रायेणोच्यते तत्रेयं गाथा पिंडपगईसु तइं तिगाण वन्नरसगंधफ
साणं सव्वेसिं संघाए तणुंमि य तिगे चउक्के वा अस्या अक्षरगमनिका पिंडप्रकृतौ यो नामप्रकृतयः षट्कर्मप्रकृति
चूर्ण्यां पिंडपगईउ नामपगईउ त्ति तासु मध्ये बध्यमानानामन्यतमा गतिजातिशरीरबंधनसंघातनसंहननसंस्थानांगोपांगा
नुपूर्वीणां वर्णगंधरसस्पर्शागुरुलघुपराघातोच्छ्वासनिर्माणतीर्थकराणां आतपोद्योतप्रशस्ताप्रशस्तविहायोगति
त्रसस्थावरबादरसूक्ष्मपर्याप्तापर्याप्तप्रत्येकसाधारणस्थिरास्थिरशुभाशुभसुभगदुर्भगसुस्वरदुःस्वरआदेयाना
देययशःकीर्त्ययशःकीर्तिमिततत्पराणां वा मूलभागो विभज्य समर्पणीयः अत्रैव विशेषमाह वर्णेत्यादि वर्णगंधरस
स्पर्शानां प्रत्येकं यद्भागलब्धं दलिकमायाति तत्सर्वं स्वस्वभेदेषु वा अवांतरभेदेषु विभज्य विभज्य दीयते तथाहि वर्णनाम्नो
यद्भागोपलब्धं दलिकं तत् पंचधा कृत्वा शुक्लादिभ्यो ऽवांतरभेदेभ्यो विभज्य प्रदीयते एवं गंधरसस्पर्शानामपि यस्य यावं
तो भेदास्तस्य संबंधिनो भागस्य ततिभागी कृत्वा तावद्भ्यो ऽवांतरभेदेभ्यो दातव्याः तथा संघातनाम्नो ऽपि प्रत्येकं यद्भागल
ब्धं दलिकमायाति तत्त्रिधा चतुर्धा वा कृत्वा त्रिभ्यः चतुर्भ्यो वा दीयते तत्रौदारिकतैजसकार्मणानि वा त्रीणि शरीरा
णि संघातत्वाच्चतुर्गप्रबध्नता त्रिधा क्रियते वैक्रियाहारकतैजसकार्मणरूपाणि चत्वारि शरीराणि संघातानां बध्नता
चतुर्धा क्रियते रु: सत्तेकारविगप्पा बंधणनामाणि बंधननाम्नो भागलब्धं यद्दलिकमायाति तत्सप्तसप्तविकल्पाः सप्त
शभेदाः शरीरत्रये एकादश वा विकल्पाः शरीरचतुष्टये क्रियंते तत्रौदारिकौदारिक१ औदारिकतैजस२ औदारिककार्म
ण३ औदारिकतैजसकार्मण४ तैजसतैजस५ तैजसकार्मण६ कार्मणकार्मण७ लक्षणबंधनानि बध्नता सप्त वैक्रि
यचतुष्काहारकचतुष्कतैजसत्रिकलक्षणान्येकादशबंधनानि बध्नता एकादश चावशेषाणां च प्रकृतीनां यद्भागलब्ध १९६

दलिकमायाति तन्न भूयो विभज्यते तासां पुनः प्रभेदांतराद्यभावात् तेन तासां तदेव परिशुद्धदलिकं
भवतीति मोहनीयस्य तु यद्भागागतं द्रव्यं तदेकस्या एव बध्यमानप्रकृतेः सर्वं भवति यतोऽत्र सेकदा उच्चैर्गोत्रलक्षणानी
चैर्गोत्रलक्षणा चैकैव प्रकृतिर्बध्यत इति अंतरायभागलब्धं तु द्रव्यं दानांतरायादिप्रकृतिपंचकतया परिणमयति
तत्ताः पंचापि ध्रुवबंधित्वात्सर्वदैव बध्यंत इति ध्रुवबंधीणि विसज्जइ इति वचनेन बध्यमानानामेवायं भागवि
धिरुक्तो यदा च स्वस्वगुणस्थाने बंधव्यवच्छेदः संपद्यते तदा तासां भागलब्धं द्रव्यं कस्या भवतीत्यत्रोच्य
ते यस्याः प्रकृतेः बंधो व्यवच्छिद्यते तद्भागलब्धं द्रव्यं यावदेकापि सजातीयप्रकृतिर्बध्यते तावत्तस्या एव भवति यदा
पुनः सर्वासामपि सजातीयप्रकृतीनां बंधो व्यवच्छिद्यते भवति नच मिथ्यात्वस्येवापरा सजातीया प्रकृतिरस्ति तदा
तद्भागलब्धं द्रव्यं सर्वमपि सजातीयमूलप्रकृत्यंतर्गतानां विजातीयप्रकृतीनामपि भवति यदा ता अपि व्यवच्छिन्ना भवं
ति तदा तद्दलिकं सर्वमप्यन्यस्या मूलप्रकृतेः संपद्यते तिदर्शनं चात्र यथा स्त्यानर्द्धित्रिकस्य बंधविच्छेदे निद्रादिलब्धं द्रव्यं
सर्वमपि सजातीययोर्निद्राप्रचलयोः भवति तयोरपि बंधे बंधव्यवच्छेदे सति स्वमूलप्रकृत्यंतर्गतानां चक्षुर्दर्शनावर
णादीनां विजातीयानामपि भवति तेषामपि च बंधे विच्छिन्ने उपशांतमोहाद्यवस्थायां निःशेषं सातवेदनीयस्यैव भवति
मिथ्यात्वस्य तु बंधविच्छेदे सति सजातीयानां भागलब्धदलिकं सर्वं विजातीयानामेव क्रोधादीनामाद्यद्वादशकषाय
णां भवतीत्यनया दिशा तावन्नेयं यावत्सूक्ष्मसंपरायगुणस्थाने मोहनीयस्य भागलब्धं द्रव्यं षड्भागतया भवति त
तः ऊर्ध्वमुपशांताद्यवस्थायां सर्वघातिशेषमूलप्रकृतीनां बंधविच्छेदे तद्भागलब्धं द्रव्यं सर्वं सातवेदनीयस्यैव भागतया भ
वतीति अत्रैव कर्मप्रकृतिटीकाकारोपदर्शितं स्वस्वोत्तरप्रकृतीनामुत्कृष्टपदे सोल्पबहुत्वं विनेयजनानुग्रहाय प्रद
र्श्यते तत्रोत्कृष्टपदे सर्वस्तोकं प्रदेशाग्रं केवलज्ञानावरणस्य ततो मनःपर्यायज्ञानावरणस्यानंतगुणं ततोऽवधिज्ञानावर

णस्य विशेषाधिकं ततः श्रुतज्ञानावरणस्य विशेषाधिकं ततो मतिज्ञानावरणस्य विशेषाधिकं तथा दर्शनावरणे उत्कृ
ष्टप्रदेशाग्रं ततो निद्राया विशेषाधिकं ततः प्रचलाप्रचलायाः विशेषाधिकं ततो निद्रानिद्राया विशेषाधिकं ततः स्त्या
नर्द्धि विशेषाधिकं ततः केवलदर्शनावरणस्य विशेषाधिकं ततो अवधिदर्शनावरणस्य विशेषाधिकं ततोऽचक्षुर्दर्शनाव
रणस्य विशेषाधिकं ततश्चक्षुर्दर्शनावरणस्य विशेषाधिकं तथा सर्वस्तोकमुत्कृष्टप्रदेशाग्रमसातवेदनीयस्य ततः
सातवेदनीयस्य विशेषाधिकं तथा मोहनीये सर्वस्तोकमुत्कृष्टप्रदेशाग्रमप्रत्याख्यानावरणमानस्य ततोऽप्रत्याख्याना
वरण+ वरणक्रोधस्य विशेषाधिकं ततोऽप्रत्याख्यानमायाया विशेषाधिकं ततोऽप्रत्याख्यानावरणलोभस्य विशेषाधिकं त
तः प्रत्याख्यानावरणमानस्य विशेषाधिकं ततः प्रत्याख्यानावरणक्रोधस्य विशेषाधिकं ततः प्रत्याख्यानावरण
मायाया विशेषाधिकं ततः प्रत्याख्यानावरणलोभस्य विशेषाधिकं ततोऽनंतानुबंधिमानस्य विशेषाधिकं ततोऽ
नंतानुबंधिक्रोधस्य विशेषाधिकं ततोऽनंतानुबंधिमायाया विशेषाधिकं ततोऽनंतानुबंधिलोभस्य विशे
षाधिकं ततो मिथ्यात्वस्य विशेषाधिकं ततो जुगुप्साया अनंतगुणं ततो भयस्य विशेषाधिकं ततो हास्यशोक
योर्विशेषाधिकं स्वस्थाने तु द्वयोरपि परस्परं तुल्यं ततो रत्यरत्योर्विशेषाधिकं तयोः पुनः स्वस्थाने तुल्यं ततः स्त्रीवे
दनपुंसकवेदयोर्विशेषाधिकं स्वस्थाने तु द्वयोरपि परस्परं तुल्यं ततः संज्वलनक्रोधस्य विशेषाधिकं ततः संज्वल
नमानस्य विशेषाधिकं ततः पुरुषवेदस्य विशेषाधिकं ततः संज्वलनमायाया विशेषाधिकं ततः संज्वलनलोभ
स्यासंख्येयगुणं तथा चतुर्ष्वप्यायुःषूत्कृष्टप्रदेशाग्रं परस्परं तुल्यं नामकर्मण्युत्कृष्टप्रदेशाग्रं गतौ देवग
तिनरकगत्योः सर्वस्तोकं स्वस्थाने तु द्वयोरपि तुल्यं ततो मनुजगतौ विशेषाधिकं ततः तिर्यग्गतौ विशेषाधिकं
तथा जातौ चतुर्णां द्वीन्द्रियादिजातिनाम्नामुत्कृष्टप्रदेशाग्रं सर्वस्तोकं स्वस्थाने तु तेषां परस्परं तुल्यं ततः एकेंद्रि

+आहारक+

यजातौ विशेषाधिकं तथा शरीरनाम्नि सर्वस्तोकमुत्कृष्टप्रदेशाग्रमाहारकशरीरस्य ततो वैक्रियशरीरस्य विशेषा
धिकं तत औदारिकशरीरस्य विशेषाधिकं ततस्तैजसशरीरस्य विशेषाधिकं ततः कार्मणशरीरस्य विशेषाधिकं
एवं संघातनाम्नोपि द्रष्टव्यं तथा बंधननाम्नि सर्वस्तोकमुत्कृष्टप्रदेशाग्रमाहारकाहारकबंधननाम्नः ततः आहार
बंधन+ कतैजसनाम्नो विशेषाधिकं ततः कार्मणबंधननाम्नो विशेषाधिकं तत आहारकतैजसबंधननाम्नो विशेषाधि +कार्मण
कं ततो वैक्रियवैक्रियबंधननाम्नो विशेषाधिकं ततो वैक्रियतैजसबंधननाम्नो विशेषाधिकं ततो वैक्रियका
र्मणबंधननाम्नो विशेषाधिकं ततो वैक्रियतैजसकार्मणबंधननाम्नो विशेषाधिकं ततः औदारिकौदारिकबंधन
नाम्नो विशेषाधिकं तत औदारिकतैजसबंधननाम्नो विशेषाधिकं तत औदारिककार्मणबंधननाम्नो विशेषाधिकं
तत औदारिकतैजसकार्मणबंधननाम्नो विशेषाधिकं ततः तैजसतैजसबंधननाम्नो विशेषाधिकं ततस्तैजसका
र्मणबंधननाम्नो विशेषाधिकं ततः कार्मणकार्मणबंधननाम्नो विशेषाधिकं तथा संस्थाननाम्नि संस्थानानामा
द्यंतवर्जानां चतुर्णामुत्कृष्टप्रदेशाग्रं सर्वस्तोकं स्वस्थाने तु तेषां परस्परं तुल्यं ततः समचतुरस्रसंस्थानस्य विशे
षाधिकं ततो हुंडसंस्थानस्य विशेषाधिकं तथा अंगोपांगनाम्नि सर्वस्तोकमुत्कृष्टप्रदेशाग्रमाहारकांगोपांगनाम्नः ततो
वैक्रियांगोपांगनाम्नो विशेषाधिकं ततोप्यौदारिकांगोपांगनाम्नो विशेषाधिकं तथा संहनननाम्नि सर्वस्तोकमाद्यानां पं
चानां संहनननाम्नामुत्कृष्टप्रदेशाग्रं स्वस्थाने तु तेषां परस्परं तुल्यं ततः सेवार्त्तसंहननस्य विशेषाधिकं तथा वर्णनाम्नि स
र्वस्तोकमुत्कृष्टप्रदेशाग्रं कृष्णवर्णनाम्नः ततो नीलवर्णनाम्नो विशेषाधिकं ततो लोहितवर्णनाम्नो विशेषाधिकं त
तो हारिद्रवर्णनाम्नो विशेषाधिकं ततः शुक्लवर्णनाम्नो विशेषाधिकं तथा गंधनाम्नि सर्वस्तोकं सुरभिगंधनाम्नः ततोऽ
सुरभिगंधनाम्नो विशेषाधिकं तथा रसनाम्नि सर्वस्तोकमुत्कृष्टप्रदेशाग्रं कटुकरसनाम्नः ततस्तिक्तरसनाम्नो विशेषा

DR BHAU DAJI
DR BHAU DAJI

धिकं ततोऽम्लरसनाम्नो विशेषाधिकं ततो मधुररसनाम्नो विशेषाधिकं तथा स्पर्शनाम्नि उत्कृष्टपदे प्रदेशाग्रं कर्कशगु
रुस्पर्शनाम्नोः स्वस्थाने द्वयोरपि परस्परं तुल्यं ततो मृदुलघुस्पर्शनाम्नो विशेषाधिकं स्वस्थाने द्वयोरपि परस्परं तुल्यं
ततो रूक्षशीतस्पर्शनाम्नो विशेषाधिकं स्वस्थाने परस्परं तुल्यं ततः स्निग्धोष्णस्पर्शनाम्नो विशेषाधिकं स्वस्थाने द्वये
रपि परस्परं तुल्यं तथानुपूर्वीनाम्नि सर्वस्तोकमुत्कृष्टपदे प्रदेशाग्रं देवगतिनरकगत्यानुपूर्व्योः स्वस्थाने द्वयोरपि पर॰
स्परं तुल्यं ततो मनुजगत्यानुपूर्व्या विशेषाधिकं ततः तिर्यग्गत्यानुपूर्व्या विशेषाधिकं तथा विहायोगतिनाम्नि सर्वस्तोक
मुत्कृष्टपदे प्रदेशाग्रं प्रशस्तविहायोगतिनाम्नस्ततोऽप्रशस्तविहायोगतिनाम्नो विशेषाधिकं तथा सर्वस्तोकमुत्कृष्टपदे प्रदे
शाग्रं त्रसनाम्नस्ततो विशेषाधिकं स्थावरनाम्नः एवं बादरसूक्ष्मयोः पर्याप्तापर्याप्तयोः प्रत्येकसाधारणयोः स्थिरा
स्थिरयोः शुभाशुभयोः सुभगदुर्भगयोः सुस्वरदुःस्वरयोरादेयानादेययोर्यशःकीर्त्ययशःकीर्त्योर्वाच्यं॥
आतपोद्योतयोरुत्कृष्टपदे प्रदेशाग्रं सर्वस्तोकं स्वस्थाने द्वयोरपि तुल्यं निर्माणोच्छ्वासपराघातोपघातागुरुलघु
तीर्थकराणां त्वल्पबहुत्वं नास्ति यत इदमल्पबहुत्वं सजातीयप्रकृत्यपेक्षया प्रतिपक्षप्रकृत्यपेक्षया वा चिंत्यते यथा
कृष्णादिवर्णनाम्नः शेषवर्णापेक्षया प्रतिपक्षप्रकृत्यपेक्षया वा यथा सुभगदुर्भगयोर्न चैतासां परस्परं सजातीया अतिनैक
अपिंडप्रकृत्यंतर्गतत्वात् नापि विरुद्धा युगपदपि बंधसंभवात् तथा गोत्रे सर्वस्तोकमुत्कृष्टपदे प्रदेशाग्रं नीचैर्गोत्रस्य ततो
उच्चैर्गोत्रस्य विशेषाधिकं तथांतरायकर्मणि सर्वस्तोकमुत्कृष्टपदे प्रदेशाग्रं दानांतरायस्य ततो लाभांतरायस्य विशेषाधिकं
ततो भोगांतरायस्य विशेषाधिकं तत उपभोगांतरायस्य विशेषाधिकं तदेवमुक्तमुत्तरप्रकृतीनामुत्कृष्टपदे प्रदेशाल्पबहुत्वं १९८
संप्रति जघन्यपदे तदभिधीयते तत्र सर्वस्तोकं जघन्यपदे प्रदेशाग्रं केवलज्ञानावरणस्य ततो मनःपर्यायज्ञानावरण
स्यानंतगुणं ततोऽवधिज्ञानावरणस्य विशेषाधिकं ततः श्रुतज्ञानावरणस्य विशेषाधिकं ततो मतिज्ञानावरणस्य

विशेषाधिकं तथा दर्शनावरणस्य विशेषा सर्वस्तोकं जघन्यपदे प्रदेशाग्रं निद्रायास्ततः प्रचलाया विशेषाधिकं ततो निद्रानिद्रा निद्रा
या विशेषाधिकं ततः प्रचलाप्रचलाया विशेषाधिकं ततः स्त्यानर्द्धे विशेषाधिकं ततः केवलदर्शनावरणस्य विशेषाधिकं त
तोऽवधिदर्शनावरणस्यानंतगुणं ततोऽचक्षुर्दर्शनावरणस्य विशेषाधिकं ततः चक्षुर्दर्शनावरणस्य विशेषाधिकं तथा
मोहनीये सर्वस्तोकं जघन्यपदे प्रदेशाग्रमप्रत्याख्यानावरणमानस्य ततोऽप्रत्याख्यानावरणक्रोधस्य विशेषाधिकं तत
ऽप्रत्याख्यानावरणमायाया विशेषाधिकं ततोऽप्रत्याख्यानावरणलोभस्य विशेषाधिकं तत एवमेव प्र[illegible] २०००
त्याख्यानावरणमानक्रोधमायालोभानंतानुबंधिमानक्रोधमायालोभानां यथोत्तरं विशेषाधिकं वक्तव्यं ततो मिथ्या
त्वस्य विशेषाधिकं ततो जुगुप्साया अनंतगुणं ततो भयस्य विशेषाधिकं ततो हास्यशोकयोर्विशेषाधिकं स्वस्थाने
द्वयोरपि परस्परं तुल्यं ततो रत्यरत्योर्विशेषाधिकं स्वस्थाने द्वयोरपि परस्परं तुल्यं ततोऽन्यतरवेदस्य विशेषाधिकं ततः सं
ज्वलनमानक्रोधमायालोभानां यथोत्तरं विशेषाधिकं तथायुषि सर्वस्तोकं जघन्यपदे प्रदेशाग्रं तिर्यङ्मनुष्यायुषोः स्व॰
स्थाने परस्परं तुल्यं ततो देवनारकायुषोरसंख्येयगुणं स्वस्थाने परस्परं तुल्यं तथा नामकर्मणि गतौ जघन्यपदे प्रदे
शाग्रं तिर्यग्गतेः ततो मनुजगतेर्विशेषाधिकं ततो देवगतेरसंख्येयगुणं ततो नरकगतेरसंख्येयगुणं तथा जातौ सर्वस्तो
कं जघन्यपदे प्रदेशाग्रं चतुरिंद्रियत्रींद्रियद्वींद्रियजातिनाम्नां ततः एकेंद्रियजातेर्विशेषाधिकं तथा शरीरनाम्नि सर्वस्तोकमौदा
रिकशरीरनाम्नस्ततस्तैजसशरीरनाम्नो विशेषाधिकं ततः कार्मणशरीरनाम्नो विशेषाधिकं ततो वैक्रियशरीरनाम्नोऽ॰
संख्येयगुणं ततोऽप्याहारकशरीरनाम्नोऽसंख्येयगुणं एवं संघातनाम्नोऽपि वाच्यं अंगोपांगनाम्नि सर्वस्तोकं जघन्यपदे प्रदेशा
ग्रमौदारिकांगोपांगनाम्नः ततो वैक्रियांगोपांगनाम्नः असंख्येयगुणं ततोऽप्याहारकांगोपांगनाम्नोऽसंख्येयगुणं तथा सर्वस्तो॰
कं जघन्यपदे प्रदेशाग्रं नरकगतिदेवगत्यानुपूर्व्योः स्वस्थाने द्वयोरपि परस्परं तुल्यं ततो मनुजानुपूर्व्या विशेषाधिकं ततस्ति

र्यङ्गतिआनुपूर्वी विशेषाधिकं तथा सर्वस्तोकं त्रसनाम्नस्ततः स्थावरनाम्नो विशेषाधिकं एवं बादरसूक्ष्मयोः पर्याप्तापर्या २
प्तयोः प्रत्येकसाधारणयोश्च शेषाणां तु नामप्रकृतीनामल्पबहुत्वं न विद्यते तथा सातासातवेदनीययोरुच्चैर्गोत्रनीचैर्गोत्र
योरपि त्रेतरायेषु नयेष्वोत्कृष्टपदे तथैवावगंतव्यमिति प्रतिपादितं मूलोत्तरप्रकृतीनां सामान्यस्वरूपं संप्रति सागणबद्धदलिकं
प्रस्तुततरं गुणश्रेणिरचनये बंधउदयत्यतो गुणश्रेणिस्वरूपप्रतिपादनार्थमाह ॥ ८१ ॥ ब० सम्मदरसव्वविरईअउ अण
विसंजोअदंसखवगे अ प मोहसमसंत खवगे य खीणसजोगि इअर गुणसेढी ॥ ८२ ॥ व्या० गुणश्रेणय एक
दशसंख्या भवंतीति संबंधः कुत्र कुत्रेत्याह सम्मदर सव्वविरई इत्यादि तत्र सम्मंति सम्यक्त्वं सम्यग्दर्शनं तल्लाभे एका गुणश्रेणिः
तथा विरतिः शब्दस्य प्रत्येकं संबंधाद्दरविरति देशविरतिस्तल्लाभे द्वितीया गुणश्रेणिः सर्वविरतिसंपूर्णविरतिस्तल्लाभे तृती
या गुणश्रेणिः अण विसंजोय त्ति अनंतानुबंधिविसंयोजनायां चतुर्थी गुणश्रेणिः दंसणखवगे त्ति पदैकदेशे पदसमुदाय
दर्शनाद्दर्शनस्य दर्शनमोहनीयस्य क्षपको दर्शनक्षपकस्तत्र तद्विषया पंचमी गुणश्रेणिः चशब्दः समुच्चये मोहसमत्ति मोह
स्य मोहनीयस्य शमः शमकः स चोपशमश्रेण्यारूढोऽनिवृत्तिबादरः सूक्ष्मसंपरायश्चाभिधीयते तत्र मोहशमे षष्ठी गुणश्रे
णिः संतत्ति शांतः उपशांतमोहगुणस्थानकवर्ती तत्र सप्तमी गुणश्रेणिः खवगि त्ति क्षपकः क्षपकश्रेण्यारूढोऽनिवृत्तिबादर
सूक्ष्मसंपरायश्चाभिधीयते तत्र क्षपकेऽष्टमी गुणश्रेणिः खीणत्ति क्षीणे क्षीणमोहस्य नवमी गुणश्रेणिः सयोगि त्ति सयोगिके
वलिनो दशमी गुणश्रेणिः इयरत्ति अयोगिकेवलिन एकादशी गुणश्रेणिरिति गाथाक्षरार्थः भावार्थः पुनरयं सम्यक्त्वलाभकाले १८९
मंदविशुद्धिकत्वाज्जीवो दीर्घांतर्मुहूर्तवेद्यामल्पतरप्रदेशाग्रां च गुणश्रेणिमारचयति ततो देशविरतिलाभे संख्येयगुणही-
नांतर्मुहूर्तवेद्यामसंख्येयगुणप्रदेशाग्रां च तां करोति ततः सर्वविरतिलाभे संख्येयगुणहीनांतर्मुहूर्तवेद्यामसंख्येय-
गुणप्रदेशाग्रां च तां करोति ततोऽप्यनंतानुबंधिविसंयोजनायां संख्येयगुणहीनांतर्मुहूर्तवेद्यामसंख्येयगुणप्रदेशाग्रां

च तां विदधाति ततो दर्शनमोहनीयक्षपकः संख्येयगुणहीनांतर्मुहूर्तवेद्यामसंख्येयगुणप्रदेशाग्रां च तां निर्मापयति त
तोऽपि मोहशमकः संख्येयगुणहीनांतर्मुहूर्तवेद्यामसंख्येयगुणप्रदेशाग्रां च तां विरचयति ततोऽप्युपशांतमोहगुणस्थानक
वर्ती संख्येयगुणहीनांतर्मुहूर्तवेद्यामसंख्येयगुणप्रदेशाग्रां च तां विरचयति ततोऽपि क्षपकः संख्येयगुणहीनांतर्मुहूर्तवेद्या
मसंख्येयगुणप्रदेशाग्रां च तां विरचयति ततोऽपि क्षीणमोहः संख्येयगुणहीनांतर्मुहूर्तवेद्यामसंख्येयगुणप्रदेशाग्रां च तां कु
रुते ततोऽपि सयोगिकेवली भगवान् संख्येयगुणहीनांतर्मुहूर्तवेद्यामसंख्येयगुणप्रदेशाग्रां च तां विधत्ते ततोऽप्ययोगिकेव
ली परमविशुद्धिपरिकलितः संख्येयगुणहीनांतर्मुहूर्तवेद्यामसंख्येयगुणप्रदेशाग्रां च तां परिकल्पयति तदेवं यथा यथोत्त
ति विशुद्धिः तथा तथा स्तोकस्तोककालबहुबहुप्रदेशाग्रत्वं गुणश्रेणेर्भवतीति निरूपिता गुणश्रेणिरेकादशधा संप्रत्यस्या एव स्वरूपं स्व
प्रदर्शितं सम्यक्त्वादिगुणोत्कृष्टं चांतरं नामध्येय स्पष्टं तो र्याय गुणदलिकनिर्जरां तां च प्ररूपयन्नाह ॥ ८२ ॥ ब० गुणसेढ १.
दलरयणाणुसमयमुदयादसंखगुणणाए एयगु ण पुण कमसो असंखगुणनिज्जरा जीवा ॥ ८३ ॥ व्या० गुणेन गुण
कारेण श्रेणिर्गुणश्रेणिः श्रेणिशब्दवाच्यमाह दलर यण त्ति दलस्योपरितनस्थितेरवतारितप्रदेशाग्रस्य रचना संन्यासे
दलरचना कथं पुनर्दलिकरचना कस्माच्चारसकेनच गुणकारेण विधीयते इत्यत्रेत्याह अनुसमयं समयमनुलक्षीकृत्य प्रति
समयमित्यर्थः उदयादुदयक्षणादारभ्यासंख्यगुणनयाऽसंख्यातगुणकारेण इदमुक्तं भवति उपरितनस्थितेरवतारितं दलि
कमुदयक्षणे स्तोकं ततो विरचयति द्वितीयक्षणेऽसंख्यातगुणं तृतीयक्षणेऽसंख्यातगुणमित्येवं प्रतिसमयमसंख्यातगु
णकारेण दलरचना तावन्नेया यावद्गुणश्रेणिमेकमिति तथोपरितनस्थितेर्दलिकावतारणस्याप्ययमेव न्यायो वाच्यः यथा गु
णश्रेणिन्यस्य योग्यमुपरितनस्थितेः प्रथमसमये स्तोकं गृह्णाति द्वितीयसमयेऽसंख्यातगुणमित्येवं प्रतिसमयमसंख्यातगु
णकारेण तावन्नेयं यावच्चरमसमय इति उक्तं च उवरिल्लठिईहिंतो घित्तूणं पुग्गले उ सो खिवइ उदयसमयंमि थोवे तत्तो

यअसंखेज्जगुणिए उ बीइंमि विवइ समए तईए तत्तो असंखगुणिए उ एवं समए समए अंतमुहुत्तं जाउन्ने २ दलियं उगिरइमाणो पढ
मेसमयंमि थोवयं गिरइ उवरिल्लठिईहिंतो बीयंमि असंखगुणियं उगिरइ इसमए दलियं तइए समए असंखगुणियं उ एवं समए
समए जाव चरिमो अंतसमउत्ति ४ तथेदाशर्वकरणनिष्पन्निकरणाभ्यां विशेषाधिकोऽन्तर्मुहूर्त्तप्रमाणो गुणश्रेणेः कालो भवति ता
वंतं च कालं दलिकविरचितं करोति तथाऽधस्तनाधस्तनोदयक्षणे वेदनतः क्षीणे सति शेषक्षणेषु दलिकं विरचयति न पुनरुप
रिगुणश्रेणिं वर्द्धयति उक्तं च सेढी एकालमाणं दुण्हं करणाण समहियं जाण खिज्जइ सा उदएणं उसेसे तंमि निक्खेवो सम्यक्त्व
श्रेणेरयं क्रमः शेषाणामपि श्रेणीनां दलरचनायां प्राय एष एव विधिः किंचिद्विशेषोऽपि चास्ति केवलं स कर्मप्रकृत्यादिग्रंथांतराद्
वसेयो नेह प्रतन्यते ग्रंथगौरवभयात् अधुनाऽयं गुणश्रेणीदशकाजीवानां यावती निर्ज्जरा तामाह एते प्रागुपदर्शिताः सम्यक्त्वदेश
विरतिसर्वविरत्यादयो गुणा धर्म्मा येषां ते एतद्गुणा जीवा इत्युत्तरेण संबंधः कथमित्याह पुनरिति पुनरत्र अष्टो गुणश्रेणिस्वरूपपेक्ष
या व्यतिरेकार्थः क्रमशोऽयथोत्तरं क्रमेण असंख्यातगुणिता निर्ज्जरा कर्मपरिशाटरूपा येषां तेऽसंख्येयगुणनिर्ज्जरा जी
वाः सत्तास्वेंतीति शेषः तत्र सम्यक्त्वगुणा जीवास्तोकपुद्गलनिर्ज्जरकास्ततो देशविरता असंख्येयगुणनिर्ज्जराः ततः सर्व
विरता असंख्येयगुणनिर्ज्जराः ततोऽनंतानुबंधिविसंयोजनीया असंख्येयगुणनिर्ज्जराः ततो दर्शनक्षपका असंख्ये
यगुणनिर्ज्जरा ततो मोहशमका असंख्येयगुणनिर्ज्जराः ततः उपशांतमोहा असंख्येयगुणनिर्ज्जराः ततः क्षपका असं
ख्येयगुणनिर्ज्जराः ततः क्षीणमोहा असंख्येयगुणनिर्ज्जराः ततः सयोगिकेवलिनोऽसंख्येयगुणनिर्ज्जराः ततोऽयोगि
केवलिनोऽसंख्येयगुणनिर्ज्जराः इहोत्तरगुणारूढानां जंतूनामसंख्येयगुणनिर्ज्जरा तावदुक्ता उत्तरोत्तरगुणा अध्यव 200
सायक्रमम विशुध्यपकर्षविशुद्धिप्रकर्षस्वरूपाः संतो गुणस्थानकान्युच्यंते अथ तेषां गुणस्थानकानां जघन्यमुत्कृष्टं चां
तरकालं प्रतिपादयन्नाह ॥ ८३ ॥ पलियासंखंसमुहू २ सासणइयरगुण अंतरं हस्सं पगुरु मिच्छि बे छसठी इयरगुणेसु

पुग्गलद्धंतो ॥ ८४ ॥ इह सामासत्पत्तामेतिन्यायात् पल्योपमासंख्यांशोऽन्तर्मुहूर्त्तं च जघन्यमंतरमिति योः ॥ केषामित्याह
सास्वादनश्चेतरगुणाश्चावशिष्टगुणस्थानकानि सास्वादनेतरगुणास्तेषां प्राकृतत्वात् अत्र विभक्तिलोपः अंतरंवि
वक्षितगुणस्थानावस्थितेः च्युतानां पुनस्तत्प्राप्तेर्व्यवधानमंतरालमिति यावत् कस्यं जघन्यं तत्र सास्वादनगुणस्थानकस्य
जघन्यमंतरं पल्योपमासंख्येयभागः इतरगुणस्थानकानां तु जघन्यमंतर्मुहूर्त्तं इत्यक्षरार्थः भावार्थः पुनरयं योऽनादिमिथ्या
दृष्टिः कृपलितसम्यक्त्वमिश्रपुंजो यो वा मिथ्यादृष्टिः षड्विंशतिसत्कर्म्मा सिद्धांतरकरणादिना प्रकारेण प्रथमोपशमिकसम्यक्त्वो
ऽनंतानुबंध्युदयात्सास्वादनभावमासाद्य मिथ्यात्वंगतः सन् यदि तादृक्सास्वादनत्वं पुनर्लभते अंतरकरणप्रकारेणैव त
दा जघन्यतोऽपि पल्योपमासंख्येयभागेऽर्द्धलभते नार्वाक् किं कारणमिति चेदुच्यते यतः सास्वादनात् मिथ्यात्वं गतस्य प्रथम
समये सम्यक्त्वमिश्रपुंजो सत्तायामवश्यं तिष्ठतः एवं च तयोः सत्तायां वर्त्तमानयोः पुनरौपशमिकसम्यक्त्वं लभते तदभावात्
सास्वादनत्वं दूरापास्तमेव यदि पुंजद्वये सद्भावेऽपि औपशमिकसम्यक्त्वस्य न लाभस्तर्हि पल्योपमासंख्येयभागे प्रतिक्रांते कथं सा
स्वादनलाभ इति चेदुच्यते इह सम्यक्त्वमिश्रपुंजो मिथ्यात्वंगतः प्रतिसमयमुद्वर्त्तयति तद्दलिकं प्रतिसमयं मिथ्यात्वे प्रक्षि
पतीत्यर्थः अनेन च क्रमेणैतावुद्वर्त्यमानो पल्योपमासंख्येयभागेन सर्वथोद्वर्त्तितो निःसत्ताकं नीतो भवतश्च एवं कर्म्मप्रकृत्या
दिष्वभिहितत्वात्ततः पल्योपमासंख्येयभागेन मिश्रसम्यक्त्वपुंजयोरुद्वर्त्तितयोः सदंते कश्चिज्जंतुः पुनरप्यौपशमिकसम्यक्त्व
मासाद्य सास्वादनत्वं गच्छतीत्येवं सास्वादनस्य पल्योपमासंख्येयभागो अंतरं भवतीति न त्वेकदोपशमश्रेणेः प्रतिपतितः सा
स्वादनभावमनुभूय यदा पुनरप्यंतर्मुहूर्त्तेनैनतामेवोपशमश्रेणिं प्रतिपद्य ततः प्रतिपतितस्सास्वादनभावं लभते तदा जघ
न्यतोऽल्पमेवांतरं लभ्यते तत्किंमिति पल्योपमासंख्येयभागो जघन्यमंतरमित्युक्तं सत्यं उपशमश्रेणेः प्रतिपतितो यः सास्वा
दनत्वं गच्छति स केवलमनुष्यगतिभावे तेनाल्पत्वान्नेह विवक्षितश्चेतरस्यैव प्रभूततरस्य चतुर्गतिवर्त्तित्वादंतरालं चिंतितमिति इ

तरगुणस्थानकेष्व मिथ्यादृष्टिसम्यग् मिथ्यादृष्ट्यविरतसम्यग्दृष्टिदेशविरतिप्रमत्ताप्रमत्तोपशमश्रेणिगतापूर्वकरणानि
वृत्तिबादरसूक्ष्मसंपरायोपशान्तमोहलक्षणेभ्यः परिभ्रष्टः पुनर्जघन्यतोऽन्तर्मुहूर्तेऽतिक्रान्ते तान्येव गुणस्थानकानि लभते
इति तेषां जघन्यतोऽन्तर्मुहूर्तमन्तरालं भवति तथाहि कश्चिज्जीव उपशमश्रेण्यारूढः सन्नुपशान्तत्वमपि संप्राप्य प्रतिप
ततो मिथ्यादृष्टित्वं यावदवाप्नोति ततोऽप्यन्तर्मुहूर्तेन तान्येवोपशान्तगुणस्थानान्तानि यदारोहति तदा चत्वारिषाणां सा
स्वादनमिश्रगुणस्थानकवर्जितानां गुणस्थानकानां प्रत्येकं जघन्यतोऽन्तर्मुहूर्तिकमन्तरं भवति एकस्मिन् भवे वारद्व
यमुपशमश्रेणिकरणं सम्भवति इत्युक्तं च एगभवे दुक्खुत्तो चरित्तमोहं उवसमिज्जा तत्र सास्वादनं प्रति जघन्यान्तरस्योक्तत्व
रत् श्रेणिप्रतिपतितस्य च मिश्रगमनाभावात्तयोर्वर्जनमुक्तं श्रेणिगमनाभावे च मिश्रसास्वादनवर्जानां षड्गुणस्थानकानां
च मिथ्यादृष्ट्यादीनामप्रमत्तान्तानां परावृत्त्यागमनतोऽन्तर्मुहूर्तिकमन्तरं प्राप्यते क्षपकक्षीणमोहसयोगिकेवल्ययोगिके
वलिनां त्वन्तरचिन्तैव नास्ति तेषां प्रतिपातस्यैवाभावादिति उक्तं जघन्यमन्तरं सर्वगुणस्थानकानाम् इदानीमुत्कृष्टमन्तरमा
ह गुरु मिच्छि वे छसठी इत्यादि गुरु उत्कृष्टमन्तरं मिच्छत्ति मिथ्यात्वे मिथ्यादृष्टिगुणस्थानकस्य द्वे षट्षष्टी षट्षष्टिद्वयं अयम
त्र भावार्थः यः कश्चिज्जन्तुर्विशुद्धिवशान्मिथ्यादृष्टित्वं परित्यज्य सम्यक्त्वं प्रतिपन्नः ततः सागरोपमषट्षष्टिप्रमाणमुत्
कृष्टं सम्यक्त्वकालं प्रतिपाल्यान्तर्मुहूर्तमात्रं सम्यग्मिथ्यात्वं गच्छति ततोऽप्यपि सम्यक्त्वमासाद्य सागरोपमषट्षष्टिं या
वदनुपाल्य तत ऊर्ध्वं यो न सिध्यति सोऽवश्यं मिथ्यात्वं गच्छति तत इदं सागरोपमषट्षष्टिद्वयरूपं सामर्थ्यतो मिश्रान्तर्मुहूर्त २०१
न्तरत्वाधिकमुत्कृष्टं मिथ्यात्वस्यान्तरालं भवतीति इयरगुणे त्ति इतरगुणस्थानकविषये कोऽर्थः मिथ्यादृष्टिगुणस्थानक
रहितेष्वन्यगुणस्थानकेषु सास्वादनादिषूपशान्तमोहान्तेषूत्कृष्टोऽन्तरालकालो भवति किं यदित्याह पुग्गल
लद्धंतत्ति सूत्रकत्वात् अत्र पुद्गलस्य पुद्गलपरावर्तस्यार्द्धं पुद्गलपरावर्तार्धं तस्यान्तर्मध्यं पुद्गलपरावर्तार्धान्तः किंचिन्नं पु

द्गलपरावर्तार्धमित्यर्थः इदमत्र तात्पर्यं सास्वादनादय उपशमश्रेणिगतापूर्वकरणाद्युपशान्तमोहान्ताश्च जीवा निजगुणस्था
नकावस्थितेर्यदा परिभ्रष्टास्तदोत्कृष्टतः किंचिन्न्यूनं पुद्गलपरावर्तार्धं यावदपारसंसारपारावारमध्यमवगाह्य पुनस्तानि गुण
स्थानकानि लभन्ते नार्वाक् तत ऊर्ध्वं च सम्यक्त्वादिगुणान् संप्राप्यावश्यं जीवाः सिध्यन्तीति ततो देशोनार्धपुद्गलपरावर्तमान
मेषामुत्कृष्टमन्तरं भवति क्षपकक्षीणमोहादीनां चान्तरमेव नास्ति प्रतिपातिताभावादिति इह सास्वादनस्य जघन्यमन्तरं पल्योपमा
संख्येयांश उक्तमतः पल्योपमस्वरूपं स्वयमेव प्रचिकटयिषुराह ८४ उद्धार१ अद्ध२ खित्तं३ [illegible]ते
स्सूक्ष्मे पलिय ति हा समय१ वाससय२ समए३ केसवहारो दीवो दहि आउ२ तसाइ३ परिमाणं ८५ व्या० धान्यपल्य
वत् पल्यं पल्योपमं त्रिधा त्रिप्रकारं भवति सिलोपः प्राकृतत्वात् तथाहि उद्धारपल्योपमं अद्धापल्योपमं क्षेत्रपल्योपमं च तत्र बाल १
ग्राणां तत्खण्डानां वा प्रतिसमयमुद्धरणमुद्धारस्तद्विषयं तत्प्रधानं वा पल्योपममुद्धारपल्योपमं १ अद्धा कालः स च प्रस्तावा
द्बालाग्राणां तत्खण्डानां वापहारे प्रत्येकं वर्षशतलक्षणं तत्प्रधानं पल्योपममद्धापल्योपमं २ क्षेत्रमाकाशप्रदेशरूपं तत्प्रधानं
पल्योपमं क्षेत्रपल्योपमं चेति समयवाससय समए केसवहारोत्ति तत्रोद्धारपल्योपमे केशानां बालाग्राणां समये समये अपह
रणमुद्धरणं क्रियते अद्धापल्योपमे वर्षशते केशापहारः क्रियते क्षेत्रपल्योपमे समये २ केशापहारः केशस्पृष्टास्पृष्टाकाशप्र
देशापहारः क्रियते तत्र दीवोदहि आउतसाइपरिमाणंति तत्रोद्धारपल्योपमेन प्रयोजनं द्वीपोदधिप्रमाणं द्वीपा उदधयश्चानेन प्र
मीयन्ते तथा अद्धापल्योपमेन प्रयोजनमायुःपरिमाणं देवानां नारकतिर्यङ्मनुष्याणामायूंषि अनेन मीयन्त इत्यर्थः क्षेत्रपल्योपमेन प्रयो
जनं त्रसादिपरिमाणं आदिशब्दात्पृथिवीकायिकाप्कायिकतेजस्कायिकवायुकायिकवनस्पतिकायिकानां परिमाणं प्रो
च्यते उक्तं च एएणं खित्तसागरोवमाणेणं हविज्ज नायव्वं पुढविदगअगणिमारुयहरियतसाणं च परिमाणं इति गाथाक्षरा
र्थः भावार्थः पुनरयं इह त्रिविधं पल्योपमं उद्धारपल्योपमं अद्धापल्योपमं क्षेत्रपल्योपमं पुनरेकैकं द्विधा बादरं सूक्ष्मं च त

आयामविस्ताराभ्यामवगाढेन चोत्सेधांगुलनिष्पन्नैकयोजनप्रमाणो वृत्तत्वाच्च परिधिना किंचिदूनषड्भागाधिकयोजन
त्रयमानः पल्यो मुंडिते शिरसि एकेनाह्ना द्वाभ्यामहोभ्यां यावदुत्कर्षतः सप्तभिरहोभिः प्ररूढानि यानि वालाग्राणि तैः प्रचयवि
शेषान्निबिडतरमाकर्णं भ्रियते वालाग्राणि च नाग्निर्दहति वायुर्नापहरति जलं न कोथयति ततः समये समये एकैक
वालाग्रापहारेण यावता कालेन स पल्यः सकलोऽपि सर्वात्मना निर्लेपो भवति तावान् कालः संख्येयसमयमानो बादरमुद्धार
पल्योपमं एतेषां च दशकोट्याकोट्यो बादरमुद्धारसागरोपमं महत्त्वात्सागरेण समुद्रेणोपमा यस्येति कृत्वा बादरे च प्ररूपिते सूक्ष्मं
सुखावसेयं स्यादिति बादरोद्धारपल्योपमसागरोपमयोः प्ररूपणं न पुनरेतत्प्ररूपणेऽन्यत्किंचित्फलमस्तीति एवं बादरे अद्धा
क्षेत्रपल्योपमसागरोपमेष्वपि वक्तव्यं यदुक्तमनुयोगद्वारेषु तत्थ णं जे से ववहारिए उद्धारपलिओवमे से णं इमे से जहानामए
पल्ले सिया जोयणं आयामविक्खंभेणं जोयणं उड्ढं उच्चत्तेणं तिगुणं सविसेसं परिरएणं से णं पल्ले एगाहिय बेयाहिय तेयाहिय उक्को
ससत्तरत्ताणं संमट्ठे संनिचिए भरिए वालग्गकोडीणं ते णं वालग्गा नो अग्गी डहिज्जा नो वाऊ हरिज्जा नो कुच्छिज्जा नो विद्धं
सिज्जा नो पूइत्ताए हव्वमागच्छिज्जा तओ णं समए समए एगमेगं वालग्गं अवहाय जावइएणं कालेणं से पल्ले खीणे नीरए नि
ल्लेवे निट्ठिए भवइ सेत्तं ववहारिए उद्धारपलिओवमे एएसिं पल्लाणं कोडाकोडी हविज्ज दसगुणिया उद्धारसागरस्स एगस्स भ
वे परीमाणं एएहिं ववहारिएहिं उद्धारपलिओवमसागरोवमेहिं किं पओयणं नत्थि किंचि पओयणं केवलं पन्नवणट्ठा पन्नविज्जंति उक्तं बाद
रमुद्धारपल्योपममधुना सूक्ष्ममुच्यते तत्रैकैकं वालाग्रमसंख्येयानि खंडानि कृत्वा पूर्ववत्पल्यो भ्रियते तानि च खंडानि द्रव्य
तः प्रत्येकमत्यन्तविशुद्धलोचनच्छद्मस्थो यदतीवसूक्ष्मं पुद्गलद्रव्यं चक्षुषा न पश्यति तदसंख्येयभागमात्राणि क्षेत्रतस्तु सू २०२
क्ष्मपनकशरीरं यावति क्षेत्रेऽवगाहते ततोऽसंख्येयगुणानि बादरपर्याप्तपृथिवीकायिकशरीरं यावति क्षेत्रेऽवगाहते ततोऽ
संख्येयगुणानि बादरपर्याप्तपृथिवीकायिकशरीरतुल्यानीति वृद्धाः एषां च वालाग्राणामसंख्येयत्वात्प्रतिसमयमुद्धारे

किलासंख्येया वर्षकोट्यो इति कालमानं ततः संख्येयवर्षकोटिमानमिदं सूक्ष्ममुद्धारपल्योपममवसेयं तद्दशकोटीकोट्यः
सूक्ष्मोद्धारसागरोपमं आभ्यां पल्योपमाभ्यां द्वीपाः समुद्राश्च मीयन्ते उक्तं चानुयोगद्वारेषु एएहिं सुहुमउद्धारपलिओवमसागरोवमे
हिं किं पओयणं एएहिं दीवसमुद्दाणं उद्धारो घिप्पइ केवइया णं भंते दीवसमुद्दा उद्धारेणं पन्नत्ता गोयमा जावइया णं अड्ढाइज्जा
णं उद्धारसागरोवमाणं उद्धारसमया एवइया दुगुणा दुगुणप्पवित्थरा दीवोदहि त्ति एवं द्विधा अप्युक्तं बादरसूक्ष्मभेदतो द्वि
धमुद्धारपल्योपमं २ संप्रति द्विविधमेवाद्धापल्योपमं प्ररूप्यते तत्र पूर्वोक्तपल्याद्वर्षशतेऽतिक्रान्ते एकैकवालाग्राप
हारेण निर्लेपनाकालसंख्येयवर्षकोटीमानो बादरमद्धापल्योपमं तद्दशकोटीकोट्यो बादरमद्धासागरोपमं तथैव पूर्वोक्त
पल्याद्वर्षशतेऽतिक्रान्ते एकैकवालाग्रासंख्येयतमखंडापहारेण निर्लेपनाकालोऽसंख्यातवर्षकोटीमानः सूक्ष्ममद्धाप
ल्योपमं तद्दशकोटीकोट्यः सूक्ष्ममद्धासागरोपमं दशसागरोपमकोटीकोटीप्रमाण अवसर्पिणी तावत्प्रमाणैवोत्सर्पिणी
एषापि अवसर्पिण्युत्सर्पिण्योऽनंताः पुद्गलपरावर्तोऽनंताः पुद्गलपरावर्ता अतीताद्धाऽनंतपुद्गलपरावर्ता अनागताद्धा चेति
उक्तं च श्रीभगवतीटीकायां अद्धावष्टंभकालेन सव्वद्धाए दोऽद्धा छिन्नी कंतीयणागयातं अद्धा तदो विउत्ताउ "अयम
त्राभिप्रायो यथा अनागताद्धायाः प्रतीतो नास्ति एवमतीताद्धाया आदिरिति तिमकं समत्वमिति अनेत्वाकृः उस्सप्पिणीओ अणंत १"
पुग्गलपरियट्टउ मुणेयव्वो तेणंताऽतीयद्धा अणागयद्धा अणंतगुणा १ अत्रेयं भावना अतीताद्धातोऽनागताद्धाया अ
नंतगुणत्वं समयावलिकादिभिः अनवरतं क्षीयमाणाया अप्यनागताद्धाया अक्षयात् आभ्यां च सूक्ष्माद्धापल्योपमसाग
रोपमाभ्यां सुरनारकनरतिरश्चां कर्मस्थितिः कायस्थितिर्भवस्थितिश्च मीयन्ते उक्तं च अनुयोगद्वारेसु एएहिं सुहुमअ
द्धापलिओवमसागरोवमेहिं किं पओयणं गोयमा एएहिं नेरइयतिरिक्खजोणियमणुस्सदेवाण आउयाइं मविज्जंति इत्य
तिरिति बादरसूक्ष्मभेदतो द्विविधमप्यद्धापल्योपमं २ संप्रति द्विविधमेव क्षेत्रपल्योपमं निरूप्यते तत्र पूर्वोक्तपल्यात् वालाग्रस्य

एनभःप्रदेशानां प्रतिसमयमेकैकापहारेण निर्लेपनाकालोऽसंख्येयोत्सर्पिण्यवसर्पिणीमानो बादरक्षेत्रपल्योपमं तद्दश
कोटीकोट्यो बादरं क्षेत्रसागरोपमं तथैव एकैकवालाग्रासंख्येयतमखंडैः स्पृष्टानामस्पृष्टानां च नभःप्रदेशानां प्रतिस
मयमेकैकापहारेण निर्लेपनाकालो बादरासंख्येयगुणकालमानः सूक्ष्मक्षेत्रपल्योपमं तद्दशकोटीकोट्यः सूक्ष्मं क्षेत्रसा
गरोपमं उक्तं चानुयोगद्वारेषु से किं तं सुहुमे खित्तपलिओवमे से जहा नामए पल्ले सिया एगं जोयणं आयामविक्खंभेणं जो
यणं उड्ढं उच्चत्तेणं जाव भरिए वालग्गकोडीणं तत्थ णं एगमेगे वालग्गे असंखिज्जाइं खंडाइं कज्जइ ते णं वालग्गा दिट्ठीओगाहणा
उ असंखिज्जइभागमित्ता सुहुमस्स पणगजीवस्स सरीरोगाहणाउ असंखिज्जगुणा ते णं वालग्गा नो अग्गी डहिज्जा नो वा
उ हरिज्जा जाव नो पूइत्ताए हव्वमागच्छिज्जा जे णं तस्स आगासपएसा तेहिं वालग्गेहिं अप्फुन्ना वा अणप्फुन्ना वा तओ णं समए २ एगमेगं आग
सपएसं अवहाय जावइएणं कालेणं से पल्ले खीणे जाव निट्ठिए भवइ से त्तं सुहुमे खेत्तपलिओवमे तत्थ णं चोयए पन्नवगं एवं वयासी अत्थि
णं तस्स पल्लस्स आगासपएसा जे णं तेहिं वालग्गेहिं अणप्फुन्ना हंता अत्थि जहा को दिट्ठंतो से जहा नामए कोट्ठए सिया कूहंड
णं भरिए तत्थ णं माउलिंगा पक्खित्ता ते वि माया तत्थ णं बिल्ला पक्खित्ता ते वि माया तत्थ णं आमलगा पक्खित्ता ते वि माया तत्थ णं बाय
रा पक्खित्ता ते वि माया तत्थ णं चणगा पक्खित्ता ते वि माया तत्थ णं मुग्गा पक्खित्ता ते वि माया तत्थ णं सरिसवा पक्खित्ता ते वि
माया तत्थ णं गंगावालुया पक्खित्ता ते वि माया एवमेव अत्थि णं तस्स पल्लस्स आगासपएसा जे णं तेहिं वालग्गेहिं अणप्फुन्न
त्ति एतासां च सूक्ष्मक्षेत्रपल्योपमसागरोपमानां प्रायो दृष्टिवादे द्रव्यप्रमाणप्ररूपणायां प्रयोजनं स च व्यवच्छिन्नोऽत्र यदाग
मः एएहिं सुहुमखित्तपलिओवमसागरोवमेहिं किं पओयणं एएहिं सुहुमखित्तपलिओवमसागरोवमेहिं दिट्ठिवाए २०२
दव्वाइं मविज्जंति आह यदि स्पृष्टा अस्पृष्टाश्च सूक्ष्मक्षेत्रपल्योपमे नभःप्रदेशा गृह्यंते तर्हि वालाग्रैः किं प्रयोजनं
यस्मात् पल्यान्तर्गतनभःप्रदेशापहारमात्रतः सा मानैव वक्तुमुचितं स्यात् सत्यं किंतु सूक्ष्मक्षेत्रपल्योपमेन दृष्टिवादे द्र

व्याणि मीयंते तानि च कानिचिद्यथोक्तबालाग्रस्पृष्टैरेव नभःप्रदेशैर्मीयंते कानिचिदस्पृष्टैरित्यतो दृष्टिवादोक्तद्रव्यमानो
पयोगित्वाद्बालाग्रप्ररूपणा अत्र प्रयोजनवतीति व्याख्यातं बादरसूक्ष्मभेदतो द्विविधमपि क्षेत्रपल्योपमं तद्व्याख्यानेन च स
मर्थितं सप्रपंचं पल्योपमसागरोपमस्वरूपमिदानीं किंचिद्विवृतं पुद्गलपरावर्त्तादि सास्वादनादीनामुत्कृष्टमंतरमुक्तमतस्त
मेव सप्रपंचं पुद्गलपरावर्त्तं गाथात्रयेण निरूपयितुकामः प्रथमं तावत्तस्यैव भेदान् परिमाणं चाह ८५ व्या० दव्वे खित्ते काले
भावे चउह दुह बायरो सुहुमो होइ अणंतुस्सप्पिणिपरिमाणो पुग्गलपरिट्टो ८६ व्या० द्रव्ये द्रव्यविषयः क्षेत्रे क्षे
त्रविषयः काले कालविषयः भावे भावविषयः इत्येवं चतुर्धा चतूरूपः पुद्गलपरावर्त्तो भवतीत्यध्याहारेण संटंकः पुनरेकैको द्रव्या
दिको द्विविधो द्विप्रकारो भवति द्वैविध्यमेवाह बायरो सुहुमोत्ति बादरसूक्ष्मभेदभिन्नः अयमर्थः द्रव्यपुद्गलपरावर्त्तो द्वि
विधः बादरः सूक्ष्मश्च भावपुद्गलपरावर्त्तो द्विधा बादरः सूक्ष्मश्च कियत्कालप्रमाणः पुनरयमेकैक इत्याह होइ अणं
उस्सप्पिणिपरिमाणो भवति जायते उत्सर्पंति प्रतिसमयं कालप्रमाणं ज्ञानं वा शरीरायुःप्रमाणादिकमपेक्ष्य वृद्धिमनु
भवंतीत्युत्सर्पिण्यः ततोऽनंतानामुत्सर्पिणीनामुपलक्षणत्वादवसर्पंति प्रतिसमयं कालप्रमाणं ज्ञानं वा शरीरायुःप्रमा
णादिकमपेक्ष्य हानिमनुभवंतीत्यवसर्पिण्यस्तासां च परिमाणं यस्य सोऽनंतोत्सर्पिण्यवसर्पिणीपरिमाणः पूरणगलनध
र्माणः पुद्गलास्तेषां पुद्गलानां चतुर्दशरज्ज्वात्मकलोकवर्त्तिसमस्तपरमाणूनां परावर्त्तः औदारिकादिशरीरतया गृहीत्व
३० मोचनं यस्मिन् कालविशेषे स पुद्गलपरावर्त्तः यद्यपि क्षेत्रादिविषयस्य पुद्गलपरावर्त्तस्य स्वरूपेऽन्वर्थो न घटां प्रांचति
तथाप्यन्यथाप्युत्पादितस्य पदस्य प्रसिद्धवशात् रूढितः अन्यत्र प्रवर्त्तमानत्वदर्शनात्समयप्रसिद्धमर्थं विषयीकरोतीति न कश्चिद्दोष इ
ति द्रव्यपुद्गलपरावर्त्तो बादरः सूक्ष्मश्च भवतीत्युक्तमतः क्रमप्राप्तं बादरसूक्ष्मद्रव्यपुद्गलपरावर्त्तस्वरूपं प्ररूपयन्नाह
८६ व्या० उरलाइसत्तगेणं एगजीवो मुयइ फुसिय सव्वअणू जित्तियकालि स थूलो दव्वे सुहुमो सगन्नयरा ८७ व्या०

स्वकत्वात्तत्र सर्वेऽप्यौदारिकादिसप्तकत्वेनौदारिकपरमाणूनौदारिकशरीरतया आदिशब्दाद्वैक्रियपरमाणून्वै-
क्रियशरीरतया तैजसपरमाणून्तैजसशरीरतया कार्मणपरमाणून्कार्मणशरीरतया भाषापरमाणून्भाषात्वेन
प्राणापानपरमाणून्प्राणापानतया मनोवर्गणापरमाणून्मनस्त्वेन न पुनराहारकशरीरमप्यत्रग्राह्यं कादाचित्कत्वा
त्वात्तस्येति स्पृष्टा परिणमय्य तथा परिणामं नीत्वा एकजीवो विवक्षितैकसत्त्वो मुंचति त्यजति सर्वाण्येवं चतुर्दशरज्ज्वात्मक
लोकवर्त्ति समस्तपरमाणून् कियत्कालेनेति यावता कालेन विवक्षितस्य प्राकृतत्वाद्यथादाह पाणिनिः स्वप्राकृतल
क्षणे व्यत्ययोऽप्यासामिति सप्तम्येकवचनलस्पर्शमानेनोपलक्षितः कालविशेषः स्थूलो बादरो द्रव्येति द्रव्यपुद्गलपरावर्त्तो भवतीति
तथा क्रमः सूक्ष्मः किल संसारकान्तारे पर्यटनेकजीवोऽनेकेषु भवग्रहणैः सकललोकवर्त्तिनः सर्वानपि पुद्गलान् यावता का-
लेनऔदारिकशरीरवैक्रियशरीरतैजसशरीरभाषाप्राणापानमनःकार्मणशरीरलक्षणपदार्थैः सप्तकत्वेन यथा
स्वं परिणमय्य मुंचति स तावत्प्रमाणः कालो द्रव्यतो बादरपुद्गलपरावर्त्तो भवतीति तात्पर्यमित्यभिधीयते बादरो द्रव्यपु
द्गलपरावर्त्त इदानीं सूक्ष्मद्रव्यपुद्गलपरावर्त्तो भवति तस्य बोधः कथमित्याह सप्तकान्यतरात् सप्तकान्यतरेण विवक्षि
तस्यैवाप्राकृतत्वात् इदमत्र हृदयं सप्तानामौदारिकवैक्रियतैजसभाषाप्राणापानमनःकार्मणमध्यादन्यतरेणैव पुनरेकेन
केनचिदौदारिकादिना शरीरप्रदर्शितप्रकारेण सकललोकवर्त्तिपुद्गलानां स्पर्शने औदारिकादिशरीरतया ग्रहणेनामो
चनेन सूक्ष्मद्रव्यपुद्गलपरावर्त्तो भवति विवक्षितशेषावशेषैः षड्भिर्देहादिभिः परिणमिता अपि न गृह्यन्ते इति एके त्वाचार्या एवं
द्रव्यपुद्गलपरावर्त्तस्वरूपं प्रतिपादयन्ति तथाहि यदैकजीवोऽनेकेषु भवग्रहणेष्वौदारिकशरीरवैक्रियशरीरतैजसशरी
रकार्मणशरीरचतुष्टयरूपतया यथास्वं सकललोकवर्त्तिनः सर्वान्पुद्गलान्परिणमय्य मुंचति तदा बादरो द्रव्यपुद्ग
लपरावर्त्तो भवति यदा पुनरौदारिकादिचतुष्टयमध्यादेकेन चिदेकेन शरीरेण सर्वपुद्गलान्परिणमय्य मुंचति शेषशरी २०४

रपरिणमितास्तु पुद्गला न गृह्यन्ते तदा सूक्ष्मो द्रव्यपुद्गलपरावर्त्तो भवतीत्युक्तो द्वेधापि द्रव्यपुद्गलपरावर्त्तः संप्रति क्षेत्र
कालभावपुद्गलपरावर्त्तान् बादरसूक्ष्मभेदभिन्नान्निरूपयन्नाह ८७ व्याः लोगपएसोसप्पिणिसमया अणुभागबं
धठाणा य जह तह कममरणेणं । पुट्ठा खित्ताइ थूलइयरा ॥ ८८ ॥ व्या० लोकस्य चतुर्दशरज्ज्वात्मकस्य प्रदेशा निर्वि
भागा भागा लोकप्रदेशाः तथोत्सर्पिणीशब्देनावसर्पिण्युपलक्ष्यते दिनग्रहणे रात्र्युपलक्षणवत् तयोः समयः परमनि
कृष्टः कालविशेषाः उत्सर्पिण्यवसर्पिणीसमयाः समयस्वरूपं च प्रदर्शितकापाटनदृष्टान्तादुत्पलपत्रशतभेदोदा
हरणाच्चावसेयं ततो लोकप्रदेशाश्चोत्सर्पिण्यवसर्पिणीसमयाश्चेति द्वंद्वः तथानुभागस्य रसस्य बंधो बंधनं तस्य निमि
त्तभूतानि स्थानानि कषायोदयविशेषलक्षणान्यनुभागबंधस्थानानि अनुभागबंधहेत्वध्यवसायस्थानानीत्यर्थः
चः समुच्चये ततश्चैते प्रत्येकं त्रयोऽपि पदार्था यदा मरणेनाङ्गस्य प्रत्येकमभिसंबंधो यथा तथा मरणेन क्रमोत्क्रमाभ्यां प्राणपरि
त्यागलक्षणेन स्पृष्टा व्याप्ता भवंति तदा खित्ताइ थूल त्ति क्षेत्रादयः क्षेत्रपुद्गलपरावर्त्तकालपुद्गलपरावर्त्तभावपुद्गलपराव
र्त्ताः स्थूला बादरा भवंति यदा पुनस्तत्र लोकाकाशप्रदेशा उत्सर्पिण्यवसर्पिणीसमया अनुभागबंधाध्यवसाय
स्थानानि चेति प्रत्येकं त्रयोऽपि पदार्थाः क्रममरणेन सर्वस्पृष्टाकाशप्रदेशा निरंतरा व्यवधानतः प्राणपरित्यागलक्षणेन स्पृ
ष्टा भवंति तदा क्षेत्रपुद्गलपरावर्त्तकालपुद्गलपरावर्त्तभावपुद्गलपरावर्त्ता इयरत्ति इतरे सूक्ष्मा भवंत
ीति गाथाक्षरार्थः भावार्थः पुनरयं यदा अनंतभवभ्रमणशीलो जंतुरनंतरेष्वव्यवहितेषु वा अपरापराकाशप्रदेशेषु म्रि
यमाणः सर्वानपि चतुर्दशरज्ज्वात्मकलोकाकाशप्रदेशान् मरणेन स्पृशति तदा बादरः क्षेत्रपुद्गलपरावर्त्तो भवति नवरं येषु
प्रदेशेषु व्यवस्थितेषु सर्वावगाढेषु वन्तः प्रदेशेषु मृतस्तेन गण्यन्ते ऽपूर्वास्तु व्यवहिता अपि स्पृष्टा गण्यन्त एवेति । काले
तस्त्वयदोत्सर्पिण्यवसर्पिणीसमयेषु सर्वेष्वपि क्रमेणोत्क्रमेण वा अनंतानंतैर्भवैरेकोऽपि जंतुर्मृतो भवति तदा बादरपुद्गलकाल

उद्गलपरावर्त्तो भवति केवलं येषु समयेषु कदाचिन्मृतोऽन्यदापि यदा तेष्वेव समयेषु म्रियते तदा ते न गण्यंते यदा पुनरेकद्वितीय
ादिसमयक्रममुल्लंघ्यापि अग्रेतनेषु समयेषु म्रियते तदा ते व्यवहिता अपि समया गण्यंत इति २ भावतः पुद्गलपरावर्त्तो
च्यते अनुभागबंधाध्यवसायस्थानानि मंदानुभावतरादिभेदतोऽसंख्येयानि वर्त्तंते एतेषां चासंख्येयत्वप्रमाणमुत्तरत्र वक्ष्य
ामः ततो यदैकैकस्मिन्ननुभागबंधाध्यवसायस्थाने क्रमेणोत्क्रमेण वा म्रियमाणेन जंतुनाऽसंख्येयलोकाकाशप्रमाणा
न्यपि सर्वाण्यपि तानि स्पृष्टानि भवंति तदा बादरो भावपुद्गलपरावर्त्तो भवति अत्रापि यदध्यवसायस्थानमेकदा मरणेन स्पृ
ष्टं तदेवान्यदापि यदि स्पृशति तदा तन्न गण्यते अपूर्वं तु व्यवहितमपि स्पृष्टं गण्यत एवेति भाविता बादराः क्षेत्रपुद्गलपरा
वर्त्तकालपुद्गलपरावर्त्ताः सांप्रतमेत एव सूक्ष्मा भाव्यंते इह येष्वाकाशप्रदेशेष्ववगाढो जंतुरेकदा मृतस्ततोऽनंतरमव्यवहि
तेष्वेव नभःप्रदेशेष्वन्यदापि यदि म्रियतेऽपरस्यां वेलायां तेषामप्यनंतरमव्यवस्थितेष्वाकाशप्रदेशेष्वन्यवेलायां तेषामप्यनं +स्था+
तरमव्यवस्थितेष्वाकाशप्रदेशेष्वन्यस्यां तु वेलायां तेषामप्यनंतरेष्वन्येष्वेवं तावन्नेयं यावत् दिक्क्रमपरापरेषु नैरंतर्यव्यवस्थितेषु
नभःप्रदेशेषु क्रमेण म्रियमाणो जंतुः सर्वानपि लोकाकाशप्रदेशान् स्पृशति ये चापरप्रदेशा व्यवहिताः पूर्वावगाढा एवम
व्यवस्थिताः आकाशप्रदेशा मरणेन स्पृष्टास्ते न गण्यंते तदा सूक्ष्मः क्षेत्रपुद्गलपरावर्त्त इति पंचसंग्रहशास्त्रेषु सूक्ष्मबा
दरभेदतो द्विविधोऽपि क्षेत्रपुद्गलपरावर्त्त इत्थं व्याख्यातः यथा चतुर्दशरज्ज्वात्मकलोकस्य सर्वप्रदेशेषु एकैकं यावता का
लेनैकजीवो मृतो भवति कोऽर्थो यावंतो लोकाकाशप्रदेशास्तेषु प्रदेशेषु प्रदेशक्रमोत्क्रमाभ्यां मरणं जीवेन यदा सर्वे व्याप्ता
भवंति तदा बादरः क्षेत्रपुद्गलपरावर्त्तः सूक्ष्मस्तु यावता कालेन प्रथमप्रदेशानुबद्धप्रदेशक्रमेण मृतो भवति कोऽर्थो य २०५
त्राकाशप्रदेशेषु मृतस्तदनंतरप्रदेशक्रमेण यदा सर्वेऽपि लोकाकाशप्रदेशा मरणेन व्याप्ता भवंति तदा सो भवतीत्यवहि
तेषु च मरणं न गण्यते यद्यपि जीवस्यैकप्रदेशेऽवस्थानमेव नास्ति तथापि जीवावस्थानप्रदेशानां प्रधानो नैकः परि

कल्प्यते तस्माद्गणनाप्रवृत्तिरमुना प्रकारेण व्यक्तता काश्या ख्यापनेन संभवतीति सूक्ष्मस्तु कालपुद्गलपरावर्त्तस्तदा
भवति यदोत्सर्पिण्यां अवसर्पिण्यां वा प्रथमसमये कश्चिन्मृतस्ततः पुनरपि समयोनविंशतिकोटीकोटीभिरतिक्रा
ंताभिर्द्वितीयोऽपि स एव जंतुः कालांतरेण तस्या एव द्वितीयसमये म्रियते पुनरपि कदाचित्तथैव ताभिरतिक्रांताभिः तस्या ए
व तृतीयसमये एवं चतुर्थपंचमषष्ठादिसमयक्रमेणानंतानंतैर्भवैः यावत्सर्वेषु उत्सर्पिण्यवसर्पिण्योर्विंशतिसागरो
पमकोटीकोटीमानयोः समया मरणेन व्याप्ता भवंतीति ये तु प्रथमादिसमयक्रममुल्लंघ्य व्यवहितसमया मृत्युस्पृ
ष्टा वा मरणेन व्याप्तास्ते तु न गृह्यंत एवेति सूक्ष्मो भावपुद्गलपरावर्त्त उच्यते इह किलानुभागबंधाध्यवसायस्थानानि बध्य
मानकर्मपुद्गलेषु तादृशानुभागपलिच्छेदनिर्वर्त्तकान्यसंख्येयलोकाकाशप्रदेशप्रमाणानि मंदमंदमंदतरादि
भेदतो वर्त्तंते तत्र च सर्वस्तोकानुभागपलिच्छेदजनके कषायोदये वर्त्तमानः कश्चिज्जंतुर्मृतस्ततः कदाचित्पुनरपि त
स्मादनंतरव्यवस्थिते द्वितीयानुभागबंधाध्यवसायस्थाने विशेषाधिकाऽनुभागपलिच्छेदजनके वर्त्तमानो मृतः पुन
रपि तस्मात्कदाचिद्विशेषाधिकानुभागपलिच्छेदजनके तृतीये एवं क्रमेणोत्क्रमेण विशेषाधिकानुभागपलिच्छेदजनका
ध्यवसायस्थानेषु वर्त्तमानस्य मरणं तावद्वाच्यं यावत्सर्वोत्कृष्टानुभागबंधाध्यवसायस्थाने म्रियमाणेन जंतुनाऽनंतानं
तैर्मरणैः सर्वाण्यपि स्पृष्टानि भवंतीति व्यवहितानि यत्स्पृष्टानि च न गण्यंत इति व्याख्यातं सप्रपंचं पुद्गलपरावर्त्तस्वरूपं सं
प्रति योजयेत् यथाविधः सन्नुत्कृष्टं यथाविधश्च जघन्यं प्रदेशबंधं विधत्ते इत्येतत्स्वामित्वद्वारेण निरूपयन्नाह ८८
अप्पयरपयडिबंधी उक्कडजोगी य सन्नि पज्जत्तो कुणइ पएसुक्कोसं जहन्नयं तस्स वच्चासे ८९ व्या० अल्पतरा अ
ताः प्रकृतयः स्वाल्पतरप्रकृतयः तासां बंधः अविद्यते यस्यासावल्पतरप्रकृतिबंधको यो योगस्थानानामुत्कराणां वाल्पप्र
कृतिभेदानां बंधकः स सदुत्कृष्टप्रदेशबंधं करोति समानामल्पत्वसद्भावात् उत्कटयोगः उत्कटवीर्यवान् सर्वोत्कृष्टयोगस्थ ।२

पारेवर्त्तमान इत्यर्थः चसमुच्चये सच तिन्नक्रमे पर्याप्तश्चेतियोऽयंते संज्ञामनोविकल्पनलब्धिः सा विद्यते यस्यासौ संज्ञी
पर्याप्तश्चसमासपर्याप्तकः करोति विदधाति प्रदेशानामुत्कर्षेणोत्कृष्टस्तं प्रदेशोत्कर्षतमुत्कृष्टप्रदेशमितियावत् इहसंज्ञीति
विशेष्यं शेषाणि तु विशेषणानि अत्र चयो मनःपूर्विकां क्रियां विदधाति तस्य सर्वजीवेभ्यः उत्कृष्टवेष्टा भवति तयैव चोत्कृष्ट
प्रदेशो भवतीति संज्ञिग्रहणं संज्ञापि जघन्ययोगमुत्कृष्टयोगी च भवत्यतो जघन्ययोगिव्युदासार्थमुत्कृष्टयोगिग्रहणं तस्य
वोत्कृष्टप्रदेशबंधान् संज्ञापर्याप्तको नोत्कृष्टप्रदेशबंधं विधत्ते अल्पमल्पवीर्यत्वात्तस्येति पर्याप्तग्रहणं एवंविधस्यापि च
...तरप्रकृतबंधकस्य नागबाहुल्यात् स्तोकप्रदेशबंधो लभ्यते इत्यल्पतरप्रकृतेर्बंधीत्युक्तं तस्मादेवंविधविशेषणविशि
ष्टोऽयं तूत्कृष्टप्रदेशबंधं विधत्त इति तद्विजघन्यं प्रदेशबंधं कथं करोतीत्याह जहन्नयं तस्स वच्चासे जघन्यमेव जघन्यके
...यावादिस्य इति स्वार्थिकप्रत्ययस्तं जघन्यकं प्रदेशबंधमिति प्रक्रमः तस्य पूर्वप्रदर्शितस्य विशेषस्य विशेषणकलापस्य व्य
त्यासे विपर्यये सति करोतीति योगः अयमर्थः बहुतरप्रकृतिबंधको मंदयोगोऽपर्याप्तकोऽसंज्ञी जीवो जघन्यं
प्रदेशबंधं विदधातीत्यतिहितः सामान्येनोत्कृष्टजघन्यप्रदेशबंधस्वामी संप्रति मूलप्रकृतीनुत्तरप्रकृतीश्च प्रकृत्योत्कृष्टप्रदे
शबंधस्वामित्वं निरूपयन्नाह ९९ ब: मिच्छ अजय चउ आउ बितिगुणमोहि सत्त मिच्छाई छण्हं सतरस सुहुमो अ
जया देसा बितिकसाए ९० व्या० आउत्ति आयुष उत्कृष्टप्रदेशबंधस्वामिनः पंच तद्यथा मिच्छत्ति मिथ्यादृष्टिः अजय
चउत्ति अयतेन अविरतसम्यग्दृष्टिनोपलक्षिता श्चत्वारो अविरतसम्यग्दृष्टिदेशविरति प्रमत्ताप्रमत्तलक्षणाः पंचैव ते ना अ
...यस्य हि बंधीत्यादि गुणितगाथासंभवद्विशेषणविशिष्टा आयुष उत्कृष्टप्रदेशबंधमुपकल्पयंति सम्यग्मिथ्यादृष्टिरपू
र्वकरणादयश्चायुर्न बध्नंतीति नेह गृहीताः सास्वादनस्तु यद्यप्यायुर्बध्नाति तथापि स किमिति न गृहीत इति चेदुच्यते तत्रोत्कृष्ट २०६
प्रदेशबंधनिबंधनो उत्कृष्टयोगा... अनंतानुबंधिनामुत्कृष्टोऽनुत्कृष्टश्च प्रदेशबंधो मिथ्या... सास्वादनक...

गोनिसव्वसयोगिकेवलिगुणस्थानकयावत्सयुगपत्तदुदयोदीरणे अयोगप्रवस्थायां तदुदयणनोदीरणासंभवतिकस्मि
न्गुणस्थानके का प्रकृतीर्बध्नातीति बंधविशेषणनिरूपणाय माह ९९ ब: तित्थयराहारगविरहिआओ अज्जेइ सव्वपय
डीउ मिच्छत्तवेअगोसासणो वि इगुवीससेसाउ ९० व्या० इह बंधे प्रकृतीनां विंशत्युत्तरमधिक्रियते एतच्च प्रागेव प्रकृ
तवर्णनायामुक्तं तत्र मिथ्यात्ववेदको मिथ्यादृष्टिस्तीर्थकराहारकशरीराहारकांगोपांगवर्जाः शेषाः सर्वा अपि
प्रकृतीः सप्तदशोत्तरशतसंख्या अर्जयति बध्नाति तीर्थकराहारकद्विके तु न तस्य बंधमायातः तयोर्यथासंख्यं स
म्यक्त्वसंयमप्रत्ययत्वात् तथा सासादनोऽपि सासादनसम्यग्दृष्टिरपि एकोनविंशतिशेषा एकोनविंशतिवर्जा शेषा
एकोनशतसंख्याः प्रकृतीर्बध्नाति तत्र तिस्रः प्रकृतयः प्रागुक्ता एव तासां बंधाभावे कारणमिहापि तद्देवानुसरण
...यं शेषास्तु षोडश प्रकृतयः इमा मिथ्यात्वं नपुंसकवेदो नरकगतिर्नरकानुपूर्वी नरकायुरेकद्वित्रिचतुरिंद्रियजा
...तयः हुंडसंस्थानं सेवार्त्तसंहननं आतपनाम स्थावरनाम सूक्ष्मनाम साधारणनाम अपर्याप्तनामेति एता हि
मिथ्यात्वोदयनिमित्ता न च मिथ्यात्वोदयः सासादने विद्यत इत्येता अपि सासादनस्य न बंधमायांति ९० ब: छायालसे
स मीसो अविरयसम्मो तिआलपरिसेसा तेवन्न देसविरओ विरओ सगवन्न सेसाउ ९१ व्या० मिश्रः सम्यग्मिथ्याद
ष्टिः षट्चत्वारिंशच्छेषाः षट्चत्वारिंशद्वर्जाः चतुःसप्ततिसंख्याः प्रकृतीर्बध्नाति तत्रैकोनविंशतिप्रकृतयो बंधायोग्य
...ः प्रागुक्तप्रकारेण द्विगुणाः स्त्यानर्द्धित्रिकं अनंतानुबंधिचतुष्टयं स्त्रीवेदस्तिर्यग्गतिस्तिर्यगानुपूर्वी तिर्यगायुः प्रथ
मांतिमवर्जानि चत्वारि संस्थानानि प्रथमांतिमवर्जानि चत्वारि संहननानि उद्योतनाम अप्रशस्तविहायोगतिर्दुर्भगं दुःस्वर
मनादेयं नीचैर्गोत्रमित्येताः पंचविंशतिः प्रकृतयोऽनंतानुबंध्युदयनिमित्ता न च सम्यग्मिथ्यादृष्टेरनंतानुबंधिनामु
दयोऽस्ति ततो न बंधमायांति अन्यच्च सम्यग्मिथ्यादृष्टिरायुर्बंधमपि नारभते ततो मनुष्यदेवायुषी अपि न बंधमायांति

PAGE(S) MISSING
NOT AVAILABLE

FOLIO NO:-
207 - 293

६
कर्मग्रंथवृत्तिः षट्चत्वारिंशदपेताः प्रतिषिध्यंते तथा च अविरतसम्यग्दृष्टिः त्रिचत्वारिंशद्वर्जाः शेषाः सप्तसप्ततिप्रकृतीर्बध्नाति अविर
पत्र ६७ तसम्यग्दृष्टिर्हि मनुष्यदेवायुषी अपि बध्नाति तीर्थकरनाम च ततः शेषा एव त्रिचत्वारिंशत्प्रकृतयो वर्ज्यंते तथा देशविर
तः त्रिपंचाशच्छेषाः त्रिपंचाशद्वर्जाः शेषाः सप्तषष्टिः प्रकृतीर्बध्नाति तत्र त्रिचत्वारिंशत्प्रकृतयो बंधायोग्याः प्राक्तन्य एव
शेषाः पुनरिमाः अप्रत्याख्यानचतुष्टयं मनुष्यगतिर्मनुष्यानुपूर्वी मनुष्यायुः औदारिकशरीरमौदारिकांगोपांगं वज्रर्षभना
राचसंहननं एता हि दश प्रकृतयो विरतदेशविरतयोर्न देशविरते बंधमागच्छंति तथा विरतः प्रमत्तसंयतः सप्तपंचाशच्छेषाः सप्त
पंचाशद्वर्जाः शेषास्त्रिषष्टिप्रकृतीर्बध्नाति तत्र त्रिपंचाशत् बंधायोग्याः प्राक्तन्य एव शेषास्तु चतस्रः प्रकृतयः प्रत्याख्यानाव
रणक्रोधमानमायालोभरूपाः एता हि देशविरतिगुणस्थानक एव बंधं प्रतीत्य व्यवच्छिन्नाः संप्रति प्रतिषेद्धव्याः एवं तयोर्बंधाबंधयोग्य
त्वं स्तोकादिति बंधयोग्या एव निर्दिश्यंते ॥६॥ छः ॥ इगुणसट्ठिमप्पमत्तो बंधइ देवाउअस्स इयरोवि अट्ठावन्नमपुव्वो छप्प
न्नं वा वि छव्वीसं ॥७॥ व्या० अप्रमत्तोऽप्रमत्तसंयतः एकोनषष्टिं प्रकृतीर्बध्नाति तास्त्वप्रमत्तसंयतस्य बंधयोग्यास्त्रिषष्टिप्रकृ
तयोऽसातवेदनीयारतिशोकास्थिराशुभायशःकीर्तिवर्जा आहारकद्विकसहिता वेदितव्याः असातवेदनीय
ादयो हि षट् प्रकृतयः प्रमत्तसंयतगुणस्थानक एव बंधं प्रतीत्य व्यवच्छिन्ना आहारकद्विकं चाप्रमत्तो वा विशिष्टसं
यमस्थो बध्नाति ततः एकोनषष्टिः प्रकृतयोऽप्रमत्तस्य बंधयोग्या देवायुषः इयरोवि इतरोऽप्रमत्तोऽपि देवायु
षो बंधकः एतेनैतत्सूच्यते प्रमत्तसंयत एवायुर्बंधं प्रमत्त आरभते आरभ्य च कश्चिदप्रमत्ततामपि गच्छति तत एव
मप्रमत्तसंयतोऽपि देवायुषो बंधको भवति न पुनरप्रमत्तसंयत एवायुर्बंधं प्रमत्त आरभते इति तथाऽपूर्वोऽपूर्वकरणोऽष्ट २०४
पंचाशत्प्रकृतीर्बध्नाति तस्य देवायुर्बंधाभावात् ताश्चाष्टपंचाशत्प्रकृतीस्तावद्बध्नाति यावदपूर्वकरणाद्धायाः संख्ये
यतमो भागो गतो भवति ततो निद्राप्रचलयोरपि बंधव्यवच्छेदात् षट्पंचाशत्प्रकृतीर्बध्नाति ताश्चापि तावद्यावदपूर्व

करणाद्धायाः एकः संख्येयतमो भागोऽवशिष्यते ततो देवगतिदेवानुपूर्वीपंचेंद्रियजातिवैक्रियशरीरवैक्रियांगोपां
गाहारकांगोपांगतैजसकार्मणसमचतुरस्रसंस्थानवर्णरसगंधस्पर्शागुरुलघूपघातपराघातोच्छ्वासप्रशस्तविहायो
गतित्रसबादरपर्याप्तप्रत्येकस्थिरशुभसुभगसुस्वरादेयनिर्माणतीर्थकररूपाणां त्रिंशत्प्रकृतीनां बंधव्यवच्छेदात् शेषाः
षड्विंशतिप्रकृतीर्बध्नाति ताश्चापि तावद्बध्नाति यावदपूर्वकरणाद्धायाश्चरमसमयः तस्मिंश्च समये हास्यरतिभयजुगुप्सा बं
धं प्रतीत्य व्यवच्छिद्यंते ततः ॥७॥ छः ॥ बावीसा एगूणं बंधइ अट्ठारसंतमनियट्टी सत्तरस सुहुमसरागो सायममोहो सजोगुत्ति ॥८॥
व्या० अनिवृत्तिरनिवृत्तिबादरो द्वाविंशतिप्रकृतीर्बध्नाति ताश्च तावद्यावदनिवृत्तिबादरसंपरायाद्धायाः संख्येया भागा गता भवं
ति एकोऽवतिष्ठते ततः एकोनमेकैकप्रकृत्यूनं बध्नाति तावद्यावदष्टादशांतं एतदुक्तं भवति तस्मिन् संख्येयतमे भागे पुरु
षवेदबंधव्यवच्छेदात् शेषा एकविंशतिप्रकृतीर्बध्नाति ताश्चापि तावद्यावच्छेषस्य शेषीकृताया अद्धायाः संख्येयतमा भागा गता भवं
ति एकः शिष्यते ततः संज्वलनक्रोधस्यापि बंधव्यवच्छेदात् विंशतिप्रकृतीर्बध्नाति ताश्चापि तावद्यावच्छेषशेषीकृताया अद्धायाः सं
ख्येयतमा भागा गता भवंति एकोऽवतिष्ठते ततः संज्वलनमायाया अपि बंधव्यवच्छेदात् अष्टादशप्रकृतीर्बध्नाति ताश्च तावद्याव
दनिवृत्तिबादरसंपरायाद्धायाश्चरमसमयः तस्मिंश्च समये संज्वलनलोभोऽपि बंधं प्रतीत्य व्यवच्छिद्यते ततः सूक्ष्मसंपरायः शे
षाः सप्तदश प्रकृतीर्बध्नाति ताश्च तावद्यावत्सूक्ष्मसंपरायाद्धायाश्चरमसमयः तस्मिंश्चरमसमये ज्ञानावरणपंचकांतरायपंच
कदर्शनावरणचतुष्टययशःकीर्त्युच्चैर्गोत्ररूपाः षोडश प्रकृतयो बंधमधिकृत्य व्यवच्छिद्यंते ततः सायममोहो सजोगुत्ति अमोहो
मोहनीयोदयरहितः सातमेवैकं बध्नाति स चैतावद्यावत्सयोगी सयोगावस्थाचरमसमय इत्यर्थः इदमुक्तं भवति उपशांतमो
हक्षीणमोहसयोगिकेवली च सातमेकं बध्नाति अयोगिकेवली त्वेकस्यापि बंधहेतोरभावान्न किमपि बध्नातीति ॥८॥ छः ॥
एसो उ बंधसामित्तओघो गइयाइएसु वि तहेव उहाउ साहिज्जा जत्थ जहा पगइसब्भावो ॥९॥ व्या० योऽयमनंतरं प्रागभिहितः

६
कर्मग्रंथवृत्तिः पत्र ६८

दिषु सयोगिकेवलिपर्यंतेषु बंधस्ते इत्युक्तः एष बंधस्वामित्वौघ उच्यते। अस्मात् ओघात् ओघगुणस्थानप्रकारात् गत्यादिषु चि तुर्दशसु मार्गणास्थानेषु यत्र मार्गणास्थाने यथा येन प्रकारेण तस्य स्वाम्यादिना प्रकृतिसत्ता वोघ इति तत्र तथा साधयेत् कथयेत् यथा ×३१× एतः प्रकृतयो ऽस्मिन् मार्गणास्थाने बध्यंते न घटते इति संप्रति किं सर्वा अपि प्रकृतयः सर्वासु गतिषु प्राप्यंते किं वा नेति संशये सति तदपनोदायमाह १२ व्याः तित्थयरदेवनिरयाउअं च तिसु गईसु बोधव्वं अवसेसा पयडीउ हवंति सव्वासु विगईसु १४ व्याख्या तीर्थकरनामदेवायुर्नरकायुरूपं प्रत्येकं तिसृषु गतिषु बोधव्यं तथाहि तीर्थकरनाम नरकदेवमनुष्यगतिरूपासु तिसृषु गतिषु सत्ताप्यते न तिर्यग्गतौ तत्र हि तीर्थकरसत्कर्मणस्तिर्यक्षूत्पादाभावात् तत्र गतस्य च तीर्थकरनामबंधासंभवात् तथा तत्सत्वस्यालभ्यात् तथा तिर्यग्मनुष्यदेवगतिषु देवायुर्नरकगतौ नैरयिकाणां देवायुर्बंधाऽसंभवात् तिर्यग्मनुष्यनरकगतिषु च नरकायुर्न तु देवगतौ देवानां नरकायुर्बंधाऽसंभवात् शेषाः प्रकृतयः सर्वास्वपि गतिषु सत्तामधिकृत्य प्राप्यंते इद गुणस्थानकेषु पाकबंधोदयसत्तास्थानसंवेध उक्तः गुणस्थानकानि च प्रायः उपशमश्रेणिगतानि रूपकश्रेणिगतानि च ततो ऽवसरप्राप्तमुपशमश्रेणिरूपकश्रेणीवक्तव्ये १४ व्याः तत्र प्रथमत उपशमश्रेणिप्रतिपादनार्थमाह पढमकसायचउक्कं दंसणतिगसत्तगा वि उवसंता अविरयसम्मत्ताउ जाव नियट्टित्ति नायव्वं १५ व्याख्या प्रथमकषाया अनंतानुबंधिनो दर्शनत्रिकं मिथ्यात्वसम्यग्मिथ्यात्वसम्यक्त्वरूपं एताः सप्त कापि सप्त प्रकृतय उपशांता अविरतसम्यक्त्वात् अविरतसम्यग्दृष्टिगुणस्थानकादारभ्य यावत् निवृत्तिरपूर्वकरणगुणस्थानं तावत् ज्ञातव्याः अविरतसम्यग्दृष्टिदेशविरतिप्रमत्ताप्रमत्तसंयतानामन्यतमो योग्या योगमेताः सप्तापि प्रकृतय उपशांता लभ्यंते अपूर्वकरणवर्जं ... अन्यथा योगमुपशमकापूर्वकरणत्वेन नियमत २५५ उपशांता एव लभ्यंते तत्र प्रथमतो ऽनंतानुबंधिनामुपशमना विधीयते अविरतसम्यग्दृष्टिदेशविरतविरतानामन्यतमो ऽन्यतस्मिन् योगे वर्तमानस्तेजःपद्मशुक्ललेश्याऽन्यतमलेश्यायुक्तः साकारोपयोगोपयुक्तो ऽंतःसागरोपमकोटाकोटीस्थि

तिसत्कर्मा ऽपूर्वकरणकालात् पूर्वमपि अंतर्मुहूर्तकालं यावत् वर्द्धमानचित्तसंततिरवतिष्ठते तथा च तिष्ठमानश्च परावर्तमानाः प्रकृतीः शुभा एव बध्नाति नाशुभाः अशुभानां च प्रकृतीनामनुभागं चतुःस्थानकं संतं द्विस्थानकं करोति शुभानां च द्विस्थानकं संतं चतुःस्थानकं स्थितिबंधे पूर्णे सति अन्यं स्थितिबंधं पूर्वस्थितिबंधापेक्षया पल्योपमसंख्येयभागहीनं करोति इदं अपूर्वकरणकालात् पूर्वमंतर्मुहूर्तकालं यावत् कृत्वा ततो यथाक्रमं त्रीणि करणानि प्रत्येकमांतर्मौहूर्तिकानि करोति तद्यथा यथाप्रवृत्तकरणं अपूर्वकरणं अनिवृत्तिकरणं चतुर्थी उपशांताद्धा तत्र यथाप्रवृत्तकरणे प्रविशन् प्रतिसमयमनंतगुणवृद्ध्या विशुद्ध्या प्रविशति शुभोक्तं च शुभप्रकृतिबंधादिकं तथैव तत्र कस्तेन च स्थितिघातं रसघातं गुणश्रेणिं गुणसंक्रमं वा करोति तद्योग्यविशुद्ध्यभावात् प्रतिसमयं च नानाजीवापेक्षया असंख्येयलोकाकाशप्रदेशप्रमाणानि अध्यवसायस्थानानि लभ्यंते षट्स्थानपतितानि च अनंतर प्रथमसमयापेक्षया द्वितीयसमये ऽध्यवसायस्थानानि विशेषाधिकानि ततो ऽपि तृतीयसमये विशेषाधिकानि एवं तावद्वाच्यं यावत् यथाप्रवृत्तकरणचरमसमयः एतेन निष्पाद्यमानानि विषमचतुरस्रक्षेत्रमास्तृणन्ति स्थापना चेयं

ति स्थापना चेयं	१२००००००००००	१६
स्नंतगुणा ततो ऽपि	१००००००००००००	१५
२ः संख्येयो भागो	८००००००००००	१४
न्नलिवृत्तस्तस्पो	६००००००००	१३
तस्त उपरि जघन्या	४०००००००	११
त्यथाप्रवृत्तकरण	२००००००	९
निर्दिष्टानि	२०००००	७
	१००००	५

तत्र प्रथमसमये जघन्या विशोधिः सर्वस्तोका ततो द्वितीयसमये जघन्या विशोधिरनंतगुणा ततो ऽपि तृतीयसमये जघन्या विशोधिरनंतगुणा एवं तावद्वाच्यं यावत् यथाप्रवृत्तकरणाद्धायाः संख्येयो भागो गतो भवति ततः प्रथमसमये उत्कृष्टा विशोधिरनंतगुणा ततो ऽपि यतो जघन्यस्थानान्निवृत्तस्तस्य उपरितनी जघन्या विशोधिरनंतगुणा ततो ऽपि द्वितीयसमये उत्कृष्टा विशोधिरनंतगुणा ततस्तस्य उपरि जघन्या विशोधिरनंतगुणा एवमुपर्यधश्चैकैकं विशोधिस्थानमनंतगुणतया तावत् यावत् यथाप्रवृत्तकरणचरमसमये जघन्यं विशोधिस्थानं ततो ऽनुत्कृष्टानि यानि विशोधिस्थानानि अनुक्तानि निर्दिष्टानि तानि अनंतरमनंतगुणया ख्यातानि तान्येव यानि चरमसमये उत्कृष्टविशोधिस्थानं तदेव तु

क्तं यथाप्रवृत्तकरणं संप्रत्यपूर्वकरणमुच्यते तत्रापूर्वकरणे प्रतिसमयमसंख्येयलोकाकाशप्रदेशप्रमाणान्यध्यवसायस्था
नानि भवंति प्रतिसमयं च षट्स्थानपतितानि तत्र प्रथमसमये जघन्या विशोधिः सर्वस्तोका तावद्यथाप्रवृत्तकरणसम
यचरमसमयोत्कृष्टविशोधिस्थानादनंतगुणा ततः प्रथमसमय एवोत्कृष्टा विशोधिरनंतगुणा ततो ऽपि द्वितीयसमये जघ
न्या विशोधिरनंतगुणा ततो ऽपि तस्मिन्नेव द्वितीयसमये उत्कृष्टा विशोधिरनंतगुणा ततो ऽपि तृतीयसमये जघन्या विशोधि
रनंतगुणा ततो ऽपि तस्मिन्नेव तृतीयसमये उत्कृष्टा विशोधिरनंतगुणा एवं प्रतिसमयं तावद्वक्तव्यं यावच्चरमसमये उत्कृष्टवि
९ ० ० ० ० ० ० ० ० ० १० शोधिः स्थापना चः अस्मिंश्चापूर्वकरणे प्रथमसमय एव स्थितिघातो रसघातो गुणश्रेणिर्गुणसंक्रमो ऽ
७ ० ० ० ० ० ० ० ० ८ न्यश्च स्थितिबंध इति पंच पदार्था युगपत्प्रवर्तंते तत्र स्थितिघातो नाम स्थितिकर्मणो ऽग्रिमभागादुत्कर्ष
५ ० ० ० ० ० ० ० ६ तः प्रभूतसागरोपमशतप्रमाणं जघन्यतः पल्योपमासंख्येयभागमात्रं स्थितिखंडमुत्किरति खंडयतीत्य
३ ० ० ० ० ० ० ४ र्थः उत्कीर्यते च या स्थितिरधो न खंडयिष्यति तत्र तद्दलिकं प्रक्षिपति अंतर्मुहूर्तेन च कालेन तत् स्थितिखं
१ ० ० ० ० २ डमुत्कीर्यते ततः पुनरप्यधस्तात् पल्योपमासंख्येयभागमात्रं स्थितिखंडमंतर्मुहूर्तेन कालेनोत्किरति पू
र्वोक्तप्रकारेणैव च निक्षिपति एवमपूर्वकरणाद्धायां प्रभूतानि स्थितिखंडसहस्राणि व्यतिक्रामंति तथा च सति अपूर्वकर
णस्य प्रथमसमये यत् स्थितिसत्कर्मासीत् तदस्य चरमसमये संख्येयगुणहीनं जातं रसघातो नाम अशुभप्रकृतीनां
यदनुभागसत्कर्म तस्यानंततमं भागं मुक्त्वा शेषाननुभागभागान् अंतर्मुहूर्तेन कालेन विनाशयति ततः पुनरपि तस्य
प्राक्तनस्यानंततमभागस्यानंततमं भागं मुक्त्वा शेषाननुभागभागानंतर्मुहूर्तेन कालेन विनाशयति एवमनेकान्यनुभाग
खंडसहस्राण्येकस्मिन् स्थितिखंडे व्यतिक्रामंति तेषां च स्थितिखंडानां सहस्रैरपूर्वकरणं परिसमाप्यते गुणश्रेणिर्नामांतर्मु
हूर्तप्रमाणानां स्थितीनामुपरि याः स्थितयो वर्तंते ताभ्यो दलिकं गृहीत्वा उदयावलिकाया उपरितनीषु स्थितिषु प्र

मसमयमसंख्येयगुणतया निक्षिपति तद्यथा प्रथमसमये स्तोकं द्वितीयसमये असंख्येयगुणं ततो ऽपि तृतीयसमये ऽसं
ख्येयगुणं एवं तावन्नेयं यावदंतर्मुहूर्तचरमसमयः तच्चांतर्मुहूर्तमपूर्वकरणानिवृत्तिकरणकालात्मनागतिरिक्तं वेदि
तव्यं प्रथमसमयगृहीतदलिकस्य निक्षेपविधिः एवं द्वितीयादिसमयगृहीतानामपि दलिकानां निक्षेपो वक्तव्यः अत्र च
गुणश्रेणीरचनाय प्रथमसमये यद्दलिकं गृह्यते तत् स्तोकं ततो ऽपि द्वितीयसमये असंख्येयगुणं ततो ऽपि तृतीयसम
ये असंख्येयगुणं एवं तावन्नेयं यावत् गुणश्रेणिकरणचरमसमयः अपूर्वकरणसमयेष्वनिवृत्तिकरणसमयेषु चानु
भवतः क्रमशः क्षीयमाणेषु गुणश्रेणिदलिकनिक्षेपः शेषे भवति परिचनर्द्धीतगुणसंक्रमो नाम अपूर्वकरणस्य प्रथम
समये ऽनंतानुबंध्यादीनामशुभप्रकृतीनां दलिकं यत्परप्रकृतिषु संक्रमयति तत् स्तोकं ततो द्वितीयसमये परप्रकृ
तिषु संक्रम्यमाणमसंख्येयगुणं ततो ऽपि तृतीयसमये ऽसंख्येयगुणं एवं चतुर्थसमयादिष्वपि वक्तव्यं अन्यः स्थितिबं
धो नाम अपूर्वकरणस्य प्रथमसमये ऽन्य एवापूर्वः स्तोकः स्थितिबंध आरभ्यते स्थितिबंधस्थितिघातौ च युगपदारभ्येते
युगपदेव च निष्ठां यातः एवमेते पंच पदार्था अपूर्वकरणे प्रवर्तंते अनिवृत्तिकरणं नाम यत्र प्रविष्टानां सर्वेषामपि तुल्य
कालानामेकमेवाध्यवसायस्थानं तथा हि अनिवृत्तिकरणस्य प्रथमसमये ये वर्तंते ये च वर्तमाना ये च वर्तिष्यंते तेषां सर्वेषाम
प्येकरूपमेवाध्यवसायस्थानं द्वितीयसमये ऽपि ये च वर्तंते ये च वर्तमाना ये च वर्तिष्यंते तेषामपि सर्वेषामेकरूपमध्यवसाय
स्थानं नवरं प्रथमसमयतावद्विशोधिस्थानापेक्षया अनंतगुणं एवं तावद्वक्तव्यं यावदनिवृत्तिकरणचरमसमयः अत एव
अस्मिन् करणे प्रविष्टानां तुल्यकालानामसुमतां संबंधिनामध्यवसायस्थानानां परस्परं निवृत्तिर्व्यावृत्तिर्न विद्यते इति अनि
वृत्तीति नाम अस्मिंश्चानिवृत्तिकरणे यावंतः समयास्तावंत्यध्यवसायस्थानानि पूर्वस्मात् पूर्वस्मादनंतगुणवृद्धानि ए
तानि च मुक्तावलीसंस्थानेन स्थापयितव्यानि ॥ ॥ अत्रापि प्रथमसमयादेवारभ्य पूर्वोक्ताः पंच पदार्था युगपत्प्रवर्तंते अनि

BHAU DAJI
BHAU DAJI

६

कर्मप्रवृत्तिः पत्र ७१

निकरणाद्धाया असंख्येयतमेषु भागेषु गतेषु एकस्मिन् भागेऽवतिष्ठमानेऽनंतानुबंधिनामधस्तादावलिकामात्रं मुक्त्वा अंत
र्मुहूर्तप्रमाणं अंतरकरणमभिनवस्थितिबंधाद्धासमेनांतर्मुहूर्तप्रमाणेन कालेन करोति अंतरकरणसत्कं च दलिकमुत्कीर्यमा
णं परप्रकृतिषु बध्यमानासु प्रक्षिपति प्रथमस्थितिगतं च दलिकमावलिकामावलिकामात्रं वेद्यमानासु परप्रकृतिषु स्तिबुकसं
क्रमेण संक्रमयति अंतरकरणे कृते सति द्वितीयसमयेऽनंतानुबंधिनामुपरितनस्थितिगतं दलिकमुपशमयितुमारभते तद्यथा
+ म + प्रथमसमये स्तोकमुपशमयति द्वितीयसमये असंख्येयगुणं ततोऽपि तृतीयसमये असंख्येयगुणं एवं यावदंतर्मुहूर्तं एता
वता च कालेन साकल्यतोऽनंतानुबंधिनः उपशमिता भवंति यथा रेणुनिकरः सलिलबिंदुनिवहैरभिषिच्याभिषिच्य द्रुघ
णादिभिर्निकुट्टितो निबिडो भवति तथा कर्मरेणुनिकरोऽपि विशुद्धिसलिलप्रवाहेण परिषिच्य परिषिच्य निवृत्तिकरणरूपद्रुघण
निकुट्टितः संक्रमणोदयोदीरणानिधत्तिनिकाचनाकरणानामयोग्यो भवति तदेवमेके आचार्या मन्यन्ते नानंतानुबंधिना
मुपशमनास्तीति अन्ये त्वाचक्षते अनंतानुबंधिनामुपशमना न भवति किंतु विसंयोजनैव विसंयोजना क्षपणा सा चैवं
इह श्रेणिमप्रतिपद्यमाना अविरताश्चातुर्गतिका अविरतसम्यग्दृष्टयो देशविरताश्च तिर्यंचो मनुष्या वा सर्ववि
रतमनुष्या एव सर्वाः पर्याप्तिभिः पर्याप्ताश्चानंतानुबंधिनां क्षपणार्थं यथाप्रवृत्तादीनि त्रीणि करणानि कुर्वंति करणवक्तव्य
ता च सर्वाऽपि प्रागिव निरवशेषा वेदितव्या नवरमिह निवृत्तिकरणे प्रविष्टः सन् अंतरकरणं न करोति उक्तं च कर्मप्रकृ
तौ चउगइया पज्जत्ता तिन्नि वि संजोयणे विजोयंति करणेहिं तीहिं सहिया नंतरकरणं उवसमो वा ॥ किंतु कर्मप्रकृत्य
भिहितस्वरूपेणोद्वलनासंक्रमेणाधस्तादावलिकामात्रं मुक्त्वा उपरि निरवशेषाननंतानुबंधिनो विनाशयति आव २९७
लिकामात्रं तु स्तिबुकसंक्रमेण वेद्यमानासु प्रकृतिषु संक्रमयति ततोऽनंतरमंतर्मुहूर्तात् परतोऽनिवृत्तिकरणपर्य
वसाने शेषकर्मणां स्थितिघातरसघातगुणश्रेणयो न संभवंति किंतु स्वभावस्थ एव जायते तदेवमुक्ताऽनंतानुबं
धिना विसं॰

योजना इदानीं दर्शनत्रिकस्योपशमना भण्यते तत्र मिथ्यात्वस्योपशमना मिथ्यादृष्टेर्वेदकसम्यग्दृष्टेश्च सम्यक्त्व
सम्यग्मिथ्यात्वयोस्तु वेदकसम्यग्दृष्टेरेव तत्र मिथ्यादृष्टेर्मिथ्यात्वोपशमना प्रथमसम्यक्त्वमुत्पादयतः सा चैव
पंचेंद्रियः संज्ञी सर्वाभिः पर्याप्तिभिः पर्याप्तः करणकालात्पूर्वमप्यंतर्मुहूर्तकालं यावत् प्रतिसमयमनंतगुणया वृद्ध्या विशु
द्ध्या प्रवर्धमानोऽभव्यसिद्धिकविशुद्ध्यपेक्षया अनंतगुणविशुद्धिको मतिश्रुताज्ञानविभंगज्ञानानामन्यतमस्मिन्
योगे वर्तमानो जघन्यपरिणामेन तेजोलेश्यायामुत्कृष्टपरिणामेन शुक्ललेश्यायां वर्तमानो मिथ्यादृष्टिश्च उत्ति-
कांतः सागरोपमकोटीकोटीस्थितिसत्कर्मा इत्यादि सर्वं किं तावद्वक्तव्यं यावद्यथाप्रवृत्तकरणमपूर्वकरणं चापू
र्वं भवति नवरमिहापूर्वकरणं चापरिपूर्णं भवति नवरमिहापूर्वकरणे गुणसंक्रमो न वक्तव्यः किंतु स्थितिघा
तरसघातस्थितिबंधगुणश्रेणय एव वक्तव्याः गुणश्रेणिदलिकरचना पुनरुदयसमयादारभ्य वेदितव्या ततोऽनिवृ
त्तिकरणेऽप्येवमेव वक्तव्यं अनिवृत्तिकरणाद्धाया असंख्येयेषु भागेषु गतेषु एकस्मिन् संख्येयतमे भागेऽव
तिष्ठमानेऽन्तर्मुहूर्तमात्रमधो मुक्त्वा मिथ्यात्वस्यांतरकरणमंतर्मुहूर्तप्रमाणं प्रथमस्थितेः किंचित्समधिकं अभि
नवस्थितिबंधाद्धासमेनांतर्मुहूर्तेन कालेन करोति अंतरकरणसत्कं च दलिकमुत्कीर्य प्रथमस्थितौ द्वितीया
यां स्थितौ च प्रक्षिपति प्रथमस्थितौ च वर्तमान उदीरणाप्रयोगेण यत्प्रथमस्थितिगतं दलिकं समाकृष्योदये प्रक्षिपति
सा उदीरणा यत्पुनर्द्वितीयस्थितेः सकाशात् उदीरणाप्रयोगेणैव दलिकं समाकृष्योदये प्रक्षिपति सा आगाल इत्युदी
रणाया एव विशेषप्रतिपत्त्यर्थमागाल इति द्वितीयं नाम पूर्वसूरिभिरावेदितं उदयोदीरणे स्यातां च प्रथमस्थितिमनुभव
न् तावद्यावदावलिकाद्विकं शेषं तिष्ठति तस्मिंश्च स्थिते आगालो व्यवच्छिद्यते तत उदीरणैव केवला प्रवर्तते सापि
तावद्यावदावलिकाशेषो न भवति आवलिकायां तु शेषीभूतायामुदीरणापि निवर्तते ततः केवलेनैवोदयेनावलिका

मात्रमनुभवति आवलिकामात्रचरमसमये च द्वितीयस्थितिगतं दलिकमनुभागभेदेन त्रिधा करोति तद्यथा सम्य-
क्त्वं सम्यग्मिथ्यात्वं मिथ्यात्वं चेति उक्तं च कर्मप्रकृतिचूर्णौ चरमसमयमिच्छद्दिट्ठी से काले उवसमसम्मद्दिट्ठी होहिइ ताहे बि-
इयट्ठितिं तिहाणुभागं करेइ तं जहा सम्मत्तं सम्मामिच्छत्तं मिच्छत्तं चेति ततोऽनन्तरसमये मिथ्यात्वदलिकस्योदया-
भावात् औपशमिकं सम्यक्त्वमवाप्नोति उक्तं च मिच्छत्तुदये खीणे लहइ सम्मत्तमोवसमियं सो लंभेण जस्स लब्भइ आय-
हियमलद्धपुव्वं जं प्रथमसम्यक्त्वप्रथमकाले मिथ्यात्वस्य सर्वोपशमना भवति उक्तं च सम्मत्तपढमलंभो सव्वोवसमा इति
सम्यक्त्वं चेत्थं प्रतिपद्यमानः कश्चिद्देशविरतिसहितं प्रतिपद्यते कश्चित्सर्वविरतिसहितं प्रतिपद्यते उक्तं च पंचसंग्रहे
सम्मत्तेण समगं सव्वं देसं च कोइ पडिवज्जे ततो देशविरतप्रमत्ताप्रमत्तसंयतेष्वपि मिथ्यात्वमुपशान्तं लभ्यते संप्रति वे-
दकसम्यग्दृष्टेस्त्रयाणामपि दर्शनमोहनीयानामुपशमनाविधिरुच्यते इह वेदकसम्यग्दृष्टिः संयमे वर्तमानः
सन् अन्तर्मुहूर्तमात्रेण कालेन दर्शनत्रितयमुपशमयति उपशमयतश्च करणत्रितयविधिः पूर्ववद्वक्तव्यो याव-
दनिवृत्तिकरणाद्धायाः संख्येयेषु भागेषु गतेषु सत्सु अन्तरकरणं करोति अन्तरकरणं च कुर्वन् सम्यक्त्वस्य प्रथम-
स्थितिमन्तर्मुहूर्तप्रमाणं स्थापयति मिथ्यात्वमिश्रयोरावलिकामात्रां उत्कीर्यमाणं च दलिकं त्रयाणामपि सम्यक्त्व-
स्य प्रथमस्थितौ प्रक्षिपति मिथ्यात्वमिश्रयोः प्रथमस्थितिदलिकं सम्यक्त्वस्य प्रथमस्थितिमध्ये स्तिबुकसंक्रमेण क्षीणा-
यां सत्यामौपशमिकसम्यग्दृष्टिर्भवति उपरितनदलिकस्य चावसेया एवमुपशान्तदर्शनमोहनीयत्रिकश्चारित्रमो-
हनीयोपशमनायोद्यतः पुनरपि यथाप्रवृत्तादीनि त्रीणि करणानि करोति करणानां च स्वरूपं प्राग्वद्वक्तव्यं केवल- १५८
मिह यथाप्रवृत्तकरणमप्रमत्तगुणस्थानके द्रष्टव्यम् अपूर्वकरणमपूर्वकरणगुणस्थानके अनिवृत्तिकरणं चानिवृत्तिबा- १
दरसंपरायगुणस्थानके तत्राऽपूर्वकरणे स्थितिघातादयः पूर्ववदेव प्रवर्तन्ते नवरमिह सर्वासामप्यशुभप्रकृतीना-
मब=

ध्यमानानां गुणसंक्रमः प्रवर्तत इति वक्तव्यम् अपूर्वकरणाद्धायाश्च संख्येयतमे भागे गते सति निद्राप्रचलयोर्बन्ध-
व्यवच्छेदः ततः प्रभूतेषु स्थितिखण्डसहस्रेषु गतेषु सत्सु अपूर्वकरणाद्धायाः संख्येयतमा भागा गता भवन्ति एकोऽ-
वशिष्यते अस्मिन्नन्तरे देवगतिदेवानुपूर्वीपञ्चेन्द्रियजातिवैक्रियाहारकतैजसकार्मणसमचतुरस्रवैक्रियाङ्गो-
पाङ्गाहारकाङ्गोपाङ्गवर्णादिचतुष्टयागुरुलघूपघातपराघातोच्छ्वासत्रसबादरपर्याप्तप्रत्येकप्रशस्तविहायोग-
ति स्थिरशुभसुभगसुस्वरादेयनिर्माणतीर्थकरसंज्ञितानां त्रिंशतः प्रकृतीनां बन्धव्यवच्छेदः ततः स्थितिखण्डपृथक्त्वे
गते सति अपूर्वकरणाद्धायाश्चरमसमये हास्यरतिभयजुगुप्सानां बन्धव्यवच्छेदो हास्यरत्यरतिशोकभयजुगुप्साना- १
मुदयः सर्वकर्मणां च देशोपशमनानिधत्तिनिकाचनाकरणानि व्यवच्छिद्यन्ते ततोऽनन्तरसमयेऽनिवृत्तिकरणं प्रविशति
अत्रापि स्थितिघातादीनि पूर्ववत्करोति ततोऽनिवृत्तिकरणाद्धायाः संख्येयेषु भागेषु गतेषु सत्सु दर्शनसप्तकशेषाणामेकविंशते-
र्मोहनीयप्रकृतीनामन्तरकरणं करोति तत्र चतुर्णां संज्वलनानामन्यतमस्य वेद्यमानस्य संज्वलनस्य त्रयाणां च वेदानामन्यतम-
स्य वेद्यमानस्य वेदस्य प्रथमस्थितिः स्वोदयकालप्रमाणा अन्येषां चैकादशकषायाणामष्टानां च नोकषायाणां प्रथमस्थिति-
रावलिकामात्रा स्वोदयकालप्रमाणं च चतुर्णां संज्वलनानां त्रयाणां वेदानामिदं स्त्रीवेदनपुंसकवेदयोरुदयकालः सर्वस्तो- +च+
कः स्वस्थाने तु परस्परं तुल्यः ततः पुरुषवेदस्य संख्येयगुणः ततोऽपि संज्वलनक्रोधस्य विशेषाधिकः ततोऽपि संज्वलनमाया-
या विशेषाधिकः ततोऽपि संज्वलनलोभस्य विशेषाधिकः उक्तं च थीअपुमोदयकाला संखिज्जगुणो उ पुरिसवेयस्स तत्तो वि
विसेसअहिओ कोहे तत्तो वि जहक्कमसो तत्र संज्वलनक्रोधेनोपशमश्रेणिं प्रतिपन्नस्य यावदप्रत्याख्यानप्रत्याख्यानावरण-
क्रोधोपशमो न भवति तावत्संज्वलनक्रोधस्योदयः संज्वलनमानेनोपशमश्रेणिं प्रतिपन्नस्य यावदप्रत्याख्यानप्रत्या-
ख्यानावरणमानोपशमो न भवति तावत्संज्वलनमानस्योदयः संज्वलनमायया चोपशमश्रेणिं प्रतिपन्नस्य याव-

६
कर्मग्रंथवृत्तिः
पत्र९२

प्रत्याख्यानाप्रत्याख्यानावरणमायायोपशमेन भवति तावत् संज्वलनमायाया उदयः संज्वलनलोभेनोपशमश्रे
णिप्रतिपन्नस्य यावदप्रत्याख्यानप्रत्याख्यानावरणलोभोपशमो न भवति तावत् संज्वलनलोभस्योदयः तदेवमंतरकरणमु
परितनस्थित्यपेक्षया समम् अधस्तनापेक्षया चोक्तनीत्या विषममिति यावता च कालेन स्थितिखंडं घातयति यावता चान्यं स्थि
तिबंधं करोति तावता कालेनांतरकरणमपि करोति त्रीण्यपि युगपदारब्धानि युगपदेव च निष्ठां नयति तदंतरं प्रथमस्थि
ते संख्येयगुणं अंतरकरणसत्कदलिकं द्विरूपं विक्षिपति येषां कर्मणां तदानीं बंधोदयश्च विद्यते तेषामंतरकर
णसत्कं दलिकं प्रथमस्थितौ द्वितीयस्थितौ च प्रक्षिपति यथा पुरुषवेदोदयारूढः पुरुषवेदस्य येषां तु कर्मणामुदय
एव केवलो न बंधः तेषामंतरकरणसत्कं दलिकं प्रथमस्थितावेव प्रक्षिपति न द्वितीयस्थितौ यथा स्त्रीवेदोदयारूढः स्त्री
वेदस्य येषां पुनरुदयो न विद्यते किंतु केवलो बंधस्तेषामंतरणसत्कं दलिकं द्वितीयस्थितावेव प्रक्षिपति न प्रथमस्थितौ य
था संज्वलनक्रोधोदयारूढः शेषसंज्वलनानां येषां पुनर्न बंधो नाप्युदयस्तेषामंतरकरणसत्कं दलिकं परप्रकृतिषु प्रक्षिप
ति यथा द्वितीयतृतीयकषायाणां इदानीं निवृत्तिकरणे बहुवक्तव्यं तत्तु ग्रंथगौरवभयान्नोच्यते केवलं विशेषार्थिना क
र्मप्रकृतिटीका निरीक्षितव्या अंतरकरणं च कृत्वा ततो नपुंसकवेदमुपशमयति तच्चैवं प्रथमसमये स्तोकं द्वितीयसमये
ऽसंख्येयगुणं ततो तृतीयसमयेऽसंख्येयगुणं एवं प्रतिसमयमसंख्येयगुणं तावदुपशमयति यावच्चरमस
मयः परप्रकृतिषु प्रतिसमयमुपशमितदलिकापेक्षया तावदसंख्येयगुणं प्रक्षिपति यावद्द्विचरमसमयः चरमसम
ये पुनरुपशमदलिकं परप्रकृतिषु संक्रम्यमाणदलिकापेक्षयाऽसंख्येयगुणं द्रष्टव्यं तदेवं नपुंसकवेद उपशमितस्त १०९
स्मिंश्चोपशांते अष्टौ कर्माण्युपशांतानि जातानि ततोऽनेनैव प्रकारेणांतर्मुहूर्तेन कालेन स्त्रीवेदमुपशमयति तस्मिंश्चोप
शांते नव ततोऽन्तर्मुहूर्तेन कालेन हास्यादिषट्कमुपशमयति तस्मिंश्चोपशांते पंचदश कर्माण्युपशांतानि भवंति त

स्मिन्नेव समये पुरुषवेदस्य बंधोदयोदीरणाव्यवच्छेदः प्रथमस्थितिव्यवच्छेदश्च प्रथमस्थितौ चावलिकाशेषायां प्रागु
क्तस्वरूप आगालो न भवति तस्मादेव चरमसमयाद्धास्यषट्कनोकषायाणां सत्कं दलिकं न पुरुषवेदे प्रक्षिपति किंतु सं
ज्वलनक्रोधादिषु "उदउ आवलियासु पढमठिईए सेसासु विवेउ" इति वचनात् हास्यादिषट्कोपशमनानंतरं च समयोनाव
लिकाद्विकमात्रेण कालेन पुरुषवेदं सकलमप्युपशमयति तच्चैवं प्रथमसमये स्तोकं द्वितीयसमयेऽसंख्येयगुणं ततो तृ
तीयसमयेऽसंख्येयगुणं एवं तावद्वाच्यं यावत्समयद्वयोनावलिकाद्विकचरमसमयः परप्रकृतिषु च प्रतिसमयं समयद्व
योनावलिकाद्विककालं यावत् यथाप्रवृत्तसंक्रमेण संक्रमयति प्रथमसमये प्रभूतं द्वितीयसमये विशेषहीनं ततो
तृतीयसमये विशेषहीनं एवं तावद्वक्तव्यं यावच्चरमसमयं पुरुषवेदे चोपशांते षोडश कर्माण्युपशांतानि भवंति ततो यस्मि
न्समये हास्यादिषट्कमुपशांतं पुरुषवेदस्य प्रथमस्थितिः क्षीणा ततः समयादनंतरं अप्रत्याख्यानप्रत्याख्यानावरणसं
ज्वलनक्रोधान् युगपदुपशमयितुमारभते संज्वलनक्रोधस्य च प्रथमस्थितौ समयोनावलिकाशेषायामप्रत्याख्यानप्रत्या
ख्यानावरणक्रोधदलिकं न संज्वलनक्रोधे प्रक्षिपति किंतु संज्वलनमानादौ "तिसु आवलियासु समऊणियासु अपडिग्ग
हा उ संजलणा" इति वचनात् द्व्यावलिकाशेषायां आगालो न भवति किंतूदीरणैव केवला सापि तावद्भवति यावदावलिक
शेषो भवति आवलिकायां च शेषीभूतायां संज्वलनक्रोधस्य बंधोदयोदीरणाव्यवच्छेदः अप्रत्याख्यानप्रत्याख्यानावरणौ च क्रो
धावुपशांतौ तयोश्चोपशांतयोरष्टादश कर्माण्युपशांतानि भवंति तदानीं च संज्वलनक्रोधस्य प्रथमस्थितिगतामेकामावलि
कां समयोनावलिकाद्विकबद्धं च उपरितनस्थितिगतं दलिकं मुक्त्वा शेषमन्यत्सर्वमुपशांतं ततस्तां प्रथमस्थितिगतामेकामाव
लिकां संज्वलनमाने स्तिबुकसंक्रमेण प्रक्षिपति समयोनावलिकाद्विकबद्धं च दलिकं पुरुषवेदोक्तप्रकारेणोपशमयति सं
क्रमयति च ततः समयोनावलिकाद्विकेन कालेन क्रोध उपशमितः तस्मिंश्चोपशांते एकोनविंशतिः कर्माण्युपशांतानि
भवंति यदा च

संज्वलनक्रोधस्य बंधोदयोदीरणाव्यवच्छेदः ततोऽनंतरसमयादारभ्य संज्वलनमानस्य द्वितीयस्थितेः सकाशाद्दलिकमाकृष्य प्र
थमस्थितिं करोति वेदयते च तत्रोदयसमये स्तोकं प्रक्षिपति द्वितीयस्थितौ चासंख्येयगुणं ततो द्वितीयस्थितावसंख्येयगुणं एवं
तावद्वाच्यं यावत्प्रथमस्थितेश्चरमसमयः प्रथमस्थितिकरणप्रथमसमयादेव चारभ्य त्रीनपि प्रत्याख्यानप्रत्याख्यानावरण
संज्वलनरूपान् मानान्युगपदुपशमयितुमारभते संज्वलनमानस्य च प्रथमस्थितौ समयोनावलिकात्रिकशेषायामप्रत्या
ख्यानप्रत्याख्यानावरणमानदलिकं न संज्वलनमाने प्रक्षिपति किंतु संज्वलनमायादौ आवलिकाद्विकशेषायां तु आगालो व्य
वच्छिद्यते ततः उदीरणैव केवला प्रवर्त्तते सापि तावद्यावदावलिकाशेषो भवति आवलिकायां तु शेषीभूतायां संज्वल
नमानस्य बंधोदयोदीरणाव्यवच्छेदः अप्रत्याख्यानप्रत्याख्यानावरणौ च मानावुपशांतौ तयोश्चोपशांतयोरेकविंशतिक
र्माण्युपशांतानि तस्मिंश्च समये संज्वलनमानस्य प्रथमस्थितिगतामेकामावलिकां समयोनावलिकाद्विकबद्धं चोप
रितनस्थितिगतं दलिकं मुक्त्वा शेषमन्यत्सर्वमुपशांतं ततस्तां प्रथमस्थितिगतामेकामावलिकां स्तिबुकसंक्रमेण संज्वलनमा
यायां प्रक्षिपति समयोनावलिकाद्विकबद्धं च दलिकं पुरुषवेदोक्तप्रकारेणोपशमयति संक्रमयति च ततः समयोनावलिकाद्वि
केन कालेन संज्वलनमान उपशमितस्तस्मिंश्चोपशांते द्वाविंशतिकर्माण्युपशांतानि भवंति यदा च संज्वलनमानस्य बंधोदयो
दीरणाव्यवच्छेदस्ततोऽनंतरसमयादारभ्य संज्वलनमायायाः द्वितीयस्थितेः सकाशात् दलिकमाकृष्य पूर्वोक्तप्रकारेण
प्रथमां स्थितिं करोति वेदयते च तत्समयादेव चारभ्य तिस्रोऽपि माया युगपदुपशमयितुमारभते संज्वलनमायायाश्च प्र
थमस्थितौ समयोनावलिकात्रिकशेषायामप्रत्याख्यानप्रत्याख्यानावरणमायादलिकं संज्वलनमायायां प्रक्षिपति २००
किंतु संज्वलनलोभे आवलिकाशेषायां त्वागालो न भवति किंतु उदीरणैव केवला सापि तावत्प्रवर्त्तते यावदावलिकाशेषो
भवति आवलिकायां च शेषीभूतायां संज्वलनमायाया बंधोदयोदीरणाव्यवच्छेदः अप्रत्याख्यानप्रत्याख्यानावरणे च माये उ

पशांते तयोश्चोपशांतयोश्चतुर्विंशतिकर्माण्युपशांतानि भवंति तस्मिंश्च समये संज्वलनमायायाः प्रथमस्थितिगतामेकामाव
लिकां समयोनावलिकाद्विकबद्धं चोपरितनस्थितिगतं दलिकं मुक्त्वा शेषमन्यत्सर्वमुपशांतं ततस्तां प्रथमस्थितिगतामेकामाव
लिकां स्तिबुकसंक्रमेण संज्वलनलोभे संक्रमयति समयोनावलिकाद्विकबद्धं च दलिकं पुरुषवेदोक्तप्रकारेणोपशमयति संक्रम
यति च ततः समयोनावलिकाद्विकेन कालेन संज्वलनमाया उपशांता तस्यां चोपशांतायां पंचविंशतिकर्माण्युपशांतानि भवंति
यदा च संज्वलनमायाया बंधोदयोदीरणाव्यवच्छेदस्ततोऽनंतरसमयादारभ्य संज्वलनलोभस्य द्वितीयस्थितेः सकाशाद्दलिकमा
कृष्य लोभवेदकाद्धायास्त्रिभागद्वयप्रमाणं प्रथमस्थितिः पूर्वोक्तप्रकारेण करोति वेदयते च प्रथमश्च त्रिभागोऽश्वकर्णकरणाद्धासंज्ञो
द्वितीयः किट्टिकरणाद्धासंज्ञः प्रथमे चाश्वकर्णकरणाद्धासंज्ञे त्रिभागे वर्त्तमानः पूर्वस्पर्द्धकेभ्यो दलिकमादाय अपूर्वस्पर्द्धकानि करो
ति अथ किमिदं स्पर्द्धकमित्युच्यते इह तावदनंतानंतैः परमाणुभिर्निष्पन्नान् स्कंधान् जीवः कर्मतया गृह्णाति तत्र चैकैक
स्मिन् स्कंधे यः सर्वजघन्यरसः परमाणुस्तस्यापि रसः केवलिप्रज्ञया छिद्यमानः सर्वजीवेभ्योऽनंतगुणान् रसाविभागान् प्रयच्छ
ति अपरस्तु ततोऽप्येकाधिकान् एवमेकोत्तरया वृद्ध्या तावन्नेयं यावदन्यः परमाणुः सिद्धानंततमभागाधिकान् रसाविभागान् प्र
यच्छतीति तत्र जघन्यरसा ये केचन परमाणवः तेषां समुदायः समानजातीयत्वात् एका वर्गणेत्युच्यते अन्येषां त्वेकाधिकर
साविभागयुक्तानां समुदायो द्वितीया वर्गणा अपरेषां तु द्व्यधिकरसाविभागयुक्तानां समुदायस्तृतीया वर्गणा एवमनया दिशा
एकैकरसाविभागवृद्धानामणूनां समुदायरूपा वर्गणाः सिद्धानामनंततमभागकल्पा अभव्येभ्योऽनंतगुणा वाच्याः एताश्च समुदायः
स्पर्द्धकमित्युच्यते स्पर्द्धंत इवोत्तरोत्तरवृद्ध्या परमाणुवर्गणा अत्रेति कृत्वा इत ऊर्द्ध्वमेकोत्तरया निरंतरवृद्ध्या वर्द्धमानो रसो न ल
भ्यते किंतु सर्वजीवानंतगुणा एव रसाविभागास्ततस्तेनैव क्रमेण ततः प्रवर्त्तते द्वितीयस्पर्द्धकमिति भावनीयं एवमेव तृतीयं एवं ताव
द्वाच्यं यावदनंतानि स्पर्द्धकानि भवंति एतानि च पूर्वकृतत्वात् पूर्वस्पर्द्धकान्यभिधीयंते तत एतेभ्यः इदानीं प्रतिसमयं दलिकं गृहीत्वा

६

कर्मग्रंथवृत्तिः पत्र ७४ चानंतहीनरसतामापाद्य निस्पर्द्धकानि करोति आसंसारं हि परस्परमतानकरोत्येव पि बंधमाश्रित्यैवंरूपाणि स्पर्द्धकानि कृतानि किं
तु प्रत्येकविशुद्धिप्रकर्षवशात्करोति ततोऽपूर्वाणीत्युच्यंते अश्वकर्णकरणाद्धायां गतायां किट्टिकरणाद्धायां प्रविशति तत्र च
पूर्वस्पर्द्धकेभ्योऽपूर्वस्पर्द्धकेभ्यश्च दलिकं गृहीत्वा प्रतिसमयमनंताः किट्टीः करोति किट्टयो नाम पूर्वस्पर्द्धकापूर्वस्पर्द्धकेभ्यो
वर्गणा गृहीत्वा तासामनंतगुणहीनरसतामापाद्य बृहदंतरालतया व्यवस्थापनं यथा यासामेवासत्कल्पनया अ
नुभागभागानां शतमेकोत्तरं शुतस्थाने तासामेवानुभागभागानां पंचकं पंचदशकं पंचविंशतिरिति किट्टीकरणाद्धाया
श्चरमसमये युगपदप्रत्याख्यानप्रत्याख्यानावरणलोभावुपशांतौ भवतः तस्मिन्नेव समये संज्वलनलोभबंधव्यवच्छेदो बादरसं
ज्वलनलोभोदयोदीरणाव्यवच्छेदोऽनिवृत्तिबादरसंपरायगुणस्थानव्यवच्छेदश्चेत्येवमनिवृत्तिबादरे सप्तदशानां पंचविं
शतिं यावदुपशांतकर्माणि लभ्यंते तथा चाह ७४ व्याः सत्तट्ठ नव य पन्नरस सोलस अट्ठारसेव इगुवीसा एगाहि दुचउवी
सा पणवीसा बायरे जाण ७५ व्या० सुगमा अत्राप्रत्याख्यानप्रत्याख्यानावरणलोभोपशांतौ च सप्तविंशतिकर्माण्युपशां
तानि भवंति तानि च सूक्ष्मसंपराये प्राप्यंते आह च ७५ व्याः सत्तावीसं सुहुमे अट्ठावीसं पि मोहपयडीउ उवसंतवीयरागे उ
वसंता हुंति नायव्वा ७६ व्या० सूक्ष्मे सूक्ष्मसंपराये सप्तविंशतिः कर्माण्युपशांतानि भवंति सूक्ष्मसंपरायाद्धा चांतर्मुहू
र्त्तप्रमाणा सूक्ष्मसंपरायाद्धायास्त्रिभागे शेषे सति उपरितनस्थितेः सकाशात्किट्टीः समाकृष्य प्रथमस्थितिं सूक्ष्म
संपरायाद्धातुल्यं करोति वेदयति च शेषं च सूक्ष्मकिट्टीकृतं दलिकं समयोनावलिकाद्विकबद्धं चोपशमयति सूक्ष्मसं
परायाद्धायाश्[redacted]समये संज्वलनलोभ उपशांतो भवति तस्मिन्समय एव ज्ञानावरणपंचकदर्शनावरणचतुष्कांतराय ३०१
पंचक[illegible] यशःकीर्त्त्युच्चैर्गोत्राणां बंधव्यवच्छेदः ततोऽनंतरसमये उपशांतकषायो भवति तस्मिं
श्चोपशांतकषाये वीतरागे अष्टाविंशतिरपि मोहनीयप्रकृतयः उपशांता ज्ञातव्याः उपशांतकषायश्च जघन्येनैकं
समयं भवे

ति उत्कर्षेणांतर्मुहूर्त्तं कालं यावत् ततोऽवश्यं नियमादसौ प्रतिपतति प्रतिपातश्च द्विधा भवक्षयेणाद्धाक्षयेण अद्धाक्षयेण च तत्र भ
वक्षयो म्रियमाणस्य अद्धाक्षय उपशांताद्धायां समाप्तायां अद्धाक्षयेण च प्रतिपतन् यथैवारूढस्तथैव प्रतिपतति यत्र यत्र बंधोदयो
दीरणा व्यवच्छिन्नास्तत्र तत्र प्रतिपतता आरभ्यंते इति यावत् प्रतिपतंश्च तावत् प्रतिपतति यावत्प्रमत्तसंयतगुणस्थानकं क
श्चित्पुनस्ततोऽप्यधस्तनं गुणस्थानकद्विकं याति कोऽपि सासादनभावमपि यः पुनर्भवक्षयेण प्रतिपतति स प्रथमसमय एव स
र्वाण्यपि बंधनादीनि करणानि प्रवर्त्तयति तेषु विशेषः उत्कर्षतश्चैकस्मिन्भवे द्वौ वारावुपशमश्रेणिं प्रतिपद्यते यश्च द्वौ वारा
वुपशमश्रेणिं प्रतिपद्यते तस्य नियमात्तस्मिन्भवे क्षपकश्रेण्यभावः यः पुनरेकं वारं प्रतिपद्यते तस्य क्षपकश्रेणिर्भवेदपि उ
क्तं च सूत्रे जो दुवारे वारे उवसमसेढिं पडिवज्जइ तस्स नियमा तम्मि भवे खवगसेढी नत्थि जो इक्कसिं उवसमसेढिं पडिवज्जइ त
स्स खवगसेढी हुज्ज त्ति आगमाभिप्रायेणैकस्मिन्भवे एकामेव श्रेणिं प्रतिपद्यते तदुक्तं मोहोपशम एकस्मिन्भवे द्वि
: स्यादसंततः यस्मिन्भवे त्पशमः क्षयो मोहस्य तत्र नेति तदेवमुक्तः सप्रपंचमुपशमश्रेणिः संप्रति क्षपकश्रेणिमभिधित्सुक
रमाह ७६ व्याः पढमकसायचउक्कं इत्तो मिच्छत्तमीससम्मत्तं अविरयसम्मे देसे पमत्ति अपमत्ति खीअंति ७७ व्या० इहायं क्ष
पकश्रेणिमारभते सोऽवश्यं मनुष्यो वर्षाष्टकस्योपरि वर्तमानः स च प्रथमं कषायचतुष्कमनंतानुबंधिसंज्ञं विसंयोजयति तद्वि
संयोजना च प्रागेवोक्ता ततस्तत्प्रथमकषायचतुष्कक्षयादनंतरं मिथ्यात्वमिश्रसम्यक्त्वानि निरूपयति स्म अत्रैकवचनं समाहा
र विवक्षणात् समाहारविवक्षा चामीषां त्रयाणामपि युगपत्क्षपणाय ततोऽयं प्रतिज्ञापनार्थं मिथ्यात्वादीनि च क्षपयन् यथाप्रवृत्तादी
नि त्रीणि करणान्यारभते करणानि च प्रागिव व्याख्यानि नवरमपूर्वकरणस्य प्रथमसमये यावुदितयोर्मिथ्यात्वसम्यग्मिथ्यात्व
योर्दलिकं गुणसंक्रमेण सम्यक्त्वे प्रक्षिपति उद्वलनासंक्रममपि तयोरेवमारभते तद्यथा प्रथमस्थितिखंडं बृहदुद्वलयति
ततो द्वितीयं विशेषहीनं ततोऽपि तृतीयं विशेषहीनं एवं तावद्वाच्यं यावदपूर्वकरणचरमसमयः पूर्वकरणप्रथमसमये च यत् स्थिति

कर्म्मासीत् तत्र तस्यैव चरमसमये संख्येयगुणहीनं जातं ततोऽनिवृत्तिकरणे प्रविशति तत्रापि स्थितिघातादीनि सर्वाण्यपि त
थैव करोति अनिवृत्तिकरणस्य प्रथमसमये च दर्शनत्रिकस्यापि देशोपशमनानिधत्तिनिकाचना व्यवच्छिद्यंते दर्शनमोहनीयत्रिकस्य
च स्थितिसत्कर्म्माऽनिवृत्तिकरणप्रथमसमयादारभ्य स्थितिघातादिभिः घात्यमानं घात्यमानं स्थितिखंडसहस्रेषु गतेषु असं
ज्ञिपंचेंद्रियस्थितिः सत्कर्मसमानं भवति ततः स्थितिखंडसहस्रपृथक्त्वे गते सति चतुरिंद्रियस्थितिसत्कर्मसमानं ततोपि ता
वन्मात्रेषु खंडेषु गतेषु त्रींद्रियस्थितिसत्कर्मसमानं ततोपि तावन्मात्रेषु खंडेषु गतेषु द्वींद्रियस्थितिसत्कर्मसमानं ततोपि
तावन्मात्रेषु खंडेषु गतेषु एकेंद्रियस्थितिसत्कर्मसमानं ततोपि तावन्मात्रेषु खंडेषु गतेषु पल्योपमासंख्येयभागप्रमाणं भ
वति ततः त्रयाणामपि पृथगेकमेकं संख्येयभागं मुक्त्वा शेषं सर्वमपि घातयति ततस्तस्यापि पश्चादुक्तस्य संख्येयभागस्यैकं संख्येय
तमं भागं मुक्त्वा शेषं सर्वं विनाशयति एवं स्थितिघाताः सहस्रशो व्रजंति तदनंतरं च मिथ्यात्वस्यासंख्येयान् भागान् खंडयति स
म्यक्त्वसम्यग्मिथ्यात्वयोस्तु संख्येयान् तत एवं स्थितिखंडेषु प्रभूतेषु गतेषु सत्सु मिथ्यात्वस्य दलिकमावलिकामात्रं जातं सम्यक्त्व
सम्यग्मिथ्यात्वयोस्तु पल्योपमासंख्येयभागमात्रं अमूनि च स्थितिखंडानि खंड्यमानानि मिथ्यात्वसत्कानि सम्यक्त्वसम्यग्मिथ्या
त्वयोः प्रक्षिपति सम्यक्त्वमिथ्यात्वसत्कानि सम्यक्त्वे सम्यक्त्वसत्कानि त्वधस्तात्स्वस्थाने इति तदपि च मिथ्यात्वदलिकमाव
लिकामात्रं स्तिबुकसंक्रमेण सम्यक्त्वे प्रक्षिपति तदनंतरं सम्यक्त्वसम्यग्मिथ्यात्वयोरसंख्येयान् भागान् खंडयति एकोऽवशि
ष्यते ततस्तस्याप्यसंख्येयान् भागान् खंडयति एकं मुंचति एवं कतिपयेषु स्थितिखंडेषु गतेषु सम्यग्मिथ्यात्वमप्यावलिका ३०२
मात्रं जातं तदानीं सम्यक्त्वस्थितिसत्कर्म वर्षाष्टकप्रमाणं भवति तस्मिन्नेव काले सकलप्रत्यूहापगमतो निश्चयमतेन द
+स्या+ र्शनमोहनीयक्षपकत्वं प्रोच्यते तत ऊर्ध्वं सम्यक्त्वस्थितिखंडमंतर्मुहूर्तप्रमाणमुत्किरति तद्दलिकं चोदयसमयादारभ्य प्रक्षिप
ति केवलमुदयसमये सर्वस्तोकं ततो द्वितीयसमये असंख्येयगुणं ततोपि तृतीयसमयेऽसंख्येयगुणं एवं तावद्वक्त
व्यं याव

त् गुणश्रेणीशिरस्तत ऊर्ध्वं तु विशेषहीनं यावच्चरमा स्थितिः एवमांतर्मौहूर्त्तिकान्यनेकानि खंडान्युत्किरति निक्षिपति च
तानि च तावद्यावच्चरमस्थितिखंडं द्विचरमात्तु स्थितिखंडाच्चरमखंडं संख्येयगुणं चरमे च स्थितिखंडे उत्कीर्णे सति असौ
क्षपकः कृतकरण इत्युच्यते अस्यां च कृतकरणाद्धायां वर्त्तमानः कश्चित् कालमपि करोति ततश्चतसृणां गतीनामन्यतमस्यां ग
तावुत्पद्यते लेश्यायामपि च पूर्वं शुक्ललेश्यायामासीत् संप्रति त्वन्यतमस्यां गच्छति तदेवं प्रस्थापको मनुष्यो निष्ठाप
कश्चतसृष्वपि गतिषु भवति उक्तं च पट्ठवगो उ मणूसो निट्ठवगो चउसु विगईसु इत्यादि बद्धायुः क्षपकश्रेणिमारभते अनं
तानुबंधिनां च क्षयादनंतरं मरणसंभवतो व्युपरमते ततः कदाचिन्मिथ्यात्वोदयात्स्यो पुनरनंतानुबंधिन उपचिनोति तद्बीजस्य
मिथ्यात्वस्याविनाशात् क्षीणमिथ्यादर्शनस्तु नोपचिनोति बीजाभावात् क्षीणसप्तकस्य प्रतिपतितपरिणामोऽवश्यं त्रिदशेषूत्प
द्यते प्रतिपतितपरिणामसंभवात् अन्यपरिणाममन्यतमस्यां गतावुत्पद्यते उक्तं च बद्धाऊ पडिवन्नो पढमकसायक्खए जइ मरि
ज्जा तो मिच्छत्तोदयउ विणिज्ज भुज्जो न खीणम्मि तम्मि मउ गाइ दिवं तप्परिणामो य सत्तखवीणे उवरियपरिणामो उण पच्छा ना
णागइ मईओ २ बद्धायुष्को यदि तदानीं कालं करोति तथापि सप्तके क्षीणे नियमादवतिष्ठते न तु चारित्रमोहक्षपणाय यत्न
मारभते यत आह बद्धाऊ पडिवन्नो खीणम्मि सत्तए ठाइ अथोच्यते क्षीणसप्तको गत्यंतरं संक्रामन् कतितमभवे मोक्षमु
पयाति उच्यते तृतीये चतुर्थे वा भवे तथाहि यदि देवगतिं नरकगतिं वा संक्रामति ततो देवभवांतरितो नरकभवांतरितो वा न
रकभवांतरितो वा तृतीये भवे मोक्षमुपयाति अथ तिर्यक्षु मनुष्येषु वा मध्ये समुत्पद्यते तर्हि सोऽवश्यमसंख्येयवर्षायुष्केषु मध्ये
गच्छति न संख्येयवर्षायुष्केषु ततस्तद्भवादनंतरं देवभव तस्माच्च देवभवाच्च्युत्वा मनुष्यभवे ततो मोक्षं यातीति चतुर्थे भवे मो
क्षगमनं उक्तं च पंचसंग्रहे तइयचउत्थे तम्मि व भवम्मि सिज्झंति दंसणे खीणे जं देवनिरयसंखाउचरमदेहेसु ते हुंति एतानि
च सप्त कर्म्माणि क्षपयति अविरतसम्यग्दृष्टिर्देशविरतसम्यग्दृष्टिर्वा सर्वविरतः प्रमत्तोऽप्रमत्तो वा ततः एतेषु चतुर्ष्वपि सप्तकक्ष

यः प्राप्यते तथा चाह सूत्रकृत् अविरइ इत्यादि अविरते देशविरते प्रमत्ते अप्रमत्ते वा प्रथमकषायचतुष्कादीनि सप्त कर्माणि क्ष
पयंते क्षयमुपयाति यदि पुनरबद्धायुः क्षपकश्रेणिमारभते ततः सप्तके क्षीणे नियमादनुपरतपरिणाम एव चारित्रमोहनी
यक्षपणाय यत्नमारभते यत आह श्राप्यकृत् इयरो अणवरओ चिय सयलं सेढिं समाणेइ चारित्रमोहनीयं क्षपयितुं यत
मानो यथाप्रवृत्तादीनि त्रीणि करणानि करोति तद्यथा यथाप्रवृत्तकरणमपूर्वकरणमनिवृत्तिकरणं च एषां स्वरूपं प्राग्व
देवावगंतव्यं नवरमिह यथाप्रवृत्तकरणमप्रमत्तगुणस्थानके द्रष्टव्यं अपूर्वकरणगुणस्थानके अनिवृत्तिकरणमनिवृ
त्तिबादरसंपरायगुणस्थानके तत्रापूर्वकरणे स्थितिघातादिभिरप्रत्याख्यानप्रत्याख्यानावरणकषायाष्टकं तथा क्षपय
ति स्म यथा अनिवृत्तिकरणाद्धायाः प्रथमसमये तत्पल्योपमासंख्येयभागमात्रस्थितिकं जातं अनिवृत्तिकरणाद्धायाश्च संख्ये
येषु भागेषु गतेषु सत्सु स्त्यानर्द्धित्रिकनरकगतितिर्यग्गतिनरकानुपूर्वीतिर्यगानुपूर्व्येकद्वित्रिचतुरिंद्रियजातिस्थावरात
पोद्योतसूक्ष्मसाधारणरूपाणां षोडशप्रकृतीनामुद्वलनासंक्रमेणोद्वल्यमानानां पल्योपमासंख्येयभागमात्रा स्थितिर्जाता
ततो बध्यमानासु प्रकृतिषु तानि षोडश कर्माणि गुणसंक्रमेण प्रतिसमयं प्रक्षिप्यमाणानि निरनिःशेषतः क्षीणानि भ
वंति इहाप्रत्याख्यानप्रत्याख्यानावरणकषायाष्टकं पूर्वमेव क्षपयितुमारब्धं परं तन्नाद्यापि क्षीणं केवलमपांतराल
एव पूर्वोक्तप्रकृतिषोडशकं क्षपितं ततः पश्चादेतदपि कषायाष्टकमंतर्मुहूर्त्तमात्रेण क्षपयति तथा चाह ११ अः अनियट्टि
बायरे थीणगिद्धितिगनिरयतिरियनामाउ संखिज्जइमे सेसे तप्पाउग्गाउ खीअंति १८ इत्तो हणइ कसायट्ठगंपि पच्छा
पुंसगं इत्थी तो नोकसायछक्कं छुहइ संजलणकोहंमि १९ व्या० अनिवृत्तिबादरेगुणस्थानके संख्येयतमे भागे शे
ष्ये स्त्यानर्द्धित्रिकं निरयतिर्यग्नामिनी निरयगतितिर्यग्गतिनाम्नी तत्प्रायोग्याश्च निरयगतितिर्यग्गतिप्रायोग्याश्च
एकेंद्रियद्वींद्रियत्रींद्रियजातिचतुरिंद्रियजातिनिरयानुपूर्वीतिर्यगानुपूर्वीस्थावरातपोद्योतसूक्ष्मसाधारणरू

पाः सर्वसंख्यया षोडश प्रकृतयः क्षीयंते ततस्ततः प्रकृतिषोडशकक्षयादनंतरं निःशेषतः कषायाष्टकं हंति अन्ये पुनराहुः
षोडश कर्माण्येव पूर्वं क्षपयितुमारभते केवलमपांतराले ष्टौ कषायान् क्षपयति पश्चात्षोडश कर्माणीति ततोऽंतर्मुहूर्त्त
मात्रेण नवानां कषायाणां चतुर्णां संज्वलनानामंतरकरणं करोति तच्च कृत्वा नपुंसकवेददलिकमुपरितनस्थितिगतमु
द्वलनविधिना क्षपयितुमारभते तच्चांतर्मुहूर्त्तमात्रेण पल्योपमासंख्येयभागमात्रं जातं ततः प्रभृति बध्यमानासु प्रकृतिषु गुणसं
क्रमेण दलिकं प्रक्षिपति तच्चैवं प्रक्षिप्यमाणमंतर्मुहूर्त्तमात्रेण निःशेषं क्षीणं अधस्तनदलिकं च यदि नपुंसकवेदेन क्षपका
श्रेणिमारूढस्ततो नुभवतः क्षपयति अन्यथा त्वावलिकामात्रं तत्स्रवति तच्च वेद्यमानासु प्रकृतिषु स्तिबुकसंक्रमेण संक्र
मयति तदेवं क्षपितो नपुंसकवेदः ततोऽंतर्मुहूर्त्तमात्रेण स्त्रीवेदोप्यनेनैव क्रमेण क्षप्यते ततः षण्णोकषायाणां युगपत्क्ष
पयितुमारभते ततः प्रभृति तेषामुपरितनस्थितिगतं दलिकं न पुरुषवेदे संक्रमयति किंतु संज्वलनक्रोधे तथा चाह सूत्र
कृत् पच्छा नपुंसगंति कषायाष्टकक्षयादनंतरं पश्चात् नपुंसकं नपुंसकवेदं क्षपयति ततः स्त्रीति स्त्रीवेदं ततः षण्णो
कषायान् क्षपयन् तेषामुपरितनस्थितिगतं दलिकं संज्वलनक्रोधे छुहइत्ति क्षिपति न पुरुषवेदे एते पि च षण्णोकषाया
: संज्वलनक्रोधे पूर्वोक्तविधिना क्षिप्यमाणाः क्षिप्यमाणाः अंतर्मुहूर्त्तमात्रेण निःशेषाः क्षीणाः तत्समयमेव च पुरुषवे
दस्य बंधोदयोदीरणा व्यवच्छेदः समयोनावलिकाद्विकबद्धं मुक्त्वा शेषदलिकस्य क्षयश्च ततो सावेदानीमवेदको
जातः एवं पुरुषवेदेन क्षपकश्रेणिं प्रतिपन्नस्य द्रष्टव्यं यदा तु नपुंसकवेदेन क्षपकश्रेणिं प्रतिपद्यते तदा तु प्रथमतः
स्त्रीवेदनपुंसकवेदौ युगपत् क्षपयति स्त्रीवेदनपुंसकवेदक्षयसमकालमेव च पुरुषवेदस्य बंधो व्यवच्छिद्यते तदनं
तरं चावेदकः सन् पुरुषवेदहास्यादिषट्कं युगपत् क्षपयति यदा तु स्त्रीवेदेन प्रतिपद्यते क्षपकश्रेणिं तदा प्रथमतो न
पुंसकवेदं ततः स्त्रीवेदं स्त्रीवेदक्षयसमकालमेव च पुरुषवेदस्य बंधव्यवच्छेदः ततोऽवेदकः पुरुषवेदहास्यादिषट्कं यु
गपत्

क्षपयति संज्वलनपुरुषवेदेन क्षपकश्रेणिं प्रतिपन्नमधिकृत्य प्रकटमभिधीयते क्रोधं वेदयमानस्य सतस्तस्याः क्रोधाद्धाया
स्त्रयो विभागा भवंति तद्यथा अश्वकर्णकरणाद्धा किट्टीकरणाद्धा किट्टीवेदनाद्धा च तत्राश्वकर्णकरणाद्धायां वर्तमानः
प्रतिसमयमनंतानि अपूर्वस्पर्द्धकानि चतुर्णामपि संज्वलनानामंतरकरणादुपरितनस्थितौ करोति अश्वकर्ण
करणाद्धायां वर्तमानः पुरुषवेदमपि समयोनावलिकाद्विकेन कालेन क्रोधे गुणसंक्रमेण संक्रमयन् चरमसमये सर्वसंक्र
मेण संक्रमयति तदेवं क्षीणे पुरुषवेदे अश्वकर्णक्रियायां च समाप्तायां किट्टीकरणाद्धायां प्रविशति तत्र च प्रविष्टः सन् चतु
र्णामपि संज्वलनानामुपरितनस्थितिगतस्य दलिकस्य किट्टीः करोति तत्राश्वकिट्टयः परमार्थतोऽनंता अपि स्थूलजाति
भेदापेक्षया द्वादश कल्प्यंते एकैकस्य च कषायस्य तिस्रः तिस्रः तद्यथा प्रथमा द्वितीया तृतीया च एवं क्रोधेन क्षपकश्रे
णिं प्रतिपन्नस्य द्रष्टव्यं यदा तु मानेन प्रतिपद्यते तदा उद्वलनविधिना क्रोधे क्षपिते सति त्रयाणां पूर्वक्रमेण नव किट्टीः करो
ति मायया चेत् प्रतिपन्नः तर्हि क्रोधमानयोरुद्वलनविधिना क्षपितयोः सतोः शेषद्विकस्य पूर्वक्रमेण षट् किट्टी
: करोति यदि पुनर्लोभेन प्रतिपद्यते उद्वलनविधिना क्रोधादित्रिके क्षपिते सति लोभस्य किट्टीत्रिकं करोति ए
ष किट्टीकरणविधिः किट्टीकरणाद्धायां निष्ठितायां क्रोधेन प्रतिपन्नः सन् क्रोधस्य प्रथमकिट्टिदलिकं द्वितीय
स्थितिगतमाकृष्य प्रथमस्थितिगतं करोति वेदयते च तावद्यावत् समयाधिकावलिकामात्रशेषः ततोऽनंतर
समये द्वितीयकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिगतं करोति वेदयते च तावद्यावत्समयाधि
कावलिकामात्रशेषः ततोऽनंतरसमये तृतीयकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिगतं क २०५
रोति वेदयते च तावद्यावत्समयाधिकावलिकामात्रशेषः तिसृष्वपि चामूषु किट्टीवेदनाद्धासूपरितनस्थिति
गतं दलिकं गुणसंक्रमेण प्रतिसमयमसंख्येयगुणवृद्धिलक्षणेन संज्वलनमाने प्रक्षिपति तृतीयकिट्टीवेद

नाद्धायाश्चरमसमये संज्वलनक्रोधस्य बंधोदयोदीरणानां युगपद्व्यवच्छेदः सत्कर्मापि च तस्य समयोनावलिकाद्विकब
द्धमुक्त्वा अन्यन्नास्ति सर्वस्य माने प्रक्षिप्तत्वात् ततोऽनंतरसमये मानस्य प्रथमकिट्टिदलिकं द्वितीयस्थितिगतमाकृ
ष्य प्रथमस्थितिगतं करोति वेदयते च तावद्यावदंतर्मुहूर्तं क्रोधस्य च बंधोदयव्यवच्छिन्ने सति तस्य संबंधि दलिकं
समयोनावलिकाद्विकमात्रेण कालेन गुणसंक्रमेण संक्रमयन् चरमसमये सर्वसंक्रमेण संक्रमयति मानस्यापि प्रथ
मकिट्टिदलिकं प्रथमस्थितिकृतं वेद्यमानं समयाधिकावलिकाशेषं जातं ततोऽनंतरसमये मानस्य द्वितीयकि
ट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावत्समयाधिकावलिकामात्रशेषः त
तोऽनंतरसमये तृतीयकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावत्समय
अधिकावलिकामात्रशेषः तस्मिन्नेव च समये मानस्य बंधोदयोदीरणानां युगपद्व्यवच्छेदः सत्कर्मापि च तस्य स
मयोनावलिकाद्विकबद्धमवशेषस्य मायायां प्रक्षिप्तत्वात् ततो मायायाः प्रथमकिट्टिदलिकं द्वितीयस्थितिगतमा
कृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावदंतर्मुहूर्तं मानस्यापि च बंधोदयव्यवच्छिन्ने सति तस्य संबंधि दलिकं
समयोनावलिकाद्विकमात्रेण कालेन गुणसंक्रमेण मायायां प्रक्षिपति मायायाश्चापि च प्रथमकिट्टिदलिकं द्वि
तीयस्थितिगतमाकृष्य प्रथमस्थितिकृतं वेद्यमानं समयाधिकावलिकाशेषं जातं ततोऽनंतरसमये मायाया द्वि
तीयकिट्टीदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावत्समयाधिकावलिकामा
त्रशेषः ततोऽनंतरसमये तृतीयकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्या
वत्समयाधिकावलिकामात्रशेषः तस्मिन्नेव च समये मायाया बंधोदयोदीरणानां युगपद्व्यवच्छेदः सत्कर्मा
पि च तस्याः समयोनावलिकाद्विकबद्धमवशेषस्य लोभे प्रक्षिप्तत्वात् ततो लोभस्य प्रथमकिट्टिदलिकं द्वितीय
स्थिति

६
कर्मग्रंथवृत्तिः पत्र ७८ गतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यद्वेदं तमुत्कीर्णं संज्वलनमायायाश्च बंधोदयव्यवच्छिन्ने
तस्याः संबंधदलिकं समयोनावलिकाद्विकमात्रेण कालेन गुणसंक्रमेण लोभे सर्वं संक्रमयति लोभस्य च प्रथ
मकिट्टिदलिकं प्रथमस्थितिकृतं वेद्यमानं वेद्यमानं समयाधिकावलिकामात्रशेषं जातं ततोऽनंतरसमये लोभस्य द्वितीय
+ स्थितिगत किट्टिदलिकं द्वितीयकिट्टिमाकृष्य प्रथमस्थितिं करोति वेदयते च तां च वेदयमानः तृतीयकिट्टिदलिकं गृहीत्वा सूक्ष्म
किट्टीकरोति तावद्यावत् द्वितीयकिट्टिदलिकस्य प्रथमस्थितीकृतस्य समयाधिकावलिकामात्रं शेषः तस्मिन्नेव च
समये संज्वलनलोभस्य बंधव्यवच्छेदो बादरकषायोदयोदीरणाव्यवच्छेदो निवृत्तिबादरसंपरायगुणस्थानककालव्यव
च्छेदश्च युगपज्जायते ततोऽनंतरसमये सूक्ष्मकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च
तदानीमसौ सूक्ष्मसंपराय उच्यते प्रवेशिकाश्चावलिकाः तृतीयकिट्टिगताः शेषीभूताः सर्वा अपि वेद्यमानासु पर
प्रकृतिषु स्तिबुकसंक्रमेण संक्रमयति प्रथमद्वितीयकिट्टिगताश्च यथासं द्वितीयतृतीयकिट्ट्यंतर्गता वेद्यंत सूक्ष्मसंप
रायस्य लोभस्य सूक्ष्मकिट्टीर्वेदयमानः सूक्ष्मकिट्टिदलिकं समयोनावलिकाद्विकबद्धं च प्रतिसमयं स्थितिघातादिभि
: तावत्क्षपयति यावत्सूक्ष्मसंपरायाद्धायाः संख्येया भागा गता भवंति एकोऽवशिष्यते ततः तस्मिन्संख्येयत
मे संज्वलनलोभं सर्वापवर्तनया अपवर्त्य सूक्ष्मसंपरायाद्धासमं करोति सा च सूक्ष्मसंपरायाद्धा अद्याप्यंतर्मुहूर्त्त
प्रमाणा ततः प्रभृति च स्थितिघातादयो निवृत्ताः शेषकर्मणां तु प्रवर्त्तंत एव तां च लोभस्यापवर्त्तितां स्थितिमुद
योदीरणाभ्यां वेदयमानस्तावद्गतो यावत्समयाधिकावलिकामात्रं शेषः ततोऽनंतरसमये उदीरणा स्थिता ततः उदये ३०५
नैव केवलेन तावद्वेदयति यावच्चरमसमयः तस्मिंश्चरमसमये ज्ञानावरणपंचकदर्शनावरणचतुष्कयशःकीर्त्यु
च्चैर्गोत्रांतरायपंचकरूपाणां षोडशकर्मणां बंधव्यवच्छेदः मोहनीयोदयसत्ताव्यवच्छेदश्च अमुमेवार्थं संकल्प्य सू

त्रकृत् प्रतिपादयति ७९ ॥ पुरिसं कोहे कोहं माणे माणं च छुहइ मायाए मायं च छुहइ लोहे लोहं सुहुमंपि तो हणइ ८०
व्या० पुरुषं पुरुषवेदं बंधोदयव्यवच्छिन्ने सति गुणसंक्रमेण क्रोधे संज्वलनक्रोधे छुहइत्ति संक्रमयति क्रोधस्यापि च बंधो + उ +
दयव्यवच्छिन्ने तं क्रोधं माने संज्वलनमाने संक्रमयति संज्वलनमानस्यापि बंधोदयव्यवच्छिन्ने तं संज्वलनमानं गुणसं
क्रमेण मायायां संज्वलनमायायां प्रक्षिपति संज्वलनमायाया अपि बंधोदयव्यवच्छिन्ने तां संज्वलनमायां लोभे सं
ज्वलनलोभे गुणसंक्रमेण संक्रमयति संज्वलनलोभस्यापि च बंधोदयव्यवच्छिन्ने तं संज्वलनलोभं सूक्ष्ममपि अपिशब्दा
त् शेषमपि हंति स्थितिघातादिभिर्विनाशयति लोभे च समाकल्पेन विनाशिते सत्यनंतरसमये क्षीणकषायो जायते तस्य
च क्षीणकषायस्य मोहनीयवर्जानां शेषकर्मणां स्थितिघातादयः पूर्ववत्प्रवर्त्तंते तावत् यावत्क्षीणकषायाद्धाया
: संख्येयभागा गता भवंति एकः संख्येयभागोऽवतिष्ठते तस्मिंश्च ज्ञानावरणपंचकदर्शनावरणचतुष्टयांतरायपं
+ कर्मणां + चकनिद्राद्विकरूपाणां षोडशानां स्थितिसत्कर्म सर्वापवर्तनया अपवर्त्य क्षीणकषायाद्धासमं करोति केवलं निद्राद्विकस्य
स्वरूपापेक्षया समयन्यूनं कर्मत्वमात्रापेक्षया यावत्तुल्यं सा च क्षीणकषायाद्धा अद्याप्यंतर्मुहूर्त्तप्रमाणा ततः प्रभृ
ति च तेषां स्थितिघातादयः स्थिताः शेषाणां तु भवंत्येव तानि च षोडश कर्माणि निद्राद्विकहीनान्युदयोदीरणाभ्यां
वेदयमानः तावद्गतो यावत्समयाधिकावलिकामात्रं शेषं ततोऽनंतरसमये उदीरणा निवृत्ता ततः आवलिकामात्रं
कालं यावदुदयेनैव केवलेन वेदयते यावत्क्षीणकषायाद्धाया द्विचरमसमयस्तस्मिन् समये च द्विचरमसमये निद्राद्वि
कं स्वरूपसत्तापेक्षया क्षीणं चतुर्दर्शनानां च शेषप्रकृतीनां चरमसमये क्षयः तथा चाह सूत्रकृत् ८० ॥ खीणकसाय
दुचरिमे निद्दं पयलं च हणइ छउमत्थो आवरणमंतराए छउमत्थो चरमसमयंमि ८१ व्याख्या तथा ततोऽनंतरस
मये सयोगिकेवली भवति स च लोकमलोकं च सर्वं सर्वात्मना परिपूर्ण[illegible]तिन दितदस्तित्वं तत्त्ववक्तविष्यद्यायन्
पत्रप॰

६

कर्म्मग्रंथवृत्तिः पत्र७९

गवानुपदर्शयति उक्तं च संभिन्नं पासंतो लोगमलोगं च सव्वओ सव्वं तं नत्थि जं न पासइ भूयं भव्वं भविस्सं च १ इत्थंभूत
श्च सयोगिकेवली जघन्यतोंतर्मुहूर्त्तमुत्कर्षतो देशोनां पूर्वकोटीं विहृत्य कश्चित्कर्म्मणां समीकरणार्थं समुद्घातं क
रोति यस्य वेदनीयादिकमायुषः सकाशात् अधिकतरं भवति अन्यस्तु न करोत्येव तथा चोक्तं प्रज्ञापनायां सव्वे वि णं भं
ते केवली समुग्घायं गच्छंति गोयमा नो इणट्ठे समट्ठे जस्साउएण तुल्लाइं बंधणेहिं ठिईहिं य भवोवग्गाहिकम्माइं न समु
ग्घायं स गच्छइ १ अगंतूणं समुग्घायमणंता केवली जिणा जरमरणविप्पमुक्का सिद्धिं वरगइं गया अत्र बंधणेहिं ति बध्यंत इ
ति बंधनाः कर्म्मपरमाणवः रूढकलमिति वचनात्कर्म्मण्यनट्प्रत्ययस्तैः शेषं सुगमं गत्वा चागत्वा च समुद्घात
त्तं भवोपग्राहिकर्म्मक्षपणाय लेश्यातीतमत्यंताप्रकंपं परमनिर्ज्जराकारणं ध्यानं प्रतिपित्सुर्योगनिरोधायोपक्र
मते एव तत्र पूर्वं बादरकाययोगेन बादरमनोयोगं निरुणद्धि ततो बादरवाग्योगं ततः सूक्ष्मकाययोगेन बादरका
ययोगं ततः तेनैव सूक्ष्मकाययोगेन सूक्ष्ममनोयोगं ततः सूक्ष्मवाग्योगं ततः सूक्ष्मकाययोगं निरुंधा
नः सूक्ष्मक्रियाप्रतिपाति ध्यानमारोहति तत्सामर्थ्याच्च वदनोदरादिविवरपूरणेन संकुचितदेहत्रिभागवर्त्ति
प्रदेशो भवति तस्मिंश्च ध्याने वर्त्तमानः स्थितिघातादिभिरायुर्वर्ज्जानि सर्वाण्यपि भवोपग्राहिकर्म्माणि तावदप
वर्त्तयति यावत्सयोग्यवस्थाचरमसमयस्तस्मिंश्चरमसमये सर्वाण्यपि कर्म्माणि सयोग्यवस्थासमस्थि
तिकानि जातानि नवरं येषां कर्म्मणामयोग्यवस्थायामुदयाभावः तेषां स्थितिः स्वरूपं प्रतीत्य समयोना वि
धत्ते कर्म्मत्वमात्ररूपतां चाश्रित्यायोग्यवस्थासमाना तस्मिंश्च सयोग्यवस्थाचरमसमये अन्यतरद्वेदनीयं औ २०६
दारिकतैजसकार्म्मणशरीरसंबद्धबंधनसंघातसंस्थानषट्कप्रथमसंहननौदारिकांगोपांगवर्णादिचतुष्टय
मगुरुलघूपघातपराघातप्रशस्ताप्रशस्तविहायोगतिप्रत्येकस्थिरास्थिरशुभाशुभनिर्माणनाम्नामु
दयो वि॰

दयव्यवच्छेदः ततोऽनंतरसमये अयोगिकेवली भवति अयोगिकेवली च भवस्थो जघन्योत्कर्षमंतर्मुहूर्त्तकालं भवति
स चैतस्यामवस्थायां वर्त्तमानो भवोपग्राहिकर्म्मक्षपणाय व्युपरतक्रियमप्रतिपाति ध्यानमारोहति एवमसावयोगिके
वली स्थितिघातादिरहितो यान्युदयवंति कर्म्माणि तानि स्थितिक्षयेणानुभवन् क्षपयति यानि पुनरुदयवंति तदानीं
संति तानि वेद्यमानासु प्रकृतिषु स्तिबुकसंक्रमेण संक्रमयन् वेद्यमानप्रकृतिरूपतया च वेदयमानस्तावद्याति या
वदयोग्यवस्थाद्विचरमसमयः तस्मिंश्च एताः प्रकृतयः क्षीयंते तदाह ८१ ब॰ देवगइसहगयाउ दुचरमसमयभवियंमि
खीयंति सविवागेयरनामा नीआगोअंपि तत्थेव ८२ व्या॰ देवगत्या सहगताः स्थिता देवगतिसहगताः देवगत्या स
हकांते न बंधे या सांता देवगतिसहगता इत्यर्थः कास्ता इति चेदुच्यते वैक्रियाहारकशरीरे २ वैक्रियाहारकबंधने २ वै
क्रियाहारकसंघाते २ वैक्रियाहारकांगोपांगे २ देवानुपूर्वी चेत्येता देवगतिसहगता द्विचरमसमयभवसिद्धिके इति द्वौ चर
मौ समयौ यस्य भवसिद्धिकस्य स द्विचरमसमयः स चासौ भवसिद्धिकश्च तस्मिन् द्विचरमसमयभवसिद्धिके क्षीयंते क्षयमुप •य•
गच्छंति तथा तत्रैव द्विचरमसमयभवसिद्धिके सविपाकेतरनामानि विपाक उदयः सह विपाकेन यानि वर्त्तंते तानि स
विपाकानि तेषामितराणि प्रतिपक्षभूतानि यानि नामानि तानि सविपाकेतरनामानि अनुदयवत्यो नामप्रकृतय इत्य
र्थः ताश्चेमाः औदारिकतैजसकार्म्मणशरीराणि औदारिकतैजसकार्म्मणबंधनसंघातनानि संस्थानषट्कं संहननष
ट्कमौदारिकांगोपांगं वर्णगंधरसस्पर्शा मनुजानुपूर्वी पराघातमुपघातमगुरुलघु प्रशस्ताप्रशस्तविहायोगती प्रत्ये
कमपर्याप्तकमुच्छ्वासनाम स्थिरास्थिरे शुभाशुभे सुस्वरदुःस्वरे दुर्भगमनादेयमयशःकीर्त्तिर्निर्माणमिति तथा
नीचैर्गोत्रमपि शब्दादन्यतरदनुदितं वेदनीयं सर्वसंख्यया सप्तचत्वारिंशत्प्रकृतयः क्षयमुपयांति ८२ ब॰ अन्नयर
वेअणीअ मणुआउअ उच्चगोअ नवनाम वेएइ अजोगिजिणो उक्कोस जहन्न इक्कारा ८३ व्या॰ अन्यतरद्वेदनीयमा

तमसातं वा द्विचरमसमयक्षीणद्विस्तरत्मनुष्यायुरुच्चैर्गोत्रं नवनामानि नवनामप्रकृतीः सर्वसंख्यया द्वादशप्र
कृतीर्वेदयते अयोगिजिनोऽयोगिकेवली जघन्यपदे एकादश तास्तीर्थकरवर्ज्जा इह या नवनामप्र
कृतय उक्तास्ता एव नामप्रकृतीर्दर्शयति ८३ ॥ बः मणुअगइजाइतसबायरं च पज्जत्तसुभगमाइज्जं जसकित्ती तित्थ
यरं नामस्स हवंति नव एया ८४ गतार्था अत्रैव मतांतरं दर्शयति तच्चाणुपुव्विसहिआ तेरस भवसिद्धिअस्स च
रमंमि संतंसगमुक्कोसं जहन्नयं बारस हवंति ८५ व्याख्या तृतीयानुपूर्वी मनुष्यानुपूर्वी तया सहितास्ता एव द्वादशप्र
कृतयः त्रयोदश सत्योऽभवसिद्धिकस्य तद्भवमोक्षगामिनः संतं सगति सत्कर्म्मोत्कृष्टं भवति जघन्यं पुनर्द्वादशप्रकृ
तयो भवंति ताश्च द्वादश प्रकृतयः ता एव त्रयोदश तीर्थकरनामरहिता वेदितव्या अथ कस्मादेवमिष्यते तत्र
१६ ८५ ॥ बः मणुअगइसहगयाओ भवखित्तविवागजिअविवागत्ति वेअणीअन्नयरुच्चं चरमसमयंमि खीअं
ति ८६ व्याख्या मनुजगत्या सहगताः स्थिताः मनुजगतिसहगता मनुष्यगत्या सह यासामुदयस्ता मनुजगतिस
हगता इत्यर्थः किंविशिष्टास्ता इत्याह भवक्षेत्रविपाकजीवविपाका इति भवविपाका क्षेत्रविपाका जीवविपाकाश्च
तत्र भवविपाका मनुष्यायुः क्षेत्रविपाका मनुष्यानुपूर्वी शेषा भवजीवविपाकास्तथा अन्यतरद्वेदनीयमुच्चैर्गोत्रं
च सर्वसंख्यया त्रयोदश प्रकृतयो भविकस्य भवसिद्धिकस्य चरमे समये क्षीयंते न द्विचरमसमये ततश्चरमभव
सिद्धिकस्योत्कृष्टं सत्कर्म त्रयोदश प्रकृतयो जघन्यतो द्वादश भवंतीति अन्ये पुनराहुर्मनुष्यायुर्मनुष्यानुपूर्व्या
द्विचरमसमय एव व्यवच्छेद उदयाभावात् उदयवतीनां हि स्तिबुकसंक्रमाभावात् स्वस्वरूपेण चरमसमये
दलिकं दृश्यत एवेति युक्तस्तासां चरमसमये सत्ताव्यवच्छेदः आनुपूर्वीनाम्नस्तु चतुर्णामपि क्षेत्रविपाकतया
अपांतरालगतावेवोदयः तेन भवस्थस्य तदुदयसंभवः तदसंभवाच्चायोग्यवस्था द्विचरमसमय एव मनुष्या २०३

BHAU DAJI

नुपूर्व्याः सत्ताव्यवच्छेद इति एतदेव मतमधिकृत्याह प्राग्द्विचरमसमये सम्भवत्वारिंशत्प्रकृतीनां सत्ताव्यवच्छेदो दर्शितः च
रमसमये उत्कृष्टतो द्वादशानां जघन्यत एकादशानामिति ततोऽनंतरसमये कोशबंधमोक्षलक्षणसहकारिसमुद्भूतस
स्वाविशेषादेरंडफलमिव तथाविधकर्मसंबंधविमोक्षलक्षणसहकारिसमुद्भूतस्वस्वभावविशेषादूर्ध्वं लोकांतं गच्छति स
चोर्ध्वं गच्छन् ऋजुश्रेण्या यावत्स्वाकाशप्रदेशेष्ववगाढस्तावतः प्रदेशानूर्ध्वमप्यवगाहमानो विवक्षितसमयाच्चान्य
त्समयांतरमस्पृशन् गच्छति चावश्यकचूर्णौ उज्जुसेढिं पडिवन्नो जावइए जीवो अवगाढो तावइयाए ओगाहणाए उड्ढं उज्जुगं गच्छइ न वंकं बीयं च सम
यं न फुसइ इति इह चैवमनाकलितवंतः कर्मक्षयं कृत्वा तत्र गताः संतः सिद्धिसुखं शाश्वतं कालमनुभवंतोऽवतिष्ठंते तथा
चाह ८६ ॥ बः अहसुइअसयलजगसिहरमरुअनिरुवमसहावसिद्धिसुहं अनिहणमव्वाबाहं तिरयणसारं अणुहवं
ति ८७ व्याख्या अथेत्यानंतर्ये कर्मक्षयादनंतरं शुचिकं एकांतशुद्धं रागादिदोषव्यामिश्रं तथा सकलं संपूर्णं तथा जग १
गच्छिखरं सकलसांसारिकलोकसंतविकसुखनिकुरुंबशेखरभूतं कथमिति चेदत आह अरुजं लेशतोऽपि तत्र व्याधेरस
द्भावात् उपलक्षणमेतत् तत्राधेरप्यभावः तत्र इष्टव्यः सांसारिकं च सुखमाधिव्याधिसंकुलं तथा निरुपमं उपमातीतं
नहि तत्सदृशं किंचिदपि संसारेऽस्ति सुखं येन तदुपमीयते तस्मान्निरुपमं तथा सहजभावेन स्वभावभूतं नतु संसारसुख
मिवकृत्रिमं अतस्तत्सकलदेवासुरमनुजसंततिसुखसमूहशिखरकल्पं इह भूतसिद्धिसुखं मोक्षसुखं अनिधनमप
र्यवसानं कथमपर्यवसानमिति चेदत आह अव्याबाधं व्याबाधरहितं बाधयितुमशक्यमिति भावः तथा हि रागाद
यः तत्सुखं बाधयितुमीशास्ते च सर्वात्मना क्षीणा न च क्षीणा अपि पुनः प्रादुर्भवमश्नुवते तत्कारणकर्मपुद्गलानां
अभावात् न च ते पुद्गलास्त्रयोपि बध्नाति संक्लेशमंतरेण तद्बंधाभावात् न च सर्वात्मना रागादिक्लेशविप्रमुक्तस्य
सतः संक्लेशोऽशातं तत्कारणकर्मपुद्गलानामभावात् अतो रागादिसंक्लेशो भवतीति सिद्धिसुखमव्याब १

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

धं उनस्तत्कथं तत्त्वमित्याह श्रीरत्नसारं त्रीणि रत्नानि सम्यग्दर्शनज्ञानचारित्रलक्षणानि तेषां सारं फलं तथाहि
सम्यग्दर्शनज्ञानचारित्राण्येव कर्मक्षयकारणं कर्मक्षयाच्च सिद्धिसुखसंप्राप्तिरतः सिद्धिसुखं त्रिरत्नसारं एतेन किमु
क्तं भवति इदमुक्तं सिद्धिसुखमखिलखवतावत्स्वरूपं रत्नत्रयापेक्षावतायन्नत्राक्षेपः उपायमंतरेणोपेयसिद्धिरसंभवान्न उपाय
त्वं तच्च सिद्धिसुखस्य रत्नत्रयं कर्मक्षयकारणत्वात् तथा सज्ज्ञानादिनिमित्तं कर्म अज्ञानादिप्रतिपंथि ज्ञानादितीव
स्वज्ञानाद्यसेवायां कर्मक्षय इति इदमुक्तं सिद्धिसुखतत्त्वगता संतोऽनुभवंति वेदयंते इह बंधोदयसत्कर्मणां संक्षेप
श्चिंतितः सोऽपि सामान्येन ततो बंधोदयसत्कर्मसु विशेषजिज्ञासया अतिदेशमाह ८७ ब: उरहिगमनिउणपरम
ब रूइउवकुलंगदिठिवायाउ अट्ठा अणुसरिअव्वा बंधोदयसंतकम्माणं ८८ व्या० उरवेन महता कष्टेन प्रमाणन
यनिक्षेपादिभिरधिगम्यते इति उरधिगमो निउणस्स सूक्ष्मबुद्धिगम्यः परमार्थ यथावस्थितार्थ विस्तरस्य सूक्ष्मतरार्थ
लेइपक्वप्रज्ञानां मनःप्रह्लादकरो बहुभंगो बहुविकल्पो यो दृष्टिवादस्तस्मात् बंधोदयसत्कर्मणां विषये अर्थवि
शेषरूपा अनुसर्तव्याः ज्ञातव्याः इह तु संक्षिप्तरुचिसत्त्वानुग्रहार्थतया ग्रंथगौरवभयान्नोच्यते संप्रत्याचार्य आत्मौ
द्धत्यत्वेनात्मनोऽल्पागमत्वं ख्यापयन् शेषं बहुश्रुतानां च बहुमानं प्रकटयन् प्रकरणपरिसमाप्तिविधिविषये तेषां प्रा
र्थितां विदधान आह ८८ ब: जो जत्थ अपडिपुन्नो अत्थो अप्पागमेण बद्धु त्ति तं खमिऊण बहुसुआ पूरेऊणं परिकहंतु
८९ इति सप्ततिकासूत्रं समाप्तं व्या० अत्र सप्ततिकाख्ये प्रकरणे यत्र बंधोदयसत्तायां वा यो अर्थोऽपरिपूर्णः खं
डितोऽल्पागमेनाल्पश्रुतेन मया बद्धो निबद्धः इति शास्त्रसमाप्तिवचनः सर्वगाथापर्यंते वेदितव्यः तं अपरिपूर्णमर्थं तत्र बं २०८
धादौ अपरिपूर्णो अविकलतानिधानलक्षणमपराधं क्षमित्वा बहुश्रुताः दृष्टिवादज्ञाः सुरचितत्वात् ततस्तदर्थं प्रतिपादिकां गाथां
प्रक्षिप्य शिष्यजनेभ्यः परिकथयंतु सामस्त्येन प्रतिपादयंतु बहुश्रुता हि परिपूर्णज्ञानसारसंपत्समन्विततया परो